

Almira 3
Shelf 2
21

(१८)

श्रीत्रिविनायकपूजा ।

1. Surya Narayana Puja
2. Bhagavata Saptaha Puja Vidhi Rajyabhisheka Prayoga Vara
3. Kartrika Yogadana
4. Prayashchitta Yogadana
5. Graha Dana Rakshoghna
6. Sukta Tadagotsarga Vidhi
7. Dakshina Kalika Puja Vidhi Adhikamasa
8. Vratodhyapana Vidhi
9. Dakshina Kalika Puja Vidhi
10. Karpura Stotra
11. Ravi Vara Vratam
12. Pratyavayahara Yogadana
13. Bhagavata Pustaka Dana Vidhi
14. Sarasvati Pujana
15. Brahmana Varanam
16. Grihya Kali Puja Vidhi
17. Partheya Shraddha Vidhi
18. Paraskarar Grihyanusari Chudakarana Vidhi
19. Karna Vedha
20. Rajyadana
21. Jala Purna Ghata Dana
22. Purana Vachanam
23. Kmalanika Kavacha In Vishvasara Tantra
24. Apupapannadana In Purushottamasa
25. Lagna Godana
26. Kumari Puja
27. Graha Shanti

28. Hiranyashva Dana Vidhi
29. Kalpalata Maha Dana Vidhi
30. Go Sahasra Maha Dana Vidhi
31. Hiranyashva Ratha Maha Dana Vidhi
32. Kalpa Pada Padana Vidhi
33. Hiranya Kamadhenu Dana Vidhi
34. Karma Kanda Theli Pustak

आसने उपविश्य. आचम्य. सङ्कल्पं कुर्यात्.

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ..... राशिः ..... शर्मा अहं मम यजमानस्य काश्यपगोत्रस्य मीन राशौ देवदूर्वारिकम वर्मणः सकल व्याधि विशेषतः हृद्रोगादि रोग दूरीक दीर्घायुरारोग्यैश्वर्योदयार्थाय श्रीसूर्यनारायण प्रीतये श्रीसूर्यनारायण पूजन कर्म करिष्ये तथा ग्रहशान्तये एवाधाने सूर्य पंचाग पाठ कर्म तथा तत्र सदन्ते संबन्धित सूर्य वैदिक मन्त्रजपं च करिष्ये . ततः पूजनम्.

ध्यानम्:

ॐ तेजोरूपं सहस्रांशुं सप्ताश्वरथवाहनम् ।
द्विभुजं वरदं पद्मलाञ्छनं सर्वकामदम् ॥
ध्येयः सदा सवितृमण्डलमध्यवर्ती ।
नारायणः सरसिजासनसन्निविष्टः ॥
केयूरवान् मकरकुण्डलवान् किरीटी ।
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
सर्वज्ञः सर्वगश्चैव सर्वकारण देवता ।
सर्वेशा सर्वहृदय नमामि सर्वसाक्षिणम् ॥

भास्वद् रत्नाढ्य मौलिः स्फुरद ।
धारुचो रञ्जितश्चारु केशो ॥
भास्वान्यो दिव्यतेजाः करकमल ।
युतः स्वर्णवर्णः प्रभाभिः ॥
विश्वाकाशावकाश ग्रहपति ।
शिखरे भाति यश्चोदयाद्रौ ॥
सर्वानन्द प्रदाता हरिहर नमितः ।
पातु मां विश्व चक्षुः ॥
जपाकुसुम संकाशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥
ध्यानं समर्पयामि सूर्यनारायणाय नमः

पाद्यं

ॐ मया हृतं तु सलिलं पाद्यार्थं विमलं विभो ।
पाद्यं गृहाण देवेश भास्कर नमोऽस्तु ते ॥
पाद्यं समर्पयामि सूर्यनारायणाय नमः

आचमनम्

ॐ स्वच्छं कालिन्दं तोयं पवित्रं वायु शीतलं ।
तदाचमस्व देवेश शुभ्रं मयोपहृतं स्वयं ॥
आचमनीयं समर्पयामि सूर्यनारायणाय नमः

मधुपर्कम् ।

ॐ मधुपर्कं शुभं शुद्धं दध्याज्यमधुसंयुतम् ।
तं गृहाण त्व विधानेन कृपया भक्तवत्सल ॥
मधुपर्कं समर्पयामि सर्वेभ्यो देवेभ्यो नमः ।

शुद्धोदकस्नानम् ।

ॐ मन्दाकिनी गौतमी च यमुना च सरस्वती ।
ताभ्यो जलं समानीतं स्नानार्थं प्रतिगृह्यताम् ॥
शुद्धोदक स्नानं समर्पयामि सर्वेभ्यो देवेभ्यो नमः ।

स्नानम् ।

ॐ गङ्गा च दक्षिणा गोमती च कावेरी च हरिद्वरा ।
तासां स्नानार्थमानीतं गृहाण ह्रीषीकेश जलम् ॥
स्नानं समर्पयामि सर्वेभ्यो देवेभ्यो नमः ।

वस्त्रम् ।

ॐ वस्त्रे शुक्ले देवेश सुसूक्ष्मे तन्तुमये ।
मयार्पिते जगन्नाथ गृहाण [illegible] ॥
वस्त्रं समर्पयामि सर्वेभ्यो देवेभ्यो नमः ।

यज्ञोपवीतम् ।

ॐ नमः कमलदलाय विश्वरूपाय ते नमः ।
उपवीतं मयानीतं गृहाण दिवाकर ॥

यज्ञोपवीतं समर्पयामि सूर्यनारायणाय नमः

चन्दनम्.

ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम्॥
चन्दनं समर्पयामि सूर्यनारायणाय नमः

अक्षताः

ॐ अक्षताः कुङ्कुमैर्योन रञ्जिताश्च सुशोभनाः।
मयार्पिता देवदेव तां गृहाण कृपानिधे॥
अक्षतान् समर्पयामि सूर्यनारायणाय नमः

तिलपत्रान्.

ॐ विष्णुप्रिया धान्यराजा माङ्गल्याः तिलपत्रकाः।
तिलोदकप्रदानेन ममास्त्वक्षयकं फलम्॥
तिलपत्रान् समर्पयामि सूर्यनारायणाय नमः

सिन्दूरम्.

ॐ उद्यदादित्यसंकाशं द्रौणं निर्मलकं शुभम्।
कौलकाण्णं देव सिन्दूरं प्रतिगृह्यताम्॥
सिन्दूरं समर्पयामि सूर्यनारायणाय नमः

पिष्टातकम्.

ॐ पुष्पोद्भवं क्षौन्द्रचूर्णं देवानां प्रीतिदायकम्।

पिष्टातकं गृहाणेदं सौभाग्यत वत्सल ॥
पिष्टातकं समर्पयामि सूर्यनारायणाय नमः

पुष्पाणि.

ॐ जपाकदंबकुसुम कोमलप्रतानि च ।
पुष्पाणि गृह्यतां देव सर्वकाम प्रदो भव ॥
करवीर जपा दीनि पुष्पाणि विविधानि च ।
मालादीनि सुगन्धीनि तानि देव गृहाणताम् ॥
सेवन्तिका बकुल चम्पक पाटलाब्ज ।
पुन्नागजाति करवीर रसाल पुष्पैः ॥
बिल्व प्रवाल तुलसी दल मालतीभि ।
त्वां पूजयामि परमेश्वर मे प्रसीद ॥
पुष्पाणि समर्पयामि सूर्यनारायणाय नमः

माल्यम्.

ॐ माल्यानि च सुगन्धीनि द्रव्याणि प्रयत्नतः ।
मया हृतानि पूजार्थं गृहाण पङ्कजासन ॥
माल्यानि समर्पयामि सूर्यनारायणाय नमः

अङ्गपूजा.

ॐ सूर्याय नमः पादौ पूजयामि.
ॐ आदित्याय नमः जंघे पूजयामि.

ॐ भवाय नमः : जानुनी प्रकल्पयामि ।
ॐ धात्रे नमः : उरू प्रकल्पयामि ।
ॐ दक्षे नमः : कटिं प्रकल्पयामि ।
ॐ भर्गाय नमः : गुह्यं प्रकल्पयामि ।
ॐ सुवर्णरेतसे नमः : नाभिं प्रकल्पयामि ।
ॐ अत्रये नमः : उदरं प्रकल्पयामि ।
ॐ दिवाकराय नमः : हृदयं प्रकल्पयामि
ॐ तपनाय नमः : कण्ठं प्रकल्पयामि ।
ॐ भानवे नमः : स्कन्धौ प्रकल्पयामि ।
ॐ हंसाय नमः : हस्तौ प्रकल्पयामि ।
ॐ मित्राय नमः : मुखं प्रकल्पयामि ।
ॐ रवये नमः : नासिकां प्रकल्पयामि ।
ॐ खगाय नमः : नेत्रे प्रकल्पयामि ।
ॐ पूष्णे नमः : कर्णौ प्रकल्पयामि ।
ॐ हिरण्यगर्भाय नमः : ललाटं प्रकल्पयामि ।
ॐ आदित्याय नमः : शिरः प्रकल्पयामि ।
ॐ भास्कराय नमः : सर्वाङ्गं प्रकल्पयामि ।

धूपम् :
ॐ वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः ।

आघ्रेय सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥
धूपं गन्धाधिकं पद्मैक धूपादिभिरन्वितम् ।
दशाङ्गः द्रव्यसंयुक्तं षड्गुणी कृत मयार्पितम् ॥
धूपं समर्पयामि सूर्यनारायणाय नमः :

दीपम् :

ॐ सुप्रकाशो महान् दीप त्रैलोक्य तिमिरापहः ।
सवाह्याभ्यन्तर ज्योति दीपोयं प्रतिगृह्यताम् ॥
त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम् ।
आत्मज्योतिः परं धाम दीपोयं प्रतिगृह्यताम् ॥
दीपम् समर्पयामि सूर्यनारायणाय नमः :

नैवेद्यम् :

ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
भक्ष्यभोज्य समायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
पक्वा पृथक् लोकहितमन्नं सिद्धं चतुर्विधम् ।
तुष्टिदं सर्वदेवानां नैवेद्यं प्रतिगृह्यताम् ॥
नैवेद्यं समर्पयामि सूर्यनारायणाय नमः :

आचमनम् :

ॐ कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

जलं समर्पयामि सूर्यनारायणाय नमः
करोद्वर्तनम्:
ॐ गन्धचन्दनसंयुक्तं कस्तूर्यादिसुवासितम्।
करोद्वर्तनकं देव गृहाण परमेश्वर॥
करोद्वर्तनं समर्पयामि सूर्यनारायणाय नमः
फलम्:
ॐ फलानि कुष्माण्ड नारिकेल निवाम्र कदलानि च।
गृहाण वरदे देवा नानैः फलानि भक्तितः॥
एष फलं दिव्य मही रहोस्य ।
मया मया स्थापितं मया तोषित ॥
इह परजन्मापि येन कामाः ।
सर्वे मदीयाः सफला भवन्तु ॥
फलनैवेद्यं समर्पयामि सूर्यनारायणाय नमः
ताम्बूलम्.
ॐ पूगीफल सताम्बूलं सुधावेदीसंयुतम्।
मया दत्तं मया देव ताम्बूलं प्रतिगृह्यताम्॥
ताम्बूलं समर्पयामि सूर्यनारायणाय नमः
सुवर्णादिदक्षिणा फलम्:
ॐ इदं फलं मया देव स्थापितं पुरतस्तव।

तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
सहिरण्याग्निबीजदक्षिणां समर्पयामि सवितादेवताभ्यो न-
[illegible]

ॐ कदलीगर्भसम्भूतं कर्पूरं च प्रदीपितम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥
कर्पूरनीराजनं समर्पयामि सवितादेवताभ्यो नमः

पुष्पाञ्जलिः

ॐ कालात्मा सर्वभूतात्मा देवात्मा विश्वतोमुखः ।
यस्मादग्नीन्दुरूपत्वम् अतः पाहि दिवाकर ॥
नमः सवित्रे जगदेकचक्षुषे ।
जगत्प्रसूतिस्थितिनाशहेतवे ॥
त्रयीमयाय त्रिगुणात्मधारिणे ।
विरञ्चिनारायणशङ्करात्मने ॥
अजाय लोकत्रयपालनाय ।
भूतात्मने गोपतये वृषाय ॥
सूर्याय सर्वप्रलयान्तकाय ।
नमो महाकारुणिकोत्तमाय ॥

प्रौलैदैः परितोषिताय ।
दिव्यैर्गन्धैश्च दिव्यकाय ॥
नद्याजलेन प्रोक्ष्य पदाम्बु नित्यं ।
नमोऽस्तु ते वारणाननाय ॥
पत्रैर्दलैः स्याङ्कुरितैः प्रवोधौ ।
यः कर्णिकाद्यैर्नववल्लिगोत्र ॥
प्रत्यादिव ख्याद्यैर्विनायकाय ।
समाक्षोभे प्रीतिं निक्षपाय ॥
उदयगिरिमुपेते भास्करे पद्महस्ते ।
निखिलभुवननेत्रे दिव्यरत्नोपमेये ॥
तिमिरकरिमृगेन्द्रे बोधके पद्मिनीनां ।
सुरवरमभिवन्दे सुन्दरं विश्ववन्द्यम् ॥
सुमानि पुष्पाणि मनोहराणि ।
जलेरुहाणि स्थलपद्मजातानि ॥
कल्पद्रुमादिद्रुमजानि तानि ।
पुष्पाञ्जलिं मे तु गृहाण नित्यम् ॥
पुष्पाञ्जलिं समर्पयामि श्रीगणपतये नमः
प्रदक्षिणा ।
ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ।

विलयं यान्ति तानीह प्रदक्षिणे पदे पदे॥
अनेकजन्म कोटिसञ्चितानि।
पापानि सर्वाण्यपि यानि कानि॥
नाशं प्रयान्त्वद्य च यानि तानि।
प्रदक्षिणा यस्य भवच्छरण्ये:॥
प्रदक्षिणा त्रयं पापे सूर्यकायेण नमन:
नमस्कार:

ॐ नम: पङ्कजहस्ताय नम: पङ्कजमालिने।
नम: पङ्कजनेत्राय भास्कराय नमो नम:॥
आमनेषोले नयनत्वं दृष्टेत्वाउतिभास्कर।
जपन जापादि गदे नमस्ते ज्योतिषांपते॥
नमोस्तु सूर्याय सहस्ररश्मये।
सहस्रशाखान्वित सम्भवात्मने।
सहस्रयोगाद्भव भाव भागिने।
सहस्रसंख्या युगधारिणे नम:॥
नमो नम: पापविनाशनाय।
विश्वात्मने सप्ततुरङ्गमाय॥
सामर्ग्यजुर्धाम निधे विधात्रे।
भवाब्धिपोताय नम: सवित्रे॥

नमः सर्वहितार्थाय जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ॥
नमस्कारं [illegible] [illegible]
[illegible] नैवेद्य [illegible] [illegible]
[illegible] स्थापयेत् ।

ॐ [illegible] [illegible]
[illegible] प्रसादेन [illegible] [illegible]
[illegible] नमः ।

अञ्जलिबन्धः ।

ॐ मन्त्रहीनं क्रियाहीनं विधिहीनं जनार्दन ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥
[illegible] प्रा[illegible] [illegible] [illegible]
[illegible] पद्मनाभ [illegible] [illegible] नमः ॥
[illegible] [illegible] [illegible] दनः ।
[illegible] [illegible] [illegible] नमः ॥

अथ गीता :

कायेन वाचा मनसेन्द्रियैर्वा ।
बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ॥
करोमि यद्यत् सकलं परस्मै ।
नारायणायेति समर्पयेतत् ॥

[illegible] समर्पणम् ।

(९५)

अ

[illegible]

अद्येह काश्यप गोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः ''
.................अहं मम अस्मन्मातुः ....
......देव्याः प्रतिनिध्येन

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूतरजतरूप्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा …… ……… ………………देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वक श्रीपरमेश्वरप्रीतये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ……… गोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्यकृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।

ॐ शान्तिरस्तु, पुष्टिरस्तु, वृद्धिरस्तु, यच्छ्रेयस्तदस्तु, यत्पापं

रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु. द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु अमृताभिषेकोस्तु ।

ससुवर्णघृतकांस्यपात्राय नमः

काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् । तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ...
.... देवी अहं मम दुःस्वप्नदुष्टग्रहदुर्निमित्तादिसूचितसर्वोपद्रवशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये विशेषतः श्रीमृत्युञ्जयदेवताप्रीतये इदं अवलोकिताज्यं मृत्युञ्जयदेवताकं, कांस्यपात्रं विश्वकर्मदेवताकं, सुवर्णं वह्निदेवताकं .... गोत्राय ....
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा

अद्यकृतैतत् अवलोकितान्यकांस्यपात्रसुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं यथानामगोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

सोपस्करामान्नाय नमः ।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥

संक्रान्तिव्रतम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ... . देवी अहं मम सकलपापक्षयपूर्वकश्रीसत्यनारायणदेवताप्रीतये सङ्क्रान्तिव्रतं; तदङ्गत्वेन दीपकलशगणेशपूजनपुरःसरं रमासहितसत्यनारायणपूजनं ब्राह्मणद्वारा करिष्ये. तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥ अच्युताय नमः ३ ॥

अस्मत् पितुः प्रातिनिध्येन.

अस्मन्मातुः प्रातिनिध्येन.

रविवारव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ……… …… ……………………… देवी अहं मम समस्तव्याधिपरिहारपूर्वकदीर्घायुरारोग्यैश्वर्योदयादिसिद्धये श्रीसूर्यनारायणदेवताप्रीतये रविवासरव्रतं, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकसपरिवारसूर्यनारायणपूजनं ब्राह्मणद्वारा करिष्ये, तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

भौमवारव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ……… …… ……………………… देवी अहं मम ऐहिकामुष्मिकऋणापाकरणपूर्वकविद्याधनधान्यादिसमृद्धये श्रीभौमदेवताप्रीतये भौमवासरव्रतं, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकसशक्तिकभौमपूजनं ब्राह्मणद्वारा करिष्ये, तत्करिष्य — माणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… …… गोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

अष्टमीव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेतित्रिप्रवरा ……… …. ……………… देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलप्राप्तिद्वारा श्रीस्वेष्टदेवताप्रीतये अष्टमीव्रतं, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं स्वेष्टदेवतापूजनं ब्राह्मणद्वाराकरिष्ये, तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं रजतं चन्द्रदेवताकं ……… गोत्राय ……………… शर्मणेब्राह्मणाय तुभ्यं संप्रददे।

त्रयोदशीव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेतित्रिप्रवरा ……… ……… ……………… देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा श्रीसदाशिवदेवताप्रीतये त्रयोदशीप्रदोषव्रतं, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वक महेश्वरपूजनं ब्राह्मणद्वारा करिष्ये, तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

पूर्णिमाव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेतित्रिप्रवरा ……… ……… ……………… देवी अहं मम सर्वकामसमृ

द्धिद्वारा श्रीचन्द्रदेवताप्रीतये पूर्णिमाव्रतं, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकरोहिणीसहितचन्द्रदेवतापूजनं ब्राह्मणद्वारा करिष्ये, तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ………… गोत्राय ………………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

यन्मया प्रातिनिध्येन भवतोद्य कृतं व्रतम् ।
तन्निष्क्रयेण भवते फलमस्य समर्पये ॥

एकादशी गोदानम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेति त्रिप्रवरा …… …… ……………… देवी अहं मम आजन्मोपार्जिताशेषपापोपशमनपूर्वकं एकादशीव्रतनियमाद्यनाचरणजन्यप्रत्यवायपरिहारद्वारा श्रीपरमेश्वरप्रीतये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ………… गोत्राय ………… ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्यकृतैतद्गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं

रजतं चन्द्रदेवताकं .... गोत्राय .... शर्म
णे ब्राह्मणाय तुभ्यं संप्रददे।

रविवारव्रतदक्षिणादानम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ......
.... देवी अहं मम समस्तव्याधि
परिहारपूर्वकदीर्घायुरारोग्यैश्वर्योदयादिसिद्धये श्रीसूर्यनारा
यणप्रीतये ब्राह्मणद्वारा कृतस्य रविवारव्रतस्य सपरिवारसू
र्यनारायणपूजनस्य च यथोक्तफलावाप्तये इमां दक्षिणां रज
तं चन्द्रदेवताकं .... गोत्राय .... शर्मणे
ब्राह्मणाय तुभ्यं संप्रददे।

रुद्रिपाठसंकल्पः—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ······ ···················· देवी अहं मम अनेकजन्मार्जितदुरितोपद्रवनिवृत्तिपूर्वकं ऐहिकपुत्रपौत्रादिसर्वैश्वर्यसमन्वितविविधसुखप्राप्त्यनन्तरशिवलोकवासकामा श्रीसाम्बसदाशिवप्रीतये एकादशब्राह्मणद्वारा लघुरुद्राध्यायपाठकर्म करिष्ये, तत्पाठकर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतादिभिर्वृणे, तत्कृ ष्यमाणपाठकर्मणः प्रतिष्ठार्थं इमां दक्षिणां रजतं देवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्य। यथाभागं विभज्य दातुं समुत्सृजे तत्सन्न मम ।

चण्डीपाठ संकल्पः—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ……………………… देवी अहं मम सर्वाऽशुभनिवृत्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयाद्यभिवृद्धये श्रीगुह्यकालीप्रीतये एकावृत्ति सप्तशतीस्तोत्रपाठं करिष्ये, तत्पाठकर्मकर्तुं ………… गोत्रं ……………………… शर्माणं ब्राह्मणं एभिश्चन्दनपुष्पाक्षतादिभिर्वृणे, तत्करिष्यमाणपाठकर्मणः प्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदेवताकं ……… गोत्राय ……………………… शर्मणे ब्राह्मणाय संप्रददे।

प्रायश्चित्तगोदानम्-

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूतरजतद्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः । अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम करिष्यमाणकर्मणि पूर्वकर्तव्यनियमानाचरणजन्यप्रत्यवायपरिहारपूर्वक तत्करिष्यमाणकर्माधिकारसिद्धये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं यथानामगोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्य कृतैतद्गोनिष्क्रयीभूतरजतदानकर्मणः प्र

तिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यपगोत्राय
------------------ शर्मणो ब्राह्मणा तुभ्यं संप्रददे
॥ ॐशान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तद
स्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतम
स्तु द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु ॐअमृता
भिषेकोऽस्तु॥ ॥

अच्छिद्रविधिः

सफलदक्षिणं शालग्रामचरणोदकं तुलसीपत्रयुतं अर्घपात्रे गृहीत्वा· अच्छिद्रमन्त्रान् पठेत् ॥

व्रतानां व्रतराजेन्द्र व्रतानां व्रतमुत्तमम् ॥
व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ॥ १ ॥
सर्वं भवतु मेच्छिद्रं यदि चेच्छन्ति ब्राह्मणाः ॥
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ॥ २ ॥
सर्वं भवतु मेऽच्छिद्रं ब्राह्मणा भवतां गिरा ॥
सर्वदेवमयो विप्रो न तद्वचनमन्यथा ॥ ३ ॥
उपवासो व्रतं चैव स्नानं तीर्थं फलं तपः ॥
विप्रैः संभाषितं यच्च सम्पूर्णं भवतु व्रतम् ॥ ४ ॥
अन्नव्यञ्जनपानेषु शय्यायां ताम्रभाजने ॥
यच्च भुक्तमभुक्तं वा स्वप्नान्तरमथापि वा ॥ ५ ॥
दन्तान्तरविलग्नं वा क्षम्यतां मधुसूदन ॥
ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ६ ॥
तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ॥
व्यासवाल्मीकिवचनात्पाराशरवशिष्ठयोः ॥ ७ ॥
गर्गगौतमधौम्यात्रिकश्यपाङ्गिरसां तथा ॥
वचनान्नारदादीनां सम्पूर्णं भवतु व्रतम् ॥ ८ ॥

अच्छिद्रं भक्ष्य भोज्येषु पर्यङ्कशयनेषु च ॥
नियमेषु च सर्वेषु भवति द्विजवाक्यतः ॥ ९ ॥

कृतेनानेन जन्माष्टमी निराहारव्रतं विधिहीनं, श्रद्धाहीनं, द्रव्यहीनं, देशहीनं, कालहीनं, क्रियाहीनं यत्कृतं तत्सुकृतमस्तु. यन्न कृतं तद्विष्णोः प्रसादा द्ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु ।

आचार्यः यजमानहस्तात् पात्रमादाय. अस्तु परिपूर्णम्।

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

अज्ञानतिमिरान्धस्य ज्ञानेनानेन केशव ॥
प्रसीद सुमुखो भूत्वा ज्ञानदृष्टिप्रदो भव ॥

इत्यभिमन्त्र्य यजमाय दद्यात् । यजमानश्च फलं दक्षिणां च आचार्याय दत्वा. तुलसीपत्रयुतं जलं पिबेत् ॥

ॐ अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥

एकादशी व्रत दक्षिणा दानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ………………………… अहं मम·
समस्त पाप क्षय पूर्वकं श्रुतिस्मृति पुराणोक्त फलावाप्ति द्वारा श्रीपरमेश्वर प्रीतये ब्राह्मण द्वारा कृतस्य …… ……एकादशीव्रतस्य प्रतिष्ठासाङ्गता सिद्ध्ये इदं व्रत निष्क्रयीभूतं रजतं चन्द्रदेवताकं ……… गोत्राय ……………शर्मणे ब्राह्मणाय दक्षिणात्वेन तुभ्यं संप्रददे·

प्रसादार्पणमन्त्रः:-

यन्मया प्रातिनिध्येन भवतोद्य कृतं व्रतम् ॥
तन्निष्क्रयेण भवते फलमस्य समर्पये ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृत स्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

शनिग्रह दानम् -

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवर .... राशिः .... वर्मा अहं मम·
जन्मलग्नात् वर्षलग्नात् गोचरात्
स्थानास्थितेन शनिग्रहेण सूचित सकलारि
ष्टशान्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श
निग्रहप्रीतये· तिलान् सोमदेवताकान्· तैलं भैरव
देवताकं· माषान्नं प्रजापतिदेवताकं· कुलत्थान्नं
प्रजापतिदेवताकं· लौहं यमदेवताकं· नीलवस्त्रं
बृहस्पतिदेवताकं· सुवर्णं वन्हिदेवताकं· नीलर
त्नं समुद्रदेवताकं· यथानामगोत्राय यथाना
म शर्मणे ब्राह्मणाय तुभ्यं संप्रददे -,

प्रार्थना -

शन्नोदेवीरभिष्टय आपोभवन्तुपीतये ॥ शंयोर
भिस्रवन्तुनः ॥ ॥

दानप्रतिष्ठा -

अद्यकृतैतत् - शनिग्रहप्रीतये कृतस्य· तिल· तैल·
माष· कुलत्थ· लौह· नीलवस्त्र· सुवर्ण· नीलरत्न·
दानकर्मणः प्रतिष्ठार्थं ताम्रखण्डं सूर्यदेवताकं ...
गोत्राय· .... ब्राह्मणाय तुभ्यं संप्रददे ; तत्सन्नमम·

सन्ध्याभ्रंशे गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोनिष्क्रयीभूतरजतद्रव्याय नमः ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः ……………………… अहं मम अज्ञानतः स्वकर्तृकनित्योपास्यगायत्रीजपाकरणोत्तरकालिकनानाविधान्नभक्षणादिजन्यसकलदुरितदूरीकरणाद्वारा सद्यो देहशुद्धये प्रजापत्याद्यनुकल्पितगोनिष्क्रयीभूतं इदं रजतं चन्द्रदेवताकं ………… गोत्राय ……………………… शर्मणे ब्राह्मणाय तुभ्यं सं प्रददे ।

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्यकृतैतद्गोनिष्क्रयीभूतरजतद्रव्यदानकर्मणः प्रतिष्ठा

थं इदं रजतं चन्द्रदेवताकं …………… गोत्राय …………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

अशुचिवस्त्रधारणपूर्वकान्नादिभक्षणे गोदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरा …………… अहं मम अज्ञानतः स्वदेहकर्तृकपरिहिताशुचिवस्त्रधारणोत्तरसन्ध्यावन्दनान्नादिभोजनजन्यसमस्तपापक्षयपूर्वकेन देहशुद्धिद्वारा नित्यनैमित्तिककर्माधिकारसिद्ध्यै प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयं इदं रजतं चन्द्रदेवताकं …………… गोत्राय …………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्यकृतैतद्गोनिष्क्रयीभूतरजतद्रव्यदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं …………… गोत्राय …………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

प्रतिमासे रुद्रि सप्तशति स्तोत्र पाठ संकल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेतित्रिप्रवरः कन्याराशिः पेशलवीर विक्रम वर्मा. अहंमम. सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये. श्री पशुपतिनाथप्रीतये अद्यारभ्यमासपर्यन्तं प्रतिदिनं एकादशावृत्तरुद्राध्यायपाठकर्म. तथा सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीगुह्येश्वरीप्रीतये. अद्यारभ्यमासपर्यन्तं प्रतिदिनं सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भवितामनुः पर्यन्तं एकावृत्त चण्डी स्तोत्र पाठकर्म च करिष्ये. तत्करिष्यमाण पाठ कर्म कर्तुं नानानामगोत्रौ नाना नाम शर्माणौ ब्राह्मणौ एभिर्गंधाक्षतपुष्पादिभिर्वृणे. तत्तत्करिष्यमाण पाठकर्मणः प्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदेवताकं नाना गोत्राभ्यां नाना नाम शर्मभ्यां ब्राह्मणाभ्यां यथाभागं विभज्य दातुं समुत्सृजे. तत्सन्नमम. ॥ ॥

महामारी पाठ दक्षिणा संकल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
कन्याराशिः पेशलवीर विक्रम वर्माहं मम. भूतप्रेत पि
शाच यक्ष राक्षस विनायक कुष्माण्ड शाकिनी डाकिनी
ग्रहाद्यावेश महामारी त्रासोल्कापातादि जन्य सर्व
बाधोपद्रव निरसन पूर्वकं श्रीमहाकाली महालक्ष्मी
महासरस्वती देवता प्रीतये चतुर्ब्राह्मण द्वारा [illegible]
आषाढ शुक्ल नवम्या मारभ्य एतावत्कालपर्यन्तं प्रतिदि
[illegible]
नं कृतस्य मार्कण्डय पुराणान्तगत सप्तशती स्तोत्र
पाठकर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थं इदं रजतं चन्द्रदे
वताकं तत्पाठ कर्तृभ्यो नाना नाम गोत्रेभ्यो ब्राह्मणे
भ्यो यथाभागं विभज्य दातुं जले समुत्सृजे. तत्स
न्न मम. ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः .... शर्माहं मम इह जन्मसुखे भोगे जन्मान्तरे अक्षय विष्णुलोक निवास मम पथ्यादिकारेण सुखाराधितो वनमार्गगमने आतप निवारणे समस्तसुखादि कारणेन मृदुसतानि सुखपूर्वक मार्गगमन दुःख सर्वनिवारणे आत्मपजसि वद्रुलो पस्थित विपदादि कारणेन पादः शूल शङ्कुकीर्ण विनाशनपूर्वक गोलक विराजपूर्वक पुत्रस्त्री गृहीत्वा महत्सुखे प्राप्तिकामनया इमंच सोपस्करं विष्णुदैवतं छत्रं उत्तराङ्गाणि दैवतं यष्टिं वनस्पतिदैवतां तावां शार्ङ्गलोकादि जलपूरितपात्रं विष्णुदैवतं व्यजनं वायुदैवतं काष्ठपादुके उत्तराङ्गाणि दैवतके शय्याञ्च प्रजापतिदैवतं उपानहौ उत्तराङ्गाणि दैवतके जलपूरितपात्रं विष्णुदैवतं वस्त्रं बृहस्पति दैवतं सोमदैवतं आसनं प्रजापतिदैवतं ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।

एषु वर्णस्थ छत्रदानो ब्रह्मविष्णुशिवात्मकः

आतप्रवासनाशाय मम सन्तु मनोरथाः ।
सर्वेषामेव दानानां छत्रं आतपवारणम्
प्रविशद् मोक्षदं परलोके सौख्यानि प्रयच्छते ।
यतोऽयो वैष्णवं दत्तं द्विजश्रेष्ठाय वेदिने
प्रदाय परलोके सौ यमदण्डं न गच्छति ।
एष पूर्णं छत्रं दत्तं शार्ङ्गलोकादि संयुतः
आत्मप्रदाना देवेशा प्रीयतां मे जनार्दनः ॥

अथ गोपूजनविधिः

गां अग्रतः पूर्वाभिमुखीं कृत्वा सङ्कल्पं कुर्यात् । ॐ अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ………… ………………………… देवी अहं मम सकलपापक्षयपूर्वक श्रुतिस्मृतिपुराणोक्तफलप्राप्तये विशेषतः श्रीपरमेश्वरप्रीतये यथामिलितोपचारैरङ्गदेवतासहितगोपूजनं करिष्ये ॥ आवाहनम् ॥ आवाहयाम्यहं देवीं गां त्वां त्रैलोक्यमातरम् । यस्याः स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥ कामधेनो इहागच्छेह तिष्ठ कामधेनवे नमः ॥ ध्यानम् ॥ त्वं देवि त्वं जगन्माता त्वमेवासि वसुन्धरा । सावित्री त्वं च गायत्री गङ्गा त्वं च सरस्वती ॥ तृणानि भक्ष मे नित्यममृतस्रवसे प्रभो । भूतप्रेतपिशाचाँश्च पितृदेवतमानुषान् ॥ सर्वान्तारयसे देवि नरकात्पापसङ्कटात् ॥ लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता । घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥ ध्यानं समर्पयामि कामधेनवे नमः ॥ ॥ अथाङ्गपूजा ॥ गोरग्रपादाभ्यां नमः ॥ गोः पश्चात्पादाभ्यां नमः ॥ गोरास्याय नमः ॥ गोः शृङ्गाभ्यां नमः ॥ गोर्नासावंशाय नमः ॥ गोर्नेत्राभ्यां नमः ॥ गोः कर्णाभ्यां नमः ॥ गोः स्कन्धाय नमः ॥ गोः ककुदे नमः ॥ गोः पृष्ठाय नमः ॥ गोः पुच्छाय नमः ॥ गोरूधसे नमः ॥ गोस्तनेभ्यो नमः ॥ गोः सर्वाङ्गेभ्यो नमः ॥ ॐ गोभ्यो

नमः॥ ॐ श्रीमतीभ्यो नमः ॥ ॐ सौरभेयीभ्यो नमः ॥ ॐ ब्रह्म
सुताभ्यो नमः॥ ॐ पवित्राभ्यो नमः॥ ॥ अथ पूजा ॥ ॐ न
मो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्य
श्च पवित्राभ्यो नमो नमः॥ पाद्यं समर्पयामि गोभ्यो नमः ॥
अर्घ्यं समर्पयामि गोभ्यो नमः॥ आचमनीयं समर्पयामि गोभ्यो
नमः॥ गन्धं समर्पयामि गोभ्यो नमः॥ सिन्दूरं समर्पयामि
गोभ्यो नमः॥ पिष्टातकं समर्पयामि गोभ्यो नमः॥ अक्षता
न् समर्पयामि गोभ्यो नमः॥ यवान् तिलान् समर्पयामि गोभ्यो
नमः॥ पुष्पाणि समर्पयामि गोभ्यो नमः ॥ अथ अङ्गदेवता
पूजा॥ दक्षशृङ्गमूले ब्रह्मणे नमः॥ वामशृङ्गमूले विष्णवे न
मः॥ शृङ्गाग्रे सर्वतीर्थेभ्यो नमः॥ शिरसि महादेवाय नमः॥
ललाटे गौर्यै नमः॥ नासावंशे षण्मुखाय नमः॥ दक्षिणना
सापुटे कवलनागाय नमः॥ वामनासापुटे अश्वतरनागाय न
मः॥ कर्णयोरश्विनिकुमाराभ्यां नमः॥ दक्षनेत्रे भास्कराय न
मः॥ वामनेत्रे शशिने नमः॥ दन्तेषु सर्ववायुभ्यो नमः॥ जिह्वा
यां वरुणाय नमः॥ हुङ्कारे सरस्वत्यै नमः॥ दक्षगण्डे यमा
य नमः॥ वामगण्डे यक्षाय नमः॥ ओष्ठयोः सन्ध्याद्वयाभ्यां
नमः॥ ग्रीवायां इन्द्राय नमः॥ कुक्षिदेशे रक्षोभ्यो नमः॥ उर
सि साध्यगणेभ्यो नमः॥ पादेषु धर्माय नमः॥ जङ्घासु पूर्णध

र्माय नमः ॥ खुरमध्ये गन्धर्वेभ्यो नमः ॥ खुराग्रे पन्नगेभ्यो न
मः ॥ खुरपश्चिमाग्रे अप्सरोभ्यो नमः ॥ पृष्ठे एकादशरुद्रेभ्यो
नमः ॥ सर्वसन्धिषु वसुभ्यो नमः ॥ श्रोणितटे पितृभ्यो नमः ॥
लाङ्गुले सोमाय नमः ॥ पुच्छकेशेषु सूर्यरश्मिभ्यो नमः ॥ गोमू
त्रे गङ्गायै नमः ॥ गोमये यमुनायै नमः ॥ क्षीरे सरस्वत्यै नमः
॥ दध्नि नर्मदायै नमः ॥ सर्पिषु हुताशनाय नमः ॥ रोमसु अष्टा
विंशतिदेवकादिभ्यो नमः ॥ उदरे सकाननपृथिव्यै नमः ॥ पयो
धरेषु चतुःसमुद्रेभ्यो नमः ॥ अथ धूपः ॥ वनस्पतिरसोद्भूतो
गन्धाढ्यो गन्ध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्य
ताम् ॥ धूपं आघ्रापयामि गोभ्यो नमः ॥ दीपः ॥ दीपं भक्त्या प्र
यच्छामि कामधेनु घृतोद्भवम् ॥ त्राहि मां निरयाद्घोराद्दीपज्योति
र्नमोस्तु ते ॥ दीपं दर्शयामि गोभ्यो नमः ॥ नैवेद्यम् ॥ नैवेद्यं गृह्य
तां देवि भक्तिं मे ह्यचलां कुरु । ईप्सितं मे वरं देहि परत्रेह परां ग
तिम् ॥ उपायनद्रव्यम् ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः
॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ उपायनद्रव्यं सम
र्पयामि गोभ्यो नमः ॥ नीराजनम् ॥ नीराजनं प्रयच्छामि तुभ्यं
देव्यै परात्मने । पंचवर्तिसमोपेतं त्रैलोक्यतिमिरापहम् ॥ नीरा
जनं समर्पयामि गोभ्यो नमः ॥ पुष्पाञ्जलिः ॥ वन्दितासि
वसिष्ठेन विश्वामित्रेण धीमता । सुरभे हर मे पापं यन्मया दु

ष्कृतं कृतम् ॥

या कामधेनुर्भवनेस्ति विष्णो-
र्या धेनुरासीज्जमदग्निगेहे ।
या सौरभेय्यस्ति वसिष्ठगेहे
सा कामधेनुर्वरदा ममास्तु ॥

पुष्पाञ्जलिं समर्पयामि गोभ्यो नमः ॥ प्रदक्षिणा ॥ गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ गावः सुरभयो नित्यं गावो गुग्गुलगन्धिकाः। गावः प्रतिष्ठा भूतानां गावः सर्वफलप्रदाः ॥ अन्नमेव परं गावो देवानां हविरुत्तमम् ॥ पावनं सर्वभूतानां क्षरन्ति च वहन्ति च ॥ हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि। ऋषीणामग्निहोतॄणां गावो होमे प्रतिष्ठिताः। सर्वेषामेव देवानां गावः शरणमुत्तमम् ॥ गावः सर्वस्य लोकस्य गावो धन्याः सवाहनाः ॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ या लक्ष्मीः सर्वभूतानां या देवेषु व्यवस्थिता॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ यानि कानि च पापानि जन्मान्तर कृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥ प्रदक्षिणां समर्पयामि गोभ्यो नमः ॥ नमस्कारः ॥ नमस्ते सर्वकल्याणि नमस्ते

ग्रहदानम् –

देयद्रव्याय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशालवीरविक्रम वर्मा अहं मम· वर्षवृद्धौ जन्मोत्सवकर्मणि जन्मलग्नात् ११ वर्षलग्नात् ७ गोचरात् १० स्थानस्थितेन सूर्यग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्यादिफलावाप्तये सूर्यग्रहप्रीतये· गोधूमान्नं प्रजापतिदेवताकं· गुडं अग्निदेवताकं· ताम्रं सूर्यदेवताकं· रक्तचन्दनं वनस्पतिदेवताकं· रक्तवस्त्रं बृहस्पतिदेवताकं· सुवर्णं वन्हिदेवताकं· माणिक्यं समुद्रदेवताकं· तथा –

जन्मलग्नात् २ वर्षलग्नात् ७ गोचरात् २ स्थानस्थितेन चन्द्रग्रहेणासूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्यादफलावाप्तये चन्द्रग्रहप्रीतये· तण्डुलान्नं प्रजापतिदेवताकं· दधिसर्पदेवताकं· कर्पूरं गन्धर्वदेवताकं· शङ्खपात्रं विश्वकर्मदेवताकं· श्वेतवस्त्रं बृहस्पतिदेवताकं· शङ्खं समुद्रदेवताकं· रजतं चन्द्रदेवताकं· मौक्तिकं समुद्रदेवताकं· तथा –

जन्मलग्नात् ११ वर्षलग्नात् १ गोचरात् ८ स्थानस्थितेन भौमग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्यादिफलावाप्तये भौमग्रहप्रीतये· गोधूमान्नं प्रजापतिदेवता

कं. मसूरान्नं प्रजापतिदेवताकं. गुडं अब्देवताकं. ताम्रं सूर्यदेवताकं. रक्तचन्दनं वनस्पतिदेवताकं. रक्तवस्त्रं बृहस्पतिदेवताकं. रक्तवृषभं रुद्रदेवताकं. सुवर्णं वह्निदेवताकं. प्रवालं समुद्रदेवताकं. तथा—

जन्मलग्नात् १२ वर्षलग्नात् ७ गोचरात् १० स्थानस्थितेन बुध ग्रहेण सूचित सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्याद्यवाप्तये मुद्गान्नं प्रजापतिदेवताकं. घृतं मृत्युञ्जयदेवताकं. कांस्यपात्रं विश्वकर्मदेवताकं. हस्तिदन्तं विष्णुदेवताकं. नीलवस्त्रं बृहस्पतिदेवताकं. सुवर्णं वह्निदेवताकं. पञ्चरत्नं समुद्रदेवताकं. तथा—

जन्मलग्नात् १२ वर्षलग्नात् ८ गोचरात् १२ स्थानस्थितेन शुक्रग्रहेण सूचित सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्याद्यवाप्तये शुक्रग्रहप्रीतये- तण्डुलान्नं प्रजापतिदेवताकं. घृतं मृत्युञ्जयदेवताकं. श्रीखण्डं वनस्पतिदेवताकं. श्वेतवस्त्रं बृहस्पतिदेवताकं. रजतं चन्द्रदेवताकं. हीरकं समुद्रदेवताकं. तथा—

जन्मलग्नात् ७ वर्षलग्नात् ८ गोचरात् २ स्थानस्थितेन शनिग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये शनिग्रहप्रीतये तिलान् सोमदैवताकान्· तैलं भैरवदैवताकं· माषान् प्रजापतिदैवताकं· कुलत्थान्नं प्रजापतिदैवताकं· लोहं यमदैवताकं· नीलवस्त्रं बृहस्पतिदैवताकं· सुवर्णं वह्निदैवताकं· महिषीं यमदैवताकां· नीलमणिं समुद्रदैवताकं· तथा–

जन्मलग्नात् १२ वर्षलग्नात् १ गोचरात् ४ स्थानस्थितेन राहुग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये राहुग्रहप्रीतये· तिलान् सोमदैवताकान्· तैलं भैरवदैवताकं· माषान् प्रजापतिदैवताकं· लोहं यमदैवताकं· कृष्णवस्त्रं बृहस्पतिदैवताकं· सुवर्णं वह्निदैवताकं· कृष्णमेषं वा

कपालं भिन्नं आभुवान्तिः सदवृषः सख्या । कपालाञ्चिविष्टपा कृता· ॥

त्सां सालंकारां गां रुद्रदैवताकां · नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुं जले समुत्सृजे, तत्सन्न मम·

प्रार्थना-

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

इमन्देवा असपत्नᳪ सुवध्वं महते क्षेत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इम ममुष्य पुत्रं ममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाᳪ राजा ॥

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाᳪ रेताᳪसि जिन्वति उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सᳪसृजेथामयञ्च । अस्मि-सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानᳪ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयो मृतं मधु ॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

केतुं कृन्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भि रजाय
थाः ॥

अम्बे अम्बिके म्बालिके नमानयति कश्चनः । सस
स्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

दानप्रतिष्ठा-

अद्यकर्तेतत् – सूर्य·चन्द्र·भौम·बुध·शुक्र·शनि·राहु·केतु
ग्रहकृत – प्रीतये तत्तद्द्रव्यदानकर्मणः प्रतिष्ठार्थं इदं
रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामश
र्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले स
मुत्सृजे. तत्सन्न मम.

जपपाठादिसंकल्पः –

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्या राशिः पेशालवीरविक्रम वर्मा अहं मम· वर्षवृद्धौ जन्मोत्सवकर्मणि अशुभस्थान स्थित ग्रहयोगिनीजनित सकलारिष्टशान्तिपूर्वक शुभस्थानावस्थितिजन्यशुभफलप्राप्तये सूर्यग्रहप्रीतये सप्तसहस्रसंख्याक सूर्य वैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति सूर्यस्तोत्रपाठकर्म· तथा – चन्द्रग्रहप्रीतये एकादशसहस्रसंख्याक चन्द्रवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति चन्द्रस्तोत्रपाठकर्म· तथा- भौमग्रहप्रीतये दशसहस्रसंख्याक भौमवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति भौमस्तोत्रपाठकर्म· तथा- बुधग्रहप्रीतये अष्टादशसहस्रसंख्याक बुधवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति बुध स्तोत्र पाठकर्म, तथा- शुक्रग्रहप्रीतये एकादशसहस्रसंख्याक शुक्रवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति शुक्र-स्तोत्रपाठकर्म, तथा- शनिग्रहप्रीतये त्रयोविंशतिसहस्रसंख्याक शनिवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति शनिस्तोत्रपाठकर्म, तथा- राहुग्रहप्रीतये अष्टा[illegible] जपकर्म· अशी

कदीर्घायुरारोग्यैश्वर्योदयाद्याप्तये बुध ग्रहप्रीतये अष्टाद
[illegible] आगामि जन्मोत्सवदिवस पर्यन्त प्रतिदिनं एकावृत्ति
[illegible] हस्रनाम स्तोत्रपाठकर्म· तथा- शुक्रग्रहप्री

त्यधिकशतावृत्तिकेतु स्तोत्रपाठकर्म, तथा-शंकट
योगिनीप्रीतये सप्तविंशतिसहस्रसंख्याक शंकट वै-
दिकमन्त्रजपकर्म अष्टोत्त्यधिकशतावृत्ति शंकट स्तो-
त्रपाठकर्म, तथा- अकालमृत्युनिवारणाय मृत्यु-
ञ्जयदेवताप्रीतये अद्यारभ्य आगामिजन्मोत्सवादिव
सपर्यन्तं ब्राह्मणद्वारा कोटिसंख्याक मृत्युञ्जय
तान्त्रिकमन्त्रजपकर्म तथा- आयुरारोग्यवृद्धये सप्त
शिवदेवताप्रीतये अद्यारभ्य आगामिजन्मोत्सवदिव
सपर्यन्तं प्रतिदिनं शतसंख्याकपार्थिवलिङ्गपूजन
पूर्वकं एकसहस्रसंख्याक मृत्युञ्जयवैदिकमन्त्रज
पकर्म एकावृत्ति मृत्युञ्जयस्तोत्रपाठकर्म, तथा-
नवग्रहप्रीतये नवग्रहपूजनपूर्वकं अद्यारभ्य आगा
मिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं शतसंख्याक
नवग्रहतान्त्रिकमन्त्रजपकर्म तथा- सर्वारिष्टशा
न्तिद्वारा अल्पमृत्युनिवारणपूर्वक दीर्घायुरारोग्यै
श्वर्योदयावाप्तये श्रीमृत्युञ्जयदेवताप्रीतये अद्यार
भ्य आगामिजन्मोत्सवादिवसपर्यन्तं प्रतिशुक्लप
क्षप्रथमा शतावृत्ति मृत्युञ्जयस्तोत्रपाठकर्म तथा-
सर्वसुखावाप्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये
श्रीभद्रकालीदेवताप्रीतये तन्मन्दिरे अद्यारभ्य-
आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं शरणागतेतिम
-न्त्रेण एकावृत्ति सप्तशति स्तोत्र संपुटितकर्म. (तथा-

अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं एकावृत्ति सप्तशति स्तोत्र पाठकर्म.)

तथा- अशुभस्थानास्थित ग्रहयोगिनीजनित सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये श्रीमहाकालदेवताप्रीतये तन्मन्दिरे अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं एकसहस्रसंख्याक वैदिकमन्त्र जपकर्म. तथा- एतत्स्थूलदेहाधिकरणक नानाविध व्याधिप्रशमनपूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये काशीस्थविश्वेश्वरदेवताप्रीतये अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं एकावृत्तिरुद्राध्यायपाठकर्म. विश्वेश्वरसंपूजनकर्म च. तथा- त्रिविधविभूतिनैरुज्योदयपूर्वकं अल्पमृत्युनिवारणार्थं श्रीअल्पमृत्युहरेश्वरदेवताप्रीतयेऽद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं श्रीअल्पमृत्युहरेश्वरसंपूजन दधिचिपिटान्नसमर्पणपुरःसरं एकावृत्तिरुद्राध्यायपाठकर्म. तथा- आयुरारोग्यवृद्ध्यर्थं वैद्यनाथदेवताप्रीतये ब्राह्मणानीत गङ्गाजलेनाभिषेकपूर्वकं रुद्राध्यायपाठकर्म. संपूजनकर्म च, तथा- सकलारिष्टशान्तये अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं अश्वत्थवृक्षोपरि

जलार्पणाकर्म, तथा- मृत्युञ्जयदेवताप्रीतये एकावृत्तिमृत्युञ्जयस्तोत्रपाठकर्म गणेशदेवताप्रीतये एकावृत्तिगणेशसहस्रनामस्तोत्रपाठकर्म सूर्यदेवताप्रीतये एकावृत्तिआदित्यहृदयस्तोत्रपाठकर्म विष्णुदेवताप्रीतये एकावृत्तिविष्णुसहस्रनामस्तोत्रपाठकर्म शिवदेवताप्रीतये एकावृत्तिशान्तिकाध्यायपाठकर्म पुरुषसूक्तपाठकर्म च; तथा- सकलसंपत्समृद्धिद्वारा सकलकामनासिद्धये अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं श्रीस्वेष्टदेवताप्रीतये प्रतिदिनं पञ्चाङ्गपाठ संपूजन कर्म च, तथा- साम्बसदाशिवदेवताप्रीतये अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं एकावृत्तिशतरुद्रीयमन्त्रपाठेनाभिषेककर्म तथा—

गायत्रीमहामन्त्र पाठ

श्रीसाम्बसदाशिवदेवताप्रसादात् दीर्घायुरारोग्यानन्दादिशुभफलावाप्तये ब्राह्मणद्वारा अविच्छिन्नजलधारयाशतरुद्रियमन्त्रै लघुरुद्राध्यायपाठकर्म तथा- महाकाली महालक्ष्मी महासरस्वती-देवतात्रयप्रसादात् भूत प्रेत पिशाचादिजनित विघ्नबाधाभयनिवृत्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये नवब्राह्मणद्वारा नवावृत्तिसप्तशतिस्तोत्रपाठकर्म क

रिध्ये. करिष्यमाणतत्तज्जपपाठादिकर्मणः साङ्गतासिद्धये इदं रजतं चन्द्रदैवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले संमुत्सृजे. तत्सन्न मम.

सर्वारिष्टदानम्-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशालवीरविक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सवदिवसे सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये सकलारिष्टशान्तये इमान् तिलान् सोमदेवताकान् ताम्रपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं सालंकारां गां रुद्रदेवताकां गोत्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे,

प्रार्थना-

यानि कानि च पापानि जन्मान्तरकृतानि च।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥
कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा-

अद्यकृतैतत्- तिल सुवर्ण ताम्रपात्र सालंकृत गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं गोत्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्न मम

(२५)

ब्राह्मणभोजनम् । प्रत्याब्दिकश्राद्धम् । ब्राह्मणवरणम्:
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
गुल्मी[illegible] विक्रमवर्मा अहं मम [illegible]
[illegible] देवतायाः प्रीत्यर्थं [illegible]
कर्म कारिष्ये तदङ्गत्वेन [illegible] पूजन
मातृकाको पूजन आयुष्यदीपक गोदान नान्दी पूजन [illegible]
पूजन षोडश[illegible] देवता पूजन [illegible]
[illegible]
देवी पूजन तथा स्वर्ग[illegible] ब्राह्मणको [illegible]
नपूर्वक [illegible] देवता स्थापनादि कर्म कारिष्ये ~~[illegible]~~
तत्र कारिष्यमाण [illegible] कर्मणि [illegible]
[illegible] प्रत्याब्दिक [illegible]
नाम गोत्राय नाना [illegible]
[illegible]
[illegible] वृणे । ॐ वृतोऽस्मि:

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः गुल्मी[illegible] विक्रमवर्मा अहं मम
[illegible] कर्मणि [illegible]
मम गृहे प्रत्याब्दिक [illegible] ॐ प्रत्याब्दिके

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु
विश्वा भूतानि जातवेदः पुनीहि मा॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] सर्व [illegible] प्राप्त्यर्थं मन्त्र [illegible]
[illegible] [illegible] [illegible] ध्रुवन्तु ३ ॐ स्वस्ति ३

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] सर्व [illegible] प्राप्त्यर्थं मन्त्र [illegible]
[illegible] [illegible] [illegible] ध्रुवन्तु ३ ॐ [illegible] ३

ॐ [illegible] [illegible] [illegible] [illegible]
दिवः पृथिव्या [illegible] [illegible] [illegible] देवा [illegible]॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] सर्व [illegible] प्राप्त्यर्थं मन्त्र [illegible]
[illegible] [illegible] [illegible] ध्रुवन्तु ३ ॐ [illegible] ३

ॐ [illegible] [illegible] [illegible] [illegible]

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे
प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च
मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्र
वरः [illegible] विक्रम वर्षे [illegible]
सकलकर्माणि सिद्ध्यर्थं प्रारभ्य [illegible] मम गृहे
कल्याणं भवन्तो ब्रुवन्तु ३ ॐ कल्याणम् ३
ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय
च प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे
कामः समृध्यताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः [illegible] विक्रम वर्षे [illegible]
[illegible] सकलकर्माणि सिद्ध्यर्थं प्रारभ्य [illegible]
गृहे [illegible] स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा
विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः [illegible] विक्रम वर्षे [illegible]

ॐ नमो भव च मायाते सर्वी ऋषप ब्राम्हप मोत्रालणाः मम गृहे शान्तिं भवन्तो ब्रुवन्तु ३ ॐ स्वाहा ३

ॐ द्यौः शान्तिरन्तरिक्ष ६० शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ६० शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥

मन्त्रार्थाः सिद्धयः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥
पुण्याहवाचनसमाप्तिः

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ३

प्रायश्चित्तगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयपरिष्कृतद्रव्याय नमः

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः

अद्येह काश्यपसगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [illegible] [illegible] विक्रम [illegible] कायिक मानसिक [illegible] सकल कर्माणि दुष्कृतेवानि मान[illegible] च [illegible] जन्मजन्मान्तरवाय [illegible] दुष्कृत तत्कालिक मानस कर्मोपेकार सिद्धये इदं गोनिष्क्रयपरिष्कृतद्रव्यं चन्द्रदेवताकं काश्यपगोत्राय अच्युतशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात् अतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्य कृतैतत् गोनिष्क्रयपरिष्कृतद्रव्यदानकर्मणः प्रतिष्ठार्थं इदं द्रव्यं चन्द्रदेवताकं काश्यपगोत्रा

पं अच्युतराज शर्मणो ब्राह्मणाय [illegible] सदैव नु
दे

ॐ ज्ञाने [illegible] : प्राणे [illegible] : चक्षुषे [illegible] : [illegible]
प [illegible] : [illegible] : ज्ञान [illegible] : [illegible]
[illegible] : [illegible]
ज्ञाने [illegible] : ॐ आपतापि [illegible] :

दीप प्रार्थना

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥

दीपनारायणाय नमः

वरुण प्रार्थना

वरुणत्वं महाभाग सर्वदेवप्रपूजित ।
रेवतो मम पक्षे सिञ्चनं च कुरु सर्वदा ॥

वरुणाय नमः

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणेशाय नमः

ग्रह प्रार्थना

ब्रह्मा मुरारि त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनि राहु केतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः

गण प्रार्थना

प्रसादो कमलेन्दु सौम्यवदना माद्देय श्री लोलप
लोमाली गिरिदुर्ग नाट्यानकपि चन्द्राय धावेदनको ।
वारिधि धनकोश ध्वर्धी प्रकृति चन्द्रोच्चवक्राप्रधा
चामुण्डा गणनाथ रुद्रसादेन क्षेमं नो मानव: ॥

गणपूजनम्:

वास्तु प्रार्थना

वास्तुदेव नमस्तुभ्यं भूमिशय्यारत प्रभो ।
मद्गृहं धनधान्यादि समृद्धं कुरु सर्वदा ॥

वास्तोष्पतिपूजनम्:

अग्निप्रार्थना

अग्ने प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥

अग्निपूजनम्:

मार्कण्डेय प्रार्थना

चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान्वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ॥

अष्टचिरञ्जीवीपूजनम्:

षष्ठीदेवी प्रार्थना

जयदेवि जगन्मातर्जगदानन्दकारिणि ।

प्रसीद ममकल्याणादौ नमस्ते वसो देवते ।

षड्विधापूजनम् ।

तुलाप्रार्थना

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ॥
एकतः सर्वसत्यानि तथानृतशतानि च ।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिता ॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥
योऽसौ तत्त्वाधिपो देवः पुरुषः पञ्चविंशकः ।
स एषोऽधिष्ठितो देवि त्वयि तस्मान्नमो नमः ॥

तुलापूजनम् ।

गोविन्दप्रार्थना

नमो नमस्ते गोविन्द तुलापुरुष संज्ञक ।
त्वं हरे तारयस्वास्मानस्मात् संसारसागरात् ॥

गोविन्दपूजनम् ।

ततो दक्षहस्ते स्वर्णं वामहस्ते धर्मराजं गृहीत्वा
तुलायां प्रविशेत् ।

पृथ्वीपूजनो देवताप्रार्थना

नमस्ते सर्वभूतानां साक्षिभूत सनातनी ॥
पीतासनेन देवी त्वं तोर्जिता परमेश्वरी ॥
त्वं पश्यतेऽजगत्सर्वं सदसद्याव्युदुत्तमम् ॥
सर्वभूतात्म भूतस्थे नमस्ते सर्व कामदे ॥

ॐ पुनन्तु मा देवजना: पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् ।
अग्ने क्रत्वा क्रतूं रनु: ॥
यत्ते पवित्र मर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनातु मा ॥
पवमानः सोऽद्य नः पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा ॥
उभाभ्यां देव सवितः पवित्रेण सवेन च ।
मां पुनीहि विश्वतः ॥
वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो
वीतपृष्ठाः ॥
तयामदन्तास्सधमाद्येषु वयꣳ स्याम पतयो
र्यीणाम् ॥

तुलादानम्

अथ तुलादानप्रयोगः [illegible] निर्माय
तुलां [illegible] पूर्वादिक्रमेण [illegible]
[illegible] कर्मणि [illegible] पूर्व [illegible]
पू[illegible] [illegible] उत्तरतः कलशत्रय
[illegible] स्थापये आत्मसमतोलितं कर्पूरं
गन्धर्वदेवताकं आरोग्यार्थे आत्मसमतोलितं
ताम्रं [illegible] सूर्यदेवताकं सुरूपप्राप्त्यर्थं आत्मसम
तोलितं श्रीखण्डं [illegible] देवताकं तेजोवृद्ध्यर्थे आ
त्मसमतोलितं घृतं मृत्युञ्जयदेवताकं सर्वकाम
सिद्ध्यर्थे आत्मसमतोलितं [illegible] समुद्रदेवताकं
[illegible] आत्मसमतोलितं [illegible]
[illegible] देवताकं अक्षयलोकप्राप्त्यर्थं आत्मसमतो
लितं तिलान् प्रजापतिदेवताकं बलवर्धनार्थं आ
त्मसमतोलितं तण्डुलान् प्रजापतिदेवताकं लावण्य
प्राप्त्यर्थे आत्मसमतोलितं लवणं समुद्रदेवताकं प्र
जापालनसमृद्ध्यर्थे आत्मसमतोलितं [illegible]
[illegible] देवताकं आरोग्यार्थे आत्मसमतोलितं गुडं अ
देवताकं [illegible] आत्मसमतोलितं लोहं यमदे

पताद्द सर्वं पापप्रशमनार्थं इमाम् सुवर्णतोलितं गोरूपं पितृदेवताकं नानानाम गोत्राणां नानानाम शर्मणां ब्राह्मणेभ्यो दातुमहं सम्प्रददे। तत्सन्नमम

प्रार्थना

कर्पूरः कलदो सुरो देवदेवप्रियः सदा ।
आयोजनोऽनुपाणाश्च तद्दानात् शिवमस्तु मे ॥ कर्पूर
पापवाद्द वैश्वन्यादि नक्षत्रस्य च भक्षणात् ।
तत्सर्वान्तं यत्पापं ताम्रदानात् प्रणश्यतु ॥ ताम्र
द्वादिप सर्वलोकानां जलायापि क्षुदितं पदन्
सुवेष धान्येन पञ्चधान्यप्रधानं प्रयच्छतो ॥ धान्
गन्धवासमन्दारं तोषदं वन्दारं काञ्चीतं ।
चन्दनं वस्त्रश्रमादाम सान्द्रामद प्रदीप्यव ॥ श्रीखण्ड
कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वर्द्धनो यज्ञानां माज्ञ पातु सदैव माम् ॥ घृत
अमृतस्य फलो ऽन्न इक्षुकादुत्स शर्करा ः।
सर्वप्रीतिकरा नित्यमतः शान्तिं प्रयच्छतु ॥ शर्करा
पात्रानि नराणां आयुर्देवप्रियं मधु सुतोत्सव ।
तस्मान्मधुप्रदानेन मम सन्तु मनोरथाः ॥ मधु

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः।
तस्मात्तव प्रदानेन [illegible]ं नाशय केशव ॥ तिल
धान्याः सर्वपदेषु ब्रह्मणा परिकीर्तिताः।
अस्मात्सङ्कुलदानेन प्रीयन्तां विश्वदेवताः ॥ सङ्कुल
सौनां भगवतां श्रेष्ठं लवणो बलवर्द्धनम्।
वृक्षाणां निर्मितं तोषां दत्तः शान्तिं प्रयच्छ मे ॥ लवण
तैलं प्रोक्तं तिलं मा पुण्यं पापनाशनम्।
मङ्गलं द्रव्यमुख्यामतः शान्तिं प्रयच्छ मे ॥ तैल
यथा देवेषु विश्वात्मा प्रवर~~श्च~~ जनार्दनः।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ गुड
यस्मादायसकर्माणि तवाधीनानि सर्वदा।
लाङ्गलाद्यायुधादीनि ततः शान्तिं प्रयच्छ मे ॥ लोह
कामधेनोः समुद्भूतं गोमयं पापनाशनम्।
पवित्रं मङ्गलं यस्मादतः शान्तिं प्रयच्छ मे ॥ गोमय

दान प्रतिष्ठा

अद्य कृतैतत् आस्तरण गोदान कर्म नाम वस्त्र श्रीयाउ घृत धान्य सप्त तिल सङ्कुल लवण तैल गुड लोह गोमय दानकर्मणः प्रतिष्ठार्थं इदं हिर

चन्द्रदेवताकं नानाजात रोगे शोक नानाजात दुर्भिक्षो
प्रदेशे उपद्रवा भागांविनमद्पुऽजले सुखाये
तत्र अकालं

उदाहरणम् ।

अथोदाहरणप्रयोगः । कारणपापग्रहात् [illegible] त्रिकोण [illegible]
[illegible] । पृथ्वीति [illegible] गत वर्षपत्रे [illegible]
[illegible]

जन्मलग्नात् १० वर्षलग्नात् ४ गोचरात् ३ स्थान स्थितेन
सूर्य ग्रहेण [illegible] तत्रापेक्षया [illegible]
[illegible] दशा [illegible] सूर्य ग्रह
प्रीत्यर्थं [illegible] प्रजापति देवताक [illegible] अग्नि देवताक
ताम्र [illegible] देवताक [illegible] वनस्पति देवताक बृहस्प-
ति [illegible] देवताक सुवर्णपात्र देवताक [illegible]
समुद्र देवताक । तथा ।

जन्मलग्नात् ८ वर्षलग्नात् ६ गोचरात् ९ स्थान स्थिते
[illegible] ग्रहेण [illegible] तत्रापेक्षया [illegible]
[illegible] दशा [illegible]
[illegible] प्रीत्यर्थं [illegible] प्रजापति देवताक । [illegible]
[illegible] विश्वकर्म देवताक । [illegible] देवताक । [illegible]
रुद्र देवताक । [illegible] चन्द्र देवताक । [illegible]
देवताक । [illegible] बृहस्पति देवताक । सुवर्णपात्र
देवताक [illegible] समुद्र देवताक । तथा ।

जन्मलग्नात् ५ वर्षलग्नात् ६ गोचरात् ७ स्थानस्थितेन
भौमग्रहेण सूचितारिष्टपरिहारार्थं ममात्मनः सकलारिष्ट
शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्यादि प्राप्त्यर्थं भौमग्रह
प्रीतये मसूरान् प्रजापति देवताक मसूर प्रजापति
देवताक गुड अग्निदेवताक ताम्र सूर्यदेवताक रक्तवस्त्र
वनस्पति देवताक रक्तवृषभं बृहस्पति देवताक रक्तपुष्प
रुद्र देवताक सुवर्ण वह्निदेवताक प्रवाल समुद्रदेवताक तथा
जन्मलग्नात् ८ वर्षलग्नात् ६ गोचरात् ७ स्थानस्थितेन
बृहस्पति ग्रहेण सूचितारिष्टपरिहारार्थं ममात्मनः स
कलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्य प्राप्त्य
र्थं बृहस्पति ग्रह प्रीतये पीतधान्य प्रजापति देवताक,
हरिद्रा वनस्पति देवताक हरिद्रं सोमदेवताक लवण
समुद्रदेवताक पीतवस्त्र बृहस्पति देवताक सुवर्ण व
ह्निदेवताक पुष्पराग समुद्रदेवताक । तथा
जन्मलग्नात् ५ वर्षलग्नात् ५ गोचरात् ७ स्थानस्थितेन
शुक्रग्रहेण सूचितारिष्टपरिहारार्थं ममात्मनः सकला
रिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्य प्राप्त्य
र्थं शुक्रग्रह प्रीतये चित्रान्न सोमदेवताकं श्वेतं

+ तथा जन्मलग्नात् २०वर्षलग्नात् १ गोचरात् ११ स्थानस्थितेन केतुग्रहेण
सूचितं सकलारिष्ट शान्तिपूर्वक दीर्घायुरैश्वर्य प्राप्त्यर्थं केतुग्रह
प्रीतये तिलान् सोमदेवताकान् तैलं मं देवताकं माषान् प्रजापति देवताकं
लवणं [illegible] देवताकं [illegible] देवताकं [illegible] बृहस्पति देवताकं [illegible]
[illegible] देवताकं सुवर्णं वह्नि देवताकं [illegible] [illegible] देवताकं
गौदेवताकं माषान् प्रजापति देवताकं कुलत्थान् प्रजापति
देवताकं लोहं यमदेवताकं नीलवस्त्रं बृहस्पति देवताकं
सुवर्णं वह्निदेवताकं [illegible] देवताकं [illegible]
[illegible] देवताकं: तथा

जन्मलग्नात् ४ वर्षलग्नात् ६ गोचरात् ५ स्थानस्थितेन
राहुग्रहेण सूचितं सकलारिष्ट शान्तिपूर्वक
शान्तिकं [illegible] दीर्घायु [illegible] ऐश्वर्य प्राप्त्यर्थं राहु
ग्रहप्रीतये तिलान् सोमदेवताकान् तैलं मं [illegible] देवता
कं माषान् प्रजापति देवताकं लोहं यमदेवताकं वस्त्र
यात्रे बृहस्पति देवताकं सुवर्णं वह्नि देवताकं दक्षिणा
च वायुदेवताकं गो [illegible] देवताकं। *
नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो दातु
ऽहमुत्सृजे [illegible] न मम । इदं विश्वकर्म देवताकं

प्रार्थना:

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं म
र्त्यञ्च । हिरण्ययेन सविता देवो याति भुवनानि पश्यन् ।
ॐ इमन्देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यै
ष्ठ्याय महते जानराज्याये न्द्रस्येन्द्रियाय ।

इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा
सोमोऽस्माकं ब्राह्मणानां राजा ॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ॥

ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शंयोरभिस्रवन्तु नः ॥

ॐ कया ~~नश्चि~~ त्र आभुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥

दानप्रतिष्ठा ।

अद्य कृतैतत् सूर्य चन्द्र भौम बृहस्पति शनि राहु
ग्रह प्रीतये तत्तद् दान कर्मणः प्रतिष्ठार्थं इदं
हिरण्यं चन्द्रदेवताकं नानानाम गोत्राय नानानाम्ने
शर्मणे ब्राह्मणाय यथानामगोत्राय दक्षिणां तुभ्यमहं सम्
प्रददे तन्न मम ।

* केतुग्रह प्रीतये सार्द्धत्रिसहस्र संख्याक केतु वैदिकमन्त्र जपकर्म तवाहं आहूतो केतु स्तोत्र पाठ कर्म. तथा.

जपकार्यसंकल्प

अद्येह कश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः तुलाराशिः श्रीविक्रम शर्मा अहं यजमानस्य सबल [illegible] दोषापहरणार्थं [illegible] दयावाप्तये. सूर्यग्रह प्रीतये सार्द्धत्रिसहस्र संख्याक सूर्यवैदिकमन्त्र जपकर्म तवाहं आहूतो सूर्य स्तोत्रपाठ कर्म. तथा.

चन्द्रग्रहप्रीतये सार्द्धपञ्चसहस्र संख्याक चन्द्र वैदिकमन्त्र जपकर्म तवाहं आहूतो चन्द्र स्तोत्र पाठकर्म. तथा
भौमग्रहप्रीतये पञ्चसहस्र संख्याक भौमवैदिकमन्त्र जपकर्म तवाहं आहूतो भौमस्तोत्र पाठकर्म. तथा
बृहस्पतिग्रहप्रीतये सार्द्धनवसहस्र संख्याक बृहस्पति वैदिकमन्त्र जपकर्म तवाहं आहूतो बृहस्पति स्तोत्र पाठ कर्म. तथा
शनिग्रहप्रीतये सार्द्ध एकादशसहस्र संख्याक शनिवैदिकमन्त्र जपकर्म तवाहं आहूतो शनिस्तोत्र पाठ कर्म. तथा
राहुग्रहप्रीतये नवसहस्र संख्याक राहु वैदिकमन्त्र जपकर्म तवाहं आहूतो राहु स्तोत्र पाठ कर्म. तथा *
श्रीसाम्बसदाशिवदेवता प्रीतये एकादश ब्राह्मण द्वारा

कपुरस्त्रा प्रयोग पाठक्रमः। तथा। महाकाली महाकालीको
महाकाल प्रत्यक्षो देवताप्रीत्यर्थे पूजाहोमे सम्प्रदाने [illegible]
कर्मः। तथा। द्वितीय देवताप्रीत्यर्थे पूजाहोमे [illegible]
[illegible] पाठक्रमः। तथा। गुरु आप देवताप्रीत्यर्थे [illegible]
[illegible] गुरु आप स्तोत्र पाठक्रमः ~~[illegible]~~ च ब्राह्मणेभ्यः
दक्षिणा [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

सर्वौषधि दानम्

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः गुलारोग्री श्रीमति विक्रम यमी प्रद मम नर्पिहुडो ज्ञनो सिवदिवसे सकलरोगसु इत्यादि सर्वेच्छ दिस्थीयुप-ठेगेवे श्रपर्ण पापाविप्रय सकलरोगे सु इत्यानापेच इमान् तिलान् सोमदैवताकान् ताम्रपात्रं विश्वकर्मदैवताकं सुवर्णं वह्नि दैवताकं साऊदूषणं लिप्रदैवताकं गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे

प्रार्थना

यानि कानिच पापानि जन्मान्तर कृतानिच ।
तिल पात्र प्रदानेन तानि नश्यन्तु मे सदा ॥
कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थ देवमयी यस्मादतः शान्तिं प्रयच्छमे ॥

दानप्रतिष्ठा

अद्यकृतैतत् तिलपात्र सुवर्ण साङ्गकृष्णगो दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे तत्सत् न मम

घृतपात्रदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
तुलाराम शर्मा: [illegible] अद्य मम वर्षवृद्धौ
जन्मोत्सव दिवसे जन्मकाले ग्रहाणां पूर्वकृत दोषापुञ्ज
प्रशम कृतस्य जन्मोत्सव कर्मणः [illegible]
र्थं आयुरारोग्य प्राप्त्यर्थं घृतपात्रं प्रजापति दैवतं
काश्यपगोत्राय अच्युतानन्द शर्मणे ब्राह्मणाय सम्प्रददे

प्रणीता विमोकः

ॐ सुमित्रियान ऽआप ऽओषधयः सन्तु
इति प्रणीता जलेनाभिषिञ्च्य।
ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः।
इति प्रणीतापात्रं ऐशान्यां न्युब्जीकुर्यात्।

मेधा।

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनिं मेधामयासिषं स्वाहा॥
यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥
मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा॥

वास्तुहोम

ॐ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं स्वाहा॥

चरुहोम

ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा॥

[illegible]

ॐ काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥
दूर्वासि [illegible] यजमानो [illegible] प्रजापते [illegible] पातु। [illegible] पृथिवी [illegible] ब्रह्मण [illegible] [illegible] स्वाहा॥
ॐ [illegible] पञ्च दोह्यां मे [illegible]।
तस्मै [illegible] वर्धय॥

सम्बत्सरोदय काश्यपपात्रदानम्:

अद्येह काश्यपगोत्रः काश्यपात्र नाम गौप्तुकेनोन्नि
[illegible] विश्राम [illegible]
कर्ण [illegible] कर्णाभ्यां दीपाय [illegible]
दय्याचामये ह्य अवलोकितेश्वर प्रीत्यर्थं [illegible]
काश्यपपात्रं विश्वकर्मदेवताकं सुवर्णविह्नितं [illegible]
काश्यपगोत्राय अच्युतगोत्र शर्मणे ब्राह्मणाय तुभ्य
महं सम्प्रददे ।

प्रार्थना

काश्यपेन समुद्भूतं देवानां मुक्तिदायकं ।
अस्य दानेन मे नित्यं पातु देवेश नाम ॥

दानप्रतिष्ठा

अद्य कृतैतत् अद्य काश्यपपात्रं सुवर्ण दानकर्म
णः प्रतिष्ठार्थं हिरण्यं चन्द्रदेवताकं काश्यप
गोत्राय अच्युतगोत्र शर्मणे ब्राह्मणाय तुभ्यमहं
सम्प्रददे । ।। इति समाप्तम

Tribhuvan University, Balmeeki Campus, Kathmandu

प्रत्यक्षगोदानम्

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयहिरण्यद्रव्यदानम्

अद्येह काश्यपगोत्रः काश्यपशर्माहं गैडुवे गोत्रेऽस्य
गुणागोद्धेः पितृविश्वरूपस्य उद्देश्य मम वयसे
जन्मान्तरकर्मणो दोषाय ... सर्वदोषनिवृत्तये
... देवतानां ... प्रीतये
... सकलदेवतानां पूजनं दानं
... पापादि क्षयाय साङ्गफलप्राप्तये परमात्मप्री-
त्यर्थं इदं गोनिष्क्रयभूतं हिरण्यं चन्द्रदैवतं
काश्यपगोत्राय अमुकनाम्ने ब्राह्मणाय
तुभ्यमहं संप्रददे ॥

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात् अतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्य कृतैतत् गोनिष्क्रयीभूत हिरण्यदानकर्मणः प्रतिष्ठा-
र्थं इदं हिरण्यं चन्द्रदैवतं काश्यपगोत्राय अमुकनाम्ने
ब्राह्मणाय तुभ्यमहं संप्रददे तेन भगवान्

कन्यार्चना

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां देविं कन्यां तां पूजयाम्यहम् ॥

आवाहनं समर्पयामि कन्यायै नमः
पाद्यं समर्पयामि कन्यायै नमः
आचमनीयं समर्पयामि कन्यायै नमः
वस्त्रं समर्पयामि कन्यायै नमः
गन्धं समर्पयामि कन्यायै नमः
अक्षतान् समर्पयामि कन्यायै नमः
पुष्पाणि समर्पयामि कन्यायै नमः
माल्यं समर्पयामि कन्यायै नमः
धूपं समर्पयामि कन्यायै नमः
दीपं समर्पयामि कन्यायै नमः
नैवेद्यं समर्पयामि कन्यायै नमः
दक्षिणां समर्पयामि कन्यायै नमः

जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥
पुष्पाञ्जलिं समर्पयामि कन्यायै नमः

ब्राह्मण भोजन मन्त्रः

ॐ हिरण्य गर्भ गर्भस्थं हेमवीजं विभावसो।
अनन्त पुण्य फलदः मतः शान्तिं प्रयच्छमे।

देयद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
प्रवरः [illegible] शिवदत्त विक्रमशर्माऽहं मम
[illegible] ऽस्मोत्सव कर्मणः सकलप्राप्तये ब्राह्मण
[illegible] दक्षिणाकाङ्क्षये द्रव्यस्य देय
कल्प[illegible] मोहन[illegible] शर्मा उपाध्या
य [illegible] कुलदेवता पूजन हवनदानकर्माणि
न्यूनातिरिक्त [illegible] तथा कारिष्यमाण
ब्राह्मण भोजन कर्मणः प्रतिष्ठार्थं वैद
[illegible] वस्त्र [illegible] नानानाम गोत्रेभ्यो नानानाम
शर्मभ्यो ब्राह्मणेभ्यो यथा नाम [illegible] संप्रददे
महं सम्प्रददे। न मम।

ततः उत्तरपूजा

आशीषोदकः

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥
द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥
विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव॥
ॐ शान्तिरस्तु, पुष्टिरस्तु, तुष्टिरस्तु, यच्छ्रेयस्तदस्तु, यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रशान्तमस्तु। द्विपदेभ्यश्च चतुष्पदेभ्यश्च शान्तिर्भवतु। ॐ अमृताभिषेकोऽस्तु।

पोटोलिको बन्धन मन्त्रः

ॐ मार्कण्डेय महाभाग आयुरारोग्य दायक ।
श्रमद्रौ विभीषणो हनारो मानुविश्वोरवराजर्षि ॥
धात्युगार्थे मूले दक्षे ममकल्याणराहकवे ।
प्रापद्धव सिद्धार्थाञ्च कामनानां मनोरथाः ॥

धागाबन्धन मन्त्रः

ॐ येनबद्धो बलि राजा दानवेन्द्रो महाबलः ।
तेत्वां प्रतिबध्नामि रक्षे मा चलमाचल ।

तिलकमन्त्रः

ॐ त्र्यायुषञ्जमदग्ने ललाटे
कश्यपस्य त्र्यायुषम् ग्रीवायाम् ।
यद्देवेषु त्र्यायुषम् दक्षिबाहुमूले ।
तन्नो अस्तु त्र्यायुषम् हृदि ।

प्रणाम मन्त्र

श्रीयिद्वत्वमायुष्यं मातेम्य मातेश्वात्मवगान्न
जहीपते । धान्यधनपुत्रलबद्धपत्रकलोनै द्वान
सन्धातो दीर्घमायुः ॥
अश्वत्थामा हारीतिरो भवनाञ्च निर्णयो ।
प्राप्नवाप्नोनामाहमन्त्वत्रीयद्वारपा द्वारम् ।

दुग्धपानमन्त्रः

सातेकं गड तामेश्रीं मक्रलब्धपीविंद यपः।
नाकिले पाहलेखा पिबाम्यमः समुद्रे॥

यस्य हस्तान्न गोभोज्य तपो पहानिकेपाविष्ठ।
न्पूतसमूर्धं तोयपाते सख्यो वन्दे तमच्युतम॥
ॐ अच्युताय नमः ३

कावेरी वान्या मवहोमूर्वी
वुधुपालनाया नृसिंह स्वभावान्।
कलापि पद्मा सुकक प्रादौ
नारायणाय पीते समर्पयेतन्॥

Library, BanHouse Kathmandu

(२४)

रजत तुला दान सिंहासनारूढ रजत [illegible]
जन्मोत्सव'

श्रीगणेशाय नमः ॥ ॥

प्रायश्चित्त गोदानम्

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
~~सवत्सायै गवे नमः~~ । गोप्रत्याम्नायीभूत रजत खण्डाय नमः
ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कल्याणसिंहः .... वर्मोऽहं मम
श्रीपरमेश्वरप्रीतिपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तये करिष्यमाण रजततुलापुरुषमहादानकर्मणि पूर्वकर्तव्यनियमानाचरणादिजन्य प्रत्यवायपरिहारपूर्वकं सद्योदेहशुद्धिद्वारा तत्कर्माधिकारसिद्ध्यै प्रायश्चित्तप्रत्याम्नायीभूतां ~~[illegible]~~ गां रुद्रदेवताकां .... गोत्राय .... शर्मणे आ
तत्प्रत्याम्नायीभूत रजतं चन्द्रदेवताकं

चार्याय तुभ्यं सं प्रददे· तत्सन्न मम· ॥

प्रार्थना-

ॐ कपिले सर्व देवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मा त्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् प्रायश्चित्त प्रत्याम्नायीभूत ~~सालंका~~
~~र सवत्स~~ गोदान कर्मणः प्रतिष्ठा साङ्गता सिद्ध्ये
इदं रजतं चन्द्रदेवताकं ······ गोत्राय ······
शर्मणे आचार्याय तुभ्यं संप्रददे· तत्सन्न मम·
ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्त
दस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्दू
मो प्रतिहतमस्तु अमृताभिषेकोऽस्तु· ॥

प्रतिज्ञा सङ्कल्पः-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः कन्याराशिः ··············· वर्मा·
अहं मम· श्रुति स्मृति पुराणोक्त फलावाप्ति पूर्व
कैहलौकिकाखिल भूपालमौलिमाणिरञ्जित पा
दपीठ श्रद्धान्वितयज्ञसहस्रयाजित्वप्रदीप्तप्रताप
जित महीपलोक राजराजत्व भवनपुरःसरं श्रीप
रमेश्वर प्रीतये रजततुला पुरुष महादान कर्म क

रिष्ये. ॥

स्वस्तिवाचनम् ।

ततो दीपकलशगणेशपूजा ॥

दीपपुष्पाञ्जलिः –

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनाथाय नमः ।

कलशपुष्पाञ्जलिः –

ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥

वरुणकलशाय नमः ॥

गणेश पुष्पाञ्जलिः —

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

सिद्धिबुद्धिसहितगणाधिपतये नमः ।

मण्डप प्रवेशः —

अथ शङ्ख घण्टावादन- मङ्गलमन्त्रपठनपूर्वकं दीप कलश गणेशान्धृत्वा मण्डपं त्रिःप्रदक्षिणी कृत्य पश्चिमद्वारेण प्रविशेत् ॥

आनो भद्रा इत्यादिकं पठेत् ॥

वरणम् —

वरणद्रव्याय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्या राशिः .... वर्मा अहं मम सिंहासनारूढ-रजतजयन्ती महोत्सवे करिष्यमाण रजततुलापुरुष महादान कर्मणि पूर्वाङ्ग

त्वेन निर्विघ्नता सिद्ध्यै दीपकलश गणेशपूजनं, मातृका पूजनं, पुण्याहवाचनं, नान्दी श्राद्धानुकल्प गोदानं, ग्रहपूजनं, वास्तु पूजनं, मण्डपदेवता पूजनं, ध्वजा पताको च्छ्रयणादि, षोडशारचक्रदेवता पूजनं, तुलादेवता पूजनरजताधिवासन पुरःसरं स्वगृह्योक्तप्रकारेण अग्निप्रज्वालनपूर्वकं, संपूजित देवतानादि कर्म करिष्ये, तत्कर्म कर्तुं नानानामगोत्रान् नाना नामशर्माणो ब्राह्मणान्, एभिश्चन्दन पुष्पाक्षत माल्य धौतोत्तरीयासन राजत जल पात्र सौवर्णाङ्गुलीयका~~केयुर~~ [illegible] दिभि आचार्यत्वेन, तथा- एभिश्चन्दन पुष्पाक्षतधौतोत्तरीय जल पात्रासन सौवर्णाङ्गुलीयकादिभि र्गणपति ब्रह्म सदस्य ऋत्वि ग्जापक द्वारपालत्वेन, तथा- एभिश्चन्दनपुष्पाक्षत धौतोत्तरीयादिभिः परिचारकत्वेन च युष्मान् वृणे.

ॐ वृताः स्मः ॥

मधुपर्कः —

तत आचार्यं संपूज्य,

ममास्मिन्यज्ञे आचार्यत्वेन त्वामहं वृणे।

ॐ वृतोऽस्मि ॥
प्रार्थना –
आचार्यत्वे यथा स्वर्गे शक्रादीनां बृहस्पतिः ।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥
ॐ भवानि ।

ततो गणेशं संपूज्य,
ममास्मिन्यज्ञे गणपतित्वेन त्वामहं वृणे ।
ॐ वृतोस्मि ॥
प्रार्थना –
देवानामसुराणां च यज्ञे प्राक्पूजितस्तु यः ।
निर्विघ्नं कुरुते यद्वत्त्वं मे गणपति भव ॥
ॐ भवानि ।
ततो ब्रह्माणं संपूज्य,
ममास्मिन्यज्ञे ब्रह्मत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥
प्रार्थना –
यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः ।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥
ॐ भवानि ।

ततः सदस्यं संपूज्य,
ममास्मिन्यज्ञे सदस्यत्वेन त्वामहं वृणे,।
ॐ वृतोऽस्मि ॥

प्रार्थना-
यथा विश्वसृजो यज्ञे याज्ञवल्क्यो द्विजोत्तमः।
तथा त्वं मम यज्ञेऽस्मिन् सदस्यो भव सुव्रत ॥
ॐ भवानि.।

ततो ऋत्विजं संपूज्य.
ममास्मिन्यज्ञे ऋत्विक्त्वेन त्वामहं वृणे .।
ॐ वृतोऽस्मि ॥

प्रार्थना-
भगवन्सर्वधर्मज्ञ सर्वधर्मविदां वर ॥
वितते मम यज्ञेऽस्मिन् ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.। ४

ततो जापकं संपूज्य.
ममास्मिन्यज्ञे ऋग्वेदमन्त्रजप कर्तुं जापकत्वेन त्वामहं वृणे,। ॐ वृतोऽस्मि ॥

प्रार्थना-
ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव।

ॐ भवानि ।

ततोन्यं जापकं संपूज्य । ममास्मिन्यज्ञे यजुर्वेदमन्त्रजपकर्म कर्तुं जापकत्वेन त्वामहं वृणे ।

ॐ वृतोस्मि ॥

प्रार्थना-

कानएक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

ॐ भवानि ।

ततोन्यं जापकं संपूज्य । ममास्मिन्यज्ञे सामवेदमन्त्रजपकर्म कर्तुं जापकत्वेन त्वामहं वृणे ।

ॐ वृतोस्मि ॥

प्रार्थना -

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

ॐ भवानि ।

ततोन्यं जापकं संपूज्य । ममास्मिन्यज्ञे अथर्ववेदमन्त्रजपकर्म कर्तुं जापकत्वेन त्वामहं वृणे ।

ॐ वृतोस्मि ॥

प्रार्थना-

बृहन्नेत्रोथर्ववेदो नुष्टुभो रुद्रदैवतः ।

वैशम्पायन विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि ॥

ततो द्वारपालं संपूज्य,

ममास्मिन्यज्ञे ऋग्वेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे । ॐ वृतोस्मि ॥

प्रार्थना-

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि ।

ततोन्यं द्वारपालं संपूज्य.

ममास्मिन्यज्ञे यजुर्वेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे । ॐ वृतोस्मि ॥

प्रार्थना-

कातराक्षो यजुर्वेद स्त्रैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि ।

ततोन्यं द्वारपालं संपूज्य. ममास्मिन्यज्ञे सामवेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे ॥
ॐ वृतो वृतोस्मि ॥

प्रार्थना-

सामवेस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

ॐ भवामि ।

ततोऽन्यं द्वारपालं संपूज्य ।

ममास्मिन्यज्ञे अथर्ववेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे । ॐ वृतोऽस्मि ॥

प्रार्थना —

वृहन्नेत्रोथर्ववेदो नुष्टुभो रुद्रदैवतः ।
वैशम्पायनविप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

ॐ भवामि ।

ततः परिचारकादींश्च पूजयेत् ।

ततः सर्वेषां प्रार्थना —

अस्य यागस्य निष्पत्त्यै भवन्तोभ्यार्थिता मया ।
सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम् ॥

यथाविहितं कर्म कुरुत ॥

यथामतिः करवामः ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

अथ पुण्याह वाचनम् ॥

फल वस्त्रादिकं गृहित्वा ॥

अद्येह काश्यप गोत्रः काश्यपावत्सार नैध्रुवेति
त्रिप्रवरः कन्याराशिः .... वर्मा-
अहं मम. सिंहासनारूढ रजत जयन्ती म
होत्सवाङ्गभूत करिष्यमाण रजत तुलादानक
र्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्या
हं वाचयिष्ये, तदङ्गतया चतुर्णां ब्राह्मणानां
पूजनं वरणं च करिष्ये. ॥

एभिश्चन्दन पुष्पाक्षत पुगीफल यज्ञोपवी
त वस्त्रोपायनादिभिः पुण्याह वाचनार्थं ब्रह्म
न्. त्वामहं वृणे, ॐ वृतो स्मि ॥

अञ्जलिं बध्वा ॥

अद्येह काश्यप गोत्रः काश्यपावत्सार नैध्रुवेति
त्रिप्रवरः कन्याराशिः .... वर्मा अहं
मम. करिष्यमाण रजततुलादानकर्मणि सर्वा
भ्युदयप्राप्तये भो ब्राह्मणाः (मण्डपे, पुण्या
हं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वाभूतानि जात वेदः पुनीहि मा ॥१॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिवरः
कन्याराशिः .... वर्मा अहं मम.
रजत तुलादान कर्मणि सर्वाभ्युदयप्राप्तये भोब्रा
ह्मणाः (मण्डपे, स्वस्ति भवन्तो ब्रुवन्तु ३
ॐ स्वस्तिः ३ ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्व
स्तिनः पूषा विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्यो ऽरि
ष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ २ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रि
प्रवरः कन्याराशिः .... वर्मा अहं मम
करिष्यमाण रजत तुलादान कर्मणि सर्वाभ्युद
यप्राप्तये भोब्राह्मणा मण्डपे ऋद्धिं भवन्तो ब्रु
वन्तु ॥ ३ ॥ ॐ ऋद्धनाम् ॥ ३ ॥
ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योति रमृता अभूम ॥
दिवं पृथिव्या अध्यारुहा माविदामदेवान् स्वर्ज्यो
तिः ॥ ३ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवरः कन्याराशिः .... वर्मा अहं मम.
करिष्यमाण रजत तुलादान कर्मणि सर्वाभ्युद

य प्राप्तये भो ब्राह्मणाः मण्डपे वृद्धिं भवन्तो ब्रुवन्तु
॥ ३॥ ॐ वृद्धताम् २ ॐ ज्यैष्ठ्यं च मे आ
धिपत्यश्च मे मन्युश्च मे भामश्च मे मश्च मे म
श्च मे जेमा च मे महिमा च मे वरिमा च मे
प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृ
द्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवरः कल्याणाम्नि: ...... वर्मा अहं मम
करिष्यमाण रजततुलादानकर्मणि सर्वाभ्यु
दयप्राप्तये भो ब्राह्मणाः मण्डपे कल्याणं भ
वन्तो ब्रुवन्तु २ ॐ कल्याणम् २ ॐ यथेमां
वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्या
भ्यां शूद्राय चार्याय च स्वाय चारणाय च
॥ प्रियो देवानां दक्षिणायै दातुरिह भूयास
मयं मे कामः समृद्ध्यताम् ॥ ५ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवरः कल्याणाम्नि: .... वर्मा अहं मम
करिष्यमाण रजततुलादानकर्मणि सर्वाभ्युदय

प्राप्तये भो ब्राह्मणा मण्डपे श्रियं भवन्तो ब्रुवन्तु २ ॐ श्रीः २ ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूना ँ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥ ६ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कल्याणीः .... वर्मा अहं मम करिष्यमाण रजततुलादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणा मण्डपे शान्तिं भवन्तो ब्रुवन्तु २ ॐ शान्तिः २ ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ७ ॥

विश्वानि देव सवितर्दुरितानि परासुव ॥
यद्भद्रं तन्न आसुव ॥ ॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥

पुण्याहवाचनसमृद्धिरस्तु ,

अथ मातृकापूजन- नान्दिश्राद्ध- ग्रह वास्तु म
ण्डल देवतापूजन- ध्वजा पताकोच्छ्रयण ओ
ङ्कार चक्र देवतापूजन- तुलादेवतापूजनाधि
वासन पुरःसरं रजताधिवासनं- तथा- स्वगृ
ह्योक्तप्रकारेण अग्निप्रज्वालन पूर्वकं पूजितदे
वतानां हवनादि कर्म च ब्राह्मणद्वारा का
रयेत् ॥

अञ्जलिं बध्वा,

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ।
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

उत्तरदिने,

तुलादिवसे कृतनित्यक्रियः कर्ता मण्डपदेशमागत्य देवान्संपूज्य प्रार्थयेत् ॥

दीपप्रार्थना-

नमोस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनाथाय नमः ॥

कलशप्रार्थना-

देवदानसवादे मथ्यमाने महोदधौ ।
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

वरुण कलशाय नमः ।

गणेश प्रार्थना-

वक्रतुण्ड महाकाय कोटिसूर्य सम प्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

मातृका प्रार्थना-

ब्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोर घर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथ रुद्र सहिता रक्षन्तु नो मातरः ।

मातृकाभ्यो नमः ।

ग्रह प्रार्थना-

ब्रह्मा मुरारि त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनि राहु केतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नव ग्रहेभ्यो नमः ।

वास्तु प्रार्थना-

वास्तुदेव नमस्तेस्तु भूमिशय्यारत प्रभो ।
मद्गृहं धनधान्यादि समृद्धं कुरु सर्वदा ॥

वास्तोष्पतये नमः ।

अग्निप्रार्थना -

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥

अग्नये नमः ।

इन्द्रप्रार्थना –

एह्येहि सर्वामरसिद्धसाध्यै
रभिष्टुतो वज्रधरामरेश ।
संवीज्यमानोप्सरसां गणेन
रक्षाध्वरं नो भगवन् नमस्ते ॥

इन्द्राय नमः ।

अग्नि प्रार्थना –

एह्येहि सर्वामर हव्यवाह
मुनिप्रवीरैरभितोऽभिजुष्टः ।
तेजोवतां लोकगणेन सार्धं
ममाध्वरं पाहि कवे नमस्ते ॥

अग्नये नमः ।

यमप्रार्थना –

एह्येहि वैवस्वत धर्मराज
सर्वामरैरर्चित धर्ममूर्ते ।

शुभाऽशुभानन्द शुचामधीश
शिवाय नः पाहि मखं नमस्ते ॥

यमाय नमः ।

निर्ऋति प्रार्थना -

एह्येहि रक्षोगणनायकस्त्वं
विशाल वेताल पिशाच संघैः ।
ममाध्वरं पाहि पिशाचनाथ
लोकेश्वरस्त्वं भगव न्नमस्ते ॥

निर्ऋतये नमः ।

वरुण प्रार्थना -

एह्येहि यादोगणवारिधीनां
गणेन पर्जन्य सहाप्सरोभिः ।
विद्याधरेन्द्रामरगीयमान
पाहि त्वमस्मान् भगवन्नमस्ते ॥

वरुणाय नमः ।

वायु प्रार्थना -

एह्येहि यज्ञे मम रक्षणाय
मृगाधिरूढः सह सिद्ध संघैः ।
प्राणाधिपः कालकवेः सहाय
गृहाण पूजां भगवन्नमस्ते ॥

Nepal Sanskrit University, Dang

वायवे नमः ॥

कुवेरप्रार्थना -

एह्येहि यज्ञेश्वर यज्ञरक्षां
विधत्स्व नक्षत्रगणेन सार्धम् ।
सर्वौषधीभिः पितृभिः सहैव
गृहाण पूजां भगवन्नमस्ते ॥

कुवेराय नमः ॥

ईशान प्रार्थना -

एह्येहि यज्ञेश्वर न त्रिशूल
कपाल खट्वाङ्ग धरेण सार्धम् ॥
लोकेश यज्ञेश्वर यज्ञसिद्ध्यै
गृहाण पूजां भगवन्नमस्ते ॥

ईशानाय नमः ॥

अनन्त प्रार्थना -

एह्येहि पातालधरामरेन्द्र
नागाङ्गना किन्नर गीयमानः ॥
यक्षोरगेन्दु मर लोक संघैः
अनन्त रक्षाध्वर मस्मदीयम् ॥

अनन्ताय नमः ।

ब्रह्मप्रार्थना -

एह्येहि सर्वाधिपते सुरेन्द्र
लोकेन सार्धं पितृदेवताभिः ।
सर्वस्य धातास्यमितप्रभावो
विशाध्वरं नः सततं शिवाय ॥

ब्रह्मणे नमः ॥

ततः पुष्पाञ्जलिं गृहीत्वा तुलां त्रिः प्रदक्षिणीकृत्य
पश्चिमत उपविश्य प्रार्थयेत् ॥

तुलाप्रार्थना –

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता ।
साक्षीभूता जगद्धात्रि निर्मिता विश्वयोनिना ॥
एकतः सर्वसत्यानि तथानृतशतानि च ।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिता ॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोस्तु ते ॥
योसौ तत्त्वाधिपो देवः पुरुषः पञ्चविंशकः ।
स एषोधिष्ठितो देवि त्वयि तस्मान्नमो नमः ।

तुलायै नमः ॥

गोविन्दप्रार्थना –

नमो नमस्ते गोविन्द तुलापुरुषसंज्ञकः ।
त्वं हरे तारयस्वास्मानस्मात्संसारसागरात् ॥

गोविन्दाय नमः ॥

ततो दक्षिणहस्ते सूर्यं वामहस्ते धर्मराजं स्वाङ्के इष्टदेवतां गृहीत्वा प्राङ्मुखः गोविन्दं पश्यन् तुलायां आरोहेत् ॥

तुलाधिष्ठात्रिदेवता प्रार्थना -

नमस्ते सर्वभूतानां साक्षीभूते सनातनि ।
पितामहेन देवि त्वं निर्मिता विश्वयोनिना ॥
त्वया धृतं जगत्सर्वं सह स्थावरजङ्गमम् ।
सर्वभूतात्मभूतस्थे नमस्ते सर्वधारिणि ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥
पवित्रेण पुनीहि मा शुक्रेण देवदीद्यत् ॥
अग्ने क्रत्वा क्रतूँ रनु ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ॥
ब्रह्म तेन पुनातु मा ॥
पवमानः सो अद्य नः पवित्रेण विचर्षणिः ॥
यः पोता स पुनातु मा ॥
उभाभ्यां देव सवितः पवित्रेण सवेन च ॥
मां पुनीहि विश्वतः ॥
वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्त
न्वो वीतपृष्ठाः ॥ तया मदन्तः सधमा
देषु वयꣳ स्याम पतयो रयीणाम् ॥

ततो वतीर्य तोलित रजते तुलसीपत्रं प्रक्षिप्य·

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे ॥

आत्मसमतोलितदेयद्रव्याय नमः ॥ संकल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः .... शर्मा अहं मम· सिंहासनारूढ रजतजयन्ती महोत्सवदिवसे श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकैहलौकिकाखिलभूपालमौलिमणिरञ्जितपादपीठ श्रद्धान्वित यज्ञसहस्रपाजित्व प्रदीप्तप्रतापजितमहीपलोक राजराजत्वभवनपुरःसरं श्रीपरमेश्वरप्रीतये इदं आत्मसमतोलितं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्य आचार्य ब्रह्म सदस्य गणेशत्विग्द्वारपालजापक परिचारकेभ्य अन्येभ्यो द्विजेभ्यो दीनानाथेभ्यश्च यथाभागं विभज्य दातुं जले समुत्सृजे· तत्सन्न मम· ।

प्रार्थना–

शिवनेत्रसमुद्भूतं रजतं पितृवल्लभम् ।
तस्मादस्य प्रदानेन रुद्रः संप्रीयतां मम· ।

मन्त्रेण दद्या दपि मान्त्रितां यो
सक्तुन्त्वा मेकतमां द्विजेभ्यः ।
स याति गौर्याः सदनं सुपुण्ये
नैश्लोक दौर्गत्य मुपाश्नुते पुमान् ॥

दानप्रतिष्ठा –

अद्य कृते तत् – आत्मसमतोलित रजततुल्ना पुरुष महादान कर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं ...... गोत्राय .... शर्मणे आचार्याय तुभ्यं संप्रददे तत्सन्न मम ॥

ततो गोदानम् –

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

सवत्सायै गवे नमः ॥ ~~[illegible] नमः।~~

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कल्याणशी .... नामा अहं मम श्रीपरमेश्वरप्रीतये कृतस्य आत्मसम

Nepal Sanskrit University, Balmiki Campus, Kathmandu

तोलित रजततुला पुरुष महादानकर्मण: साङ्गु
ण्यार्थं इमां सालंकारां सवत्सां गां रुद्रदेवताकां
...... गोत्राय .... शर्मणे आचार्याय संप्रददे.

प्रार्थना -

कपिले सर्वदेवानां पूजनीया सिरोहिणि।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा -

अद्य कृतैतत् सालङ्कार सवत्स गोदानकर्मण:
प्रतिष्ठार्थं इदं रजतं चन्द्र देवताकं ..... गोत्राय..
...... शर्मणे आचार्याय संप्रददे. त त्सन्न मम·
ॐ शान्तिरस्तु· पुष्टिरस्तु· तुष्टिरस्तु· यच्छ्रेय स्तदस्तु
·यत्पापं रोग: शोको दु:खं दारिद्र्यं तद्दूरो प्रतिह
तमस्तु· अमृताभिषेकोऽस्तु· ॥

तत: पूर्णपात्रम् -

अद्येह काश्यपगोत्र: काश्यपावत्सारनैध्रुवेति त्रिप्रवर
:कन्यालग्न: .... वर्मा अहं मम·
श्रीपरमेश्वरप्रीतये आत्मसमतोलित रजततुलाम
हापुरुषदानकर्मणि कृतस्य पूजन हवनादिकर्म
ण: अपूर्णपूर्णार्थं पूर्णपात्रं प्रजापतिदेवताकं
......गोत्राय.......... शर्मणे ब्राह्मणे संप्रददे·

तत्सन्न मम· ॥

प्रणीता विमोकः -

ॐ सुमित्रियान ऽ आप ऽ ओषधयः सन्तु· इति प्रणीताजलेन यजमान शिरो ऽ भिषिच्य·,

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः ॥ इति प्रणीता पात्रं ऐशान्यां न्युब्जिकुर्यात्

वर्हिहोमः -

ॐ देवा गातु विदे गातुं वित्वा गातुमित ।
मनसस्पत ऽ इमन्देव यज्ञ ँ स्वाहा वातेधाः ॥

मेधा -

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिम्मेधा मयासिष ँ स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तयामामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा
मेधांमे वरुणो दधातु मेधामग्निः प्रजापतिः
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा
इदं मे ब्रह्मच क्षत्रं चोभे श्रियमश्नुताम् ।
मयिदेवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा· ॥

वस्त्रहोमः-

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो

मयि धेहि ॥ समाववर्ति पृथिवी समुखाः समु
सूर्यः समु विश्वमिदं जगत् ।
वैश्वानरज्योति भूयासं विभून्कामान्व्यश्नवै-
भूः स्वाहा ॥

शेषचरुहोमः -

ॐ अभ्यादधामि सामिधमग्ने व्रतपते त्वयि ।
व्रतं ~~च~~श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा ।

घृतच्छाया -

ॐ काण्डात्काण्डात्प्ररोहन्ति परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
ध्रुवासि ध्रुवो यं यजमानोस्मिन्नायतने प्रजया
पशुभिर्भूयात् ॥ घृतेन द्यावा पृथिवी पूर्येथा
मिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥
अलक्ष्मी येच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् ।
तत्सर्वं शामयाज्यत्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

ससुवर्णघृतकांस्यपात्राय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवरः कन्याराशिः .... वर्मा अहं मम
श्रीपरमेश्वरप्रीतये कृतैतत् आत्मसमतोलित
रजततुलापुरुषमहादानकर्मणि इदं स्वमुखा

वलोकितं आज्यं मृत्युञ्जयदेवताकं कांश्यपात्रं
विश्वकर्मदेवताकं सुवर्णं वन्हिदेवताकं ....
गोत्राय .... शर्मणे आचार्याय संप्रददे ॥

प्रार्थना –

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातु राज्यं पातु सदैव माम् ॥
आज्यं [illegible] तेजः समुद्दिष्टमाज्यं पापहरं परम् ।
आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ।
आज्यपात्रप्रदानेन शान्तिरस्तु सदा मम ।

दानप्रतिष्ठा –

अद्य कृतैतत् अवलोकिताज्य सुवर्ण कांश्यपात्र दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय .... शर्मणे आचार्याय संप्रददे. न मम ॥

पञ्चाङ्ग गोदानम् –

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
~~सवत्सायै [illegible]~~ नमः ॥ [illegible]
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।

ब्राह्मणाय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवे
ति त्रिप्रवरः कन्याराशिः ...... वर्मा अहं
मम श्रीपरमेश्वरप्रीतये कृतस्य आत्मसमतो
लित रजततुलामहापुरुषदानकर्मणः तत्तोद्दे
वता स्थापन पूजन हवन कर्मणश्च प्रतिष्ठा
सांगता सिद्ध्यर्थं इमां ~~सालंकारां सवत्सां~~
तेजस्यायां त रजतं चन्द्रदेवताकं
गां रुद्र देवताकां ...... गोत्राय ...... शर्म
णे आचार्याय संप्रददे ।

प्रार्थना -

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥
यज्ञसाधनभूता या विश्वस्यान्नप्रदायिनी ।
विश्वरूपधरो देवः प्रीयता मनया गवा ॥

दानप्रतिष्ठा -

अद्य कृतैतत् ~~सालंकार सवत्स~~ गोदानक
र्मणः प्रतिष्ठार्थं इदं रजतं चन्द्र देवताकं ..
...... गोत्राय ...... शर्मणे आचा
र्याय संप्रददे. तत्सन्न मम ॥

उत्तराङ्ग पूजा -

भूयसी दक्षिणा -

ॐ हिरण्य गर्भ गर्भस्थं हेमवीजं विभावसोः ।
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे ॥

रजत द्रव्येभ्यो नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवे-
ति त्रिप्रवरः कन्याराशिः .... वर्मो
अहं मम-
सिंहासनारूढ रजतजयन्ती नाम महोत्सव
कर्मणि श्रीपरमेश्वरप्रीतये कृतस्य आत्म
समतोलित रजततुलापुरुषमहादानकर्म
णो न्यूनातिरिक्तपरिपूर्तिपूर्वक साद्गुण्य
सिद्धये इमां भूयसीं दक्षिणां रजतं चन्द्रदे
वताकं नानानामगोत्रेभ्यो नानानामशर्म
भ्यो ब्राह्मणेभ्यो ऽन्येभ्यश्च दातुं समुत्सृ
जे तत्सन्न मम- ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

देव विसर्जनम् —

अभिषेक:

ॐ सर्वे समुद्रा: सरित स्तीर्थानि जलदा नदा: ।
आयान्तु यजमानस्य दुरित क्षयकारका: ।

द्यौ: शान्ति रन्तरिक्ष ँ शान्ति: पृथिवी शान्ति राप: शान्ति रोषधय: शान्ति: ॥ वनस्पतय: शान्ति र्विश्वेदेवा: शान्ति र्ब्रह्म शान्ति: सर्व ँ शान्ति: शान्ति रेव शान्ति: सा मा शान्ति रेधि ॥ तच्चक्षुर्देवहितं पुरस्ता च्छुक्र मुच्चरत् ॥ पश्येम शरद: शतं जीवेम शरद: शत ँ शृणुयाम शरद: शतं प्रब्रवाम शरद: शतमदीना: स्याम शरद: शतं भूयश्च शरद: शतात् ॥ स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति न स्तार्क्ष्यो ऽरिष्टनेमि: स्वस्ति नो बृहस्पति र्दधातु ॥ विश्वानि देव सवित र्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥

ॐ शान्ति रस्तु· पुष्टि रस्तु· वृद्धिरस्तु· यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहत मस्तु· द्विपदेभ्य श्चतुष्पदेभ्यः शान्ति र्भवतु· अमृताभिषेको ऽस्तु ॥

आशीर्वादमन्त्राः –

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽति व्याधी महारथो जायतां दोग्ध्री धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्धी र्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां न्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

दीर्घायुस्त ऽओषधे खनिता यस्मै च त्वा खनाम्यहम् । अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्वं वर्धयस्व सत्या नः सन्तु यजमानस्य कामाः ॥ मनसः काम माकूतिं वाचः सत्यमशीय । पशूनाꣳ रूप मन्नस्य रसो यशः श्रीः श्रयताम् ॥

23(ख)

इष्टो
रागाे

१५।

तुलादानम्।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम वर्षवृद्धौ
जन्मोत्सवकर्मणि सकलारिष्ट शान्तिपूर्वक दीर्घायुरारो
ग्यैश्वर्यादि प्राप्त्यर्थं विशेषतः कलियुग पर्यन्तं राज्य सुख प्राप्त्यर्थं आ
त्मसमतोलितं कर्पूरं गन्धर्व देवताकं आरोग्यार्थं आत्मसमतोलितं
ताम्रं अग्नि देवताकं दीर्घायुः प्राप्त्यर्थं आत्मसमतोलितं वस्त्रं बृहस्पति
देवताकं सुरूप प्राप्त्यर्थं आत्मसमतोलितं श्रीखण्डं गन्धर्व देवताकं ते
जोवृद्ध्यर्थं आत्मसमतोलितं घृतं सूर्य देवताकं सर्वकामसिद्ध्यर्थं
आत्मसमतोलितं दुग्धं समुद्र देवताकं एकादश प्रीतिकामेन कुङ्कु
मादि आत्मसमतोलितं मधु पक्षदेवताकं ब्रह्मलोक कामना
आत्मसमतोलितं तिलान् प्रजापति देवताकं वरप्राप्त्यर्थं आत्मसम
तोलितं तण्डुलान् प्रजापति देवताकं लावण्य प्राप्त्यर्थं आत्मसम
तोलितं लवणं समुद्र देवताकं प्रजापालन सामर्थ्यार्थं आत्मसमतो
लितं तैलं सोम देवताकं आरोग्यार्थं आत्मसमतोलितं गुडं दे
वताकं रोगोपशान्त्यर्थं आत्मसमतोलितं औषधं देवताकं सर्व
पाप प्रणाशनार्थं आत्मसमतोलितं गोधूमं विष्णु देवताकं नाना
सुगन्धिनानानाम गोत्रेभ्यो ब्राह्मणेभ्यो दातुं तुले समारुह्य
प्रार्थना।

कर्पूरः कदलीभूतो देवदेव प्रियः सदा।

भाग्योत्पन्नो नृपाणां च तद्दानात् पुष्टिमस्तु ते ॥ कर्पूर
यत्पवित्रं पैत्र्यन्यादे भक्ष्यत्वं च भक्षणाते ।
तत्प्रज्ञातं च यत्नाय ताम्रपात्रं प्रदाम्यहम् ॥ ताम्र

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ।
सुवेषधारि त्वं यस्माद्वासः शान्तिं प्रयच्छ मे ॥ वस्त्र
नन्दनावास मन्दार सर्वे वृन्दारकार्चित ।
चन्दन त्वत्प्रसादान्मे सान्द्रानन्दप्रदो भव ॥ श्रीखण्ड
कामधेनोः समुद्भूतं देवानां मुत्तमं हविः ।
आयुर्विवर्द्धनो पुंसा माज्यं पातु सदैव माम् ॥ घृत
अमृतस्य कलोत्पन्न इक्षुसद्रस शर्करेः ।
सर्वप्रीतिकरे नित्यं मतः शान्तिं प्रयच्छन ॥ शर्करा
यस्मात्पितृगणा श्राद्धेषु प्रियमस्य मृतोद्भव ।
तस्मात्तव प्रदानेन मम सन्तु मृतोऽव्ययाः ॥ मधु
तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानेन सर्वं मे पापं नाशय केशव ॥ तिल
पावनाः सर्वयज्ञेषु प्रशस्ता यज्ञकर्मणि ।
तस्मात्तण्डुलदानेन प्रीयन्तां विश्वदेवताः ॥ तण्डुल
रसानां सर्वेषां श्रेष्ठं लवणं बलवर्द्धनम् ।
ब्रह्मणा निर्मितं साक्षात्ततः शान्तिं प्रयच्छ मे ॥ लवण
तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् ।
अमङ्गलहरं पुंसां मतः शान्तिं प्रयच्छ मे ॥ तैल
यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ।
तथा रसानां प्रवरः सदैवेक्षु रसो मतः ॥ गुड

Satyapratap Valmeeki Campus, Kathmandu

यस्मादायसकर्माणि तवाधीनानि सर्वदा । लोह
लाङ्गलाद्यायुधादीनि ततः शान्तिं प्रयच्छमे ॥
कामधेनोः समुद्भूतं गोमयं पापनाशनम् ।
पवित्रं मङ्गलं यस्मादतः शान्तिं प्रयच्छमे ॥ गोमय.

दानप्रतिष्ठा.

अद्यकृतैतत् आत्मसम तोलित कर्पूर ताम्र वस्त्र औषध
घृत शर्करा मधु तिल तण्डुल लवण तैल गुड
लोह गोमय दानकर्मणः प्रतिष्ठार्थं इदं रजत चन्द्र
देवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्म
णेभ्यो यथा भागं विभज्य दातुं जले समुत्सृजे. तत्स
त न मम.

Kathmandu

ग्रहदानम्·

देवद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीरविक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सव कर्मणि·

जन्मलग्नात् ८ वर्षलग्नात् २ गोचरात् २ चन्द्र मासस्थितेन ज

न्मविंशोत्तरी दशायां पापि-चन्द्रान्त[illegible] दशा स्थितत्वारिष्ट

तेन चन्द्रग्रहेण सूचित सकलारिष्ट शान्तिपूर्वक दीर्घायु रारोग्यैश्वर्यो दयावाप्त्यर्थं चन्द्रग्रहप्रीतये· तण्डुलान् प्रजापति देवताकं· दधि सर्प देवताकं· कर्पूरं गन्धर्व देवताकं· वंशपात्रं विश्वकर्म देवताकं· श्वेतवस्त्रं बृहस्पति देवताकं· शङ्खं समुद्र देवताकं· रजतं चन्द्र देवताकं· मौक्तिकं समुद्र देवताकं· तथा·

जन्मलग्नात् २ वर्षलग्नात् १२ गोचरात् ४ भौम स्थितेषु

जन्मविंशोत्तरी दशायां मध्यान्तरे भावे भौमदशा स्थितेन भौम

ग्रहेण सूचित सकलारिष्ट पूर्वक दीर्घा

पुरारोग्यैश्वर्योदयावाप्तये भौमग्रहप्रीतये· गोधूमान् प्रजापति देवताकं· मसूरान् प्रजापति देवताकं· गुडं अग्निदेवताकं· ताम्रं सूर्य देवताकं· रक्तचन्दनं वनस्पति देवताकं· रक्तवस्त्रं बृहस्पति देवताकं· रक्तवृषभं रुद्र देवताकं· सुवर्णं वह्नि देवताकं· प्रवालं समुद्र देवताकं· तथा·

जन्मलग्नात् १२ वर्षलग्नात् ४ गोचरेण ८ स्थान स्थितेन बृहस्पति ग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये बृहस्पतिग्रह प्रीतये· धान्यं प्रजापति देवताकं· हरिद्रां वनस्पति देवताकं· शर्करां सोमदेवताकां· लवणं समुद्र देवताकं· पीतवस्त्रं बृहस्पति देवताकं· सुवर्णं वह्नि देवताकं· पुष्परागमणिं समुद्र देवताकं· तथा·

जन्मलग्नात् ७ वर्षलग्नात् सप्तमे शनि नामराशितो १० गोचर राशितः २ स्थान स्थितेन शनिग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये शनिग्रह प्रीतये· तिलान् सोमदेवताकान्· तैलं भैरव देवताकं· माषान्नं प्रजापति देवताकं· कुलत्थान्नं प्रजापति देवताकं· लोहं यमदेवताकं· नीलवस्त्रं बृहस्पति देवताकं· सुवर्णं वह्नि देवताकं· महिषीं यमदेवताकां· नीलमणिं समुद्र देवताकं· तथा·

Sanskrit Mahavidyalaya Valmeeki Campus, Kathmandu

योगिनी [illegible] दशायां [illegible] दशान्तर्दशा [illegible]
~~[illegible] पैरे [illegible] स्थितानां [illegible]~~

ग्रहाणां सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्यादि फला वाप्तये राहुग्रह प्रीतये। तिलान् सोम देवताकान्। तैलं भैरव देवताकम्। माषान् प्रजापति देवताकं। लोहं यम देवताकं। कृष्ण वस्त्रं बृहस्पति देवताकं। सुवर्णं वह्नि देवताकं। कृष्णमेषं वायु देवताकं। गोमेद रत्नं समुद्र देवताकं। तथा।

सर्वक [illegible] तान् ४ स्थानस्थितान् मुख्या योगिन्या सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्य फलावाप्तये मुख्या योगिनी प्रीतये। छत्रं मृत्युञ्जय देवताकं। मधु यक्ष देवताकं। शर्करं सोम देवताकं। ताम्रपात्रं विश्वकर्म देवताकं। पट्टवस्त्रं बृहस्पति देवताकं। सवत्सां सालङ्कारां गां रुद्र देवताकं। तथा योगिनी दशायां [illegible] ना [illegible] योगिन्या

सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्यादि फलावाप्तये ६२क२१ योगिनी प्रीतये। छत्रं मृत्युञ्जय देवताकं। मधु यक्ष देवताकं। शर्करं सोम देवताकं। ताम्रपात्रं विश्वकर्म देवताकं। पट्टवस्त्रं बृहस्पति देवताकं। सुवर्णं वह्नि देवताकं। सवत्सां सालङ्कारां गां रुद्र देवताकं। नाना नामगोत्रेभ्यो नाना नाम शर्मभ्यो ब्राह्मणेभ्यो दातुं अहं सम्प्रददे

तसन्त मम:

इमन्देवा असपत्नꣳ सुवद्ध्वं महते क्षेत्राय महते
ज्यैष्ठ्याय महते जान राज्या येन्द्र स्येन्द्र स्येन्द्रियाय।
इमम मुष्यपुत्र ममुष्यै पुत्रमस्यै विश एषवोऽमी
राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपाꣳ रेताꣳसि जिन्वति॥
बृहस्पते अतियदर्यो अर्हा द्युमद्विभाति क्रतुमज्ज
नेषु। यद्दीदयच्छवस ऋतप्रजात दस्मासु द्रवि
णं धेहि चित्रम॥
शन्नोदेवी रभिष्टय आपो भवन्तु पीतये।
शंयो रभि स्रवन्तु नः॥
कयानश्चित्र आभुवदूती सदावृधः सखा।
कयाशचिष्ठयावृता॥

अम्बे आम्बिके म्बालिके नमा नयाति कश्चन । ससस्त्य
श्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

दानप्रतिष्ठा.

अद्य कृतैतत चन्द्र भौम बृहस्पति इति एतद्
ग्रहशांकला प्रीतये तत्तद्द्रव्यदानकर्मणः प्रतिष्ठार्थे
इदं रजत चन्द्र देवताकं नाना नाम गोत्रेभ्यो नानानाम
शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं अहमु
त्सृजे. तत्सत् मम.

जपपाठादिसङ्कल्प.

देवद्रव्याय नमः एतत्र खण्डाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मेष राशेः देवेन्द्रवीर विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सव कर्मणि अशुभ स्थानस्थित ग्रहयोगैर्जनित सकलारिष्ट शान्तिपूर्वक शुभस्थानस्थिति जन्य शुभफल प्राप्तये

चन्द्रग्रहप्रीतये एकादश सहस्र संख्याक चन्द्र वैदिक मन्त्रजपकर्म अष्टोत्तराधिक शतावृत्ति चन्द्रस्तोत्र पाठ कर्म. तथा.

भौमग्रहप्रीतये दश सहस्र संख्याक भौम वैदिक मन्त्रजपकर्म अष्टोत्तराधिक शतावृत्ति भौम स्तोत्रपाठ कर्म. तथा.

बृहस्पतिग्रहप्रीतये एकोनविंशति सहस्र संख्याक बृहस्पति वैदिक मन्त्रजपकर्म अष्टोत्तराधिक शतावृत्ति बृहस्पति स्तोत्र पाठकर्म. तथा

शनिग्रह प्रीतये त्रयोविंशति संख्याक शनि वैदिक मन्त्र

जपकर्म अष्टोत्त्यधिक शताहुति शनि स्तोत्र पाठ कर्म: तथा

राहु ग्रह प्रीतये अष्टादश सहस्त्र संख्याक राहु वैदिक मन्त्र जपकर्म अष्टोत्त्यधिक शताहुति राहु स्तोत्र पाठ कर्म: तथा.

मुख्या योगिनी प्रीतये मन्त्र विंशति सहस्त्र संख्याक मुख्या वैदिक मन्त्र जपकर्म अष्टोत्त्यधिक शताहुति मुख्या स्तोत्र पाठ कर्म: तथा.

शङ्क:२। योगिनी प्रीतये सप्तविंशति सहस्त्र संख्याक
शङ्क:२। वैदिक मन्त्र जपकर्म अष्टोत्त्यधिक शताहुति
शङ्क:२। स्तोत्र पाठ कर्म: तथा.

अकाल मृत्यु निवारणार्थं मृत्युञ्जय देवता प्रीतये अद्यारभ्य आगामि जन्मोत्सव तिथि पर्यन्तं दश ब्राह्मणद्वारा एक कोटी संख्याक मृत्युञ्जय तान्त्रिक मन्त्र जप कर्म: तथा.

आयुरारोग्य वृद्ध्यै सदाशिव देवता प्रीतये अद्यारभ्य आगामी जन्मोत्सव दिन पर्यन्तं प्रतिदिन शत संख्याक पार्थिव लिङ्ग पूजन पूर्वकं एक सहस्त्र संख्याक मृत्युञ्जय वैदिक मन्त्र जपकर्म एकाहुति मृत्युञ्जय स्तोत्र पाठ कर्म: तथा.

नवग्रह प्रीतये नवग्रह पूजनपूर्वकं अद्यारभ्य आगामी जन्मोत्सवदिन पर्यन्तं प्रतिदिनं शत संख्याक नवग्रहस्तोत्रिक मन्त्र जपकर्म. तथा.

सर्वारिष्ट शान्ति द्वारा अल्पमृत्यु निवारण पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्री मृत्युञ्जय देवता प्रीतये अद्यारभ्य आगामी जन्मोत्सवदिवस पर्यन्तं प्रतिमुहूर्त पंचम्यां शतावृत्ति मृत्युञ्जय स्तोत्र पाठ कर्म. तथा.

सर्वसुख प्राप्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्री भद्रकाली देवता प्रीतये तन्मन्दिरे अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं शत्रुणगतेतिमन्त्रेण एकावृत्ति शप्तशती स्तोत्र संपुटित कर्म. तथा.

अशुभस्थान स्थित ग्रहयोगेनोत्पनित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्री महाकाल देवता प्रीतये तन्मन्दिरे अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकसहस्र संख्याक वैदिक मन्त्र जपकर्म. तथा.

सकल सम्पत्समृद्धि द्वारा सकलकामना सिद्धये अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं श्रीस्वेष्ट देवता प्रीतये प्रतिदिनं पञ्चाङ्ग पाठ सम्पादन कर्म च. तथा.

श्री महाकाली महालक्ष्मी महासरस्वती प्रसादात् सकल विघ्नबाधाभय निवृत्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदया

वाप्तये श्रीस्वेष्ट देवता प्रीतये अद्यारभ्य आगामी जन्मोत्सव पर्यन्तं प्रतिदिनं एकावृत्ति सप्तशती स्तोत्र पाठ कर्म। तथा।

साम्बसदाशिव देवता प्रीतये अद्यारभ्य आगामी जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकावृत्ति शतरुद्रिय मन्त्र पाठेनाभिषेक कर्म एकावृत्ति शिवसहस्रनाम स्तोत्र पाठ कर्म च। तथा।

सकलारिष्ट शान्तये अद्यारभ्य आगामी जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं अश्वत्थ वृक्षोपरि जलार्पण कर्म। तथा।

एतच्छरीरे दैहिकादिक नानाविध व्याधिप्रशमनपूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये काशीस्थ विश्वेश्वर देवता प्रीतये अद्यारभ्य आगामी जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकावृत्ति रुद्राध्याय पाठ कर्म विश्वेश्वर सम्पूजन कर्म च। तथा।

विविधविभ्रान्तेर्नैरूप्योदय [redacted] अल्पमृत्यु निवारण पूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये श्री अल्पमृत्युहरेश्वर देवता प्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं श्री अल्पमृत्युहरेश्वर सम्पूजन दधि चिपिटान्न समर्पण पुरःसरं एकावृत्ति रुद्राध्याय पाठ कर्म। तथा।

आयुरारोग्य वृद्ध्यर्थं वैद्यनाथ देवता प्रीतये ब्राह्मणानीत गङ्गाजलेनाभिषेक पूर्वकं रुद्राध्याय

पाठकर्म सम्पूजन कर्मच. तथा. ।

मृत्युञ्जय देवता प्रीतये एकावृत्ति मृत्युञ्जय स्तोत्र पाठ कर्म. गणेश देवता प्रीतये एकावृत्ति गणेश सहस्रनाम स्तोत्र पाठ कर्म. सूर्य देवता प्रीतये एकावृत्ति आदित्यहृदय स्तोत्र पाठ कर्म. विष्णु देवता प्रीतये एकावृत्ति विष्णुसहस्रनाम स्तोत्र पाठ कर्म. शिवदेवता प्रीतये एकावृत्ति शान्तिकाध्याय पाठ कर्मच. तथा.

श्री साम्ब सदाशिवदेवता प्रसन्ना दीर्घायुरारोग्यैश्वर्यै श्वर्यानन्दादि शुभफलावाप्तये ब्राह्मण द्वारा अविच्छिन्न जलधारया शतरुद्रिय मन्त्रै लघु रुद्राध्याय पाठ कर्म. तथा.

श्री महाकाली महालक्ष्मी महासरस्वती देवता प्रसादात् भूतप्रेत पिशाचादि जनित विघ्नबाधाभयनिवृत्ति पूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये नवब्राह्मण द्वारा नवावृत्ति सप्तशति स्तोत्र पाठकर्म करिष्ये. तथा.

सर्व सुख लक्ष्मी प्राप्त्यर्थ श्री बगलामुखी देवता प्रीतये अष्टाधिक मा
ज्ञानी जन्मोत्सव पर्वनां प्रतिदिनं बगलामुखी स्तोत्र पाठक
र्म तथा बगलामुखी मन्त्र जप कर्मच. तथा
आरोग्यार्थे आदित्य नाथ प्रीतये [illegible] आगामीत
वर्ष पर्वनां प्रतिदिनं आदित्य हृदय पाठ कर्म. तथा

सर्वेषां हिन्दूनां [illegible] आगामीजन्मे मम पुत्रैः
प्रीतिं सारित सद्गुणानां चाहि कर्म कार्ये.
कोऽपि नाथ तत्र जप पाठ करोति: आज्ञे. वासि [illegible]
लोके चन्द्रदत्ताय नानानाम गोत्रस्य नानानाम [illegible]
[illegible] पचास भागं विभज्य [illegible] समर्प्य [illegible]
[illegible]:

सर्वौषधिदानम्.

देयद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीरविक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सवदिवसे सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये सकलारिष्टशान्तये तिलान् सोम देवताकान् ताम्रपात्रं विश्वकर्म देवताकं सालङ्कारं रुद्र देवताकं ····· गोत्राय ····· शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

प्रार्थना.

यानि कानि च पापानि जन्मान्तर कृतानि च।
तिलपात्र प्रदानेन तानि नश्यन्तु मे सदा॥
कपिले सर्व देवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मा तस्माच्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा.

अद्य कृतैतत् तिल सुवर्ण ताम्रपात्र सालङ्कारगोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्र देवताकं ····· गोत्राय शर्मणे ब्राह्मणाय सम्प्रददे. तत्सन्मम.

पृष्ठं — ध्वनु ९३

(23)

The ELEPHANT EXERCISE BOOK

MADE FROM
ELEPHANT BRAND PAPER
MANUFACTURED IN INDIA BY
THE TITAGHUR PAPER MILLS CO., LTD.
CALCUTTA



*Name*____________________ *Class*________

*Subject*____________________

तुलादानम्·

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीर विक्रम वर्मा अहं मम· वर्षवृद्धौ जन्मोत्सव कर्मणि सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्ये श्वर्योदयावाप्तये श्रीपरमेश्वर प्रीतये आत्मसमतोलितं कर्पूरं गन्धर्व देवताकं· आत्मसमतोलितं वस्त्रं बृहस्पति देवताकं· आत्मसमतोलितं श्रीखण्ड गन्धर्व देवताकं· आत्मसमतोलितं घृतं मृत्युञ्जय देवताकं· आत्मसमतोलितां शर्करां समुद्र देवताकां· आत्मसमतोलितं मधु यक्ष देवताकं· आत्मसमतोलितं तिलान् प्रजापति देवताकं· आत्मसमतोलितं तण्डुलान् प्रजापति देवताकं· आत्मसमतोलितं लवणं समुद्र देवताकं· आत्मसमतोलितं तैलं भैरव देवताकं· आत्मसमतोलितं गुडं अब्देवताकं· आत्मसमतोलितं लोहं यम देवताकं· आत्मसमतोलितं गोमयं विघ्न देवताकं· नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो दातुं जले समुत्सृजे· तत्सन्त मम·

प्रार्थना·

कर्पूरः कदलीभूतो देवदेवप्रियः सदा ।
मार्गणानां नृपाणां च तद्दानात्सुखमस्तु ते ॥

ग्रहदानम्

देयद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रमवर्मा अहं मम · वर्षवृद्धौ जन्मोत्सवकर्मणि ·

जन्मलग्नात् ८ वर्षलग्नात् ५ गोचरात् २ स्थान स्थितेन चन्द्रग्रहेण सूचित सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये चन्द्रग्रहप्रीतये · तण्डुलान् प्रजापतिदेवताकं · दधि सर्पदेवताकं · कर्पूरं गन्धर्वदेवताकं · वंशपात्रं विश्वकर्मदेवताकं · श्वेतवस्त्रं बृहस्पतिदेवताकं · शङ्खं समुद्रदेवताकं · रजतं चन्द्रदेवताकं · मौक्तिकं समुद्रदेवताकं · तथा ·

जन्मलग्नात् २ वर्षलग्नात् १२ गोचरात् ६ स्थान स्थितेन भौमग्रहेण सूचित सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये भौमग्रहप्रीतये · गोधूमान् प्रजापतिदेवताकं · मसुरान् प्रजापतिदेवताकं · गुडं अग्निदेवताकं · ताम्रं सूर्यदेवताकं · रक्तचन्दनं वनस्पतिदेवताकं · रक्तवस्त्रं बृहस्पतिदेवताकं · रक्तवृषभं रुद्रदेवताकं · सुवर्णं वह्निदेवताकं · प्रवालं समुद्रदेवताकं · तथा ·

जन्मलग्नात् ११ वर्षलग्नात् ११ गोचरात् ३ स्थानस्थितेन बुधग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्यो दयावाप्तये बुधग्रह प्रीतये· मुद्गान्नं प्रजापति देवताकं· घृतं मृत्युञ्जय देवताकं· काञ्चनपात्रं विश्वकर्म देवताकं· हस्तिदन्तो विष्णु देवताकं· नील वस्त्रं बृहस्पति देवताकं· सुवर्णो वाहृ देवताकं· पञ्चरत्नं समुद्र देवताकं· तथा·

जन्मलग्नात् १२ वर्षलग्नात् ९ गोचरात् ४ स्थानस्थितेन बृहस्पति ग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायु रारोग्यैश्वर्यो दयावाप्तये बृहस्पति ग्रह प्रीतये· धान्यं प्रजापति देवताकं· हरिद्रा वनस्पति देवताकं· शर्करां सोम देवताकां· लवणं समुद्र देवताकां· पीतवस्त्रं बृहस्पति देवताकं· सुवर्णं वाहृ देवताकं· पुष्पमालां समुद्र देवताकं· तथा।

६

जन्मलग्नात् १ वर्षलग्नात् ४ गोचरात् १२ स्थानस्थितेन शनिग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायु रारोग्यैश्वर्योदयावाप्तये शनिग्रह प्रीतये· तिलान् सोम देवताकान्· तैलं भैरव देवताकं· माषान्नं प्रजापति देवताकं· कुलत्थान् प्रजापति देवताकं· लोहं यम देवताकं· नीलवस्त्रं बृहस्पति देवताकं· सुवर्णं वाहृ देवताकं· महिषीं यमदे

वताकं· नीलमणीं समुद्रदेवताकं· तथा·
जन्मलग्नात् ३ वर्षलग्नात् १० गोचरात् ४ स्थानस्थि
तेन राहुग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घा
युरारोग्यैश्वर्योदयावाप्तये राहुग्रह प्रीतये· तिलान् सो
मदेवताकान्· तैलं भैरव देवताकं· माषान्नं प्रजापति दे
वताकं· लोहं यम देवताकं· कृष्णवस्त्रं बृहस्पति देवताकं·
सुवर्णं वह्नि देवताकं· कृष्णमेषं वायु देवताकं· गोमेद र
त्न समुद्रदेवताकं· तथा·
जन्मलग्नात् ६ वर्षलग्नात् ४ गोचरात् ११ स्थानस्थि
तेन केतुग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घा
युरारोग्यैश्वर्योदयावाप्तये केतुग्रह प्रीतये· तिलान् सो
मदेवताकान्· तैलं भैरव देवताकं· माषान्नं प्रजापति दे
वताकं· लवणं समुद्र देवताकं· खड्गं भैरव देवताकं· धू
म्रवस्त्रं बृहस्पति देवताकं· अजं वह्नि देवताकं· सुवर्णं
वह्नि देवताकं· वैदर्यमणिं समद्र देवताकं· तथा
वर्ष लग्नात् ९ मुन्था योगिन्या सू
चित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदया
वाप्तये मुन्था योगिनी प्रीतये· घृतं मृत्युञ्जय देवता
कं· मधु यम देवताकं· शाकं सोम देवताकं· ताम्रपा

ॐ ~~तथा सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयार्थं प्रे~~
~~[illegible] नानो गो: [illegible] द्रव्यमंव~~ ·
ॐ योगिनी दशापां अन्तरे [illegible] ~~कोमिन्या~~

ॐ विश्वकर्म दैवताकं · पद्मवरुण्द बृहस्पति दैवताकं सुवर्णाग्नि दैवताकं · सवत्सां सालङ्कारां गां रुद्र दैवताकां

नानानामगोत्रेभ्यो नाना नामशर्मभ्यो ब्राह्मणेभ्यो दातुं जले समुत्सृजे · तत्सन्न मम ·

प्रार्थना ·

इमन्देवा असपत्न ँ सुवध्वं महते क्षेत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ।
इमम मुष्य पुत्र ममुष्यै पुत्र मस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणाना ँ राजा ॥
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपा ँ रेता ँ सि जिन्वति ॥
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते स ँ सृजेथामयञ्च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥
बृहस्पतये अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शंयोरभिस्रवन्तु नः ॥

॰॰ ~~कपिले सर्व देवानां पूजनीयासि रोहिणि।~~
~~तीर्थ देवमयी यस्मात स्वच्छान्तिं प्रयच्छते~~ ।।

कयानश्चित्र आ भुवदूती सदावृधः सखा।
कया शचिष्ठ या वृता ।।
कतुं कृण्वन्न केतवे पेशो मर्या अपेशसे ।
समुषद्भिरजायथा ।।
अम्बे अम्बिके म्बालिके न मा नयति कश्चन ।।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।। ॰॰

दान प्रतिष्ठा॰

अद्य कृतैतत्॰ चन्द्र॰ भौम॰ ~~बुध~~॰ बृहस्पति॰ शनि॰ राहु॰ केतु॰ गृन्मा शुक्र प्रीतये तत्तद्द्रव्य दान कर्मणः प्रतिष्ठार्थं इदं रजत चन्द्र देवताकं नानानाम गोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुं जातो समुत्सृजे॰ तत्सन्न मम॰

जपपाठादि सङ्कल्प ।

देवद्रव्याय नमः   एजात खराडाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सवकर्मणि अशुभस्थानास्थितग्रह योगिनीजनित सकलारिष्ट शान्ति पूर्वक शुभस्थाना स्थिति जन्य शुभफल प्राप्तये ।

चन्द्रग्रह प्रीतये एकादश सहस्र संख्याक चन्द्र वैदिक मन्त्र जपकर्म अशीत्यधिक शतावृत्ति चन्द्रस्तोत्र पाठकर्म । तथा ।

भौमग्रह प्रीतये दश सहस्र संख्याक भौम वैदिक मन्त्र जपकर्म अशीत्यधिक शतावृत्ति भौम स्तोत्र पाठकर्म । तथा ।

बुधग्रह प्रीतये अष्ट सहस्र संख्याक बुध वैदिक मन्त्र जपकर्म अशीत्यधिक शतावृत्ति बुधस्तोत्र पाठकर्म । तथा ।

बृहस्पति ग्रह प्रीतये एकोन विंशति सहस्र संख्याक बृहस्पति वैदिक मन्त्र जप कर्म अशीत्यधिक शतावृत्ति बृहस्पति स्तोत्र पाठकर्म । तथा ।

शनि ग्रह प्रीतये त्रयोविंशति सहस्र संख्याक शनि वैदिक मन्त्र जप कर्म अशीत्यधिक शतावृत्ति शनि स्तोत्र पाठकर्म । तथा ।

राहु ग्रह प्रीतये अष्टादश सहस्र संख्याक राहु वैदिक मन्त्र जपकर्म अशीत्यधिक शतावृत्ति राहु स्तोत्र पाठकर्म । तथा ।

तथा ~~[illegible]~~ डाकिनी योगिनी प्रीतये चतुःसहस्र संख्याक भ्रामरी वैदिक मन्त्रजपकर्म. तथा.

केतुग्रह प्रीतये सप्तसहस्र संख्याक केतुवैदिक मन्त्रजपकर्म अशीत्यधिकशतावृत्ति केतु स्तोत्र पाठकर्म. तथा.

सुषुम्ना योगिनी प्रीतये सप्तविंशति सहस्र संख्याक सुषुम्ना वैदिक मन्त्र जप कर्म अशीत्यधिकशतावृत्ति सुषुम्ना स्तोत्र पाठकर्म. तथा.

अकालमृत्यु निवारणार्थं मृत्युञ्जय देवता प्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं दश ब्राह्मण द्वारा कोटी संख्याक मृत्युञ्जय तान्त्रिक मन्त्र जप कर्म. तथा.

आयुरारोग्य वृद्धये सदाशिव देवता प्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं शत संख्याक पार्थिव लिङ्ग पूजन पूर्वकं एक सहस्र संख्याक मृत्युञ्जय वैदिक मन्त्र जपकर्म एकावृत्ति मृत्युञ्जय स्तोत्र पाठकर्म. तथा.

सकलारिष्ट शान्त्यर्थं नवग्रह प्रीतये नवग्रह पूजन पूर्वकं अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्त प्रतिदिनं शत संख्याक नवग्रह तान्त्रिक मन्त्र जप कर्म. तथा.

सर्वारिष्ट शान्ति द्वारा अल्पमृत्यु निवारण पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीमृत्युञ्जय देवता प्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं प्रतिशुक्ल पंचम्यां शतावृत्ति मृत्युञ्जय स्तोत्र पाठ कर्म. तथा.

सर्व सुखावाप्ति पूर्वक दीर्घायु एरोग्यैश्वर्योदयावाप्तये श्रीभद्रकाली देवता प्रीतये तन्मन्दिरे अद्यारभ्य आगामि जन्मोत्सव पर्यन्तं प्रतिदिनं शरणागतेति मन्त्रेण संपूटीत एकावृत्ति दु प्तशति स्तोत्र पाठ कर्म. तथा.

अशुभ स्थानस्थित ग्रह योगिनीजनित सकल रिष्ट शान्ति पूर्वक दीर्घायु एरोग्यैश्वर्योदयावाप्तये श्रीमहाकाल देवताप्रीतये तन्मन्दिरे अद्यारभ्य आगामि जन्मोत्सव पर्यन्तं प्रतिदिनं एक सहस्र संख्याक वैदिक मन्त्र जप कर्म. तथा.

सकल सम्पत्समृद्धि द्वारा सकल कामना सिद्धये श्री स्वेष्ट देवता प्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं पञ्चाङ्ग पाठ कर्म सम्पूजन कर्म. तथा.

श्री महाकाली महालक्ष्मी महासरस्वति प्रसादात् सकल बिघ्नबाधाभय निवृत्ति पूर्वक दीर्घायु एरोग्यैश्वर्योदयावाप्तये श्री स्वेष्ट देवता प्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकावृत्ति सप्तशति स्तोत्र पाठ कर्म. तथा.

साम्ब सदाशिव देवता प्रीतये आयु एरोग्य वृद्ध्यर्थं अद्यारभ्य आगामी जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकावृत्ति शतरुद्रिय मन्त्र पाठेनाभिषेक कर्म एकावृत्ति शिव सहस्र

नामस्तोत्र पाठकर्म. तथा.

+ नानाविध व्याधिप्रसमन पूर्वक दीर्घायु आरोग्यैश्वर्योदयावाप्तये श्री सूर्य देवता प्रीतये अद्यारभ्य आगामीजन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकावृत्ति आदित्यहृदय स्तोत्र पाठ कर्म. तथा.

सर्वसुखावाप्तिपूर्वक सकलकामना सिद्ध्ये श्री ललितादेवीप्रीतये अद्यारभ्य आगामी जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकावृत्ति ललितासहस्रनाम स्तोत्र पाठकर्म. तथा.

सकलारिष्ट शान्तये अद्यारभ्य आगामी जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं अश्वत्थ वृक्षोपरि जलार्पणकर्म. तथा.

एतत्स्थूलदेहाधिकरणक नानाविध व्याधि प्रसमन पूर्वक दीर्घायु आरोग्यैश्वर्योदयावाप्तये काशीस्थ विश्वेश्वर देवता प्रीतये अद्यारभ्य आगामी जन्मोत्सव दिवस पर्यन्तं प्रतिदिनं एकावृत्ति रुद्राध्याय पाठकर्म विश्वेश्वर सम्पूजन कर्म. तथा.

विविध विपत्ति नैरुज्योदय अल्पमृत्यु निवारण पूर्वक दीर्घायु आरोग्यैश्वर्योदयावाप्तये काशीस्थ श्री अल्पमृत्यु हरेश्वर देवता प्रीतये अद्यारभ्य आगामीजन्मोत्सव दिवस पर्यन्तं प्रतिदिनं श्री अल्पमृत्युहरेश्वर सम्पूजन दीर्घ

चिपदान्ना समर्पण पुरःसरं एकादशिनी रुद्राध्याय पाठकर्म· तथा·

आयुरारोग्य वृद्ध्यर्थं वैद्यनाथ देवता प्रीतये ब्राह्मणानीतगङ्गाजलेनाभिषेकपूर्वकं रुद्राध्याय पाठकर्म सम्पूजन कर्म· तथा·

श्रीसाम्ब सदाशिव देवता प्रसादाद्दीर्घायुरारोग्यैश्वर्यानन्दादिशुभफलावाप्तये ब्राह्मणद्वारा अविच्छिन्नजलधारया शतरुद्रिय मन्त्रै लघुरुद्राध्याय पाठकर्म· तथा·

श्री महाकालि महालक्ष्मी महासरस्वती देवता प्रसादाद्भूतप्रेत पिशाचादि जनित विघ्नबाधा भय निवृत्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये नव ब्राह्मणद्वारा नवावृत्ति शप्तशति स्तोत्र पाठ कर्म· तथा·

मृत्युञ्जय देवता प्रीतये एकादशिनी मृत्युञ्जय स्तोत्र पाठ कर्म· तथा·

गणेश देवता प्रीतये एकादशिनी गणेश सहस्रनाम स्तोत्र पाठकर्म· तथा·

सूर्य देवता प्रीतये एकादशिनी आदित्य हृदय स्तोत्र पाठकर्म· तथा·

विष्णु देवता प्रीतये एकादशिनी विष्णु सहस्रनाम

स्तोत्र पाठ कर्म. तथा.

शिवदेवताप्रीतये एकावृत्ति शान्तिकाध्याय पाठ कर्म करिष्ये.

करिष्यमाण तत्तज्जप पाठादि कर्मणः साङ्गता सिद्धये इदं रजतं चन्द्रदेवताकं नाना नाम गोत्रेभ्यो नाना नाम शर्मभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुं जले समुत्सृजे. तत्सन्न मम.

सर्वौषधि दानम्·

देयद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीर विक्रम वर्मा अहं मम· वर्षवृद्धौ जन्मोत्सवदिवसे दीर्घायुरारोग्यैश्वर्यादयावाप्तये तिलान् सोमदेवताकान् ताम्रपात्रं विश्वकर्मदेवताकं पट्टवस्त्रं वृहस्पति देवताकं सुवर्णं वह्निदेवताकं प्रवालं समुद्र देवताकं सालङ्करणं गां रुद्र देवताकां …… गोत्राय …… शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे·

प्रार्थना

यानि कानिच पापानि जन्मान्तर कृतानि च ।
तिलपात्र प्रदानेन तानि नश्यन्तु मे सदा ॥
कपिले सर्व देवानां पूजनीयासि रोहिणी ।
तीर्थ देवमयी यस्मात्तस्माच्छान्तिं प्रयच्छमे ॥

दानप्रतिष्ठा

अद्य कृतैतत् तिल· ताम्रपात्र· पट्टवस्त्र· सुवर्ण· प्रवाल· सालङ्कृत गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्र देवताकं …… गोत्राय …… शर्मणे ब्राह्मणाय सम्प्रददे· तासन्नामम

(६६)

नम्बर २४

Swan

32 Pages.

	नाम	मैन्हा	पक्ष	तिथी
श्री ५ महाराजाधिराज पृथ्वीवीर विक्रम	ऐंद्र प्रताप वीर विक्रम	पौष	कृष्ण	षष्ठी
श्री ५ वलिहृद महाराज त्रैलोक्यवीर विक्रम	दुलकवीर विक्रम	चैत्र	कृष्ण	द्वादशी
श्री ५ वडामहारानी	ललित कुमारी देवी	मार्ग	शुक्ल	तृतीया
श्री ५ मुमा जेठा वडामहारानी	रेवति रमण राज्यलक्ष्मी देवी	वैशाख	शुक्ल	त्रयोदशी
श्री ५ मुमा साहीला वडामहारानी	कीर्ती दिव्येश्वरी देवी	भाद्र	शुक्ल	द्वितीया
श्री ५ मुमा कान्छा वडामहारानी	दुर्गा दिव्येश्वरी देवी	कार्तीक	कृष्ण	द्वादशी
श्री ५ मुमानु सर्कार	गुञ्जेश्वरी देवी	फाल्गुण	शुक्ल	एकादशी
श्री ५ मुमा माहीला रानी साहेव	नन्द कुमारी देवी	मार्ग	शुक्ल	त्रयोद
श्री ५ मुमा साहीला रानी साहेव	कमला देवी	भाद्र	कृष्ण	अमावा
श्री ५ माहीला रानी साहेव	चंपा देवी	माघ	शुक्ल	द्वादशी
श्री ५ साहीला रानी साहेव	पूर्णमाया देवी	जेष्ठ	शुक्ल	दशमी
श्री ठुला राजा	राजवीक्रम	वैशाख	कृष्ण	एकादशी

श्री ५ मुमा वडामहारानी —— लक्ष्मी दिव्येश्वरी देवी
श्री ५ जिज्यू मुमा वडामहारानी —— ललित कुमारी देवी
श्री ५ वडा जिज्यू मुमा वडामहारानी —— त्रैलोक्य राज्यलक्ष्मी देवी

	साल	मैन्हा	पक्ष	तिथी	नक्षत्र	राशि	लोकप्रसिद्ध नाम:	चिन्हाको नाम
श्री ५ महाराजाधिराज	६३	आषाढ	शुक्ल	नवमी	चित्रा	कन्या	श्री त्रिभुवन वीर विक्रम	पेसलेन्द्र विर विक्रम
श्री ५ मुमा वडा महारानी	३४	आश्विन	कृष्ण	तृतीया	अश्विनी	मेष	श्री लक्ष्मी दिव्यश्वरी	
श्री ५ जेठा वडा महारानी	६३	श्रावण	कृष्ण	तृतीया	श्रवण	मकर	श्री खड्ग राज्यलक्ष्मी	
श्री ५ कान्छा वडा महारानी	६४	आश्विन	कृष्ण	पञ्चमी	कृत्तिका	वृष	श्री ईश्वरी राज्यलक्ष्मी	
श्री ५ युवराजाधिराज	७७	आषाढ	कृष्ण	दशमी	रेवती	मीन	श्री महेन्द्र वीर विक्रम	देववीर विक्रम
श्री ५ माहिला युवराज	७८	आश्विन	शुक्ल	एकादशी	धनेष्ठा	कुम्भ	श्री हिमालय प्रताप वीर विक्रम	गुणसागर विर विक्रम
श्री ५ कान्छा युवराज	७८	मार्ग	कृष्ण	एकादशी	हस्ता	कन्या	श्री वसुन्धरा प्रताप वीर विक्रम	पूर्णचन्द्र वीर विक्रम
श्री ५ जेठा साहज्यादी	७९	मार्ग	शुक्ल	तृतीया	मूल	धन	श्री यशो राज्यलक्ष्मी	त्रैलोका राज्यलक्ष्मी
श्री ५ माहिला साहज्यादी	८१	आश्विन	कृष्ण	एकादशी	तिष्य	कर्कट	श्री होमसां राज्यलक्ष्मी	नेपाल राज्यलक्ष्मी
श्री ५ साहिला साहज्यादी	८२	भाद्र	शुक्ल	पञ्चमी	चित्रा	कन्या	श्री विजय राज्यलक्ष्मी	पोषक राज्यलक्ष्मी
श्री ५ कान्छा साहज्यादी	८४	फाल्गुण	कृष्ण	एकादशी	मूल	धन	श्री भीम राजराजेश्वरी	
श्री ५ मुमा सानु महारानी	३३	भाद्र	शुक्ल	तृतीया	हस्ता	कन्या		
श्री ५ मुमा जेठा रानी साहेव	३६	श्रावण	शुक्ल	चतुर्दशी	उत्तराषाढ	मकर		
श्री ५ मुमा कान्छा रानी साहेव	४७	मार्ग	शुक्ल	एकादशी	अश्विनी	मेष		
० श्री जेठा मैञा साहेव	८०	जेष्ठ	शुक्ल	द्वितीया	रोहिणी	वृष	श्री बुद्धिप्रीय राज्यलक्ष्मी	राजेश्वरी राज्यलक्ष्मी
श्री माहिला मैञा साहेव	८०	पौष	शुक्ल	दशमी	कृत्तिका	मेष	श्री अनन्त राज्यलक्ष्मी	अचल राज्यलक्ष्मी
० श्री साहिला मैञा साहेव	८१	भाद्र	कृष्ण	द्वादशी	पुनर्वसु	मिथुन	श्री हरि प्रीय राज्यैश्वर्यदेवी	कुसुम राज्यलक्ष्मी
० श्री काहिला मैञा साहेव	८३	आषाढ	शुक्ल	द्वितीया	तिष्य	कर्कट	श्री जय राज्यलक्ष्मी	उमाहरप्रिय राज्यलक्ष्मी
श्री कान्छा मैञा साहेव	८४	चैत्र	शुक्ल	द्वादशी	पूर्वाफाल्गुनी	सींह	श्री टीका राज्यलक्ष्मी	उज्वल राज्यलक्ष्मी
श्री दुलही रानी साहेव	६१	फाल्गुण	कृष्ण	चौथी				

	वार	साल	महिना	पक्ष	तिथी	नक्षत्र	राशी	लोकप्रसिद्धनाम	चीनाको नाम.
श्री ५ महारानी	शुक्र	८१	श्रावण	कृष्ण	दशमी	कृत्तिका	वृष		इश्वरीदिव्येश्वरी देवी.
श्री ५ नातिनी साहज्यादी		६८	मार्ग	शुक्ल	द्वितीया	जेष्ठा	वृश्चिक	श्रीशान्ति राज्यलक्ष्मी	प्रकाराज्यलक्ष्मी
श्री ५ माहिला नातिनी साहज्यादी	रवि	६९	माघ	शुक्ल	तृतीया	पूर्वभाद्र	मीन		दिव्य राज्यलक्ष्मी.
श्री ५ नाति साहज्यादा								राजवीर विक्रम	रघुराजवीर विक्रम
श्री ५ माहिला नाति साहज्यादा									
श्री ५ माहिला महारानी	सोम	६७	चैत्र	कृष्ण	त्रयोदशी	धनिष्ठा	कुम्भ		गेदराजलक्ष्मी
श्री ५ कान्छा महारानी	बुध	८९	आश्विन	कृष्ण	सप्तमी	रोहिणी	वृष		पुष्प राजलक्ष्मी
श्री ५ नातिनी साहज्यादी									
श्री ५ माहिला नातिनी साहज्यादी									

	साल	महिना	पक्ष	तिथी	नक्षत्र	राशि	चिनाको नाम	लोकव्यवहारिक नाम
श्री ५ महाराजाधिराज —	७७	आषाढ	कृष्ण	दशमी	रेवती	मीन	देवेन्द्रवीर विक्रम	महेन्द्रवीर विक्रम.
श्री ५ मुमा जेठा बडामहारानी —	६२	श्रावण	कृष्ण	तृतीया	श्रवण	मकर		कान्ति राज्य लक्ष्मी.
श्री ५ मुमा कान्छा बडामहारानी —	६४	आश्विन	कृष्ण	पञ्चमी	कृत्तिका	वृष		ईश्वरी राज्य लक्ष्मी.
श्री ५ बडामहारानी —	८५	श्रावण	शुक्ल	चतुर्थी	हस्ता	कन्या	पोष राज्य लक्ष्मी.	रत्न राज्य लक्ष्मी
श्री ५ युवराजाधिराज —	०२	पौष	कृष्ण	दशमी	चित्रा	तुला	ध्रुववीर विक्रम	वीरेन्द्रवीर विक्रम.
श्री ५ माहिला अधिराजकुमार —	०४	श्रावण	कृष्ण	पंचमी	शतभिषा	कुंभ	लोकेन्द्रवीर विक्रम	ज्ञानेन्द्रवीर विक्रम.
श्री ५ कान्छा अधिराजकुमार —	०६	पौष	शुक्ल	पूर्णिमा	आर्द्रा	मिथुन	छत्रराजवीर विक्रम	धीरेन्द्रवीर विक्रम.
श्री ५ जेठा साहज्यादि —	९८	मार्ग	शुक्ल	द्वितीया	ज्येष्ठा	वृश्चिक	पुष्प राज्य लक्ष्मी	शान्ति राज्य लक्ष्मी.
श्री ५ माहिला साहज्यादि —	९९	माघ	शुक्ल	तृतीया	पूर्वभाद्र	मीन	दिव्य राज्य लक्ष्मी	शारदा राज्य लक्ष्मी
श्री ५ कान्छा साहज्यादि —	०५	पौष	शुक्ल	चतुर्दशी	आर्द्रा	मिथुन	धन राज्य लक्ष्मी	शोभा राज्य लक्ष्मी.
श्री ५ माहिला अधिराजकुमार —	७८	आश्विन	शुक्ल	एकादशी	धनिष्ठा	कुम्भ	गुणसागरवीर विक्रम	हिमालयप्रतापवीर विक्रम
श्री ५ माहिला महारानी —	८७	चैत्र	कृष्ण	त्रयोदशी	धनिष्ठा	कुम्भ	गेह राज्य लक्ष्मी	
श्री ५ कान्छा अधिराजकुमार —	७८	कार्तिक	कृष्ण	एकादशी	हस्ता	कन्या	पूर्णचन्द्रवीर विक्रम	वसुन्धराप्रतापवीर विक्रम
श्री ५ कान्छा महारानी —	८६	आश्विन	कृष्ण	सप्तमी	रोहिणी	वृष	कुबेर राज्य लक्ष्मी	
श्री ५ जेठा साहज्यादे —	०२	श्रावण	शुक्ल	सप्तमी	स्वाति	तुला	रूपेश्वरी राज्य लक्ष्मी	
श्री ५ माहिला साहज्यादी —	०४	पौष	शुक्ल	तृतीया	शतभिषा	कुम्भ	गोदेश्वरी राज्य लक्ष्मी	
श्री ५ कान्छा साहज्यादे —	१०	आषाढ	शुक्ल	षष्ठी	उत्तराफाल्गुनी	कन्या	पीताम्बरा राज्य लक्ष्मी	
श्री चैना साहेब	११	मार्ग	कृष्ण	एकादशी	उत्तराफाल्गुनी	कन्या	ज्योतिवरवर.	
श्री ५ माहिला साहज्यादी —	८२	भाद्र	शुक्ल	पञ्चमी	ज्येष्ठा	कन्या	पोषक राज्य लक्ष्मी	विजय राज्य लक्ष्मी

श्रीमद्भागवतसप्ताह पूजाविधिः

प्रतिज्ञासङ्कल्प.

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम काश्यपगोत्रायाः ...... देव्याः जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघु गुरु समस्त पापनिरशन पुरःसरं विष्णोः सायुज्य मुक्ति फलावाप्तये सप्ताहे श्रीमद्भागवत श्रवणं परिक्षित ब्राह्मण द्वारा श्रवणं करिष्ये. तत्पूर्वाङ्गतया दीप कलश गणेश मातृका संपूजनं आभ्युदयिकानुकल्प गोदानं गृहवास्तु मण्डप देवता सम्पूजनं ब्राह्मण वरणं पुण्याहवाचनं च स्वयं ब्राह्मण द्वारा करिष्ये.

ततो मण्डपं त्रिः परिक्रम्य. मण्डपं प्रविशेत्.

प्रायश्चित्त गोदानम्.

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूत रजत द्रव्याय नमः

नमो ब्रह्मण्यदेवाय गोब्राह्मण हिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणवरणम्:

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम श्री परमेश्वर प्रीति पूर्वक श्रौत स्मार्त पुराणोक्त फलावाप्तये सप्ताहे करिष्यमाण श्रीमद्भागवत श्रवण कर्मणि पूर्वकर्तव्य

नियमाना चरणजन्य प्रत्यवाय परिहार पूर्वकं सद्योदेह शुद्धिद्वारा तत्कर्माधिकार सिद्धये प्रायश्चित्त प्रत्याम्नायी भूतं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थ देवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्य कृतैतत् प्रायश्चित्त प्रत्याम्नायी भूत गोनिष्क्रय रजत दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे. तत्सन्नमम.

ब्राह्मण वरण

वरणद्रव्याय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ..... देवी अहं मम काश्यपगोत्रायाः ...... देव्याः जन्मजन्मान्तरीयकायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघु गुरु समस्त पापनिशनपुरःसरं विष्णो सायुज्य मुक्ति फलावाप्तये सप्ताहः श्रीमद्भागवत श्रवण कर्मणि तत्पूर्वाङ्गत्वेन निर्विघ्नता सिद्धये दीप कलश गणेश मातृका संपूजन नान्दीश्राद्धानुकल्पगोदानं ग्रहवास्तु मण्डपदेवता संपूजन ध्वजापताकोच्छ्रयणादि सर्वतोभद्रमण्डल देवता संपूजन पूर्वकं श्रीलक्ष्मीनारायण संपूजनादि कर्म कर्तुं नानानाम गोत्रा

नानानाम शर्मणो ब्राह्मणान् एभिश्चन्दन पुष्पाक्षत माल्य धौतोत्तरीय जलपात्रासन सौवर्ण भूषणोष्णीषादिभिः श्रीमद्भागवत वाचकत्वेन तथा एभिश्चन्दन पुष्पाक्षतमाल्य धौतोत्तरीय जलपात्रासन सौवर्णाङ्गुलीयकोष्णीषादिभिः उपवाचकत्वेन तथा एभिश्चन्दन पुष्पाक्षत माल्य धौतोत्तरीयासन सौवर्णमुद्रिकादिभिः गणपति जापक द्वारपाल परीक्षितत्वेन तथा एभिश्चन्दन पुष्पाक्षतधौतोत्तरीयादिभिः परिचारकत्वेन च युष्मान् वृणे. ॐ वृताः स्मः

इति संकल्प मधुपर्कं वाचक वरणं कृत्वा प्रार्थयेत्.

वाचक प्रार्थना.

अस्मिन् सप्ताह यज्ञे वाचकत्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.

शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद ।
एतत्कथा प्रकाशेन मदज्ञानं विनाशय ॥ ॐ भवानि.

उपवाचक प्रार्थना.

अस्मिन् सप्ताह यज्ञे उपवाचकत्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.

विद्वन् भागवते ह्यस्मिन् वाचकेनाखिलीकृतो।
विसर्ग विन्दु मात्राणां व्यत्ययेन त्वयान्वितः ॥
तत्त्वया सावधानेन विविच्य वद यत्नतः ।
आतिर्थ्यया सहायश्च देयस्तुभ्यं नमो नमः ॥ ॐ भवानि.

गणेश प्रार्थना.

अस्मिन् सप्ताह यज्ञे गणपतित्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.

देवानामसुराणां च यज्ञे प्राक्पूजितस्तु यः ।
निर्विघ्नं कृत्वा यज्ञं मे गणपते भव । ॐ भवामि.

जापक प्रार्थना ।

अस्मिन्सम्राड् यज्ञे जापकत्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.
भगवन् सर्वधर्मज्ञ सर्व धर्म विदांवर ।
वितते मम यज्ञेऽस्मिन् ऋत्विकंव मे भवेभव ।। ॐ भवामि.

द्वारपाल प्रार्थना.

अस्मिन्सम्राड् यज्ञे द्वारपालत्वेन युष्मानहं वृणे. ॐ वृताः स्मः
भगवन् सर्व धर्मज्ञ सर्व धर्म विदांवर ।
वितते मम यज्ञेऽस्मिन् ऋत्विकंव मे भवेभव ।। ॐ भवाम.

परीक्षित प्रार्थना.

अस्मिन सम्राड् यज्ञे परीक्षितत्वेन त्वामहं वृणे । ॐ वृतोऽस्मि.
यथा विश्वसृजो यज्ञे यागवल्क्यो द्विजोत्तमः ।।
तथा त्वं मम यज्ञेऽस्मिन् सदस्यो भव सुव्रत ।। ॐ भवामि

ततः परीक्षकादींश्च प्रजपेत् .

ततः सर्वेषां प्रार्थना .

अस्य यागस्य निष्पत्त्यै भवन्तोऽभ्यर्थिता मया ।
सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम् ।।

यथा विहितं कर्म कुरुत . यथामति करवाम .

पुण्याहवाचनम् .

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा …… देवी
अहं मम कौषेय मासे सप्राद्यैः श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युद
यप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये तदङ्गत्या चतुर्णां ब्राह्मणा
नां पूजनं वरणं च करिष्ये । गन्धचन्दन पुष्पाक्षत पूगीफलय
ज्ञोपवीत वस्त्रो पायना दिभिः पुण्याह वाचनार्थं युष्मान्हं वृणे ।

ॐ वृतास्मः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ……
देवी अहं मम सप्राद्यैः श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युदयप्रा
प्तये ~~ब्राह्मणद्वारा~~ भो ब्राह्मणाः मण्डपे पुण्याहं भवन्तो ब्रुवन्तु २
ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ……
देवी अहं मम सप्राद्यैः श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युदयप्रा
प्तये भो ब्राह्मणाः मण्डपे स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ॐ
स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो
अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ……
देवी अहं मम सप्राद्यैः श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युदयप्रा
प्तये भो ब्राह्मणाः मण्डपे ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋध्यताम् ३
ॐ सत्रस्य ऋद्धिरस्य गन्म ज्योतिरमृता अभूम । दिवं पृथिव्या अ

ध्याहन्ता विदाम देवान्स्वर्ज्योतिः॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ……
देवी अहं मम सप्राहे: श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युदयप्रा
प्तये भो ब्राह्मणाः मण्डपे वृद्धिं भवन्तो ब्रुवन्तु २ ॐ वृद्धनाम् २
ॐ ज्यैष्ठ्यञ्च मऽ आधिपत्यञ्च मे मन्युश्च मे भामश्च मेऽमश्च मेऽ
म्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा
च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ……
देवी अहं मम सप्राहे: श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युदयप्रा
प्तये भो ब्राह्मणा मण्डपे कल्याणं भवन्तो ब्रुवन्तु २ ॐ कल्याणम् २
ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्याꣳ
शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दातुरिह भूयास
मयं मे कामः समृध्यताम्॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ……
देवी अहं मम सप्राहे: श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युदयप्रा
प्तये भो ब्राह्मणाः मण्डपे श्रियं भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३ ॐ म
नसः काममाकूतिं वाचः सत्यमशीय। पशूनाꣳ रूपमन्नस्य रसो
यशः श्रीः श्रयताम्।

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ……
देवी अहं मम सप्राहे: श्रीमद्भागवत श्रवण कर्मणि सर्वाभ्युदयप्रा

प्रये भो ब्राह्मणाः मण्डपे शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३
ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोष
धयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

विश्वानि देव सवितर्दुरितानि परा सुव।
यद्भद्रं तन्न ऽआसुव ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

पुण्याहवाचनसमृद्धिरस्तु ॥

षोडश मासीक श्राद्ध

श्राद्ध देशे श्राद्धीय वस्तून्यासाद्य. दीपं प्रज्वाल्य.
कर्ता पूर्वाभिमुखेऽपविश्य. कुशाजलेन

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरे शुचिः ॥

पुण्डरीकाक्षः पुनातु. इति ऽचार्य श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत्.

अद्य काश्यपगोत्रस्य ..... प्रेतस्य प्रेतत्व विमुक्त्युत्तम लोक प्राप्ति हेतु षोडशश्राद्धान्तर्गत ऊनमासिक द्वितीय मासिक त्रैपाक्षिक मासिक आन्तिक ~~त्रैमासिक~~ तृतीय मासिक चतुर्थ मासिक पञ्चम मासिक षष्ठ मासिक ~~[illegible] मासिक~~ ऊनषाण्मासिक सप्तम मासिक अष्टम मासिक नवम मासिक दशम मासिक एकादशमासिक द्वादशमासिक ऊनाब्दिक श्राद्धानि तन्त्रेणैकोदिष्ट विधिना एकादशो एवाहं करिष्ये.

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वधायै स्वाहायै नित्यमेव नमो नमः ॥ इति त्रिः पठेत्.

ततो अपसव्येन कुशतिल जलान्यादाय

अद्य काश्यपगोत्रस्य .... प्रेतस्य ऊनमासिक श्राद्धे इदमासनं ते
मया दीयते तवोपतिष्ठताम्.

अद्येह काश्यपगोत्रस्य प्रेतस्य द्वितीय मासिक श्राद्धे इदमासनं
ते मया दीयते तवोपतिष्ठताम्

अद्येह काश्यपगोत्रस्य प्रेतस्य त्रैपाक्षिक मासिक श्राद्धे इदमास
नं ते मया दीयते तवोपतिष्ठताम्

~~अधेह काश्यप गोत्रस्य~~ ~~प्रेतस्य आद्य मासिक श्राद्धे~~
~~इदमासनं ते मया दीयते नवो~~ ~~आब्दिक मास~~
अधेह काश्यपगोत्रस्य प्रेतस्य तृतीयमासिक श्राद्धे
इद मासनं ते मया दीयते नवोपतिष्ठताम्।
अधेह काश्यप गोत्रस्य प्रेतस्य चतुर्थ मासिक श्राद्धे
इदमासनं तेमयादीयते नवोपतिष्ठताम्।
अधेह काश्यपगोत्रस्य प्रेतस्य पंचम मासिक श्राद्धे
इद मासनं ते मया दीयते नवोपतिष्ठताम्
अधेह काश्यपगोत्रस्य प्रेतस्य षष्ठम मासिक श्राद्धे इद मा
सनं ते मया दीयते नवोपतिष्ठताम्।
~~अधिकमासिक~~
~~अधेह काश्यप गोत्रस्य प्रेतस्य ऊनषाण्मासिक श्राद्धे इदमा~~
~~सनं ते मया दीयते नवोपतिष्ठताम्~~
अधेह काश्यपगोत्रस्य प्रेतस्य ऊनषाण्मासिक श्राद्धे इदमा
सनं ते मया दीयते नवोपतिष्ठताम्
अधेह काश्यपगोत्रस्य प्रेतस्य सप्तम मासिक श्राद्धे
इद मासनं ते मया दीयते नवोपतिष्ठताम्।
अधेह काश्यपगोत्रस्य प्रेतस्य अष्टममासिक श्राद्धे
इदमासनं ते मया दीयते नवोपतिष्ठताम्
अधेह काश्यपगोत्रस्य प्रेतस्य नवम मासिक श्राद्धे इद मासनं
ते मया दीयते नवोपतिष्ठताम्।
अधेह काश्यपगोत्रस्य प्रेतस्य दशम मासिक श्राद्धे इद मा
सनं ते मया दीयते नवोपतिष्ठताम्

अधेह काश्यपगोत्रस्य प्रेतस्य एकादशमासिक श्राद्धे इदमास
नं ते मया दीयते नवोपतिष्ठताम्
अधेह काश्यप गोत्रस्य प्रेतस्य द्वादश मासिक श्राद्धे इदमास
नं ते नवोपतिष्ठताम्
अधेह काश्यपगोत्रस्य प्रेतस्य ऊनाब्दिक श्राद्धे इद मासनं
ते मया दीयते नवोपतिष्ठताम्
ॐ अपहता असुरा रक्षां सि सि वेदिषदः, इति जलमावर्जेन तिलान् विकीरेत्

हस्तार्घः

अधेह काश्यपगोत्रस्य प्रेतस्य ऊनमासिक श्राद्धे एष हस्तार्घस्ते
मयादीयते नवोपतिष्ठताम्
अधेह काश्यप गोत्र प्रेत द्वितीय मासिक श्राद्धे एष हस्ता
र्घस्ते मया दीयते नवोपतिष्ठताम्
अधेह काश्यपगोत्र प्रेत त्रैपाक्षिक मासिक श्राद्धे एष ह
स्तार्घस्ते मया दीयते नवोपतिष्ठताम् आधिक
अधेह काश्यप गोत्र प्रेत ~~द्वितीय~~ मासिक श्राद्धे एष ह
स्तार्घस्ते मया दीयते नवोपतिष्ठताम् तृतीय
अधेह काश्यपगोत्र प्रेत ~~चतुर्थ~~ मासिक श्राद्धे एष
हस्तार्घस्ते मया दीयते नवोपतिष्ठताम् चौथ
अधेह काश्यपगोत्र प्रेत ~~पंचम~~ मासिक श्राद्धे एष
हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्

प्रथम
अद्येह काश्यपगोत्र प्रेत षष्ठम मासिक श्राद्धे
एष हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्.
अद्येह काश्यपगोत्र प्रेत अधिक मासिक श्राद्धे
एष हस्तार्घस्ते नवोपतिष्ठताम्.
अद्येह काश्यपगोत्र प्रेत ऊनषाड्मासिक मासि
क श्राद्धे एष हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत सप्तम मासिक श्राद्धे एष
हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्.
अद्येह काश्यपगोत्र प्रेत अष्टम मासिक ~~श्रा~~
श्राद्धे एष हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत नवम मासिक श्राद्धे
एष हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत दशम मासिक श्रा
द्धे एष हस्तार्घस्ते मयादीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत एकादश मासि
क श्राद्धे एष हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत द्वादश मासिक श्रा
द्धे एष हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत ऊनाब्दिक मासि
क श्राद्धे एष हस्तार्घस्ते मया दीयते नवोपतिष्ठताम्

आमान्न
अद्येह काश्यपगोत्राय प्रेताय ऊनमासिक श्राद्धे
इदमन्नं सोपस्करं ते मया दीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्राय प्रेताय द्वितीय मासिक श्राद्धे
इदमन्नं सोपस्करं ते मया दीयते नवोपतिष्ठताम्
अद्येह काश्यपगोत्राय प्रेताय त्रैपाक्षिक मासिक श्राद्धे
इदमन्नं सोपस्करं ते मया दीयते ~~नवोपति~~ष्ठताम्
तृतीय
अद्येह काश्यपगोत्राय प्रेताय ~~[illegible]~~ मासिक श्रा
द्धे इदमन्नं सोपस्करं ते मया दीयते ~~नवो~~पतिष्ठताम्
तृतीय
अद्येह काश्यपगोत्राय प्रेताय ~~चतुर्थ~~ मासिक श्राद्धे
इदमन्नं सोपस्करं ते मया दीयते नवोपति~~ष्ठताम्~~
चतुर्थ
अद्येह काश्यपगोत्राय प्रेताय ~~पंचम~~ मासिक श्राद्धे
इदमन्नं सोपस्करं ते मया दीयते नवोपति~~ष्ठताम्~~.
पञ्चम
अद्येह काश्यपगोत्राय प्रेताय ~~षष्ठम~~ मासिक श्राद्धे
इदमन्नं सोपस्करं ते मया दीयते नवोपति~~ष्ठताम्~~
षष्ठ
अद्येह काश्यपगोत्राय प्रेताय ~~अधिक~~ मासिक श्रा
द्धे इदमन्नं सोपस्करं ते मया दीयते नवोपतिष्ठताम्.
अद्येह काश्यपगोत्राय प्रेताय ऊनषाड्मासिक
मासिक श्राद्धे इदमन्नं सोपस्करं ते मया दीयते नवोपतिष्ठते
अद्येह काश्यपगोत्राय प्रेताय सप्तम मासिक श्राद्धे
इदमन्नं सोपस्करं ते मया दीयते नवोपतिष्ठताम्.

अघोर काश्यप गोत्राय प्रेताय अष्टम मासिक
श्राद्ध इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्राय प्रेताय नवम मासिक श्रा
द्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्राय प्रेताय दशम मासिक श्रा
द्धे इद मन्नं सोपस्करं ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्राय प्रेताय एकादशमा
सिक श्राद्धे इद मन्नं सोपस्करं ते मया दीयते तवोपतिष्ठ
ताम्
अघोर काश्यप गोत्राय प्रेताय द्वादश मासिक
श्राद्धे इद मन्नं सोपस्करं ते मया दीयते तवोपतिष्ठतां
अघोर काश्यप गोत्राय प्रेताय ऊनाब्दिक मासिक
श्राद्धे इद मन्नं सोपस्करं ते मया दीयते तवोपतिष्ठतां

अवनेजन

अघोर काश्यप गोत्र प्रेत ऊनमासिक श्राद्धे इद मवने
जनन्ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत द्वितीय मासिक श्राद्धे
इद मवनेजनं ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत त्रैपाक्षिक मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत आद्य ~~तृतीय~~ मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत तृतीय ~~चतुर्थ~~ मासिक श्राद्धे
इद मवनेजनं ~~मन्नं सोपस्करं~~ ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत चतुर्थ ~~पञ्चमा~~ मासिक श्राद्धे
इद अवनेजनं ~~मन्नं सोपस्करं~~ ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत पञ्चम ~~षष्ठमा~~ मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत षष्ठ ~~आधिक~~ मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत ऊन षाड् मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अघोर काश्यप गोत्र प्रेत सप्तम मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्

Nepal Sanskrit University, Balmiki Campus, Kathmandu

अद्येह काश्यपगोत्र प्रेत अष्टम मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत नवम मासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत दशममासिक श्राद्धे
इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत एकादश मासिक श्रा
द्धे इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत द्वादश मासिक श्रा
द्धे इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत ऊनाब्दिक मासि
क श्राद्धे इद मवनेजनन्ते मया दीयते तवोपतिष्ठताम्

पिण्डदान

अद्येह काश्यपगोत्र प्रेत ऊनमासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत द्वितीय मासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत त्रैपक्षिक मासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत तृतीय मासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत चतुर्थ मासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत पञ्चम मासिक श्रा
द्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत षष्ठम मासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत अधिक मासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
ऊनषाड मासिक
अद्येह काश्यपगोत्र प्रेत ~~[illegible] मासिक~~ श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्
सप्तम
अद्येह काश्यपगोत्र प्रेत ~~[illegible]~~ मासिक श्राद्धे
एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्

Nepal Sanskrit University, Balmiki Campus, Kathmandu

अद्येह काश्यप गोत्र प्रेत अष्टम मासिक श्रा
द्धे एव पिण्ड स्ते मया दीयते तवोपतिष्ठतां
अद्येह काश्यप गोत्र प्रेत नवम मासिक श्राद्धे
एव पिण्ड स्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत दशम मासिक श्राद्धे
एव पिण्ड स्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत एकादश मासिक श्रा
द्धे एष पिण्ड स्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत द्वादश मासिक श्रा
द्धे एष पिण्ड स्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत ऊनाब्दिक श्राद्धे
एष पिण्ड स्ते मया दीयते तवोपतिष्ठताम्

प्रत्यवनेजन

अद्येह काश्यप गोत्र प्रेत ऊनमासिक श्राद्धपि
ण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत द्वितीय मासिक श्राद्धपि
ण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत त्रैपाक्षिक मासिक श्रा
द्धपिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठतां
अद्येह काश्यप गोत्र प्रेत तृतीय मासिक श्राद्ध
पिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठतां
अद्येह काश्यप गोत्र प्रेत चतुर्थ मासिक श्राद्धपि
ण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठतां
अद्येह काश्यप गोत्र प्रेत पञ्चम मासिक श्राद्ध
पिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठतां
अद्येह काश्यप गोत्र प्रेत षष्ठम मासिक श्राद्ध
पिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठ ताम्
अद्येह काश्यप गोत्र प्रेत अर्धिक मासिक श्रा
द्धपिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत उनषाड मासिक श्राद्ध
पिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यप गोत्र प्रेत सप्तम मासिक श्राद्ध
पिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठतां

अद्येह काश्यपगोत्र प्रेत अष्टममासिक श्राद्धपिण्डे
प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत नवममासिक श्राद्धपिण्डे
प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत दशममासिक श्राद्धपि
ण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत एकादशमासिक श्रा
द्धपिण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठतां
अद्येह काश्यपगोत्र प्रेत द्वादशमासिक श्राद्धपि
ण्डे प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्
अद्येह काश्यपगोत्र प्रेत ऊनाब्दिक श्राद्धपिण्डे
प्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्

११ दिन

शय्यादान. काञ्चनपुरुष. द्विजदम्पती
वृषोत्सर्ग.
कपिलागोदान. छत्र. उपानह. पाटि. दान.
ऊनमासिक. उदकुम्भदान.
ऊनाब्दिक
षोडश मासिक श्राद्ध.

१२ दिन

सपिण्डी श्राद्ध.
पाथेय श्राद्ध.
मासिक विघटन. (संकल्प श्राद्ध.)
उदकुम्भ दान. छत्र. उपानह इत्यादि.
गौरीहरपूजा.

१३ दिन

अपपाठकोटिहा
ब्राह्मण भोजन. द्विपादवाचन.
शय्यादान. पददान. १४ गोदान. दशदान. पंचधेनुदान
पूर्णपात्र इत्यादि. १००० ब्राह्मण भोजन.

१३ दिन

श्री ५ महाराजाधिराज — १
श्री ५ बडामहारानी — १
श्री ५ [illegible] अधिराजकुमार १
श्री ५ [illegible] अधिराजकुमारी १
श्री राजकुमार — १
दौस्या — १
[illegible] — १

११ दिन

दौस्या वो — १
दाफोत्सर्ग —
वाक्वो — १
सार्के — १

आयद्रव्येण

श्रीसूर्यस्य नित्यपूजा प्रवर्तनाय भूमीक्रयणार्थं द्रव्य समर्पणे

अहं मम श्रुति स्मृति पुराणोक्त फलावाप्ति श्रीसूर्य नारायण प्रीतिद्वारा सकल दुरित दूरीकरण समस्तव्याधि निरसन पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये सकलकामनालब्धये श्रीमत्पाशुपतक्षेत्र समीपवर्तिनो वाग्मतीसन्निहितस्य श्रीसूर्यनारायणस्य प्रतिदिवसं पूजा प्रवर्तनाय द्रव्याय संपादक यथासंपन्नपरिमाणक भूमीक्रयणार्थं. एताः पञ्च सहस्र संख्या परिमित रौप्यमुद्राः सूर्यदेवता स्वत्वेन समुत्सृजे.

प्रार्थना-

भानो भास्कर मार्तण्ड चण्ड रश्मे दिवाकर ॥
आरोग्यमायुर्विजयं वृद्धिं देहि नमोस्तु ते ॥

अहं मम श्रीस्वेष्टदेवता दक्षिणाकाली प्रसाद कामनया· इमानि रजत निर्मित पूजनोपयोगि भाजनानि तथा स्वनामाङ्कित सुवर्णसहितरजत माल्यानि च स्वेष्टदेवता दक्षिणाकालिकायै समर्पयिष्ये·

अहं मम श्रीस्वेष्टदेवता दक्षिणाकाली प्रसाद कामनया इमं वज्र खचित शिरोभूषणं श्रीदक्षिणाकालिकायै समर्पयिष्ये

पाठसंकल्पः—

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः वर्मा अहं मम· काश्यपगोत्रा स्वपेश्रात्नवीरविक्रमवर्मणः अक्षयस्वर्गवासकामनया अस्मत्कुलस्य च सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये गणेशदेवताप्रीतये त्रिआवृत्ति गणेश सहस्रनाम स्तोत्रपाठकर्म, तथा—श्रीसूर्यदेवताप्रीतये एकावृत्ति आदित्यहृदय स्तोत्रपाठकर्म; तथा—श्रीमहाविष्णुप्रीतये एकावृत्ति विष्णुसहस्रनाम स्तोत्रपाठकर्म; तथा—श्रीपरमेश्वरप्रीतये एकावृत्ति शुक्लयजुर्वेदपाठकर्म; तथा—साम्बसदाशिवप्रीतये एकादशब्राह्मणद्वारा शतरुद्रीयमन्त्रैः अविच्छिन्नजलधारया लघुरुद्राभिषेककर्म; तथा—महाकाली महालक्ष्मी महासरस्वती स्वेष्टदेवताप्रीतये एकावृत्ति संपुटित सप्तशती स्तोत्रपाठकर्म; तथा—मृत्युञ्जयदेवताप्रीतये त्रिआवृत्ति मृत्युञ्जय स्तोत्रपाठकर्म; तथा—शिवदेवताप्रीतये एकावृत्ति शान्तिकाध्यायपाठकर्म च ब्राह्मणद्वारा करिष्ये; तत्करिष्यमाण पाठकर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतादिभि र्वृणे· तत्क-

रिष्यमाणपाठकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे·

सहस्रपादाक्षिशिरोरुबाहवे
ॐ ~~नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे~~
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः।
दीपनाथाय नमः
गृहाण त्वं महाभाग निवेदितं प्रयत्नतः।
[illegible] विघ्नं कुरु [illegible]। [illegible]
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ गणेशाय नमः
ब्रह्मा मुरारिस्त्रिपुरान्तकारी।
भानुः शशी भूमिसुतो बुधश्च॥
गुरुश्च शुक्रः शनिराहुकेतवः।
सर्वे ग्रहाः शान्तिकरा भवन्तु॥ नवग्रहेभ्यो नमः
कान्ते प्रज्वलितं [illegible] [illegible]
सुवर्णवर्णं भवन्तं [illegible] ॥ अग्नये [illegible]

अथ शय्यादानम्

सव्येन आचम्य पूर्वाभिमुखो भूत्वा · गन्धाक्षतपुष्पाण्यादाय · सोपस्करशैय्यायै नमः इति मन्त्रेण शय्यां सर्वतः संपूज्य·

प्रतिमयोः लक्ष्मीनारायणौ पूजयेत्

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि॥ वैष्णवमसि विष्णवे त्वा ॥ विष्णवे नमः ॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाण मुम्म इषाण सर्वलोकं म इषाण ॥ लक्ष्म्यै नमः ॥

इति पूजां विधाय·

पुष्पाञ्जलिः–

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

लक्ष्मीनारायणाभ्यां नमः ॥

कुशतिलजलान्यादाय शय्यां स्पृशेत्·

संकल्पः–

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [redacted] वर्मा अहं मम काश्यपगोत्रस्य पेशलवीर लक्ष्मीदिव्येश्वरी [redacted] सकलपापक्षयपूर्वक यमपथाधिकरणक घर्म शीतादि बाधा याम्यपुरुषप्रहारघोरातपादिनिरसन- उच्चावच अतिविषम यमभूमि दुर्गमार्गसन्तरण- सकल नरकयातनानिवृत्ति पूर्वकं अनेक कल्पान्तपर्यन्तं पुरन्दरादि लोकावाप्तिपुरःसरं सार्वदिक चिरकालावधि सौभाग्यावैधव्यादि सर्वगुणोपेत भृत्यमित्रजनयुत सहामत्रावियोगानुत्तम सुखावाप्तिपूर्वकं त्रिंशत्कोटिवर्षपर्यन्तं दिव्य ध्वजपताका छत्र चामर व्यजनादि युत विमानाधिकरणक स्वर्गलोक महीतत्त्वोत्तरकालं वैकुण्ठलोकावाप्तये· घृतकुम्भ जल घट ताम्बूल कुंकुमागरु कर्पूरादि सुगन्ध चन्दन दीपिका पादुकोपानच्छत्र चामरासन सौवर्ण राजत ताम्रादि नानाविध धातुनिर्मित विविध भाजन काचादिनिर्मित भाजन- रत्नादि खचित सुवर्णादिभूषण विविधभक्ष्य भोज्यादर्श- पट्ट कौशेय क्षौम और्ण कार्पासादि परिधानीय वस्त्र वाहनायुधोपेतां नानाविध काष्ठशैलेयादि निर्मित खट्टिका पीठादि युतां ~~सालङ्कृतहस्ति~~- अश्वोपेत रथादि समन्वितां छत्र गृह भूमी दास दासी निष्कय रौप्य युतां संपूजितलक्ष्मीनारायण प्रतिमान्वितां इमां सोपस्करण शय्यां विष्णुदेवताकां .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

प्रार्थना-

यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
शय्या अस्याः ष्यशून्यास्तु तस्माज्जन्मनि जन्मनि ॥

दानप्रतिष्ठा-

अद्यकृतैतत् सोपस्करणशैय्यादानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्नमम· ।

पूजाभाजनादिदानम्·

पूजनोपयोगि पात्रेभ्यो नमः

पुस्तकाय नमः

गुरवे नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [redacted] वर्मा अहं मम· काश्यपगोत्रस्य पेशलवीरविक्रमवर्मणःसमस्तपापक्षयपूर्वकं अक्षय स्वर्गवासकामनया इमानि सौवर्ण राजतादि नानाविध पूजनोपयोगि भाजनानि विश्वकर्मदैवतानि पुस्तकं सरस्वतीदेवताकं .... गोत्राय .... शर्मणे

गुरवे संप्रददे· प्रार्थना–

हिरण्यादीनि भाण्डानि पात्राणि विविधानि च ॥
संप्रदास्यामि गुरवे भास्करः प्रीयतां मम ॥

दानप्रतिष्ठा–

अद्य कृतैतत्· पूजनोपयोगि भाजनादि दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ····· गोत्राय ·········· शर्मणे ब्राह्मणाय गुरवे संप्रददे· तत्सन्न मम·

पददानम्·

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पाᳫं सुरे स्वाहा· ॥ देय द्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
वर्मा अहं मम· काश्यपगोत्रस्य पेशलवीतविक्रम वर्मणः यमपथाधिकरणक घर्मातपशीतादि बाधानिवृत्ति याम्यपुरुष बाधा निरसन पूर्वकं परलोकपथि नानाविधान्न पानासनादि सुखसंपत्तये पददानान्तर्गतं इदं छत्रं उत्तानाङ्गिरो देवताकं उपानहौ उत्तानाङ्गिरो देवताके वस्त्रं वृहस्पति देवताकं सुवर्णाङ्गुलीयकं विष्णुदेवताकं कमण्डलुं ब्रह्मदेवताकं जलपात्रं वरुणदेवताकं यष्ठिकां वनस्पति देवताकां भोजनाधारपात्रं विश्वकर्मदेवताकं व्यजनं वायुदेवताकं फलमिष्टान्नादियुतं आमान्नं प्रजापतिदेवताकं यज्ञोपवीतं ब्रह्मदेवताकं रौप्यखण्डं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नानानामशर्मभ्यो त्रयोदश ब्राह्मणो दातुं जले समुत्सृजे· ।

प्रार्थना–

सर्वेषामेव देवानां छत्रमातपवारणम् ।
सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥
उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छ मे ॥
शीतोष्णवात संत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥
हिरण्यगर्भसंभूतं सौवर्णञ्चाङ्गुलीयकम् ।
धर्मपादं प्रयच्छामि प्रीयतां कमलापतिः ॥
पानकं ते प्रदास्यामि ब्रह्मलोकजिगीषया ।
घर्मस्थानेषु सुखदं तस्माच्छान्तिं प्रयच्छ मे ॥
व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखावहम् ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माखिलत्राणं मस्तु मे जन्मजन्मनि ॥

दानप्रतिष्ठा-

अद्यकृतैतत् छत्र·उपानत्·वस्त्र·मुद्रिका·कमण्डलु·आसन·भाजन·यष्टिका·यज्ञोपवीत·व्यजन·पादुका·आमान्नौष्ध्यादि दानकर्मणः प्रतिष्ठार्थं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो दातुं जले समुत्सृजे· तत्सन्न मम·

गोदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ···· वर्मा अहं मम काश्यपगोत्रस्य भ्रातृपितुः पेशलविक्रम वर्मणः स्वस्त्य स्वर्गवास कामनया इमां चतुष्पञ्चाशत्तमं सवत्सां गां रुद्रदेवताकां यथानाम गोत्राय यथाशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे·

प्रार्थना

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी।
विश्वरूपधरो देवः प्रीयतामनया गवा॥
कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छमे॥

दानप्रतिष्ठा

अद्यकृतैतत् चतुष्पञ्चाशत् गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्र देवताकं यथानाम गोत्राय यथाशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे· तत्सन्न मम·

पूर्णपात्र दानम्·

अद्येह ····· वर्मा अहं मम काश्यपगोत्रस्य पेशलवीरविक्रम वर्मणः प्रेतत्व विमुक्ति पूर्वक स्वर्ग प्राप्ति कामः कृतैतत् शुद्ध शान्तिक हवन कर्मणि ब्रह्मकर्म प्रतिष्ठार्थं अपूर्ण पूर्णार्थं पूर्णपात्रं प्रजापति देवताकं ···· गोत्राय ····· शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे·

घृतच्छाया·

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च॥
ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात्।
घृतेन द्यावा पृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥
अलक्ष्मी यच्च दौरस्थ्यं मे सर्व गात्रेषु संस्थितम्।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय॥
समुवर्ण घृत कांश्यपात्राय नमः।

अद्येह ····· वर्मा अहं मम काश्यपगोत्रस्य पेशलवीरविक्रम वर्मणः शुद्ध शान्तिक हवन कर्मणि दीर्घायुरारोग्यैश्वर्योदयावाप्तये इदं अवलोकिताज्यं मृत्युञ्जयदेवताकं कांश्यपात्रं विश्वकर्म देवताकं सुवर्णं वह्नि देवताकं ···· गोत्राय ····· शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे·

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

प्रार्थना ·

कामधेनोः समुद्भूतं देवाना मुत्तमं हविः।
आयुर्वृद्धिकरं दत्तु एज्य पातु सदैव माम्॥

दानप्रतिष्ठा ·

अद्य कृतैतत् आज्य कांस्यपात्र सुवर्ण दानकर्मणः प्रति
ष्ठार्थं इदं रजतं चन्द्र देवताकं · · · गोत्राय · · ·
शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ·

पक्षान्न गोदानम् ·

गोनिष्क्रयीभूत रजत द्रव्याय नमः।
अद्येह · · · · · वर्मा अहं मम काश्यपगोत्रस्य [illegible]
विक्रम वर्मणः [illegible]ाद्युद्भुराणोक्त हवन कर्मणि कृतस्य
दीप कलश गणेश ब्रह्मा विष्णु महेश्वर इन्द्र वरुणादि दे
वता संपूजन हवनादि कर्मणः साङ्ग फल प्राप्त्ये न्यूनाति
रिक्तपरि पूरणार्थं इदं गोनिष्क्रयीभूतं रजत चन्द्रदेवताकं
· · · गोत्राय · · · शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ·

प्रार्थना

कपिले सर्व देवानां पूजनीयासि रोहिणि।
तीर्थ देवमयी यस्मा तस्माच्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा

अद्य कृतैतत् गोनिष्क्रयीभूत रजत दान कर्मणः प्रतिष्ठार्थं
इदं रजत चन्द्र देवताकं · · · गोत्राय · · · शर्मणे ब्राह्मणाय तुभ्यं संप्रददे

सहस्र ब्राह्मण भोजन संकल्पः

देय द्रव्याय नमः
अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
[illegible] वर्मा अहं मम काश्यपगोत्रस्य [illegible] ·
[illegible] अक्षय्यतृप्तिपूर्वक अक्षयस्वर्गवासकामनया ·
सहस्र ब्राह्मणान् एभिश्चन्दनपुष्पाक्षत धौतोत्तरीयादि
भिः वरणपूर्वकं मिष्टान्नेन भोजयिष्ये · तत्करिष्य
माण सहस्रब्राह्मण भोजन कर्मणः प्रतिष्ठार्थं इदं रजतं
चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यः सह
स्रब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृ
जे· ततसन्न मम ·

दक्षिणा संकल्पः-

देवद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवराः [redacted] [redacted] वर्मा अहं मम काश्यपगोत्र [redacted] [redacted] त्रयोदशाह शुद्धशान्तीक हवन कर्मणि दीप कलश गणेश गणपत्यादि वनस्पत्यन्त देवतासंपूजन हवनादिकर्मणो न्यूनातिरिक्तपरिपूर्णार्थं इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे॥

प्रायश्चित्त गोदान

आशौचान्त त्रयोदशेऽह्नि आशौच [illegible] कायिक वाचिक मानसिक ज्ञाताज्ञात [illegible] तद्दोष परिहारार्थं [illegible] ये प्रायश्चित्त प्रत्याम्नाय भूत इमां सालङ्कृत गां रुद्रदैवताकं ....गोत्राय शर्मणे ब्राह्मणाय सम्प्रददे।

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मात् अतः शान्तिं प्रयच्छ मे॥
प्रायश्चित्ते समुत्पन्ने [illegible]।
तस्मात् पापस्य मुक्त्यर्थं धेनुरेषा ददामि ते॥

दान प्रतिष्ठा

अद्य कृतैतत् प्रायश्चित्त गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवताकं ....गोत्राय शर्मणे ब्राह्मणाय [illegible]

[illegible] — [illegible]
[illegible] — [illegible]
[illegible] — [illegible]
~~[illegible]~~
[illegible] — [illegible]
[illegible] — [illegible]
[illegible] राजलक्ष्मी देवी

श्रीगणेशाय नमः॥ ॥अथ तर्पणम्॥

आचम्य॥

तर्पणसंकल्पः–

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [illegible]ः देवेन्द्र वीरविक्रम वर्मा अहं मम काश्यपगोत्रस्य अस्मत्पितुः [illegible] वीरविक्रमवर्मणो वसुस्वरूपस्य अद्य कर्तव्य सांवत्सरिककाद्दिष्ट श्राद्धाङ्गत्वेन अक्षय्यतृप्तये ब्रह्मादिदेवर्षि मनुष्य दिव्यपितॄणां तर्पणपूर्वकं स्वपितॄणां तर्पणं करिष्ये।

ततः प्राङ्मुखः पवित्रपाणिः देवतीर्थेन सकुशोदकेन तर्पणं कुर्यात्।

ब्रह्मादिदेवानां आवाहनम्॥

ॐ विश्वेदेवाः स आगत शृणुता म इमꣳ हवम्॥ एदं वर्हि निषीदत॥

विश्वे देवाः शृणुते मꣳहवं मे येऽअन्तरिक्षे य उपद्यविष्ठ। ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन् वर्हिषि मादयध्वम्॥

ॐ ब्रह्मादिदेवाः इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु एतान्

जलाञ्जलीन् ॥

ॐ ब्रह्मा तृप्यताम्· ॐ विष्णु स्तृप्यताम्· ॐ रुद्र स्तृप्यताम्· ॐ प्रजापति स्तृप्यताम्· ॐ देवा स्तृप्यंताम्· ॐ छन्दांसि तृप्यन्ताम्· ॐ वेदा स्तृप्यन्ताम्· ॐ ऋषय स्तृप्यन्ताम्· ॐ पुराणाचार्या स्तृप्यन्ताम्· ॐ गन्धर्वा स्तृप्यन्ताम्· ॐ इतराचार्या स्तृप्यन्ताम्· ॐ संवत्सरः सावयव स्तृप्यन्ताम्· ॐ देव्य स्तृप्यन्ताम्· ॐ अप्सरस स्तृप्यन्ताम्· ॐ देवानुगा स्तृप्यन्ताम्· ॐ नागा स्तृप्यन्ताम्· ॐ सागरा स्तृप्यन्ताम्· ॐ पर्वता स्तृप्यन्ताम्· ॐ सरितस्तृप्यन्ताम्· ॐ मनुष्या स्तृप्यन्ताम्· ॐ यक्षा स्तृप्यन्ताम्· ॐ रक्षांसि तृप्यन्ताम्· ॐ पिशाचा स्तृप्यन्ताम्· ॐ सुपर्णा स्तृप्यन्ताम्· ॐ भूतानि तृप्यन्ताम्· ॐ पशव स्तृप्यन्ताम्· ॐ वनस्पतय स्तृप्यन्ताम्· ॐ ओषधयस्तृप्यन्ताम्· ॐ भूतग्रामचतुर्विध स्तृप्यताम्· ॥

ॐ मरीचि स्तृप्यताम्· ॐ अत्रि स्तृप्यताम्· ॐ अङ्गिरा स्तृप्यताम्· ॐ पुलस्त्य स्तृप्यताम्· ॐ पुलह स्तृप्यताम्· ॐ क्रतु स्तृप्यताम्· ॐ प्रचेता स्तृप्यताम्· ॐ वशिष्ठ स्तृप्यताम्· ॐ भृगु स्तृप्यताम्· ॐ नारद स्तृप्यताम्· ॥

ततः कण्ठे सूत्रं कृत्वा· उदङ्मुखः कायतीर्थेन मनुष्यान् तर्पयेत्· ॥

सनकादीनां आवाहनम्· ॥

ॐ सनकादयः सप्त मनुष्याः इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु एताञ्जलाञ्जलीन्· ॥

ॐ सनक स्तृप्यताम्· २ ॐ सनन्दन स्तृप्यताम्· २
ॐ सनातन स्तृप्यताम्· २ ॐ कपिल स्तृप्यताम्· २
ॐ आसुरि स्तृप्यताम्· २ ॐ वोढु स्तृप्यताम्· २
ॐ पञ्चशिख स्तृप्यताम् २ ॥

अपसव्येन दक्षिणाभिमुखः पातितवामजानुः मोटित कुशतिलाञ्जलित्रयेण खड्गपात्रेण पितृतीर्थेन तर्पयेत् ॥

दिव्यपितृणां आवाहनम्· ॥

ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ॥
उशन्नुशत आवह पितृन् हविषे अत्तवे ॥
आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥
अस्मिन् यज्ञे स्वधया मदन्तो धिब्रुवन्तु ते वन्त्वस्मान्· ॥

ॐ कव्यवाडनलादयो दिव्यपितरः इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु एतान् जलाञ्जलीन्· ॥

ॐ कव्यवाडनल स्तृप्यताम्· ३ ॐ सोम स्तृप्यताम्· ३

ॐ यम स्तृप्यताम् ३ ॐ अर्यमा तृप्यताम् ३
ॐ अग्निष्वात्ता स्तृप्यन्ताम् ३ ॐ सोमपा स्तृप्यन्ताम् ३
ॐ वर्हिषदः पितर स्तृप्यन्ताम् ३
ॐ यमाय नमः ३ ॐ धर्मराजाय नमः ३ ॐ मृत्यवे न
मः ३ ॐ अन्तकाय नमः ३ ॐ वैवस्वताय नमः ३
ॐ कालाय नमः ३ ॐ सर्वभूतक्षयाय नमः ३ ॐ
औदुम्वराय नमः ३ ॐ दध्नाय नमः ३ ॐ नीलाय न
मः ३ ॐ परमेष्ठिने नमः ३ ॐ वृकोदराय नमः ३ ॐ
चित्राय नमः ३ ॐ चित्रगुप्ताय नमः ३

ततः स्वपितृणां आवाहनम् ॥

आगच्छन्तु मे पितरः इमान् गृह्णन्तु जलाञ्जलीन् ।
ॐ उदीरता मवर उत्परा स उन्मध्यमाः पितरः सोम्यासः
असुं यई युरवृका ऋतज्ञास्तेनो वन्तु पितरो हवेषु ॥
ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेशल वीर
विक्रमवर्मा वसुस्वरूप स्तृप्यताम् ॥ इद जल सतिल
तस्मै स्वधा नमः ॥
ॐ अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सो
म्यासः तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौ मन-
से स्याम ॥

ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेशल वीरवि-
क्रमवर्मा वसुस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै
स्वधा नमः ॥
ॐ आयन्तु नः पितरः सोम्यासो ग्निष्वात्ताः पथिभिर्देव-
यानैः ॥ अस्मिन् यज्ञे स्वधया मदन्तो धिब्रुवन्तु तेवन्त्व
स्मान् ॥
ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेशल वीरविक्र
मवर्मा वसुस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै
स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥
ॐ ऊर्जं वहन्ती रमृतं घृतं पयः कीलालं परिस्रुतम् ॥
स्वधास्थ तर्पयत मे पितृन् ॥
ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः ऐन्द्रप्रताप वीरवि
क्रमवर्मा रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिल तस्मै स्व-
धा नमः ॥
ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधा
यिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः
॥ अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः सु
न्धध्वम् ॥
ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः ऐन्द्रप्रताप वीरविक्र

मवर्मा रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ ये चेह पितरो ये चनेह यांश्च विद्मयां उचन प्रविद्म ॥ त्वं वेत्थ यतिते जातवेदः स्वधाभि र्यज्ञꣳ सुकृतं जुषस्व ॥

ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः रौद्रप्रताप वीरविक्रमवर्मा रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ॥ माध्वीर्नः सन्त्वोषधीः ॥

ॐ अद्येहः काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा आदित्यस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ मधु नक्तमुतो षसो मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौ रस्तु नः पिता ॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा आदित्यस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ मधुमान्नो वनस्पति र्मधुमाँ अस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा आदित्यस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

ॐ आमा वाजस्य प्रसवो जगम्या देमे द्यावा पृथिवी विश्वरूपे ॥ आमा गन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात् ॥

ॐ अद्येह काश्यपगोत्रा पितामही लक्ष्मीदिव्येश्वरी देवी वसुस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः

ॐ आमा वाजस्य प्रसवो जगम्या देमे द्यावा पृथिवी विश्वरूपे ॥ आमा गन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात् ॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पितामही लक्ष्मीदिव्येश्वरी देवी वसुस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥

ॐ आमा वाजस्य प्रसवो जगम्या देमे द्यावा पृथिवी विश्वरूपे ॥ आमा गन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात् ॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पितामही लक्ष्मीदिव्येश्वरी देवी वसुस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥

तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

ॐ अद्येह काश्यपगोत्रा अस्मत्प्रपितामही ललितकुमारी देवी रुद्रस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः

ॐ अद्येह काश्यपगोत्रा अस्मत्प्रपितामही ललितकुमारी देवी रुद्रस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥

ॐ अद्येह काश्यपगोत्रा अस्मत्प्रपितामही ललीतकुमारी देवी रुद्रस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥

तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ ॥

ॐ अद्येह काश्यपगोत्रा अस्मद् वृद्धप्रपितामही त्रैलोक्यराज्यलक्ष्मी देवी आदित्यस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥

ॐ अद्येह काश्यपगोत्रा अस्मद् वृद्धप्रपितामही त्रैलोक्यराज्यलक्ष्मी देवी आदित्यस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥

ॐ अद्येह काश्यपगोत्रा अस्मद् वृद्धप्रपितामही त्रैलोक्यराज्यलक्ष्मी देवी आदित्यस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मै तद्वः पितरो वासः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मन्मातामहः अर्जुन सिंह वर्मा सपत्नीकः वसुस्वरूपस्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय सगोत्रः अस्मन्मातामहः अर्जुन सिंह वर्मा सपत्नीकः वसुस्वरूपस्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय सगोत्रः अस्मन्मातामहः अर्जुन सिंह वर्मा सपत्नीकः वसुस्वरूपस्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

ॐ अद्येह आत्रेय गोत्रः अस्मत्प्रमातामहः रूप सिंह वर्मा सपत्नीकः रुद्रस्वरूपस्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मत्प्रमातामहः रूप सिंह वर्मा सपत्नीकः रुद्रस्वरूपस्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्व-

अद्येह वत्सगोत्रा अस्मत् पितृ स्वासा लक्ष्मी एत्र लक्ष्मी देवी वसु
स्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥ तृप्यध्वम् ॥ तृ
प्यध्वम् ॥ तृप्यध्वम् ॥
अद्येह वत्सगोत्रा अस्मत् स्वसृ [illegible] देवी वसुस्वरूपा तृप्य
ताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥
धा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मत्प्रमातामहः रूप सिंहवर्मा सपत्नीकः रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

ॐ अद्येह आत्रेय गोत्रः अस्मद् वृद्धप्रमातामहः टिकम सिंह वर्मा सपत्नीक आदित्यस्वरूपस्तृप्यताम् ॥ इदं जल सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मद् वृद्ध प्रमातामहः टिकम सिंह वर्मा सपत्नीक आदित्य स्वरूप स्तृप्यताम् ॥ इदं जल सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मद् वृद्धप्रमातामहः टिकम ह वर्मा सपत्नीक आदित्य स्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम ॥ ॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पत्नी इन्द्रदिव्येश्वरी देवी वसुस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधानमः ॥ ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

आब्रह्मस्तम्भ पर्यन्तं देवर्षी पितृ मानवाः ॥
तृप्यन्तु पितरः सर्वे मातृ मातामहादयः ॥ १ ॥
मातृवंशे मृता ये च पितृवंशे तथैव च ॥
गुरुश्वशुर बन्धूनां ये चान्ये बान्धवा मृता ॥ २ ॥
तेऽपि तृप्तिमखिला यान्तु ये मत्तोयाभिकाङ्क्षिणः ॥
ये बान्धवा बान्धवा ये येन्यजन्मनि बान्धवाः ॥ ३ ॥
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुना खिलाः ॥
देवासुरा स्तथा यक्षा नागा गन्धर्वराक्षसाः ॥ ४ ॥
पिशाचा गुह्यका सिद्धाः कुष्माण्डा स्तरवः खगाः ॥
जलेचरा भूमिचरा वाय्वाधाराश्च जन्तवः ॥ ५ ॥
ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुना खिलाः ॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥ ६ ॥
तेषामाप्यायनायैतद्दीयते शलिलं मया ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ ७ ॥
आब्रह्म भुवनाल्लोकानिदमस्तु तिलोदकम् ॥
यत्र क्वचन संस्थानां क्षुत्तृषोपहतात्मनाम् ॥ ८ ॥
इद मक्षय्यमेवास्तु मया दत्तं तिलोदकम् ॥

अथ वस्त्रनिष्पीडनम् ॥

ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥
ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

ततः सव्यं कृत्वा आचम्य पूर्वाभिमुखो भूत्वा षट् कोणं विलिख्य ब्रह्मादीन् पूजयेत् ॥

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ता द्विशीमतः सुरुचो वेन आवः ॥ सवुध्न्या उपमा अस्य विष्ठा शतश्च योनि मसतश्च विव ॥

ॐ ब्रह्मणे नमः ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥ ॐ विष्णवे नमः ॥

ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः ॥ बाहुभ्यामुत ते नमः ॥ ॐ रुद्राय नमः ॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ ॐ सवित्रे नमः

ॐ मित्रस्य चर्षणी धृतो वो देवस्य सानसि ॥ द्युम्नं चित्र श्रवस्तमम् ॥ ॐ मित्राय नमः ॥

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥

ॐ वरुणाय नमः ॥

सूर्याय अर्घ्यदानम् ॥

ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ॥
जगत्सवित्रे शुचये शाक्षिणे कर्मदायिने ॥१॥
एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ॥
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥२॥

उपस्थानम् ·

ॐ अदृश्रमस्य केतवो विरश्मयो जनाँ अनु भ्राजन्तो अग्नयो यथा ॥ उपयाम गृहीतोसि सूर्याय त्वा भ्राजायैषते योनिः सूर्याय त्वा भ्राजाय ॥ सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोहं मनुष्येषु भूयासम् ॥ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

ततः पूर्वादिक्रमेण ॥

ॐ प्राच्यै दिशे नमः इन्द्राय नमः ।
ॐ आग्नेय्यै दिशे नमः अग्नये नमः ।
ॐ दक्षिणस्यै दिशे नमः यमाय नमः ।
ॐ नैरृत्यै दिशे नमः निरृतये नमः ।
ॐ प्रतीच्यै दिशे नमः वरुणाय नमः ।
ॐ वायव्यै दिशे नमः वायवे नमः ।
ॐ उदीच्यै दिशे नमः कुबेराय नमः ।
ॐ ऐशान्यै दिशे नमः ईशानाय नमः ।
ॐ ऊर्ध्वायै दिशे नमः ब्रह्मणे नमः ।
ॐ अधो दिशे नमः अनन्ताय नमः ।

तत उपविश्य नमेत् ॥

ॐ ब्रह्मणे नमः ॐ अग्नये नमः ॐ पृथिव्यै नमः ॐ ओषधिभ्यो नमः ॐ वाचे नमः ॐ वाचस्पतये नमः ॐ विष्णवे नमः ॐ महद्भ्यो नमः ॐ अद्भ्यो नमः ॐ अपां पतये नमः ॐ वरुणाय नमः

ततो मुखसंमार्जनम् ॥

ॐ संवर्चसा पयसा सन्तनूभि रगन्महि मनसा सꣳ सिवेन ॥ त्वष्टा सुदत्रो विदधातु रायो नुमार्ष्टु तन्वो यद्विलिष्टम् ॥

ततः चक्षुस्पर्शः ॥

ॐ तच्चक्षु र्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥

ततः तर्पणजलं विलोडयेत् ॥

ॐ देवा गातु विदो गातुं वित्वा गातुमित ॥ मनस स्पत इमन्देव यज्ञꣳ स्वाहा वातेधाः ॥

जलं गृहीत्वा ·

अनेन कर्मणा जनार्दनः प्रीयताम् ॥

ॐ शतमिन्नु शरदो ऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनू
नाम् ॥ पुत्रासो यत्र पितरो भवन्ति मानो मध्या रीरिषता युग
न्तोः ॥१॥ अदितिर्द्यौ रदिति रन्तरिक्षमदितिर्माता सपिता स-
पुत्रः ॥ विश्वे देवा अदितिः पञ्चजना ऽअदिति र्जातमदिति र्जनि
त्वम् ॥२॥ स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीव-
न्तो गभीराः ॥ चित्रसेना इषुबला ऽअमृध्राः सतो वीरा अवो ऽव्रा
त साहाः ॥३॥ ब्राह्मणासः पितरः सोम्यासः शिवेनो द्यावापृथिवी
अनेहसा ॥ पूषा नः पातु दुरिता दृता वृधो रक्षामाकीर्नो अघस
ꣳस ईशतः ॥४॥ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः
स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः॥
अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्व
म् ॥५॥ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पु-
नन्तु प्रपितामहाः ॥ पवित्रेण शतायुषा ॥ पुनन्तु मा पितामहाः
पुनन्तु प्रपितामहाः ॥ पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै
॥६॥

अथ राज्याभिषेक प्रयोगः ।

अभिषेकदिवसे राजा नित्यकर्म समाप्य दर्भपाणि आसने पूर्वाभिमुख उपविश्य ध्यानपूर्वकं इष्टदेवता नमस्कृत्य ·

प्रतिज्ञा संकल्पः-

अद्येह वत्सगोत्रः भार्गव-च्यावनाप्नवानौर्वजामदग्न्येति पञ्च प्रवरः .... वर्मा अहं मम सकलराज्यवश्यताकामनया सांवत्सरपुरोहिताभ्यामात्मानमभिषेचयिष्ये · इति संकल्प्य · दीप कलश गणेश पूजा मातृका पूजा आभ्युदयिकश्राद्धानि कृत्वा ·

सांवत्सरपुरोहितौ त्रीन् ऋग्यजुर्विदः विप्रक्षत्रियवैश्यान् अमात्यान् एकं सामगं विप्रं अमात्यं अन्यच्चैकं अन्यतमवेदविदं वृत्वा मधुपर्क कुण्डल केयूर कटक कण्ठाभरणांगुलीयकवस्त्रादिभि स्तान्संपूज्य चतुर्वर्णमुख्यानुपवेशयेत् :

वरण संकल्पः-

पूर्वदिने कृतोपवासः पुरोहितः श्वेतवासा श्वेतमाल्यानुलेपनः सोष्णीषः होमदेशं परिकल्प्य· तस्मादुत्तरतः तोरण कदलीस्तम्भमण्डितायां स्नानशालायां व्रीहिषु यवेषु वा सौवर्णं नवकलशं यथाविधि संस्थाप्य, यथासंभवं अनेक तीर्थजलेनापूर्य, सर्वौषधि सर्वगन्ध सर्वरत्न सर्वबीज सर्वफल क्षीरिवृक्ष क्षीरिलतापल्लवान् क्षिप्त्वा, बहुभिः सितवस्त्रै र्मालाभिश्चावेष्ट्य, तत्समीपे एकं पञ्चगव्ययुतजलपूर्णं कलशं, घृतेन पूर्णं हैमं कुम्भं, दुग्धेन पूर्णं राजत कुम्भं, दध्ना पूर्णं ताम्रकुम्भं, मधुना पूर्णं मृण्मयकुम्भं, कुशोदकेन पूर्णं मृण्मयकुम्भं, शतच्छिद्रं सौवर्णम्· अन्यांश्च यथालाभं नदीसरःकूप चतुःसमुद्रोदकपूर्णान्मार्त्तिकान् स्थापयेत्·

सर्वेषां कलशानामुच्चता षोडशाङ्गुला । वैपुल्यं द्विपञ्चाशदङ्गुल सूत्रवेष्टन योग्यम् ॥

ततः पुरोहितो होमदेशे आथर्वणगृह्योक्तेन ऐन्द्र शान्तिप्रयोगलिखितेन प्रकारेण अग्निस्थापन पूर्वकं सप्तदशाहुत्यात्मक अभ्यातान होमान्तानि पूर्वाङ्गाणि कृत्वा शर्मवर्म, स्वस्त्ययन, आयुष्य, अभय, अपराजिताख्यैः पञ्चभि र्गणैः आथर्वणपरिशिष्टोक्तैः आज्यं जुहुयात् ॥ होमदेशस्थापित हैमकलशे च संपातान् क्षिपेत् ॥

राज्ञा च सितचन्दन पुष्पवासः सर्वालङ्कारयुतोऽग्नेर्दक्षिणतः उप
विश्य सांवत्सर प्रभृतिभिः दैवज्ञैः सदस्यमुख्यैः पुरोहितैश्च हूयमा-
नाग्नेर्निमित्तानि पश्येत् ॥

एवं पुरोहितः प्रधानहोमं समाप्य ऐन्द्रशांत्युक्तेनैव प्रकारेण
सप्तदशाहुत्यात्मक अभ्यातानहोमादि ब्रह्मो-थापन नमस्कारान्ता
नि उत्तराङ्गानि कृत्वा

सुगन्धतैलादिना स्वेच्छया कृतस्नानं राजानं स्नानशालायामा
नीय आसने उपवेश्य मृद्भिः स्नापयेत्

तत्र प्रथमं पर्वताग्र मृत्तिकाभिः शिरः स्नानम्
ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिꣳ सर्वत-
स्पृत्वा त्यतिष्ठद्दशाङ्गुलम् ॥१॥

अक्षिभ्यान्त इति मन्त्रेण वल्मीकान्तमृदा कर्णौ.
ॐ अक्षिभ्यान्ते नासिकाभ्यां कर्णाभ्यां चिबुकादधि ॥ यक्ष्मं
शीर्षण्यमस्तिष्का जिह्वया विवृहामि ते ॥२॥

शिवि स्थान घाते
~~तेनैव~~ मन्त्रेण शिवा विल्वालयमृदा मुखम्.
ॐ अक्षिभ्यान्ते नासिकाभ्यां कर्णाभ्यां चिबुकादधि ॥
यक्ष्मं शीर्षण्यमस्तिष्का जिह्वया विवृहामि ते ॥३॥

इन्द्रध्वजस्थानमृदा ग्रीवाम्
ॐ ग्रीवाभ्यस्ते उष्णिहाभ्यः कीकसाभ्योनुक्यात् ॥ यक्ष्मं दो-
षण्यमंसाभ्यां बाहुभ्यां विवृहामि ते ॥४॥

आन्त्रेभ्य इति मन्त्रेण राजाङ्गणमृदा हृदयम्.
ॐ आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठो हृदयादधि ॥ यक्ष्ममत्न
स्नाभ्यां यक्नु प्लाशिभ्यो विवृहामि ते ॥५॥

यस्य विश्वानि हस्तयोरिति गजदन्तोद्धृतमृदा दक्षिणवाम
भुजौ.
ॐ यस्याविश्वानि हस्तयो रुचुर्वसूनि निद्विता। वीरस्य पृतना सहः ॥६॥

बह्वीनां पितेति सरोमृदा पृष्ठम्.
ॐ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ॥ इषु
धीः सङ्काः पृतनाश्च सर्वा पृष्ठे निनद्धो जयति प्रसूतः ॥७॥

नाभानाभिं न इति गो सङ्गममृदा उदरम्.
ॐ नाभा नाभिं न आददे चक्षुश्चित्सूर्ये सचा ॥ कवेरपत्यमादु
हे ॥८॥

आते सिञ्चामीति नदीकूलद्वयमृदा पार्श्वौ
ॐ आते सिंचामि कुक्ष्यो रनुगात्रा विधावतु ॥ गृभाय जिह्वया मधु ॥९॥

सोमानमिति मन्त्रेण वेश्याद्वारमृदा कटिम्.
ॐ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते ॥ कक्षीवन्तं यऽऔशि
जः ॥१०॥

ऊरुभ्यां त इति गजस्थानमृदा ऊरू·
ॐ ऊरुभ्यान्ते अष्ठिवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ॥ यक्ष्मं श्रोणि
भ्यां भासदाद्भंससो विवृहामि ते ॥११॥
ठ कर्म. तथा. साम्ब सदाशिव देवता प्रीतये आगामि जन्म आ
गामी जन्मोत्सव वर्ष पर्यन्तं प्रतिदिनं एकादश [illegible]
[illegible] पाठ [illegible] एकादशावृत्ति सहस्रनाम [illegible]
पाठकर्म. तथा. सकलारिष्ट निवारणार्थ आदित्य आगामी
जन्मोत्सव वर्ष पर्यन्तं प्रतिदिनं आदित्यहृदय स्तोत्र पाठ
कर्म. तथा. एतत् सकल देवादिक [illegible] निवारणार्थ प्रा
[illegible] पूर्वक दीर्घायुरारोग्य स्वर्योदयावाप्त्यै [illegible]

श्री देवताप्रीतये अश्विनमासे आगामी जन्मोत्सव पर्वणि प्रतिदिने
एकादशी रुद्राध्याय पाठकर्म विशेष देवता सम्पूजन कर्मंच ·
तथा विविध नैवेद्यादि अल्प मन्त्र विधान पूर्वक दीर्घा
युरैश्वर्य प्राप्त्यर्थं अल्प मन्त्र द्वारा देवताप्रीत
ये अश्विनमासे आगामी जन्मोत्सव पर्वणि प्रतिदिने अल्प
मन्त्र द्वारा सम्पूजनं दीपोचित दान समर्पण पुनः ए
एकादशी रुद्राध्याय पाठकर्म · तथा · आयुरारोग्य वृद्ध्यर्थं
वैद्यनाथ देवताप्रीतये ब्राह्मण [illegible] गङ्गाजलेनाभिषेकपू
र्वकैकादश रुद्राध्याय पाठकर्म सम्पूजन कर्मंच · तथा · सर्व सुख स
मृद्ध्यर्थं श्री बगलामुखी देवताप्रीतये अश्विनमासे आगामी ज
न्मोत्सव पर्वणि प्रतिदिने बगलामुखी स्तोत्र पाठकर्म बगला
मुखी मन्त्र जपकर्मंच · तथा · आरोग्यार्थं [illegible] देवताप्री
तये अश्विनमासे आगामी जन्मोत्सव पर्वणि प्रतिदिने आदि
त्य हृदय पाठकर्म · तथा · सर्व सुख समृद्ध्ये अश्विनमासे आ
गामी जन्मोत्सव पर्वणि प्रतिदिने ललिता सहस्रनाम स्तोत्र
पाठकर्म · तथा · मृत्युञ्जय देवताप्रीतये एकादशी मृत्युञ्ज
य स्तोत्र पाठकर्म · तथा · [illegible] देवताप्रीतये एकादशी [illegible]
[illegible] नाम स्तोत्र पाठकर्म · तथा · सूर्य देवताप्रीतये

एकावृत्ति आदित्यहृदयस्तोत्र पाठकर्म: तथा: विष्णुदेवता
प्रीतिको एकावृत्ति विष्णुसहस्रनामस्तोत्र पाठकर्म: तथा
शिवदेवताप्रीतिको एकावृत्ति रुद्रीको अध्यायपाठकर्म: त
था: श्री गणेशसहग्रहीत देवता प्रीतिदा ह्री को पुरश्चरणो
ब्रह्मयानन्दादि जप फलप्राप्त्यर्थ ब्राह्मणद्वारा ओ
ङ्कार जप गायत्र्या इन्द्रादि पञ्च मन्त्रौ सख्य दिग्पाल पा
ठकर्म: तथा: श्री महाकाली महालक्ष्मी महासरस्वती
देवी प्रसादात् मम नष्टपीडा याचादि अनिष्ट विनाशार्था
अष्टोत्तर दुर्गा चण्डीपुरश्चरण दशावृत्ति नवग्र
हाणां द्वारा नवार्णजप प्रधानस्तोत्र पाठ कर्म करिष्ये:
करिष्यमाण तत्र जपपाठ कर्म कर्मण: साङ्गतासिद्ध्यर्थे
इष्ट वरद देवताको नाम ... स्थोताल ... मद्र
मेरो ब्राह्मणहरु पूजा ... दक्षिणाले दिनु
तत् - तत्सत्

सर्वोपरि सङ्कल्पम्.

देवद्रव्यार्पणम्:

अद्येह कर्तव्य कृत्य पञ्चायतन ... देवता ... १।
कृतास्मिन्: पृथ्वी शिव ... मम ... पूर्व ... अ

सवितृदेवते सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यै-
श्वर्यादि मम प्रीत्ये सकलारिष्टशान्त्यर्थे तिलहोम कर्मणि देवताक
[illegible] विश्वकर्म देवताक [illegible] मन्त्रेण
का ... ओं त्र्यम्बक ... होमेन ते ब्राह्मण [illegible] प्रददे

पापानि [illegible] पापानि [illegible] ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥
दानेन सर्व देवानां प्रीतये [illegible] ।
तीर्थ देवमयो पद्मा नामा स्वर्ण प्रशस्यते ॥

अद्यकर्तव्य तिल [illegible] तिलपात्र [illegible] गोदान
कर्मण: प्रतिष्ठार्थं इदं सुवर्णं वह्नि देवताकं ... गोत्राय
... शर्मणे ते ब्राह्मणाय सम्प्रददे [illegible]
प्रतिगृह्णातु [illegible] ·
दैव प्रदानम्:

अद्येह काश्यप गोत्र: कश्यपावत्सार नैध्रुव त्रिप्रवर:
[illegible]: [illegible] विक्रम [illegible] मम वर्ष [illegible]
[illegible] सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यै[illegible]
[illegible] कर्म [illegible]
ओं [illegible] प्रजापति देवताकं ... गोत्राय ... शर्मणे

ब्राह्मणाय निष्क्रयं दद्यात्.

प्रणीताविमोक:

ॐ सुमित्रिया न ऽ आप ऽ ओषधय: सन्तु ॥

इति प्रणीताजलेनाभिषिञ्च्य.

ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म:

इति प्रणीतापात्रं ऐशान्यां न्युब्जीकुर्यात्.

बर्हिर्होम.

ॐ देवा गातुविदो गातुं वित्वा गातुमित ।
मनसस्पत ऽ इमं देव यज्ञꣳ स्वाहा वाते धा: ॥

स्रुवा.

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषꣳ स्वाहा ॥ यां मेधां देवगणा: पितरश्चोपासते । तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ मेधां मे वरुणो ददातु मेधामग्नि: प्रजापति: । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् । मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

बर्हिर्होम.

एषोऽसि पिशाचोऽहं लोके ऽस्मिन् लोकोऽसि तत्रापि बोधि ।
लोकवर्त्तिनि पृथिवी समुद्रः समुद्रपः समुद्र विश्वामिदं
जगत् । वैश्वानर ज्योतिरूपोऽसि [illegible] कान्त्यापश्च
वैश्यः स्वाहा ॥

नेत्रोक्तम्:

ॐ पादप्रक्षालने मे पात्रजलेषु तर्पणे तपसि । [illegible]
वायुमध्ये स्थेयं दोषो ज्योतिरहं स्वाहा ॥

घृतचरणाः

तत्र वर्णे घृतकाद्यपात्रापूजनम्:

ॐ कारो ऽकारो ऽमः ऐं ह्रीं [illegible] पञ्चवक्त्रे । एवं तो
द्वैत मन्त्र तद्विद् ज्ञातोऽनेन च ॥ [illegible]
[illegible] प्रणवं पञ्चमेन्दौ । [illegible]
पूर्वं [illegible] ॥
आत्मकी [illegible] ।
तत्र [illegible] ॥
अथ [illegible]
[illegible]
[illegible]

लोहितान्यं मृत्युञ्जय देवताकं कांस्यपात्रं विश्वकर्म देवताकं सुवर्णं वह्नि देवताकं ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

कांस्यं वै नो समुद्भूतं देवानां प्रीतिदायकं।
आयुर्वृद्धिकरं दातू राज्यं पातु सदैव माम्॥

अद्य कृतैतत् औरध्व कांस्य पात्र सुवर्णदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. ततस्तन्नमन.

पश्चात् गोदानम्.

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

गोरिति मन्त्रेण जल द्रव्यादय नमः:

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः शुक्ल शाखी: (शु) वेदीयो ... शर्मा अहं मम वर्षवृद्धौ जन्मनक्षत्र गोचरादि पीडा रोगैः सर्वोपद्रवापपूर्वक कृतास्त दीर्घ कल्याण॥ लेशाविद मानसा वाचिक कायिक ज्ञाताज्ञात विहितकृतकल्याणे तोष्ट्रजन्य दुरितापनोदार्थं कर्मणः साङ्ग फलावाप्त्ये न्यूनातिरिक्त परिहारार्थं इदं गोनिष्क्रयीभूत रजतं

चन्द्रदेवताकं ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे.

कांस्ये च सर्वदेवानां पूजनीयानि हि हेतवे।
तस्मात् देवमयं पात्रमस्मात् शान्तिं प्रयच्छ मे॥

अद्य कृतैतत् शान्ति कर्मणः ... दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ... गोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे तन्न मम.

कन्यापूजा.

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम्।
नवदुर्गात्मिकां देवीं कन्यां तां पूजयाम्यहम्॥

आवाहनं समर्पयामि कन्यायै नमः.

पाद्यं. आचमनीयं. गन्धं. अक्षतान्. पुष्पं. धूपं. दीपं. सौभाग्यद्रव्यं. नैवेद्यं. दक्षिणां. समर्पयामि कन्यायै नमः.

जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते॥

पुष्पाञ्जलिं समर्पयामि कन्यायै नमः.

ब्राह्मणभोजन पद्धति.

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

देयद्रव्यार्पणम्:

अद्येह काश्यपगोत्र: काश्यपावत्सार नैध्रुवेति त्रिप्रवर: शु
शर्माहं: श्री वीरविक्रम वर्षे अद्य मम वर्षवृद्धौ जन्मोत्सव
कर्मणि सकलाभिष्ट पूर्वक दीर्घायुरारोग्यैश्वर्य देवाद्य
ये स्वतन्त्र दीपक लेश्याम तेषां अद्य मम कालवारुण मार्कण्डेय
षष्ठी चिरंजीवी तत्त्वदेवता पूजन हवन दान जप पाठकर्म
ण: प्रीतये वाञ्छं चन्द्र रजतं चन्द्रदैवताक नानाद्रव्य सौव
र्णं नानानाम गोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति विभज्य दा
तुमहमुत्सृजे. ततोऽभ्यागम.

ततः अग्न्यादि पूजा.

अभिषेक:

ॐ त्वं विष्णु: त्वं शिवो त्वं नारायणा: । आयान्तु पूर
णमस्य कुर्वन्ति पाप नाशना: । प्राची: इमा ते त्वां दिशा इन्द्राणि:
पृथिवी इमानि रेखा: इमानि वृक्षा इमानि : तेन इन्द्रानीन्द्र
नि देव इमानि: सोमा इमानि देवी ॥ तत्वक्षुर्देवहितं पुरस्तोच्छु
क्रमुच्चरत् । पश्येम शरद: शतं जीवेम शरद: शतं शृणु
याम शरद: शतं प्रब्रवाम शरद: शतम् अदीना: स्याम शर
द: शतं भूयश्च शरद: शतात् नत स्वाम्निन इन्द्रो वृद्धश्रवा: स्व

स्तिनः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्यो ऽरिष्टनेमिः स्वस्ति नोबृहस्पतिर्दधातु॥ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न ऽआसुव॥ शान्तिरस्तु· पुष्टिरस्तु· तुष्टिरस्तु· यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःस्वप्नं तत्प्रतिहतमस्तु। इष्टदेवस्थानस्य देवस्य शान्तिर्भवतु· ॐ अमृताभिषेकोऽस्तु·

आशीर्वा मन्त्राः

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्यो ऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठा सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥ दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम्। अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात्॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः॥ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि॥

पौराणिकमन्त्राः

मार्कण्डेय महाभाग आयुरारोग्यदायक।

कुमुदो विघ्नदतो रैभानुर्वेध्नो ध्वरेवापि ॥
धारणान्मे भुजे दक्षे मम कल्याणदो भव ।
पूरयस्व सदा स्वामिन् काम नानामनोरथाः ॥

रक्षाबन्धन.

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

तिलकमन्त्रः

आयुर्द्रोणसुते — ह्लादये: ककुप्पदेष्वायुष्मन् श्रीमान्
पदेषु नाशुभम — इन्द्राद्युमस्ते नमो आरोग्यमायुष्मन — इत्यादि.

प्रसादमन्त्रः

श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
अन्नाधिपेन ध्यातेन जलसर्व विलोचना ।
पूरय त्वाशीर्भिर्नाशीर्भिर्गात्राणि निवारणेन दारिद्र्यं हरन्तु ॥

दुग्धपानमन्त्रः

सतिलं गुडसंमिश्रं अञ्जल्यर्धमितं पयः ।
मार्कण्डेयवरं लब्ध्वा पिबाम्यायुः विवृद्धये ॥
यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।

न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ३
कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥
श्रीकृष्णार्पणमस्तु

(९५) जन्मोत्सवे अनिष्टग्रहशान्तिः ४८ ९

प्रायश्चित्तगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एवच ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥

गोनिष्क्रयीभूत रजतद्रव्याय नमः ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम. जन्मराशितः पञ्चमराशौ सूर्य-चन्द्र-भौम-बुध-शुक्र-शनि-राहात्मक सप्तग्रहयोग सूचित सूचयिष्यमाण सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये करिष्यमाण तच्छान्तिकर्मणि पूर्वकर्तव्य नियमानाचरणजन्य प्रत्यवायपरिहारपूर्वकं सद्यो देहशुद्धिद्वारा तत्कर्माधिकारसिद्धये इमां गां रुद्रदेवताकां तन्निष्क्रयीभूतं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे आचार्याय तुभ्यं संप्रददे.

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् प्रायश्चित्त गो(निष्क्रयीभूत रौप्य खण्ड)दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……गोत्राय ……… शर्मणे आचार्याय तुभ्यं संप्रददे.

तत्सन्न मम.

ब्राह्मणवरणम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम · जन्मराशितः पञ्चमराशौ सूर्य-चन्द्र-भौम-बुध-शुक्र-शनिग्रहात्मक सप्तग्रहयोग सूचित सूचयिष्यमाण सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये यामलोक्त प्रकारेण शान्तिकर्म करिष्ये; तत्कर्मणि दीप कलश गणेश (ग्रह) मातृका संपूजन हवन पुरःसरं संयुक्तानां सूर्य-सोम-भौम-बुध-शुक्र-शनि-राहु ग्रहाणां प्रतिमासु अधिप्रत्यधिदेवता प्रतिमासु च दिनत्रय पर्यन्तं संपूजन पूर्वकं तत्तद्ग्रह वैदिकमन्त्रेण प्रत्येकशः अष्टोत्तर सहस्रसं

ख्याकहवनकर्म च ब्राह्मणद्वारा करिष्ये; तत्कर्म कर्तुं नानानामगोत्रान् नानानाम शर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतधौतोत्तरीयसौवर्णाङ्गुलीयकजलपात्रासनादिभिः आचार्यत्वेन ऋत्विक्त्वेन च युष्मान् वृणे·

वृताः स्मः

यथा विहितं कर्म कुरुत· ॥ यथामति करवामः ॥

पुण्याहवाचनम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम· करिष्यमाण सप्तग्रहयोगशान्तिकर्मणि सर्वाभ्युदय प्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये; तत्पुण्याह वाचनार्थं एभिश्चन्दनपुष्पाक्षतपूगीफलवस्त्रोपायनादिभिः चतुर्णां ब्राह्मणानां वरणं पूजनं च करिष्ये·

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम· करिष्यमाणसप्तग्रहयोगशान्तिकर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे —

जपपाठ संकल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम जन्मराशितः पञ्चमराशौ सूर्य-चन्द्र-भौम-बुध-शुक्र-शनि राह्वात्मक सप्तग्रहयोग सूचित सूचयिष्यमाण सकलारिष्ट शान्तिपूर्वक श्रीमहामृत्युञ्जयप्रीतिद्वारा अल्पमृत्युनिवृत्तिपुरःसरं दीर्घायुरारोग्यैश्वर्योदयावाप्तये षोडशब्राह्मणद्वारा लक्षसंख्याक महामृत्युञ्जयवैदिकमन्त्र जपकर्म; तथा- संयुक्त सूर्यादि सप्तग्रहाणां चतुर्ब्राह्मण द्वारा अद्यारभ्य दिनत्रयपर्यन्तं आवृत्ति त्रयक्रमेण ततद्ग्रहसूक्तपाठकर्म; तथा- संयुक्त सूर्य-चन्द्र-भौम-बुध-शुक्र- शनि-राह्वात्मक सप्तग्रहसूचित सूचयिष्यमाण सकलारिष्ट दोषोपद्रव शान्त्यर्थं अद्यारभ्य दिनत्रयपर्यन्तं त्रिब्राह्मणद्वारा प्रतिदिनं नवावृत्ति शान्तीकाध्याय पाठकर्म च करिष्ये; तत्कर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षत पूगीफलादिभि युष्मान् वृणे .

वृताः स्मः ॥

अञ्जलिं बध्वा-

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥अच्युताय नमः

ततो दीप कलश गणेश मातृका संपूजनं आभ्युदयिकानुकल्पगोदानं च कृत्वा सप्तग्रहकलशानं संस्थाप्य स्थाल्युपरि अधिप्रत्यदिदेवतायुत सूर्यादिसप्तग्रहान् संपूज्य. संपूजितदेवताहवनादिकर्म कुर्यात्

दीपप्रार्थना–

नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनाथाय नमः ।

कलशप्रार्थना–

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञोस्मिन्नविघ्नं कुरु सर्वदा ॥

वरुणाय नमः ।

गणेशप्रार्थना– ।

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभः ।
अविघ्नं कुरु देवेश प्रसन्नो भव सर्वदा ॥

गणाधिपतये नमः ।

मातृकाप्रार्थना-

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथ रुद्रसहिता रक्षन्तु नो मातरः ॥

मातृकाभ्यो नमः ॥

अग्निप्रार्थना-

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥

अग्नये नमः ॥

सूर्यप्रार्थना-

रक्ताब्जयुग्माभयदानहस्तं
केयूरहाराङ्गदकुण्डलाढ्यम् ॥
माणिक्यमौलिं दिननाथमाडे
वन्धूककान्तिं विलसत्त्रिनेत्रम् ॥

श्रीसूर्याय नमः ॥

चन्द्रप्रार्थना-

श्वेताब्जस्थः स्फटिकरजतप्रोज्ज्वलत्कान्तिरुच्चै
मुक्ताहारधवलसिततनु नीलकेशौघरम्यः ॥

हस्ताब्जाभ्यां कुमुदवरदौ धारयन्नः शशाङ्को
भूत्यै भूयादभिमतरमुञ्चको यत्कलङ्कः ॥

चन्द्रमसे नमः ॥

भौमप्रार्थना-

नमाम्यङ्गारकं रक्तं रक्ताम्बरविभूषणम् ।
जानुस्थ वामहस्ताग्रं साभयं वरपाणिकम् ॥

भौमाय नमः ॥

बुधप्रार्थना-

वन्दे बुधं सदादेवं हरिद्वस्त्रं सुभूषणम् ।
जानुस्थबामहस्ताढ्यं साभयं वरपाणिकम् ॥

बुधाय नमः ॥

शुक्रप्रार्थना-

पाषाणस्थं नमः शुक्रं शुक्लाभकरभूषणम् ।
स्वर्णवासो रत्नधार चिन्मुद्राक्तकरद्वयम् ॥

शुक्राय नमः ॥

शनैश्चरप्रार्थना-

वन्दे शनैश्चरं वक्रदंष्ट्रं नीलविभूषणम् ॥
वामजानुस्थतद्धस्तं साभयान्यकराम्बुजम् ॥

शनैश्चराय नमः ॥

राहुप्रार्थना-

वन्दे राहुं कृष्णवर्णं धूम्रवस्त्रादिभूषितम् ।
वामोरुन्यस्तद्धस्तं साभयान्यकराम्बुजम् ॥

राहवे नमः ॥

ग्रहदानम्

देयद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम स्वजन्मराशितः पञ्चमराशौ सूर्य-चन्द्र-भौम-बुध-शुक्र-शनि-राह्वात्मक सप्तग्रहयोगसूचित सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये सूर्यग्रहप्रीतये गोधूमान्नं प्रजापतिदेवताकं गुडं अब्देवताकं ताम्रं सूर्यदेवताकं रक्तचन्दनं वनस्पतिदेवताकं रक्तवस्त्रं बृहस्पतिदेवताकं सुवर्णं वह्निदेवताकं माणिक्यं समुद्रदेवताकं. तथा–

चन्द्रग्रहप्रीतये तण्डुलान्नं प्रजापतिदेवताकं वंशपात्रं विश्वकर्मदेवताकं घृतं मृत्युञ्जयदेवताकं दधि सर्वदेवताकं श्रीखण्ड गन्धर्वदेवताकं कर्पूरं गन्धर्वदेवताकं श्वेतवस्त्रं बृहस्पतिदेवताकं शङ्खं समुद्रदेवताकं रजतं चन्द्रदेवताकं मौक्तिकं समुद्रदेवताकं. तथा–

भौमग्रहप्रीतये गोधूमान्नं प्रजापतिदेवताकं मसूरान्नं प्रजापतिदेवताकं गुडं अब्देवताकं ताम्रं सूर्यदेवताकं रक्तचन्दनं वनस्पतिदेवताकं रक्तवस्त्रं बृहस्प

निदेवताकं रक्तवृषभं रुद्रदेवताकं सुवर्णं वह्निदेवताकं प्रवालं समुद्रदेवताकं· तथा-

बुधग्रहप्रीतये मुद्गान्नं प्रजापतिदेवताकं घृतं मृत्युञ्जयदेवताकं कांश्यपात्रं विश्वकर्मदेवताकं हस्तिदन्तं विष्णुदेवताकं श्रीखण्डं गन्धर्वदेवताकं हरितवस्त्रं बृहस्पतिदेवताकं सुवर्णं वह्निदेवताकं मरकतमणिं समुद्रदेवताकं ·तथा-

शुक्रग्रहप्रीतये तण्डुलान्नं प्रजापतिदेवताकं घृतं मृत्युञ्जयदेवताकं श्रीखण्डं गन्धर्वदेवताकं श्वेतवस्त्रं बृहस्पतिदेवताकं रजतं चन्द्रदेवताकं सुवर्णं वह्निदेवताकं वज्रमणिं समुद्रदेवताकं·तथा-

शनिग्रहप्रीतये तिलान् सोमदेवताकान् माषान्नं प्रजापतिदेवताकं कुलत्थान्नं प्रजापतिदेवताकं तैलं भैरवदेवताकं लोहं यमदेवताकं कृष्णवस्त्रं बृहस्पतिदेवताकं महिषीं यमदेवताकां सुवर्णं वह्निदेवताकं नीलमणिं समुद्रदेवताकं· तथा-

राहुग्रहप्रीतये तिलान् सोमदेवताकान् माषान्नं प्रजापतिदेवताकं (कुलत्थान्नं प्रजापतिदेवताकं) तैलं भैरवदेवताकं खड्गं भैरवदेवताकं धूम्रवस्त्रं बृह-

स्पतिदेवताकं कृष्णमेषं   देवताकं सुवर्णं व-
ह्निदेवताकं गोमेदमणिं समुद्रदेवताकं नानानक्ष
त्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं वि
भज्य दातुं जले समुत्सृजे ।

प्रार्थना-

आकृष्णेन रजसावर्तमानो निवेशयन्नमृतं मर्त्यञ्च ॥
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
इमन्देवाऽअसपत्नꣳ सुवध्वं महते क्षत्राय महते
ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ॥ इम
ममुष्य पुत्रममुष्यै पुत्रमस्यै विश एषवोमी राजा
सोमोस्माकं ब्राह्मणानाꣳ राजा ॥
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ॥
अपाꣳ रेताꣳसि जिन्वति ॥
उद्बुध्यस्वाग्ने प्रतिजागृही त्वमिष्टापूर्ते सꣳसृजेथा
मयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् विश्वेदेवा
यजमानश्च सीदत ॥
अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिवत् क्षत्रं पयः सो-
मं प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्र
मन्धस इन्द्रस्येन्द्रियमिदं पयो मृतं मधु ॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ॥
शंयो रभिस्रवन्तु नः ॥
कया नश्चित्र आभुवदूती सदा वृधः सखा ॥
कया शचिष्ठया वृता ॥

दानप्रतिष्ठा–

अद्यकृतैतत् सूर्य-चन्द्र-भौम-बुध-शुक्र-शनि-राहुग्रहप्रीतये तत्र द्रव्यदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे· तत्सन्न मम·

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ॥
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ १ ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥
आखण्डलोग्निर्भगवान् यमोवै निर्ऋतिस्तथा ॥२॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ॥ ३॥
कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥४॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥
आदित्यश्चन्द्रमा भौमो बुधोजीवसितार्कजाः ॥ ५॥
ग्रहास्त्वामभिषिञ्चन्तु राहुःकेतुश्च तर्पिताः ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥
ऋषयो मनवो गावो देवमातर एवच. ॥
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ ७ ॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥
औषधानि च रत्नानि कालस्यावयवाश्चये ॥ ८ ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ९ ॥
ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्य-

ञ्च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि
पश्यन् ॥१॥
इमन्देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते
ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ॥ इमम
मुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएषवोमी राजा सोमो
स्माकं ब्राह्मणानाꣳराजा ॥२॥
अग्निर्मूर्द्धा दिवःककुत्पतिः पृथिव्या अयम् ॥
अपाꣳरेताꣳसि जिन्वति ॥३॥
उद्बुध्यस्वाग्ने प्रति जागृही त्वमिष्टापूर्ते सꣳसृजेथा
मयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदे-
वा यजमानश्च सीदत ॥४॥
बृहस्पते अति अदर्योऽ अर्हाद्युमद्विभाति क्रतुमज्ज-
नेषु ॥ यदीदयच्छवसऽऋतप्रजाततदस्मासु द्रवि-
णन्धेहि चित्रम् ॥ उपयामगृहीतो सि बृहस्पतयेत्वै
षते योनिर्बृहस्पतयेत्वा ॥५॥
अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रम्पयः सो
मं प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्र
मन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतम्मधु ॥६॥
शन्नो देवीरभिष्टय आपो भवन्तु पीतये ॥ शंयोरभि-
स्रवन्तु नः ॥७॥

कयानश्चित्रऽआभुवदूती सदा वृधः सखा ॥ कया श
चिष्ठया वृता ॥८॥

केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे ॥ समुषद्भिर
जायथाः ॥९॥

क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि मा त्वा हिꣳसी
न्मा मा हिꣳसीः ॥१॥

क्षेत्रस्य पतिना वयं हितेनेव जयामसि ॥ गामश्वं
पोषयित्वा स नो मृडातीदृशे ॥२॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ॥ उर्वारु-
कमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ त्र्यम्बकं य
जामहे सुगन्धिं पतिवेदनम् ॥ उर्वारुकमिव बन्धनादितो
मुक्षीय मामुत ॥१॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रू
पमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण स
र्वलोकम्म इषाण ॥२॥

यदक्रन्दः प्रथमञ्जायमान उद्यन्त्समुद्रादुत वा पुरीषा
त् ॥ श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महिजा
तन्ते अर्वन् ॥३॥ विष्णोरराटमसि विष्णो श्नप्त्रेस्थो वि
ष्णो स्यूरसि विष्णोर्ध्रुवोसि ॥ वैष्णवमसि विष्णवे त्वा ॥४॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः
स बुध्न्याऽउपमाऽअस्य विष्ठा सतश्च योनिमसतश्च विवः॥५॥
त्रातारमिन्द्रमवितारꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वया
मि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा त्विन्द्रः ॥ ६ ॥
यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ॥ देवस्त्वा सवि
ता मध्वानक्तु पृथिव्या सꣳस्पृशस्पाहि ॥ अर्चिरसि शो
चिरसि तपोसि ॥७॥
कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि ॥ समापोऽ
अद्भिरग्मत समोषधीभिरोषधीः ॥८॥
इन्धानास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि ॥ वय-
स्वन्तो वयस्कृतꣳ सहस्वन्तः सहस्कृतम् ॥ अग्ने सपत्न
दम्भनमदब्धासो अदाभ्यम् ॥ चित्रावसो स्वस्ति ते
पारमशीय ॥ ९ ॥
अग्निन्दूतं पुरो दधे हव्यवाहमुपब्रुवे ॥ देवाँ आसाद
यादिह ॥१॥
अप्स्वग्ने सधिष्ठ्व सौषधीरनुरुध्यसे ॥ गर्भे सञ्जा
यसे पुनः ॥२॥
स्योना पृथिविनो भवानृक्षरा निवेशनी ॥ यच्छा नः
शर्म सप्रथाः ॥३॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य
पाᳪंसुरे स्वाहा ॥ ४ ॥
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर वि
द्वान् ॥ जहि शत्रूᳪं रप मृधो नुदस्वाथा भयङ्कृणुहि वि
श्वतो नः ॥ उपयामगृहीतोसीन्द्राय त्वा मरुत्वत एष ते यो
निरिन्द्राय त्वा मरुत्वते ॥ ५ ॥
अदित्यै राष्णा सीन्द्राण्या ऽउष्णीषः पूषासि घर्माय दीष्व ॥ ६
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ॥
यत्कामास्ते जुहुमस्तन्नो अस्तु वयᳬं स्याम पतयो रयी-
णाम् ॥ ७ ॥
नमोस्तु सर्पेभ्यो येके च पृथीवीमनु ॥ ये अन्तरिक्षे ये
दिवि तेभ्यः सर्पेभ्यो नमः ॥ ८ ॥
ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विशीमतः सुरुचो वेनऽआवः
॥ स बुध्न्या ऽउपमा ऽअस्य विष्ठा शतश्च योनिमसतश्च
विव ॥ ९ ॥
जा॒तवे॑दसे सुनवाम॒ सोम॑ मराती य॒तो निद॑हाति वेदः ॥
स नः॑ पर्षदति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वे॒व सिन्धुं॑ दुरि॒ता त्य॒ग्निः ॥ १ ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ॥ उर्वारुकमिव ब
न्धनान्मृत्योर्मुक्षीय मामृतात् ॥

यत इन्द्र ह्वयामहे ततो नो अभयं कृधि ॥ मघवञ्छ
ग्धि तव तन्न ऊतिभिर्विद्विषो विमृधो जहि ॥ १ ॥
त्वंहि राधस्पते राधसो महः क्षयस्यासि विधतः ॥
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ २ ॥
येन देवा पवित्रेणात्मानं पुनते सदा ॥ तेन सहस्रधारेण
पावमान्यः पुनन्तु माम् ॥ १ ॥
प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयम् ॥ तेन ब्रह्मविदो
वयं पूतं ब्रह्म पुनीमहे ॥ २ ॥
इन्द्रः सुनीती सहमा पुनातु सोमः स्वस्त्या वरुणः समीच्या ।
॥ यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मूर्जयन्त्या
पुनातु ॥ ३ ॥
आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन ॥ महेरणाय
चक्षसे ॥ १ ॥ यो वः शिवतमो रसस्तस्य भाजयतेह
नः ॥ उशतीरिव मातरः ॥ २ ॥ तस्मा अरङ्गमामवो यस्य
क्षयाय जिन्वथ ॥ आपो जनयथा च नः ॥ ३ ॥
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्ति
रोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शा-
न्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामाशा
न्तिरेधि ॥ ४ ॥

दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ॥ मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे॥ मित्रस्य चक्षुषा समीक्षामहे ॥ ५ ॥

दृते दृꣳह मा॥ ज्योक्ते सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम् ॥ ६ ॥

नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ॥ अन्यास्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव॥७॥

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ॥ नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ ८ ॥

यतो यतः समीहसे ततो नो अभयं कुरु ॥ शन्नः कुरु प्रजाभ्यो भयन्नः पशुभ्यः ॥ ९ ॥

सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः ॥१०॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥ ११॥

स्वादिष्ठया मदिष्ठया पवस्व सोमधारया ॥
इन्द्राय पातवे सुतः॥ १॥

रक्षोहा विश्वचर्षणिरभि योनिमयोहतम् ॥
द्रुणा सधस्थमासदत् ॥२॥
वरिवोधातमो भव मंहिष्ठो वृत्रहन्तम ॥
पर्षि राधो मघोनाम् ॥३॥
अभ्यर्ष महानान्देवानां वीतिमन्धसा ॥
अभिवाजमुत श्रवः ॥४॥
त्वामच्छा चरामसि तदिदर्थान्दिवे दिवे ॥
इन्दो त्वे नऽआशसः ॥५॥
पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता ॥
वारेण शश्वता तना ॥६॥
तमीमण्वीः समर्यऽआगृभ्णन्ति योषणो दश ॥
स्वसारः पार्ये दिवि ॥७॥
तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम् ॥
त्रिधातु वारणं मधु ॥८॥
अभी३ मम घ्न्याऽउत श्रीणन्ति धेनवः शिशुम् ॥
सोममिन्द्राय पातवे ॥९॥
अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते ॥
शूरो मघा च मंहते ॥१०॥

समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः॥
इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु ॥१॥
या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्व-
यंजाः॥ समुद्रार्था याः शुचयः पावकास्ता आपो देवीरि-
ह मामवन्तु ॥२॥
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ॥
मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥३॥
यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदन्ति ॥
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु ॥४॥
त्रायन्तामिह देवास्त्रायन्तां मरुतां गणाः॥ त्रायन्तां वि-
श्वा भूतानि यथायमरपा असत् ॥५॥
आप इद्वा उ भेषजीरापो अमीवचातनीः॥ आपः सर्वस्य
भेषजीस्तास्ते कृण्वन्तु भेषजम् ॥६॥
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ॥ अनाम
इत्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ॥७॥
इमा आपः शिवतमा इमाः सर्वस्य भेषजी ॥ इमा राष्ट्रस्य व
र्द्धनीरिमा राष्ट्रभृतो जनाः ॥८॥
याभिरिन्द्रमभ्यषिञ्चत्प्रजापतिः सोमं राजानं वरुणं यमं मनुम्॥
ताभिरद्भिरभिषिञ्चामि त्वामहं राज्ञां त्वमधिराजो भवेह ॥९॥

महान्तन्त्वा महीनां सम्राजं चर्षणीनाम् ॥ देवीजनीत्र्यजी
जनद्भद्राजनित्र्यजीजनत् ॥१०॥
देवस्य सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्ने
स्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय
श्रियै यशसेन्नाद्याय ॥११॥

(९८)

अश्वपवलिपाटिल

अद्य कृतैतद् गोनिष्क्रयरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ………… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

चन्दनाक्षतपुष्पाणि गृहीत्वा—

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि ॥ वैष्णवमसि विष्णवे त्वा ॥

ॐ विष्णो इहागच्छेह तिष्ठ ॐ विष्णवे नमः। पाद्यं समर्पयामि विष्णवे नमः। अर्घ्यं समर्पयामि विष्णवे नमः। आचमनीयं समर्पयामि विष्णवे नमः। गन्धं समर्पयामि विष्णवे नमः। सिन्दूरं समर्पयामि विष्णवे नमः। पिष्टातकं समर्पयामि विष्णवे नमः। अक्षतान् समर्पयामि विष्णवे नमः। यवतिलान् समर्पयामि विष्णवे नमः। पुष्पाणि समर्पयामि विष्णवे नमः॥

ततो द्वादशनामभिः पूजयेत्—

गन्धाक्षतपुष्पाणि गृहीत्वा—

ॐ मधुसूदनाय नमः। ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः। ॐ श्रीधराय नमः। ॐ हृषीकेशाय नमः। ॐ पद्मनाभाय नमः। ॐ दा

मोदराय नमः । ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः । ॐ गोविन्दाय नमः । ॐ विष्णवे नमः ॥ ततो धूपं आघ्रापयामि विष्णवे नमः । दीपं दर्शयामि विष्णवे नमः । नैवेद्यं समर्पयामि विष्णवे नमः । आचमनीयं समर्पयामि विष्णवे नमः । द्रव्यं समर्पयामि विष्णवे नमः ॥

ततः पुष्पाञ्जलिः —

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

ततो गन्धाक्षतपुष्पैः कुम्भं पूजयेत् —

ॐ सोपस्करकुम्भाय नमः ॥ ततः

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... शर्मा अहं मम

इह नानासुखभोगोत्तराक्षयविष्णुलोकनिवास यमपथाधिकरणकक्षुरधाराछिदनमार्गसन्तरण घोरातपनिवारण तप्तवालुकाश्मकण्टकितभूदुर्ग सन्तरणसुखपूर्वकमार्गगमनदुष्टसत्त्वनिवारण आकल्पतृप्तिबहुरसोपस्थितविपदधिकरणकाप्सरःशतसङ्कीर्णविमानाधिकरणकविराजपूर्वकसुस्पर्शसुशीतलमरुत्सुखप्राप्तिकामनया इमं धर्मघटं विष्णुदेवताकं, छत्रं उत्तानाङ्गिरोदेवताकं, यष्टिं वनस्पतिदेवताकां, शर्करैलादिजलपूरितघटं विष्णुदेवताकं, व्यजनं वायुदेवताकं, काष्ठपादुके उत्तानाङ्गिरोदेवताके, शङ्कून् प्रजापतिदेवताकान्, उपानहो उत्तानाङ्गिरोदेवताके, जलपूरितपात्रं विष्णुदेवताकं, वस्त्रं बृहस्पतिदेवताकं, सोपस्करं आमान्नं प्रजापतिदेवताकं, ……………… गोत्राय ………………
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना—

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥

सर्वेषामेव दानानां छत्रमातपवारणम् ।
सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥
यतिभ्यो वैणवं दण्डं द्विजेभ्योपि खनित्रकम् ।
प्रदाय परलोकेसौ यमदण्डं न गच्छति ॥
एष पूर्णघटो दत्तः शर्करैलादिसंयुतः ।
अस्य प्रदानाद्देवेशः प्रीयतां मे जनार्दनः ॥
व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखप्रदम् ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥
कण्टकोच्छिष्टपाषाणवृश्चिकादिनिवारणे ।
पादुके संप्रदत्ते मे द्विज प्रीत्या प्रगृह्यताम् ॥
प्राजापत्या यतः प्रोक्ताः शङ्कवो यज्ञकर्मणि ।
तस्माच्छङ्कून्प्रयच्छामि प्रीयतां मे जनार्दनः ॥
उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छनम् ॥

दानप्रतिष्ठा—

अद्यकृतेनद्धर्मघटच्छत्रदण्डशर्करैलादिमिश्रितजलपूर्णघटव्यजनकाष्ठपादुकाशङ्कूपानत्सोपस्करामान्नदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवताकं……गोत्राय……शर्मणे ब्राह्म

णाय तुभ्यं संप्रददे ॥

भूयसीदक्षिणादानम्—

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... वर्मा अहं मम अक्षयतृतीयायां युगादिपर्वणि सोपस्करधर्मघटदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थं इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

तत्सन्न मम ॥

अञ्जलिं बध्वा—

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः ३ ॥

हस्ते जलं गृहीत्वा —

ॐ कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा नुसृतस्वभावात् ।
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥

‘यजमानाय प्रसाददानम्’

अथ दशाहदानम् —

प्रायश्चित्तगोदानम् —

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयरजतद्रव्याय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... वर्मा अहं मम सकलपापक्षयपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तयेऽद्यदशाहणपर्वणि कर्तव्य सोपस्करामान्नदानादिकर्माधिकारसिद्धये इदं गोनिष्क्रयरजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना —

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा —

अद्यकृतैतद् गोनिष्क्रयरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्र

ददे ॥

अथामान्नदानम्—

सोपस्करणामान्नाय नमः।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... वर्मा अहं मम अदत्तोपादानादिदशविधपापपरिहारपूर्वकं मम स्तपितृणां समुद्धरणानन्तरं स्वर्गलोकनिवासाक्षय्यतृप्तिकामनया विशेषतः श्रीपरमेश्वरत्रिविक्रमनारायणप्रीतये इदं दध्याज्यसूपलवण आम्रफलादिनानाविधफलमिष्टान्नादियुतं सोपस्करं आमान्नं प्रजापतिदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना—

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥

दानप्रतिष्ठा—

अद्यकृतैतत् आम्रफलादिनानाविधफलमिष्टान्नादियुतसोपस्करामान्नदानकर्मणः प्रतिष्ठा

थं इदं रजतं चन्द्रदेवताकं ....गोत्राय ....शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

अथ गोदानम्—

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयरजतद्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ....वर्मा अहं मम अदत्तोपादानादिदशविधपापपरिहारपूर्वकं गङ्गास्नानजन्ययथोक्तफलप्राप्तिद्वारा श्रीपरमेश्वरत्रिविक्रमनारायणप्रीतये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ....गोत्राय ....शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्य कृतैतद् गोनिष्क्रयीभूतरजतद्रव्यदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ………… गोत्राय ……………………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

भूयसीदक्षिणादानम्—

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः ……………………… वर्मा अहं मम श्रीत्रिविक्रमनारायणप्रीतये सोपस्करामान्नदानकर्मणः प्रतिष्ठार्थं इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं ………… गोत्राय ……………………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥ तत्सन्न मम ॥

अञ्जलिं बध्वा—

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः३ ॥

हस्ते जलं गृहीत्वा—

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥

अथ कर्कटसंक्रान्तिदानम्—

प्रायश्चित्तगोदानम्—

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयरजतद्रव्याय नमः।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... शर्मा अहं मम कर्कटसंक्रान्तिपर्वणि सोपस्करामाल्लदानकर्माधिकारसिद्ध्ये सद्यो देहविशुद्ध्ये इदं प्रायश्चित्तगोनिष्क्रयरजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्य कृतैतत्प्रायश्चित्तगोनिष्क्रयरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

अथामान्नदानम्—

सोपस्करामान्नाय नमः।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... वर्मा अहं मम अद्य कर्कटसंक्रान्तिपर्वणि श्रुतिस्मृतिपुराणोक्तफलप्राप्तिद्वारा श्रीपरमेश्वरश्रीधरनारायणप्रीतये इदं सर्वोपस्करयुतं आमान्नं प्रजापतिदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

प्रार्थना—

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥

दानप्रतिष्ठा—

अद्य कृतेन सर्वोपस्करयुतामान्नदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे॥

भूयसीदक्षिणादानम्—

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति

त्रिप्रवरः .... वर्मा अहं मम श्रुतिस्मृतिपुराणोक्तफलप्राप्तिपूर्वकं श्रीपरमेश्वरश्रीधरनारायणप्रीतये कृतस्य सोपस्करामान्नदानकर्मणः साङ्गफलप्राप्त्यर्थं इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे। तत्सन्न मम ॥

अञ्जलिं बध्वा—

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः ॥३॥

हस्ते जलं गृहीत्वा—

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात्।
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥

अथ मकरसङ्क्रान्तिदानम्

प्रायश्चित्तगोदानम्–

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयरजतद्रव्याय नमः।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैधुवेति त्रिप्रवरः .... वर्मा अहं मम श्रुतिस्मृतिपुराणोक्तफलप्राप्तये करिष्यमाणसोपस्करामान्नदानकर्माधिकारसिद्धये सद्यः स्वदेहशुद्धये च इदं प्रायश्चित्तगोनिष्क्रयरजतं चन्द्रदेवताकं .... गोत्राय ....
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्य कृतैतत्प्रायश्चित्तगोनिष्क्रयरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं

संप्रददे ॥

अथामान्नदानम्—

सोपस्करामान्नाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... शर्मा अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये, विशेषतः ऐहिकामुष्मिकसकलसाधुफलावाप्तिपूर्वकं श्रीपरमेश्वरमाधवनारायणप्रीतये इदं हिमानिलनिवारकं कार्पासमध्यगतं नीलीकुसुम्भादिरागरञ्जितं नीशारवस्त्रं बृहस्पतिदेवताकं अङ्गारसंपूरितं शीतबाधानिवृत्तिजनकं साग्नि हसन्तिकापात्रं विष्णुदेवताकं सोपस्करामान्नं प्रजापतिदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना—

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ।
सुवेषधारित्वं यस्मादतः शान्तिं प्रयच्छ मे ॥
हसन्तिकां प्रदास्यामि ज्वलदङ्गारशोभिताम् ।
विप्रशीतार्तिनाशाय तेन प्रीणातु मे शिवः ॥

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥

दानप्रतिष्ठा—

अद्य कृतैतत् शीतानिलनिवारकनीशारवस्त्र साग्निसाङ्गारहसन्तिकापात्र सोपस्करान्नदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… ……… गोत्राय ……………………………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

भूयसीदक्षिणादानम्—

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

रजतद्रव्याय नमः।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ……………………………… वर्मा अहं मम श्रीपरमेश्वरमाधवनारायणप्रीतये कृतस्य शीतानिलनिवारकनीशारवस्त्र साग्न्यङ्गारहसन्तिकापात्रसोपस्करान्नदानकर्मणः साङ्गफलप्राप्त्यर्थं इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं ……………… गोत्राय ………………………

शर्मणे ब्राह्मणाय तुभ्यं संप्रददे। तत्सन्न मम॥

अञ्जलिं बध्वा—

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ अच्युताय नमः ३॥

हस्ते जलं गृहीत्वा—

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात्॥
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत्॥

धान्यदानम्

धान्यपूजनमन्त्रः

अन्नं ब्रह्मरसः प्रोक्त मन्ने प्राणाः प्रतिष्ठिताः ॥
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्द्धते ॥ १ ॥
अन्नमेव यतो लक्ष्मी रन्नमेव जनार्दनः ॥
धान्य पर्वत रूपेण पाहि तस्मान्नमो नमः ॥ २ ॥
नमो ब्रह्मण्य देवाय गोब्राह्मण हिताय च ॥
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ॐ ब्राह्मणाय नमः ॥

अद्येह काश्यप गोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः .... वर्मा अहं मम सकलपापक्षयपूर्वक अनेक वर्ष सहस्रावच्छिन्न सोम लोक कामनया श्रीपरमेश्वर प्रीतये इमानि धान्यानि प्रजापति देवताकानि यथानाम गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना ॥

सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ॥
प्राणिनां जीवनोपाय मतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा ॥

अद्य कृतेन पूर्वोच्चारित फल सिद्धि द्वारा श्रीप
रमेश्वर प्रीतये कृतस्य धान्य दान कर्मणः प्रतिष्ठा
सांगता सिद्ध्यर्थे इदं रजतं चन्द्रदेवताकं ……
गोत्राय …… शर्मणे ब्राह्मणाय तुभ्यम्
संप्रददे

दक्षिणादानम्

हिरण्य गर्भगर्भस्थं हेमबीजं विभावसो ॥
अनन्त पुण्य फलद मतः शान्तिं प्रयच्छ मे ॥

रजत स्वर्णाय नमः

अद्येह काश्यप गोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः …… वर्मा अहं मम
श्रुति स्मृति पुराणोक्त फलावाप्ति पूर्वक श्रीपर
मेश्वर प्रीतये कृतस्य धान्य दान कर्मणो न्यूना
तिरिक्त संपूर्णतये इमां दक्षिणां रजतं चन्द्रदेवता
कं …… गोत्राय …… शर्म
णे ब्राह्मणाय तुभ्यं संप्रददे

अञ्जलिं बध्वा ॥

ॐ यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ॥

न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ॥
हस्ते जलं गृहीत्वा

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ॥
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥

(१३)

विषुवत् संक्रमण स्थानि:

"मेषविषुवच्छान्तिः"

प्रायश्चित्त गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोप्रत्याम्नायीभूत रजत द्रव्याय नमः

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः...... .... वर्मा अहं मम मेषविषुवत्संक्रमणसूचित वामपादपतित नक्षत्रसंजात सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये करिष्यमाण मेषविषुवत् शान्तिकर्मणि· पूर्वकर्तव्य नियमानाचरण जन्य सकल प्रत्यवाय परिहार पूर्वक सद्यो देह शुद्धये· इदं गोप्रत्याम्नायीभूतं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्न मम·

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दान प्रतिष्ठा-

अद्य कृतैतद् गोप्रत्याम्नायीभूत रजत दान कर्मणः प्रतिष्ठार्थम्· इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्न मम·

ब्राह्मणवरणम्·

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ... . वर्मा अहं मम· मेषविषुवत्संक्रमण सूचित वामपाद पतित नक्षत्र संजात सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदर्यावाप्तये रुद्रयामलोक्त प्रकारेण· शान्तिकर्म करिष्ये· तदङ्गतया ब्राह्मणद्वारा महाँ२इन्द्र इति वैदिकमन्त्रेण एकसहस्र संख्याक होमकर्म करिष्ये· करिष्यमाण होम कर्मणि सर्वाभ्युदय प्राप्तये ब्राह्मणद्वारा पुण्याहं च वाचयिष्ये· एभिश्चन्दनपुष्पाक्षत वस्त्रयज्ञोपवीतोपायनादिभि र्ब्राह्मणांश्च वृणे· ॐ वृता स्मः।

पुण्याहवाचनम्·

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ... . वर्मा अहं मम करिष्यमाण मेषविषुवत् शान्तिकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः!

मम गृहे पुण्याहं भवन्तो ब्रुवन्तु: ३ ॐ पुण्याहम् ३ ॐ पुनन्तु
मा देवजना: पुनन्तु मनसा धियः॥ पुनन्तु विश्वा भूतानि जा
वेदः पुनीहि मा ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ----
...... वर्मा अहं मम क्रियमाणे मेष विषुवत् शान्ति कर्मणि
सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रु
वन्तु ३ ॐ स्वस्ति: ३ ॐ स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पू
षा विश्ववेदाः॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्प
तिर्दधातु ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः......
...... वर्मा अहं मम क्रियमाणे मेष विषुवत् शान्ति कर्मणि
सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु ३
ॐ ऋध्यताम् ३ ॐ सत्रस्य ऋद्धिरस्य गन्म ज्योतिरमृता अभू
म ॥ दिवं पृथिव्या अध्यारुहामा विदाम देवान्स्वर्ज्योतिः॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ......
...... वर्मा अहं मम क्रियमाणे मेष विषुवत् शान्ति कर्मणि
सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे वृद्धिं भवन्तो ब्रुवन्तु ३
ॐ वृद्ध्यताम् ३ ॐ ज्येष्ठान्त्वम ऽ आधिपत्यन्त्वम मन्युश्चमे भा

श्चमे मश्चमे ऽमश्चमे जेमा चमे महि
मा चमे वरिमा चमे प्रथिमा चमे वर्षिमा चमे द्राघिमा चमे वृ
द्धश्चमे वृद्धिश्चमे यज्ञेन कल्पन्ताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ....
.... वर्मा अहं मम करिष्यमाणे मेष विषुवत् शान्ति कर्मणि
सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे कल्याणं भवन्तो
ब्रुवन्तु ३ ॐ कल्याणम् ३ ॐ यथेमां वाचं कल्याणीमावदा
नि जनेभ्यः ॥ ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय
चारणाय च ॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासम
यं मे कामः समृध्यताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ....
.... वर्मा अहं मम करिष्यमाणे मेष विषुवत् शान्ति कर्मणि
सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रु
वन्तु ३ ॐ श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥
पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

ॐ अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ....
.... वर्मा अहं मम करिष्यमाणे मेष विषुवत् शान्ति कर्मणि
सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे शान्तिं भवन्तो ब्रुवन्तु
ॐ शान्तिः ३ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्ति
रापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः
शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरे
विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥

दीप प्रार्थना-

नमोस्त्वनन्ताय सहस्रमूर्त्तये ।
सहस्रपादाक्षि शिरोरू बाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते ।
सहस्रकोटीयुगधारिणे नमः ॥

दीपनारायणाय नमः ।

वरुण प्रार्थना-

वरुण त्वं महाभाग सर्वदेवप्रपूजित ॥
विनते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥

वरुणाय नमः ।

गणेश प्रार्थना-

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

ग्रहप्रार्थना- ब्रह्मा मुरारि स्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ॥
गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः।

मातृका प्रार्थना–

ब्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी लीलया·
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोर घर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥

मातृभ्यो नमः ।

अग्निप्रार्थना–

अग्निं प्रज्वलितं वन्दे जातवेद हुताशनम् ॥
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम् ॥

अग्नये नमः ।

पुष्पाञ्जलिः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
अच्युतो माधवोऽनन्तो भक्तानामभयप्रदः ।
त्राहि मां सर्वभीतिभ्यो यतोहं शरणं गतः ॥

गोविन्दाय नमः ।

सुपूजितगोविन्दघटदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ……
…… वर्मा अहं मम मेषविषुवसंक्रमणसूचितवामपादपतित नक्षत्र संजात सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये रुद्रयामलोक्त प्रकारेण शान्तिकर्मणि तत्तद्देवतानां स्थापन पूजन हवनादिकर्मसंपत्तये सुपूजितं सौवर्णगोविन्दप्रतिमायुतं ताम्रस्थालीसमेतं ताम्रघटं विष्णुदेवताकं ……
…… गोत्राय …… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

प्रार्थना-

नमो नमस्ते गोविन्द पुराणपुरुषोत्तम ।
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा-

अद्य कृतैतत् सुपूजित गोविन्दघटदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं …… गोत्राय …… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

सर्वारिष्ट गो तिल पात्र दानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गवे नमः । ससुवर्णतिलपूर्णताम्रपात्राय नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यप गोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः …… …………………… वर्मा अहं मम मेषविषुवत्संक्रमण सूचित वामपादपतित नक्षत्र संजात सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये तिलान् सोमदेवताकान् · ताम्रपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं · सालङ्कारां गां रुद्रदेवताकां …… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना–

यानिकानि च पापानि जन्मान्तरकृतानि च ।
तिलपात्रप्रदानेन मम पापं व्यपोहतु ॥
कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा ।

अद्यकृतैतत् तिलपूर्ण ताम्रपात्र सुवर्ण सालङ्कृत गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं …… गोत्राय …… ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्न मम.

पूर्णपात्रदानम्

पूर्णपात्राय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ······ ················· वर्मा अहं मम मेषविषुवत् शान्तिकर्मणि दीप कलश गणेश पूजनपूर्वक प्रधानदेवता गोविन्दपूजन हवन कर्मणः अपूर्णस्य पूर्णार्थं पूर्णपात्रं प्रजापतिदेवताकं ······ गोत्राय ·········· शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. तत्सन्न मम.

मेधा ।

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ॥ सनिम्मेधामयासिष ᳪं स्वाहा ॥ याम्मेधान्देवगणाः पितरश्चोपासते ॥ तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ॥ मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥

वस्त्रहोमः ॥

एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ॥ समाववर्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं जगत् ॥ वैश्वानरज्योतिर्भूयासं विभून्कामान् व्यश्नवै भूः स्वाहा ॥

चरु होमः —

ॐ अव्यादधामि समिधमग्ने व्रतपते त्वयि ॥
व्रतञ्च श्रद्धां चोपैमीन्धे ता दीक्षितो· अहं स्वाहा ॥

घृतच्छाया ॥

ससुवर्णघृत कांश्य पात्राय नमः ॥
ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्यच्छदिरसि
विश्वजनस्य च्छाया ॥

अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् ॥
तत्सर्वं नाशयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ·····
·············· वर्मा अहं मम मेषविषुवत् शान्तिकर्मणि स्वमुखावलोकितं आज्यं मृत्युञ्जयदेवताकं कांश्य
पात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं काश्यपगोत्राय
·············· शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· ॥
तत्सन्न मम ॥

प्रार्थना.

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ॥
आयुर्वृद्धिकरं दातु राज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा.

अद्यकृतैतत् आज्य कांश्य पात्र सुवर्णदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यपगोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. ॥ तत्सन्न मम. ॥

यज्ञान्त गोदानम्.॥

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोनिष्क्रय रजतद्रव्याय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः…… …………………… वर्मा अहं मम मेषविषुवत् शान्तिकर्मणि गोविन्ददेवता संपूजन हवनादि कर्मणः साङ्गता सिद्ध्यर्थं इदं गोप्रत्याम्नाय रजतं चन्द्रदेवताकं काश्यपगोत्राय… ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्नमम.

प्रार्थना- कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्यकृतैतत् गोप्रत्याम्नायीभूत रजत दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवताकं काश्यपगोत्राय …………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत् सन्न मम ॥

भूयसी भोजन दक्षिणा ॥

अद्येह काश्यप गोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः …………………… वर्मा अहं मम मेषविषुवत् संक्रमण सूचित वाम पाद पतित नक्षत्र संजात शकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये कृतस्य दीप कलश गणेश मातृका ग्रह संपूजन तत्तद्देवतानां हवनपूर्वक प्रधानभूत गोविन्द देवतायाः एक सहस्र संख्याक वैदिक मन्त्रेण हवन कर्मणः साङ्गतासिद्ध्यर्थं न्यूनातिरिक्त दोष निवारणार्थं करिष्यमाण दशब्राह्मण भोजन कर्मणश्च प्रतिष्ठार्थं इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे· तत्सन्न मम· ॥

अभिषेकः ।

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

ॐ द्यौः शान्तिरन्तरिक्ष ꣳ शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः
शान्तिर्ब्रह्म शान्तिः सर्व ꣳ शान्तिः शान्तिरेव शान्तिः सामा
शान्तिरेधि ॥

तिलक प्रसादः ॥

श्रीर्वर्च्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ॥
धान्यं धनं पशून्बहु पुत्रलाभंशतसंवत्सरं दीर्घमायुः ॥

अञ्जलिं बध्वा ॥

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥

इति मेष विषुवत् शान्ति विधिः

"तुलाविषुवच्छान्ति"

प्रायश्चित्तगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोप्रत्याम्नायीभूत रजतद्रव्याय नमः ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मण हिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम तुलाविषुवत्संक्रमणासूचित वामपाद पतित नक्षत्र संजात सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये करिष्यमाण तुलाविषुवच्छान्ति कर्मणि पूर्वकर्तव्यनियमानाचरणजन्यप्रत्यवायपरिहारपूर्वक सद्यो देहशुद्धये इदं गोप्रत्याम्नायीभूतं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे । तन्न मम

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्य कृतैतत् गोप्रत्याम्नायीभूत रजतदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्न मम. ।

ब्राह्मणवरणम्-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम तुलाविषुवत्संक्रमणसूचित वामपादपतित नक्षत्र संजात सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये रुद्रयामलोक्तप्रकारेण. शान्तिकर्म करिष्ये; तदङ्गतया शुक्रज्योतिश्चेति वैदिकमन्त्रेण एक सहस्र संख्याक होमकर्म करिष्ये; करिष्यमाण होमकर्मणि सर्वाभ्युदय प्राप्तये ब्राह्मण द्वारा पुण्याहं च वाचयिष्ये; एभिश्चन्दन पुष्पाक्षत वस्त्र यज्ञोपवीतोपायनादिभिः ब्राह्मणांश्च वृणे. । ॐ वृता स्मः ॥

पुण्याहवाचनम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... शर्मा अहं मम कारिष्यमाण तुलाविषुवत्शान्तिककर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे पुण्याहं भ

Nepal Sanskrit University, Balmandir, Kathmandu

वन्तो ब्रुवन्तुः ३ ॐ पुण्याहं ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मन
सा धियः॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ···
क्षेत्री ··· वर्मा अहं मम करिष्यमाणे तुलाविधिवत् दानाख्ये कर्म
णि सर्वाभ्युदयप्राप्त्यर्थं भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु
ॐ स्वस्ति ३ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ···
क्षेत्री ··· वर्मा अहं मम करिष्यमाणे तुलाविधिवत् दानाख्ये कर्म
णि सर्वाभ्युदयप्राप्त्यर्थं भो ब्राह्मणाः मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु
ॐ ऋद्ध्यताम् ३ ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम॥
दिवं पृथिव्या अध्यारुहाम [illegible] वान्स्वर्ज्योतिः॥

अद्येह काश्यपगोत्रः का[illegible]वत्सार नैध्रुवेति त्रिप्रवरः ····
क्षेत्री ··· वर्मा अहं मम करिष्यमाणे तुलाविधिवत् दानाख्ये कर्मणि
सर्वाभ्युदयप्राप्त्यर्थं भो ब्राह्मणाः मम गृहे वृद्धिं भवन्तो ब्रुवन्तुः
ॐ वर्द्धताम् ३ ॐ ज्यैष्ठ्यञ्च मऽआधिपत्यञ्च मे मन्युश्च मे भा
मश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे
प्रथिमा च मे वर्ष्मा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञे
न कल्पन्ताम्॥

दान प्रतिष्ठा-

अद्य कृतैतत् गोप्रत्याम्नायीभूत रजतदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्न मम. ।

ब्राह्मण वरणम्-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम तुलाविषुवत्संक्रमणसूचित वामपादपतित नक्षत्र संजात सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये रुद्रयामलोक्त प्रकारेण. शान्तिकर्म करिष्ये; तदङ्गतया शुक्रज्योतिश्चेति वैदिकमन्त्रेण एक सहस्र संख्याक होमकर्म करिष्ये; करिष्यमाण होमकर्मणि सर्वाभ्युदय प्राप्तये ब्राह्मण द्वारा पुण्याहं च वाचयिष्ये; एभिश्चन्दन पुष्पाक्षत वस्त्र यज्ञोपवीतोपायनादिभिः ब्राह्मणांश्च वृणे. । ॐ वृता स्मः ॥

पुण्याह वाचनम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .. [illegible] .... शर्मा अहं मम करिष्यमाण तुलाविषुवज शान्तिकर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे पुण्याहं ५

Nepal Sanskrit University, Balmiki Campus, Kathmandu

वन्तो ब्रुवन्तु: ३ ॐ पुण्याहं ३ ॐ पुनन्तु मा देवजना: पुनन्तु मनसा धिय: ॥ पुनन्तु विश्वा भूतानि जातवेद: पुनीहि मा ॥

अद्येह काश्यपगोत्र: काश्यपावत्सार नैध्रुवेति त्रिप्रवर: ... शर्मा ... वर्मा अहं मम करिष्यमाण तुलाविधुवत्दानाख्यकर्मणि सर्वाभ्युदय प्राप्त्यर्थं भो ब्राह्मणा: मम गृहे स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति: ३ ॐ स्वस्ति न ऽ इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: ॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु ॥

अद्येह काश्यपगोत्र: काश्यपावत्सार नैध्रुवेति त्रिप्रवर: ... शर्मा ... वर्मा अहं मम करिष्यमाण तुलाविधुवत्दानाख्यकर्मणि सर्वाभ्युदय प्राप्त्यर्थं भो ब्राह्मणा: मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋद्ध्यताम् ३ ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम ॥ दिवं पृथिव्या अध्यारुहामाविदाम देवान्स्वर्ज्योति: ॥

अद्येह काश्यपगोत्र: का[illegible]वत्सार नैध्रुवेति त्रिप्रवर: ... शर्मा ... वर्मा अहं मम करिष्यमाण तुलाविधुवत्दानाख्यकर्मणि सर्वाभ्युदय प्राप्त्यर्थं भो ब्राह्मणा: मम गृहे वृद्धिं भवन्तो ब्रुवन्तु: ॐ वर्द्धताम् ३ ॐ ज्यैष्ठ्यं च म ऽ आधिपत्यं च मे मन्युश्च मे भामश्च मे ऽमश्च मे ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
…शर्मा …वर्मा अहं मम करिष्यमाण तुलाविधुवन शान्ति
कर्माणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे कल्याणं भ
वन्तो ब्रुवन्तु ३ ॐ कल्याणमस्तु ३ ॐ यथेमां वाचं कल्याणीमावदा
नि जनेभ्यः ॥ ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणा
य च ॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः…
शर्मा वर्मा अहं मम करिष्यमाण तुलाविधुवन शान्ति कर्माणि
सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रुवन्तु ३
ॐ अस्तु श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥ प
शूनां रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि ॥

ॐ अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रि
प्रवरः …शर्मा… वर्मा अहं मम करिष्यमाण तुलाविधु
वन शान्ति कर्माणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे शा
न्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॐ द्यौः शान्तिरन्तरिक्षं शा
न्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः
शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः
सा मा शान्तिरेधि ॥

विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥

दीप प््रार्थना-

नमो स्त्वनन्ताय सहस्रमूर्त्तये ।
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते ।
सहस्रकोटीयुगधारिणे नमः ॥

दीपनारायणाय नमः ।

वरुण प्रार्थना-

वरुण त्वं महाभाग सर्वदेव प्रपूजित ॥
वितने मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥

वरुणाय नमः ।

गणेश प्रार्थना-

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभः ॥
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

ग्रहप्रार्थना-

ब्रह्मा मुरारि स्त्रिपुरान्तकारी ।
भानुः शशी भूमिसुतो बुधश्च ॥
गुरुश्च शुक्रः शनि राहु केतवः ।
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः ।

मातृका प्रार्थना-

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरूद्रसहिता रक्षन्तु नो मातरः ॥

मातृभ्यो नमः ।

अग्निप्रार्थना-

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ॥
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम् ॥

अग्नये नमः ।

पुष्पाञ्जलिः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
अच्युतानन्तगोविन्द भक्तानामभयप्रद ।
त्राहि मां सर्वभीतिभ्यो यतो हं शरणं गतः ॥

गोविन्दाय नमः ॥

संपूजित गोविन्द प्रतिमादानम्·

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम तुलाविषुवत्संक्रमण सूचित वामपाद पतित नक्षत्र संजात सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्याद्यावाप्तये रुद्रयामलोक्तप्रकारेण शान्तिकर्मणि तत्र देवानां स्थापन पूजन हवनादिकर्मसंपत्तये सुपूजितां ताम्रघटोपरि स्थापित ताम्रस्थाल्युपरिस्थितां गोविन्द प्रतिमां विष्णुदेवताकां ....गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्न मम ।

प्रार्थना–

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम ।
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा–

अद्यकृतैतत् सुपूजित गोविन्द प्रतिमादानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्न मम·॥

सर्वारिष्टदानम् ·

सगोसुवर्णतिल ताम्रपात्राय नमः ।
ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ………………… अहं मम तुलाविषुवत्संक्रमणसूचित वामपाद पतित नक्षत्र सञ्जात सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्तये तिलान् सोमदेवताकान् ताम्रपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं सालङ्कारां गां रुद्रदेवताकां …… गोत्राय …… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· । तत्सन्न मम·॥

प्रार्थना–

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तिलपात्रप्रदानेन मम पापं व्यपोहतु ॥
कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्यकृतैतत् तिलपूर्णताम्रपात्र सुवर्ण सालङ्कृतगोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं …… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्नमम·

पूर्णपात्रदानम्-

पूर्णपात्राय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
……………… अहं मम तुलाविषुवत्संक्रमणासू
च्चित वामपाद पतित नक्षत्र सञ्जात सकलारिष्ट शान्तिपूर्वकदी
र्घायुरारोग्यैश्वर्योदयावाप्तये तत् शान्तिकर्मणि दीपकलश गणेश पूजन पूर्वक प्रधान देवता गोविन्द पूजन हवनक
र्मणः अपूर्णस्य पूर्णार्थं पूर्णपात्रं प्रजापति देवताकं ……
…गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।
तत्सन्न मम।

मेधा-

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्॥ सनिम्मेधा
मयासिषꣳ स्वाहा॥ याम्मेधान्देवगणाः पितरश्चोपासते
॥ तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥ मेधाम्मे
वरुणो ददातु मेधामग्निः प्रजापतिः॥ मेधामिन्द्रश्च वा
युश्च मेधान्धाता ददातु मे स्वाहा॥

वस्त्रहोमः ॥

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ॥ समाववर्त्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं जगत् ॥ वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥

चरुहोमः ॥

ॐ अव्यादधामि समिधमग्ने व्रतपते त्वयि ॥
व्रतञ्च श्रद्धां चोपैमीन्धेना दीक्षितो अहं स्वाहा ॥

घृतच्छाया ॥

ससुवर्ण घृत कांश्यपात्राय नमः ॥

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावा पृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य च्छाया ॥

अलक्ष्मीर्यच्च दौरस्थ्यं मे सर्वगात्रेष्वव स्थितम् ॥
तत्सर्वं नाशयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्ररः····

…………………… अहं मम तुलाविषुवत् शान्तिकर्मणि सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये इदं स्वमुखावलोकितं आज्यं मृत्युञ्जयदेवताकं कांस्यपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं …… ‥गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्न मम. ॥

प्रार्थना-

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ॥
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा-

अद्यकृतैतत् आज्यकांस्यपात्रसुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……गोत्राय…… ……शर्मणे ब्राह्मणाय तुभ्यं संप्रददे। तत्सन्न मम।

यज्ञान्तगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयरजतद्रव्याय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः

.... अहं मम तुलाविषुवत् शान्तिकर्मणि गोविन्ददेवतासंपूजनहवनादिकर्मणः साङ्गता सिद्धये इमां गां रुद्रदेवताकां तन्निष्क्रय रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे। तत्सन्न मम ॥

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्यकृतैतत् गोप्रत्याम्नायीभूत रजत दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।
तत्सन्न मम ॥

भूयसी भोजनदक्षिणा ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम तुलाविषुवत् संक्रमणसूचित वामपाद पतितनक्षत्रसंजात सकलारिष्ट शान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये कृतस्य दीप कलश

गणेश मातृका ग्रह वास्तुदेवता संपूजन तत्तद्देवतानां हवनपूर्वक प्रधानभूत गोविन्ददेवतायाः एकसहस्रसंख्याक वैदिकमन्त्रेण हवनकर्मणः साङ्गतासिद्ध्यर्थं न्यूनातिरिक्त दोषनिवारणार्थं करिष्यमाण ... ब्राह्मणभोजनकर्मणश्च प्रतिष्ठार्थं इमां भूयसी दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे। तत्सन्न मम॥

अभिषेकः॥

सर्वे समुद्राः सरित स्तीर्थानि जलदा नदाः॥
आयान्तु यजमानस्य दुरितक्षयकारकाः॥

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः॥ वनस्पतयः शान्ति र्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि॥

तिलक प्रसादः॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते॥
धान्यं धनं पशून्बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

अञ्जलिं वध्वा ॥

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतस्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ॥
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

होममन्त्रः –
ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च ॥ शुक्रश्च ऋतपाश्चात्यꣳहाः ॥१॥

(92)

3

TEST

EXERCISE BOOK



NAME ____________________

SCHOOL ____________________

CLASS ____________________

अथशिवस्थापनायां संक्षेपः

प्रायश्चित्त गोदानम्.

नमो गोभ्यः श्रीमतीभ्यः सोरभेयीभ्य एवच .
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः.

गोनिष्क्रयीभूत रजतद्रव्याय नमः.

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च.
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः.

ब्राह्मणाय नमः.

अहं मम करिष्यमाण शिवस्थापनकर्मणि . पूर्वकर्तव्य नियमानाचरणजन्य प्रत्यवायपरिहार पूर्वक तत्कर्माधिकार सिद्धये. इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणी ।
तीर्थदेवमयी यस्मा तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा.

अद्य कृतैतद्गोनिष्क्रयीभूत रजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

ॐ शान्तिरस्तु. पुष्टिरस्तु. वृद्धिरस्तु. यच्छ्रेयस्तदस्तु. यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु. द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु. ॐ अमृताभिषेकोस्तु. ॥

ब्राह्मणवरणम्।

वरणद्रव्याय नमः।

अद्यमम· सकलपापक्षयपूर्वक श्रुतिस्मृतिपुराणोक्त फलप्राप्त्यर्थं· विशेषतः अस्मत्पिता महीनाँ ओङ्कारेश्वरी लोपामुद्रा नयनकुमारी देवीनाँ अनन्त कल्पशिवलोकवासोत्तर शिवसायुज्यमुक्तिप्राप्तये· अस्मिन् पाषाण शिवलिङ्गे देवकला सान्निध्यार्थं यथा विभवदेशकालाद्यनुसारतः शिवलिङ्गस्य प्रतिष्ठां करिष्ये, तत्पूर्वाङ्गत्वेन दीप-कलश-गणेश-पूजनं-मातृका पूजनं-आभ्युदयिक गोदानं-ग्रहपूजनं-वास्तु पूजनं-सर्वतोभद्र मण्डल देवता पूजनं-मण्डप पूजनं-ध्वजारोपणं-स्वगृह्योक्तप्रकारेण अग्निप्रज्वा[illegible]नं- नवग्रहस्थापनं-शिवन्यासपूर्वक शिवसंपूजनं-पूजितदेवानां होमं-रथारोपण शय्याशयनादि कर्माणि· ब्राह्मणद्वारा करिष्ये, तत्कर्मकर्तुं नानानामगोत्रान्· नानानामशर्मणो ब्राह्मणान्· एभिश्चन्दनपुष्पाक्षत धौतोत्तरीय मुद्रिका जलपात्रासनादिभिर्युष्मान् वृणे· ॐ वृतास्मः· ॥

गंधादिभिः संपूज्य.

वरण सामग्रीं गृहीत्वा.

अद्य प्रारम्भ शिवस्थापन कर्मणि. आचार्यकर्म कर्तुं ...... गोत्रं .... शर्माणं ब्राह्मणं एभिर्गन्धाक्षत सुवर्णाङ्गुलीयक धौतोत्तरीय जलपात्रासनादिभिः आचार्यत्वेन त्वामहं वृणे. ॐ वृतोस्मि.

प्रार्थना.

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः.
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रतः ।।

ततः ऋत्विजादीन्.

अहं मम. प्रारम्भ शिवस्थापन कर्मणि. तत्तत्कर्म करणार्थं नाना नाम गोत्रोत्पन्नान् नाना नाम शर्मणो ब्राह्मणान्. एभिर्गन्धाक्षत धौतोत्तरीयादिवासोभिः युष्मान् वृणे. ॐ वृताःस्मः.

प्रार्थनां.

ऋत्विजश्च यथापूर्वं शक्रादीनां मखेऽभवन्.
यूयं तथा मे भवितु ऋत्विजो द्विजसत्तमाः ।। ।।

ततो मधुपर्कसत्त्वे, मधुपर्ककारणम्.

।। ।। ।। ।। ।।

अथपुण्याहवाचनम्.

फल वस्त्रादिकं गृहीत्वा.

अद्येह.

अहं मम करिष्यमाण शिवस्थापन कर्मणि. सर्वाभ्युदय प्राप्तये. ब्राह्मण द्वारा पुण्याहं वाचयिष्ये, तदङ्गतया एभिश्चन्दन पुष्पाक्षत पूगीफल यज्ञोपवीत वस्त्रोपायनादिभिः पुण्याह वाचनार्थं ब्रह्मन्त्वामहं वरणे. वृताः स्मः.

अहं मम शिवस्थापन कर्मणि सर्वाभ्युदयप्राप्तये. भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥१॥

अहं मम शिवस्थापन कर्मणि. सर्वाभ्युदयप्राप्तये. भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु. ३ ॐ स्वस्ति ३ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः. स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो वहस्पतिर्दधातु. ॥ २ ॥

अहं मम. शिवस्थापन कर्मणि. सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु. ३ ॐ ऋ

ध्नताम् २ ॐ सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृता अभूम· दिवं पृथिव्या अध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ ३ ॥

अहं मम शिवस्थापनकर्मणि· सर्वाभ्युदयप्राप्तये· भो ब्राह्मणा मम गृहे वृद्धिं भवन्तो ब्रुवन्तु· २ ॐ वर्धन्ताम्· २ ॐ ज्यैष्ठ्यं च म आधिपत्यञ्च मे मन्युश्च मे भामश्च मे मश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धश्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्· ॥ ४ ॥

अहं मम शिवस्थापनकर्मणि सर्वाभ्युदयप्राप्तये· भो ब्राह्मणा मम गृहे कल्याणं भवन्तो ब्रुवन्तु· २ ॐ कल्याणम् २ ॐ यथेमां वाचङ्कल्याणीमावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च· ॥ प्रियो देवानां दक्षिणाये दातुरिह भूयासमयं मे कामः समृध्यताम्· ॥ ५ ॥

अहं मम· शिवस्थापनकर्मणि· सर्वाभ्युदयप्राप्तये· भो ब्राह्मणा मम गृहे श्रीरस्तु भवन्तो

कुर्वन्तु· ३ ॐ श्रीः ३ ॐ मनसः काममाकूतिं वाचः
सत्यमशीय। पशूनां रूपमन्नस्य रसो यशः श्रीः
श्रयताम्॥ ६॥

अहंमम। शिवस्थापन कर्मणि· सर्वाभ्युदयप्राप्तये
भो ब्राह्मणा मम गृहे शान्तिं भवन्तो ब्रुवन्तु· ३ ॐ
शान्तिः ३ ॐ द्यौः शान्तिरन्तरिक्षं· शान्तिः पृ
थिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वन
स्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं·
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ ७॥
विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रन्तन्न आसुव

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥ ९॥
पुण्याहवाचन समाप्तिरस्तु॥ ॥

ततउजरदिने.

दीप प्रार्थना.

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणेनमः.
दीपनारायणायनमः.।

वरुण प्रार्थना.

वरुणत्वं महाभाग सर्वदेव प्रपूजित.
वितते ममयज्ञेस्मिन्नविघ्नं कुरु सर्वदा. ॥ वरुणायनमः.।

गणेश प्रार्थना.

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ.
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ गणाधिपतयेनमः।

ग्रह प्रार्थना.

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च.।
गुरुश्च शुक्रः शनि राहु केतवः सर्वेग्रहाः शान्तिकरा भवन्तु.।
नवग्रहेभ्यो नमः.।

मातृ प्रार्थना.

ब्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी नीलया,
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी. ॥
वाराही घनघोरघर्घरमुखी चैन्द्रीच वज्रायुधा.
चामुण्डा गणनाथरुद्रसहिता रक्षन्तुनो मातरः ॥
मातृभ्यो नमः.।

वास्तु प्रार्थना·

वास्तुदेव नमस्तेस्तु भूमिशय्या रत प्रभो ।
मद्गृहं धनधान्यादि समृद्धं कुरु सर्वदा ॥
वास्तोष्पतये नमः·

अग्नि प्रार्थना·

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम् ॥

शिवलिङ्ग प्रार्थना·

ॐ नमो रुद्राय हरये ब्रह्मणे परमात्मने ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तकारिणे ॥ १
ध्यानं स्फटिक संकाशं देवं निष्कल मक्षरम् ।
कारणं सर्वदेवानां सर्वलोकमयं परम् ॥ २
ब्रह्मेन्द्र विष्णुरुद्राद्यै ऋषिदेवैरगोचरम् ॥
वेदविद्भिर्हि वेदान्ते स्त्वगोचर मिति श्रुतिः ॥ ३
आदिमध्यान्तरहितं भेषजं भवरोगिणाम् ।
शिवतत्त्वमिति ख्यातं शिवलिङ्गं व्यवस्थितम् । ४ ॥
ॐ नमः शिवाय·

मण्डपदानम्.

अद्य मम.

श्रुतिस्मृतिपुराणोक्त फलावाप्तये विशेषतो मम पितामहीनी ॐकारेश्वरी-लोपामुद्रा-नयनकुमारी-देवीनाँ अनन्तकोटि कल्प शिवलोकवासकामनया. शिवस्थापन कर्मणि. तत्तत् शिवादिदेवतानां स्थापन पूजन हवनादि कर्मसंपत्तये. रचित ध्वजा पताकादि मण्डितं सुपूजित कलश परिवृतं सपरिच्छदं इदं मण्डपं विष्णुदेवताकं ········· गोत्राय आचार्याय तुभ्यं संप्रददे. ।

प्रार्थना. न.

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम.
मण्डपस्य प्रदानेन प्रसन्नोभव सर्वदा. ॥

अद्य कृतैतत्सपरिच्छद मण्डपदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ········ गोत्राय ···· शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञ क्रियादिषु.
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्. ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्राकृति
स्वभावात्. करोमि यद्यत्सकलं परस्मै नारायणाये
ति समर्पयामि. ॥ ॥

x शिवस्थापनकर्मणि·

भूयसी भोजनदक्षिणा·

अहं मम· श्रुतिस्मृतिपुराणोक्त फलावाप्तये· विशेषतो मम· पितामहीनाँ ओङ्कारेश्वरी-लोपामुद्रा· नयनकुमारीदेवीनां· अनन्तकोटिकल्प शिवलोकवास कामनया· कृतस्य शिवलिङ्गदेवता स्थापन पूजन हवनादिकर्मणो न्यूनातिरिक्तदोषपरिहारार्थं· तथा करिष्यमाण ब्राह्मण भोजनकर्मणः प्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदेवताकं· आचार्य ऋत्विक् जापक द्वारपालेभ्यो· अन्येभ्यो ब्राह्मणेभ्यश्च· कन्याकुमारीभ्यश्च दातुं समुत्सृजे·॥

(6)

वरणम् —

वरणद्रव्याय नमः ।
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि-
त्रिप्रवरः, [illegible]न राशिः, देवेन्द्रवीरविक्रमवर्मा, अहं मम क-
निष्ठपुत्रस्य मिथुनराशेर्भरत्रराजवीरविक्रमवर्मणः करिष्यमाणचूडो-
पनयनवेदारम्भसमावर्तनकर्मणि तत्पूर्वा-
ङ्गत्वेन निर्विघ्नतासिद्ध्ये दीपकलशगणेशपूजनं,
मातृकापूजनं, , नान्दीश्राद्धानुकल्प-
गोदानं, ग्रहपूजनं.
स्वगृह्यो-
क्तप्रकारेण, अग्निप्रज्वालनपूर्वकं संपूजितदेवतानां विशेषदे-
वतानां हवनादिकर्म करिष्ये तथा सर्वाभ्युदयप्राप्तये पुण्याहं च वाच-
यिष्ये तत्कर्म कर्तुं नानानामगोत्रान् ब्राह्मणान्, एभिश्चन्द-
नपुष्पाक्षतमाल्यधौतोत्तरीयासनराजतजलपात्रसौ-
वर्णाङ्गुलीयककेयूररुद्राक्षकण्ठाभरणादिभिः, आ-
चार्यत्वेन; तथा- एभिश्चन्दनपुष्पाक्षतधौतोत्तरीय-
जलपात्रासनसौवर्णाङ्गुलीयकादिभिर्गणपतिब्रह्म-

न्विग्ज्ञापकद्वारपालत्वेन; तथा- एभिश्चन्दनपुष्पाक्षतधौतोत्तरीयादिभिः परिचारकत्वेन च युष्मान् वृणे. ॐ वृताः स्मः ॥

तत आचार्यं संपूज्य;
ममास्मिन्यज्ञे आचार्यत्वेन त्वामहं वृणे.
ॐ वृतोऽस्मि ॥
प्रार्थना—
आचार्यत्वे यथा स्वर्गे शक्रादीनां बृहस्पतिः।
तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत ॥
ॐ भवानि.

ततो गणेशं संपूज्य,
ममास्मिन्यज्ञे गणपतित्वेन त्वामहं वृणे.
ॐ वृतोस्मि ॥
प्रार्थना—

देवानामसुराणां च यज्ञे प्राक्पूजितस्तु यः ।
निर्विघ्नं कुरुते यद्वत्त्वं मे गणपति भव ॥
ॐ भवानि.

ततो ब्रह्माणं संपूज्य.
ममास्मिन्यज्ञे ब्रह्मत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥
प्रार्थना-
यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः ।
तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम ॥
ॐ भवानि.

ततो होतारं संपूज्य· ममास्मिन्यज्ञे होतृत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना–

भगवन् सर्वधर्मज्ञ सर्वधर्मविदां वर ।
वितते मम यज्ञेस्मिन् होता भव द्विजोत्तम ॥

ॐ भवानि·

ततो ऋत्विजं संपूज्य·
ममास्मिन्यज्ञे ऋत्विक्त्वेन त्वामहं वृणे·
ॐ वृतोस्मि ॥

प्रार्थना–

भगवन् सर्वधर्मज्ञ सर्वधर्मविदां वर ।
वितते मम यज्ञेस्मिन् ऋत्विक्त्वं मे मखे भव॥

ॐ भवानि· ४

ततो जापकं संपूज्य· ममास्मिन्यज्ञे ऋग्वेदमन्त्रजपकर्तुं जापकत्वेन त्वामहं वृणे· ॐ वृतोस्मि· ॥

प्रार्थना–

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि·

ततोन्यं जापकं संपूज्य· ममास्मिन्यज्ञे यजुर्वेदमन्त्रजपकर्मकर्तुं जापकत्वेन त्वामहं वृणे·
ॐ वृतोस्मि ॥

प्रार्थना-
कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि·

ततोन्यं जापकं संपूज्य· ममास्मिन्यज्ञे सामवेदमन्त्र जपकर्मकर्तुं जापकत्वेन त्वामहं वृणे· ॐ वृतोस्मि· ॥

प्रार्थना-
सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि·

ततो न्यं जापकं संपूज्य· ममास्मिन्यज्ञे अथर्ववेदमन्त्र जपकर्मकर्तुं जापकत्वेन त्वामहं वृणे· ॐ वृतोस्मि ॥

प्रार्थना—

बृहन्नेत्रोथर्ववेदोनुष्टुभो रुद्रदैवतः ।
वैशम्पायन विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

ॐ भवानि·

ततो द्वारपालं संपूज्य·
ममास्मिन्यज्ञे ऋग्वेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे· ॐ वृतोस्मि ॥

प्रार्थना—

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

ॐ भवानि·

ततोन्यं द्वारपालं संपूज्य·
ममास्मिन्यज्ञे यजुर्वेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे· ॐ वृतोस्मि ॥

प्रार्थना-

कानराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततोन्यं द्वारपालं संपूज्य.
ममास्मिन्यज्ञे सामवेदसूक्तपारायणार्थं द्वारपाल
त्वेन त्वामहं वृणे. ॐ वृतोस्मि ॥
प्रार्थना-

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततोन्यं द्वारपालं संपूज्य.
ममास्मिन्यज्ञे अथर्ववेदसूक्तपारायणार्थं द्वारपाल
त्वेन त्वामहं वृणे. ॐ वृतोस्मि ॥
प्रार्थना-

बृहन्नेत्रो थर्ववेदो नुष्टुभो रुद्रदैवतः ।
वैशम्पायनविप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततः परिचारकादींश्च पूजयेत् ॥

सर्वेषां प्रार्थना–

अस्य यागस्य निष्पत्त्यै भवन्तोभ्यर्थिता मया।
सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम् ॥
यथा विहितं कर्म कुरुत । यथामति करवामः॥

पुण्याहवाचनम्–

ॐ य

(८)

शिवद्वारनाम

THE BULL DOG

Exercise Book.

No. 2.

*Name*____________________

*Address*____________________

श्रीगणेशायनमः ॥ शिवाष्टोत्तरशतनामावलिः ॥

ॐ शिवायनमः १
ॐ महेश्वरायनमः २
ॐ शंभवेनमः ३
ॐ पिनाकिनेनमः ४
ॐ शशिशेखरायनमः ५
ॐ वामदेवायनमः ६
ॐ विश्वरूपाक्षायनमः ७
ॐ कपर्दिनेनमः ८
ॐ नीललोहितायनमः ९
ॐ शंकरायनमः १०
ॐ शूलपाणयेनमः ११
ॐ खट्वांगिनेनमः १२
ॐ विष्णुवल्लभायनमः १३
ॐ शिपिविष्टायनमः १४
ॐ अंबिकानाथायनमः १५
ॐ श्रीकण्ठायनमः १६
ॐ भक्तवत्सलायनमः १७
ॐ भवायनमः १८
ॐ शर्वायनमः १९
ॐ त्रिलोकेशायनमः २०
ॐ शितिकण्ठायनमः २१
ॐ शिवप्रियायनमः २२
ॐ उग्रायनमः २३
ॐ कपर्दिनेनमः २४
ॐ कामारयेनमः २५
ॐ अंधकासुरसूदनायनमः २६
ॐ गंगाधरायनमः २७
ॐ ललाटाक्षायनमः २८
ॐ कालकालायनमः २९
ॐ कृपानिधयेनमः ३०
ॐ भीमायनमः ३१
ॐ परशुहस्तायनमः ३२
ॐ मृगपाणयेनमः ३३
ॐ जटाधरायनमः ३४

ॐ कैलासवासिनेनमः ३५
ॐ कवचिनेनमः ३६
ॐ कठोरायनमः ३७
ॐ त्रिपुरांतकायनमः ३८
ॐ वृषांकायनमः ३९
ॐ वृषभारूढायनमः ४०
ॐ भस्मोद्धूलितवि ४१
ग्रहायनमः ४२
ॐ सामप्रियायनमः ४३
ॐ स्वरमयायनमः ४४
ॐ त्रयीमूर्तयेनमः ४५
ॐ अनीश्वरायनमः ४६
ॐ सर्वज्ञायनमः ४७
ॐ परमात्मनेनमः ४८
ॐ सोमसूर्याग्निलो
चनायनमः ४९
ॐ हविषेनमः ५०
ॐ यज्ञमयायनमः ५१
ॐ सोमायनमः ५२
ॐ पञ्चवक्त्रायनमः ५३
ॐ सदाशिवायनमः ५४
ॐ विश्वेश्वरायनमः ५५
ॐ वीरभद्रायनमः ५६
ॐ गणनाथायनमः ५७
ॐ प्रजापतयेनमः ५८
ॐ हिरण्यरेतसेनमः ५९
ॐ दुर्धर्षायनमः ६०
ॐ गिरिशायनमः ६१
ॐ गिरिशायनमः ६२
ॐ अनघायनमः ६३
ॐ भुजंगभूषणायनमः ६४
ॐ भर्गायनमः ६५
ॐ गिरिधन्वनेनमः ६६
ॐ गिरिप्रियायनमः ६७
ॐ कृत्तिवाससेनमः ६८
ॐ पुरारातयेनमः ६९

ॐ भगवतेनमः	७०	ॐ सात्विकायनमः	८६
ॐ प्रमथाधिपायनमः	७१	ॐ शुद्धविग्रहायनमः	८७
ॐ मृत्युञ्जयायनमः	७२	ॐ शाश्वतायनमः	८८
ॐ सूक्ष्मतनवेनमः	७३	ॐ खंडपरशवेनमः	८९
ॐ जगद्व्यापिनेनमः	७४	ॐ अजायनमः	९०
ॐ जगद्गुरवेनमः	७५	ॐ पाशविमोचनायनमः	९१
ॐ व्योमकेशायनमः	७६	ॐ मृडायनमः	९२
ॐ महासेनजनकायनमः	७७	ॐ पशुपतयेनमः	९३
ॐ चारुविक्रमायनमः	७८	ॐ देवायनमः	९४
ॐ रुद्रायनमः	७९	ॐ महादेवायनमः	९५
ॐ भूतपतयेनमः	८०	ॐ अव्ययायनमः	९६
ॐ स्थाणवेनमः	८१	ॐ हरयेनमः	९७
ॐ अहिर्बुध्न्यायनमः	८२	ॐ पूषदंतभिदेनमः	९८
ॐ दिगंबरायनमः	८३	ॐ अव्यग्रायनमः	९९
ॐ अष्टमूर्तयेनमः	८४	ॐ दक्षाध्वरहरायनमः	१००
ॐ अनेकात्मनेनमः	८५	ॐ हरायनमः	१०१

ॐभगनेत्रभिदेनमः १०२
ॐअव्यक्तायनमः १०३
ॐसहस्राक्षायनमः १०४
ॐसहस्रपदेनमः १०५
ॐअपवर्गप्रदायनमः १०६
ॐअनंतायनमः १०७
ॐतारकायनमः १०८
ॐपरमेश्वरायनमः १०९

इतिशतनामावलिः

(७)

Swan

अथ चण्डीपाठ संकल्पादि

32 Pages.

प्रायश्चित्त गोदानम्

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोप्रत्याम्नायीभूत रजत खण्डेभ्यो नमः ।

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च प्रवरः ······ शर्मा ······ वर्मा अहं मम श्रीपरमेश्वरप्रीति पूर्वक श्रुतिस्मृति पुराणोक्त फलावाप्त्ये करिष्यमाण शत चण्डी पाठ कर्मणि पूर्वकृतस्य नियमातिक्रमण जन्य प्रत्यवाय परिहार पूर्वकं सद्यो देह शुद्धि द्वारा तत्कर्माधिकार सिद्ध्ये प्रायश्चित्त प्रत्याम्नायीभूतां गां रुद्र देवताकां तन्निष्क्रयीभूत रजतं चन्द्र देवताकं ······ गोत्राय ······ शर्मणे आचार्याय तुभ्यं संप्रददे. तत्सन्न मम ॥

प्रार्थना.

ॐ कपिले सर्व देवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

~~दानप्रतिष्ठा~~

अद्य कृतैतत् प्रायश्चित्त प्रत्याम्नायीभूत गोदान कर्मणः प्रति

ष्वा साङ्गता सिद्ध्ये इदं रजतं चन्द्रदेवताकं .... गोत्राय .....
शर्मणे आचार्याय तुभ्यं संप्रददे तत्सन्न मम॥

ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्दूरे प्रतिहतमस्तु अमृताभिषेकोऽस्तु॥

देवप्रार्थना

ॐ अभीप्सितार्थ सिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
उमे ब्रह्माणि कौमारि विश्वरूपे प्रसीद मे ॥
दुर्गे शिवे भये माये नारायणि सनातनि ।
जये मे मङ्गलं देहि मङ्गलालय मङ्गले ॥
ब्रह्मामुरारी त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनि राहु केतवो नवग्रह शान्तिकरा भवन्तु॥
वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यान्दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

मङ्गलं भगवान् विष्णुर्मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं ब्रह्मबलं तदेव लक्ष्मीपते तेङ्घ्रीयुगं स्मरामि॥
सर्वमङ्गलमाङ्गल्यं वरेण्यं वरदं शुभम्।
नारायणं नमस्कृत्य सर्वकर्माणि कारयेत्॥

प्रतिज्ञा सङ्कल्प.

अद्येह वत्सगोत्रः वत्स भार्गव च्यावन और्व जामदग्न्येति पञ्च प्रवरः ...... शर्मा ...... वर्मा अहं मम श्रुतिस्मृतिपुराणोक्त फलावाप्ति पूर्वक स्वराष्ट्रे सकल विघ्न विघात नित्य यशोराज्य संपत्ति स्वसैन्यादि बलवृद्धि पूर्वकं दूरदेश गत सैन्य संघारोग्य हर्षविजयोदय प्राप्तिद्वारा झटिति स्वपुरे प्रत्यागमन कामनया श्रीमद्भगवती गुह्यकालीका प्रीतये अद्यारभ्य पञ्चम दिवस पर्यन्तं अष्टोत्तर शत संख्याक नवार्णमन्त्र संपुटित शतावृत्ति सप्तशति स्तोत्र पाठ कर्म तदङ्गतया दीपकलश गणेश मातृका पूजन नान्दीश्राद्ध नवग्रह वास्तुदेवता संपूजन कर्म मण्डपदेवता संपूजन पूर्वक ध्वजापताको छ्रयण कर्म सुवर्ण प्रतिमायां यथा मिलितोपचारैः श्रीभगवत्या चण्डी देव्या आवाहन स्थापन पूज

नादि कर्म तथा स्वगृह्योक्त प्रकारेण अग्निप्रज्वालन पूर्वक संपूजित देवतानां हवन पूर्वकं दशाशक्तो सप्तशति स्तोत्रेण जप दशांश नवार्ण मन्त्रेण हवन कर्म तद्दशांश तर्पण कर्म तद्दशांश मार्जन कर्म च ब्राह्मण द्वारा कारयिष्ये।

दीप कलश गणेश पूजा.

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि शिरोरु बाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः॥

दीपकाय नमः

ॐ देवदानव संवादे मथ्यमाने महोदधौ।
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वंच प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवा सपैतृकाः॥
त्वयि तिष्ठन्ति सर्वेपि यतः काम फलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥

वरुण कलशाय नमः

ॐ वक्रतुण्ड महाकाय कोटी सूर्य समप्रभः।
अविघ्नं कुरु मे देव सर्व कार्येषु सर्वदा॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः॥

सिद्धिबुद्धि सहित गणाधिपतये नमः

अर्घ्यनिवेदनम्

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ततो विष्वं व्यक्रा
मत्साशनानशनेऽअभि · इदं अर्घ्यं निवेदयामि ······ नमः

मातृका पूजनम् · स्वस्तिवाचनम्.

ॐ स्वस्तिनो मिमीता मश्विना भगः स्वस्ति देव्यदिति रनर्वणः।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावा पृथिवी सुचेतुना॥
स्वस्तये वायु मुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः॥
विश्वेदेवानो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये।
देवा अवन्त्वृभवः स्वस्तये स्वस्तिनो रुद्रः पात्वंहसः॥
स्वस्तिमित्रा वरुणा स्वस्ति पथ्ये रेवति।
स्वस्तिन इन्द्रश्चाग्निश्च स्वस्तिनो अदिते कृधि॥
स्वस्ति पन्था मनुचरेम सूर्या चन्द्र मसाविव।
पुन ददता घ्नता जानता सङ्गमे महि॥
स्वस्त्ययनं तार्क्ष्य मरिष्टनेमि महद्भूतं वायसं देवतानाम्।
असुरघ्न मिन्द्र सखं समत्सु बृहद्यशो नाव मिवारुहेम॥
अंहो मुच माङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्।

प्रथम पाणिः शरणं प्रपद्ये स्वस्ति संवाप्येष्व भयन्नो अस्तु ॥ ॥
ॐ आ नो भद्राः क्रतवो यन्तु विश्वतो दब्धासो ऽ अपरीतास उद्भिदः।
देवा नो यथा सदमिद्वृधे ऽ असन्न प्रायुवो रक्षितारो दिवे दिवे ॥
देवानाम्भद्रा सुमति ऋजूयतान्देवानाꣳ रातिरभि नो निवर्त्तताम्।
देवानाꣳ सख्यमुपसेदिमा वयन्देवान ऽ आयुः प्रतिरन्तु जीवसे ॥
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिन्दक्षमस्रिधम्।
अर्यमणं वरुणꣳ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥
तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥
तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥
स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा ऽ अवसागमन्निह ॥
भद्रं कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ॥
ॐ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्।
सुमङ्गलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत् ॥
मा त्वा श्येन ऽ उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता।

पित्र्यामनु प्रदिशं कनिक्रदत् सुमङ्गलो भद्रवादी वदेह ॥
अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादि शकुन्ते ।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥
प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः ।
उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानुराजति ॥
उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव शवने सुसंशसि ।
वृषेव वाजी शिशुमती रपीत्या सर्वतो नः शकुने भद्रमावद
विश्वतो नः शकुने पुण्यमावद ॥
आवदंस्त्वं शकुने भद्रमा वद तूष्णी मासीन सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करी र्यथा बृहद्वदेम विदथे सुवीराः ॥ . ॥

ब्राह्मणवरणम् वरणद्रव्याय नमः

अद्येह वत्सगोत्रः वत्स भार्गव च्यावन और्व जामदग्न्येति पञ्चप्रवरः ..... एद्गि ..... वर्मा अहं मम श्रुतिस्मृतिपुराणोक्त फलावाप्ति पूर्वक स्वराष्ट्रे सकल विघ्न विघात नित्य यशो राज्य संपत्ति स्वसैन्यादि बल वृद्धि पूर्वकं दूरदेश गत सैन्य संघारोग्य हर्ष विजयोदय प्राप्तिद्वारा झटिति स्वपुर प्रत्यागमन कामनया श्रीभगवती गुह्यकालीका प्रीतये अद्यारभ्य पञ्चदिवस पर्यन्तं अष्टोत्तर संख्याक नवार्ण मन्त्र संपुटित शतावृत्ति सप्तशति स्तोत्र पाठ कर्म तदङ्गतया दीपकलश गणेश मातृका पूजन नान्दीश्राद्ध नवग्रह वास्तुदेवता संपूजन कर्म मण्डपदेवता संपूजन पूर्वक

ध्वजापताको च्छ्रयण कर्म सुवर्णप्रतिमायां यथाविधिनो पचारैः श्री भगवत्या चण्डीदेव्या आवाहन स्थापन पूजनादिं कर्म तथा स्व गृह्योक्त प्रकारेण अग्निप्रज्वालन पूर्वक संपूजित देवतानां हवन पूर्वकं दशावृत्ति सप्तशती स्तोत्रेण जप दशांश नवार्ण मन्त्रेण हवनकर्म तद्दशांश तर्पण कर्म तद्दशांश मार्जन कर्मच कर्तुम् एभिश्चन्दन पुष्पाक्षत पूगीफल धौतोत्तरीय स्वर्णमुद्रिका जल पात्रासन भूषणादिभि ..... गोत्रं ..... शर्माणं ब्राह्मणं आचार्यत्वेन ततः किञ्चिन्न्यून सामग्रीभिः नाना नाम गोत्राणां नाना नाम शर्मणो ब्राह्मणान् गणपति ब्रह्म सदस्य ऋत्विक् द्वारपाल जापक पाठकत्वेन च पुष्पाक्षतं वृणे ॥ ॐ वृतोऽस्मि ॥

मधुपर्क .

ॐ साधु भवानास्तामित्यस्य प्रजापति ऋषि र्यजुर्ब्रह्मा देवता विप्रार्चने विनियोगः

ॐ साधुभवानास्तामर्चयिष्यामो भवन्तं .

ॐ अर्चय अर्चय अर्चय.

ॐ विष्टरो विष्टरो विष्टरः   विष्टरं गृहीत्वा

ॐ विष्टरः प्रतिगृह्यताम् . ॐ विष्टरं प्रतिगृह्णामि . विष्टरं गृहीत्वा

ॐ वर्ष्मोऽस्मीत्याथर्वण ऋषिरनुष्टुप्छन्दो विष्टरो देवता ऽऽस्तरण पूर्वको पवेशने विनियोगः

ॐ वर्ष्मोऽस्मि समानाना मुद्यतामिव सूर्यः । इमन्त मभि तिष्ठामि

यो मा कश्चाभिदासति ॥ इत्यासने ऽभ्यागतं कृत्वा विष्टरोपर्युपावेशयेत्

ॐ पाद्यं पाद्यं पाद्यं. पाद्य अञ्जलिना आदाय

ॐ पाद्यं प्रतिगृह्यताम्. ॐ पाद्यं प्रतिगृह्णामि. पाद्य आदाय

ॐ विराजो दोहोऽसीति प्रजापति ऋषिरापो देवता यजुः पाद प्रक्षालने विनियोगः

ॐ विराजो दोहोसि विराजो दोहमशीय। मयि पाद्यायै विराजो दोहः। इति दक्षिण पादं प्रक्षालयेत्.

ॐ पाद्यं पाद्यं पाद्यं. पाद्य अञ्जलिना आदाय

ॐ पाद्यं प्रतिगृह्यताम्. ॐ पाद्यं प्रतिगृह्णामि. पाद्यमादाय

ॐ विराजो दोहोऽसीति प्रजापति ऋषि रापो देवता यजुः पाद प्रक्षालने विनियोगः

ॐ विराजो दोहोसि विराजो दोहमशीय। मयि पाद्यायै विराजो दोहः॥ इति वाम पादं प्रक्षालयेत्.

ॐ विष्टरो विष्टरो विष्टरः विष्टर आदाय

ॐ विष्टरः प्रतिगृह्यताम्. ॐ विष्टरः प्रतिगृह्णामि. विष्टरं गृहीत्वा

ॐ वर्ष्मोऽस्मीत्याथर्वण ऋषि रनुष्टुप्छन्दो विष्टरो देवताऽभ्यस्तुति पूर्वको पवेशने विनियोगः

ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः। इमन्तमभितिष्ठामि यो मा कश्चाभिदासति ॥ प्रक्षालित पादयो रधस्तान् अग्रे निदध्यात्

ॐ अर्घो अर्घो अर्घः दूर्वाक्षत पुष्प चन्दन दधि जलयुत अर्घ पात्रं गृहीत्वा

ॐ अर्घः प्रतिगृह्यताम् . ॐ अर्घं प्रतिगृह्णामि . अर्घं गृहीत्वा
ॐ आपस्थेति प्रजापति ऋषिरापो देवता यजुरर्घ्य ग्रहणे विनियोगः
ॐ आपस्थ युष्माभिः सर्वान्कामानवाप्नवान् ॥ इतिशिरसि अवनामयेत् किञ्चिद्दत्वा
ॐ समुद्रं व इत्यस्य वरुण ऋषिस्त्रिष्टुप्छन्द आपो देवताऽर्घोऽपि मन्त्रेण विनियोगः
ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टाऽस्माकं विरमा परासेचि मत्पयः ॥ इत्यर्घ पात्रं नैऋत्यां त्यजेत् .
ॐ आचमनीयम् आचमनीयम् आचमनीयम् . आचमनीयमादाय
ॐ आचमनीयम् प्रतिगृह्यताम् . ॐ आचमनीयम् प्रतिगृह्णामि .
ॐ आमागन्निति परमेष्ठि ऋषिर्बृहती छन्द आपो देवताऽऽचमने विनियोगः
ॐ आमागन्यशसास ॰ सृज वर्चसा । तस्मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम् ॥ इतिमन्त्रेण आचम्य द्विस्तूष्णीं आचमेत् .
ॐ मधुपर्को मधुपर्को मधुपर्कः . कांस्यपात्रस्थं मधुपर्कमादाय
ॐ मधुपर्कः प्रतिगृह्यताम् . ॐ मधुपर्कं प्रतिगृह्णामि .
ॐ मित्रस्यत्वेति बृहस्पति ऋषिर्मधुपर्को देवता यजुर्मधुपर्कावेक्षणे विनियोगः
ॐ मित्रस्यत्वा चक्षुषा प्रतीक्षे ॥ इति निरीक्ष्य
ॐ देवस्यत्वेति बृहस्पति आङ्गिरस ऋषिः सविता देवता यजुर्मधुपर्क ग्रहणे विनियोगः

ॐ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ प्रतिगृह्णामि

ॐ नमः श्यावास्येति प्रजापति ऋषिः सविता देवता यजुर्मधुपर्काऽऽलोकने विनियोगः ॥ इति अनामिकयाङ्गुष्ठेन आलोड्य त्रिः

ॐ नमः श्यावास्यायान्नशने यत्त आविद्धन्तत्ते निष्कृन्तामि ॥ भूमौ निक्षिप्य

ॐ यन्मधुन इति कुत्स ऋषिर्जगती छन्दो मधुपर्को देवता मधुपर्क प्राशने विनियोगः

ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन मधव्यो न्नादोऽसानि ॥ इति समन्त्रं त्रिवारं प्राश्य पठेत्

ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठी ऋषिर्दैवी गायत्रीच्छन्दः पं
मात्रा देवता प्राणस्पर्शने विनियोगः

ॐ वाङ्म आस्येऽस्तु । इति मुखं स्पृशेत् ।
ॐ नसोर्मे प्राणोऽस्तु । इति नासिकारन्ध्रद्वयं स्पृशेत् ।
ॐ अक्ष्णोर्मे चक्षुरस्तु । इति युगपच्चक्षुषी स्पृशेत् ।
ॐ कर्णयोर्मे श्रोत्रमस्तु । इति मन्त्राऽऽवृत्त्या दक्षिणोत्तरौ कर्णौ स्पृशेत्
ॐ बाह्वोर्मे बलमस्तु । इति बाहु मूलयोः स्पृशेत् ।
ॐ ऊर्वोर्म ओजोऽस्तु । इति युगपदूरू स्पृशेत् ।
ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु । इति शिरः प्रभृति
ॐ गौर्गौर्गौः पादपर्यन्तं पाणिभ्यामालभेत्

ॐ माता रुद्राणामिति ब्रह्मा ऋषिस्त्रिष्टुप्छन्दो गौर्देवता गोत्

मन्त्रेणो विनियोग :

ॐ माता रुद्राणां दुहिता वसूनाꣳ स्वसाऽऽदित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥
मम ...... यजमानस्य च पाप्मा हरत ॐ उत्सृजत.

तत आचार्यं संपूज्य.
ममास्मिन्यज्ञे आचार्यत्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.
आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत॥ ॐ भवामि.
ततो गणेशं संपूज्य.
ममास्मिन्यज्ञे गणपतित्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.
देवानामसुराणां च यज्ञे प्राक्पूजितस्तु यः।
निर्विघ्नं कुरुते यद्वत्त्वं मे गणपते भव॥ ॐ भवामि.
ततो ब्रह्माणं संपूज्य.
ममास्मिन्यज्ञे ब्रह्मत्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.
यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम॥ ॐ भवामि.
ततः सदस्यं संपूज्य.
ममास्मिन्यज्ञे सदस्यत्वेन त्वामहं वृणे. ॐ वृतोऽस्मि.
यथा विश्वसृजो यज्ञे याज्ञवल्क्यो द्विजोत्तमः।

तथा त्वं मम यज्ञेस्मिन् सदस्यो भव सुव्रत ॥ ॐ भवानि.
ततो ऋत्विजः संपूज्य .
ममास्मिन्यज्ञे ऋत्विक्त्वेन युष्मानहं वृणे. ॐ वृताः स्म.
अस्य यागस्य निष्पत्तौ भवन्तो ऽभ्यर्थिता मया ।
सुप्रसन्नाः प्रकुर्वन्तु शान्तिकं विधिपूर्वकम् ॥ ॐ भवाम.
ममास्मिन्यज्ञे ऋत्विक्त्वेन त्वामहं वृणे. ॐ वृतोस्मि
भगवन् सर्व धर्मज्ञ सर्वधर्म विदां वर ।
वितते मम यज्ञे स्मिन् ऋत्विक्त्वं मे मखे भव ॥ ॐ भवानि.
ततो द्वारपालं संपूज्य .
ममास्मिन्यज्ञे ऋग्वेद सूक्त पारायणार्थं द्वारपालत्वेन त्वामहं वृणे. ॐ वृतोस्मि.
ऋग्वेद पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥ ॐ भवानि.
ततोन्यं द्वारपालं संपूज्य .
ममास्मिन्यज्ञे यजुर्वेद सूक्त पारायणार्थं द्वारपालत्वेन त्वामहं वृणे. ॐ वृतोस्मि.
कातराक्षो यजुर्वेद स्त्रैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥ ॐ भवानि.
ततोन्यं द्वारपालं संपूज्य .
ममास्मिन्यज्ञे सामवेद सूक्त पारायणार्थं द्वारपालत्वेन त्वामहं

वृणे. ॐ वृतोस्मि.

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः।
भाद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥ ॐ भवानि.

ततोन्यं ब्रह्माणं संपूज्य.

समाप्तिपर्यन्तं अथर्ववेद सूक्त पारायणार्थं ब्रह्मत्वेन त्वामहं वृणे. ॐ वृतोस्मि.

बृहन्नेत्रो थर्ववेदो नुष्टुभो रुद्रदैवतः।
वैशम्पायन विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥ ॐ भवानि.

ततो जापक संपूज्य.

समाप्तिपर्यन्तं ऋग्वेद मन्त्र जप कर्तुं जापकत्वेन त्वामहं वृणे
ॐ वृतोस्मि.

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः।
आत्रेगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥ ॐ भवानि.

ततोन्यं जापकं संपूज्य.

समाप्तिपर्यन्तं यजुर्वेद मन्त्र जप कर्तुं जापकत्वेन त्वामहं वृणे. ॐ वृतोस्मि

कातरास्यो यजुर्वेद त्रैष्टुभो विष्णुदैवतः।
काश्यपस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥ ॐ भवानि.

ततोन्यं जापकं संपूज्य.

समाप्तिपर्यन्तं सामवेद मन्त्र जप कर्तुं जापकत्वेन त्वामहं वृणे. ॐ वृतोस्मि

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः।

भारद्वाजस्तु विप्रेन्द्र ऋत्विकत्वं मे मखे भव. ॐ भवानि.

ततोन्यं जापकं संपूज्य.

ममास्मिन्यज्ञे अथर्ववेद मन्त्र जप कर्तुं जापकत्वेन त्वामहं वृणे. ॐ वृतोस्मि.

वृत्तोत्थो थर्ववेदो नुष्टुभो रुद्र दैवतः।
वैशम्पायन विप्रेन्द्र ऋत्विकत्वं मे मखे भव॥ ॐ भवानि.

तत पौरोगकादीँश्च पूजयेत् .

सर्वेषां प्रार्थना .

अस्य यागस्य निष्पत्त्यै भवन्तो भ्यर्थिता मया।
सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधि पूर्वकम्॥
यथा विहितं कर्म कुरुत॥ यथाज्ञाति करवाम:॥

पुण्याह वाचनम्

अद्येह वत्सगोत्र: वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च प्रवर: ····· एही ····· वर्मा अहं मम करिष्यमाण शत चण्डी पाठ कर्मणि सर्वाभ्युदय प्राप्तये ब्राह्मण द्वारा पुण्याहं वाचयिष्ये तदङ्गतया एभिश्चन्दन पुष्पाक्षत पूगीफल यज्ञोपवीत वस्त्रो पायनादिभि पुण्याह वाचनार्थं ब्रह्मन् युष्मानहं वृणे: ॐ वृताःस्म:

अद्येह वत्सगोत्र: वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च प्रवर: ····· एही ····· वर्मा अहं मम करिष्यमाण

शतचण्डी पाठ कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम
गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा
देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जात
वेदः पुनीहि मा ॥

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च
प्रवरः ····· शर्मा ····· वर्मा अहं मम करिष्यमाणे शतचण्डी
पाठ कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे स्वस्ति भ
वन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति
नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो
बृहस्पतिर्दधातु ॥

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च
प्रवरः ····· शर्मा ····· वर्मा अहं मम करिष्यमाणे शतचण्डी
पाठकर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे ऋद्धिं
भवन्तो ब्रुवन्तु ३ ॐ ऋध्यताम् ३ ॐ सत्रस्य ऋद्धिरस्यगन्म
ज्योतिरमृता अभूम। दिवं पृथिव्या अध्यारुहामाविदाम दे
वान्त्स्वर्ज्योतिः॥

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च
प्रवरः ····· शर्मा ····· वर्मा अहं मम करिष्यमाणे शतचण्डी
पाठकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे वृद्धिं भव
न्तो ब्रुवन्तु ३ ॐ वर्द्धताम् ३ ॐ ज्यैष्ठ्यं च म ऽ आधिपत्यं च मे

मन्युश्चमे भामश्चमे मश्चमे भश्चमे जेमा चमे महिमा चमे वरिमा चमे प्रथिमा चमे वर्षिमा चमे द्राघिमा वृद्धञ्चमे वृद्धिश्चमे यज्ञेन कल्पन्ताम् ॥

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च प्रवरः ···· एण्ही ····· वर्मा अहं मम करिष्यमाण शतचण्डी पाठकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे कल्याणं भवन्तो ब्रुवन्तु २ ॐ कल्याणम् २ ॐ यथेमां वाचङ्कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्याँ शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यताम् ॥

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्च प्रवरः ···· एण्ही ····· वर्मा अहं मम करिष्यमाण शतचण्डी पाठकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रुवन्तु ३ ॐ श्रीः २ ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाँ रूपमन्नस्य रसो यशः श्रीः श्रयन्ताम् ॥

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन और्व जामदग्न्येति पञ्चप्रवरः ···· एण्ही ···· वर्मा अहं मम करिष्यमाण शतचण्डी पाठकर्माणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः २ ॐ द्यौः शान्तिरन्तरिक्षँ शा

न्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शा
न्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं७ शान्तिः शान्तिरेव
शान्तिः सामा शान्तिरेधि॥
विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न ऽआसुव॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव॥
पुण्याह वाचन समाप्तिरस्तु .

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्॥
ॐ अच्युताय नमः। ३
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुन र्द्वाभ्यां स मे विष्णुः प्रसीदतु॥

—— . ——

नमोस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः॥
दीपनारायणाय नमः
वरुण त्वं महाभाग सर्व देव प्रपूजित। वितते मम यज्ञेऽस्मिन्न विघ्नं
कुरु सर्वदा॥ वरुणाय नमः
वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ। अविघ्नं कुरु मे देव

सर्वकार्येषु सर्वदा ॥   गणाधिपतये नमः

पुष्पाञ्जलि

दीप · कलश · गणेश · प्रार्थना ·

मूलदेवता प्रार्थना ·

दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ।
सर्वलोक प्रणेत्रीं च प्रणमामि सदां विकाम् ॥
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम् ।
विश्वेश्वरीं विश्ववन्द्यां चण्डिकां प्रणमाम्यहम् ॥
सर्वदेवमयीं देवीं सर्वदेव नमस्कृताम् ।
ब्रह्मेश विष्णुनमितां प्रणमामि सदा उमाम् ॥
विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थान निवासिनीम् ।
योगिनीं योगविद्यां च चण्डिकां प्रणमाम्यहम् ॥
ईशान मातरं देवीमीश्वरीमीश्वर प्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णव तारिणीम् ॥
दुर्गा सङ्कट हन्त्रीति दुर्गेति प्रथिता भुवि ।
सर्वदुःखापि देवीयः मन्त्रयामि स्वरूपिणी ॥
पुष्पाञ्जलिं समर्पयामि चण्डिकायै नमः

आसन शुद्धि:

ॐ आशन मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनो पवेशने विनियोगः

पृथिवी त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वंच धारय मां नित्यं पवित्रं कुरु चासनम् ॥

आधार शक्ति कमलासनाय नमः

भूतो पसारणम्

अपसर्पन्तु ये भूता ये भूता भूमि संस्थिता ।
ये भूता विघ्नकर्तार ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशाम् ।
सर्वेषाम विरोधेन सर्वकर्म समारभे ॥
इति भूता नपसर्प .

पञ्चगव्य प्राशन मन्त्र.

यत्त्वगास्थि गतं पापं देहेतिष्ठति मामके ।
प्राशनात् पञ्चगव्यस्य दहत्वग्नि रिवेन्धनम् ॥

२०२६ साल फाल्गुन १६ गते हिन्दुध्यान पल्टन जादा लागेको खानगी विधि

त्रिशग भिजाग्रह्यदक्षं विश्वमन्मभि: २४ प्रत्यग्ने हरसा हर: शृणीहि वि
श्वत: प्रति · यातुधानस्य रक्षसो बलं वि रुज वीर्यम्: २५ अयम्:

रक्षोघ्नसूक्तम् (६८)

श्रीः॥ ॥रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्म। शिशानोअ
ग्निःक्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तम्॥१ अयोदंष्ट्रोअर्चिषा
यातुधानानुपस्पृशजातवेदःसमिद्धः आजिह्वयामूरदेवान्रभस्वक्रव्या
दोवृक्त्व्यपिधत्स्वासन्॥२ उभोभयाविन्नुपधेहिदंष्ट्राहिंस्रः। शिशानोऽवरंप
रंच। उतांतरिक्षेपरियाहिराजञ्जंभैःसन्धेह्यभियातुधानान्॥३ यज्ञैरिषूःसं
नममानोअग्नेवाचाशल्याँअशनिभिर्दिहानः। ताभिर्विध्यहृदयेयातुधा
नान्प्रतीचोवाहून्प्रतिभंग्ध्येषाम्॥४ अग्नेत्वचंयातुधानस्यभिन्धिहिं
स्राशनिर्हरसाहन्त्वेनं। प्रपर्वाणिजातवेदःशृणीहिक्रव्यात्क्रविष्णुर्वि
चिनोतुवृक्णम्॥५ यत्रेदानींपश्यसिजातवेदस्तिष्ठन्तमग्नउतवाचरंतं
यद्वांतरिक्षेपथिभिःपतंतंतमस्ताविध्यशर्वाशिशानः॥६ उतालब्धंस्पृ
णुहिजातवेदआलेभानादृष्टिभिर्यातुधानात्। अग्नेपूर्वोनिजहिशोशु
चानआमादःक्ष्विंकास्तमदन्त्वेनीः॥७ तीक्ष्णेनाग्नेचक्षुषारक्षयज्ञंप्रां
चंवसुभ्यःप्रणयप्रचेतः। हिंस्रंरक्षांस्यभिशोशुचानंमात्वादभन्यातुधा

गोदावरीस्नानं दानं कामधेनु पूजा च

~~काने~~ [illegible]

गोपुच्छ तर्पणम् :

मनो मे तर्पयत · वाचंमे तर्पयत · प्राणं मे तर्पयतात्मानं मे तर्पयत ·
प्रजां मे तर्पयत · पशून् मे तर्पयत · गणान् मे तर्पयत · गणान्मे मावि
तृषन् ·

गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोभ्यो नमः ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥
ब्राह्मणाय नमः ॥

श्रीमद्भगवद्गीतापुस्तकयुतां सवत्सां ^

अहं मम समस्तपातकनिर्मूलनपूर्वकं श्रुतिस्मृतिपुराणोक्तफलावाप्तये कृतस्य गोदावरीतीर्थस्नानकर्मणः साङ्गफलावाप्तिद्वारा गोरोमपरिमितवत्सरपर्यन्तं स्वर्गलोकप्राप्तिकामनया स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठीं कांस्यपात्रोपदोहनीं घण्टाभरणां मुक्तालाङ्गूलविभूषितां वस्त्रयुगच्छन्नां स्वर्णतिलकयुतां सवत्सां इमां गां रुद्रदेवताकां……गोत्राय……शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना—

यज्ञसाधनभूता या विश्वस्यान्नप्रदायिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥१॥

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥२॥

दानप्रतिष्ठा-

अद्यकृतैतनत् सालङ्कृतगोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… ….शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्न मम·
ॐ शान्तिरस्तु, पुष्टिरस्तु, तुष्टिरस्तु, यच्छ्रेयस्तदस्तु, यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु, द्विपदेभ्यश्चतुष्पदेभ्यः शान्तिर्भवतु, अमृताभिषेकोऽस्तु·

गोनिष्क्रयीभूतरजतदानम्

अहं मम समस्तपातकनिर्मूलनपूर्वकं श्रुतिस्मृतिपुराणोक्तफलावाप्तये कृतस्य गोदावरीतीर्थस्नानकर्मणः साङ्गफलावाप्ति द्वारा स्वर्गलोकनिवासकामनया इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं …… …गोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्नमम. ॐ शान्तिरस्तु, पुष्टिरस्तु, वृद्धिरस्तु, यच्छ्रेयस्तदस्तु, यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु, द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु अमृताभिषेकोस्तु.

तिलपात्रदानम्

ससुवर्णतिलताम्रपात्राय नमः

अहं मम मनोवाक्कर्मजनितसमस्तपापक्षयपूर्वकं श्रुतिस्मृतिपुराणोक्तदीर्घायुरारोग्यैश्वर्यादयावाप्तये श्रीपरमेश्वरप्रीतये तिलान् सोमदेवताकान् ताम्रपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना-

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

दानप्रतिष्ठा-

अद्यकृतैतत् ससुवर्णतिलताम्रपात्रदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तन्सन्न मम.

सुवर्णदानम्

अहं मम समस्तपातकनिर्मूलनपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तये कृतस्य गोदावरीतीर्थस्नानकर्मणः साङ्गफलावाप्तिद्वारा सर्वभोगसमन्विताक्षयस्वर्गलोकनिवासकामनया इदं सुवर्णं वह्निदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तन्सन्न मम.

प्रार्थना-

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् सुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं

चन्द्रदेवताकं ……… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

भूमिदानम्

[illegible]

अहं मम गोदावरीतीर्थस्नानकर्मणः श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकं आजन्मोपार्जितसमस्तपातकनिरसनद्वारा सर्वभोगसमन्विताक्षयस्वर्गलोकमहितत्वकामनया इमां सर्वसस्यप्रदां भूमिं विष्णुदेवताकां (तन्निष्क्रयीभूतं रजतं चन्द्रदेवताकं)……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तन्मन्न मम·

प्रार्थना—

सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तपुण्यफलदा अतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्यकृतैतत् भूमिदानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तन्मन्न मम ·

शय्यादानम्

अहं मम गोदावरीतीर्थस्नानकर्मणः श्रुतिस्मृतिपुराणोक्त फलावाप्तिद्वारा समस्तपातकनिरसनपुरःसरं नानारत्नसमुज्वल नानापुष्पोपशोभिताप्सरोगणसंकीर्णविमानाधिरोहणपूर्वकं षष्ठीसहस्रवर्षपर्यन्तं सर्वभोगसमन्वित स्वर्गलोकनिवासकामनया इमां सोपकरणशय्यां विष्णुदेवताकां (तन्निष्क्रयीभूतं रजतं चन्द्रदेवताकं) .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे · तत्सन्न मम ·

प्रार्थना-

यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
शय्या ममाप्यशून्यास्तु तस्माज्जन्मनि जन्मनि ॥

दानप्रतिष्ठा-

अद्यकृतैतत् सोपकरणशय्यादानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे · तत्सन्न मम ·

धान्यदानम्

अहं मम आजन्मोपार्जित समस्त पापोपशमनपुरःसरं ऐहिकामुष्मिक शिवफलावाप्ति द्वारा श्रुतिस्मृति पुराणोक्त दीर्घायुरारोग्यैश्वर्योदयावाप्तये गोदावरीतीर्थे इदं ……… संख्यापरिमितं धान्यं प्रजापतिदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे.

प्रार्थना-

सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं परम् ॥
प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे ॥
धान्यं करोति दातारमिहलोके परत्र च ॥
तस्मात्प्रदीयते धान्यमतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् ……… संख्यापरिमित धान्यदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे. तत्सन्न मम.

घृतकुंभवस्त्रदानम् -

अद्येह वत्सगोत्रः भार्गव-च्यावना प्नवा नौर्व-जामद
ग्न्येति पञ्चप्रवरः वर्मा अहं मम
सकलपापनिरशनपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तय
गोदावरीतीर्थे, इदं घृतपूरितकुम्भं समुद्रदेवताकं वस्त्रं
बृहस्पतिदेवताकं, सुवर्णं वह्निदेवताकं धान्यं प्र० गो
त्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे,
तत्सन्न मम

प्रार्थना-

सुगन्धिघृतसंयुक्तं सर्वपापप्रणाशनम्
कुम्भन्ते विप्रदास्यामि सर्वकामार्थसिद्धये
शीतवातादिशमनं लज्जाया रक्षणं परम्,
सुवेषधारि त्वं यस्मा द्वासः शान्तिं प्रयच्छ मे
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे

दानप्रतिष्ठा-

अद्य कृतैतत्-घृतकुंभवस्त्र सुवर्ण-धान्य-दानकर्मणः प्रति
ष्ठार्थं इदं रजतं चन्द्रदैवताकं गोत्राय
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्नमम

दक्षिणासंकल्प -

अद्येह वत्सगोत्रः भार्गव-च्यावन आप्नवा नौर्वजामदग्न्येति पञ्चप्रवरः वर्मा अहं मम श्री परमेश्वरप्रीतये गोदावरीतीर्थे कृतस्य स्नानदानादिकर्मणो न्यूनातिरिक्तपारपूर्णार्थं करिष्यमाणब्राह्मणभोजन कर्मणश्च प्रतिष्ठासाङ्गतासिद्धये इमांभूयसी दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे, तत्सन्न मम.

धान्य प्रार्थना.

अन्न मेव यतो लक्ष्मी रन्नमेवजनार्द्दन
अन्न ~~मेव यतो लक्ष्मी~~ ब्रह्माखिलत्राण
मस्तु मे सर्वजन्मनि.

बृहस्पति प्रार्थना –

नमस्ते वाग्विलासाय देवाचार्याय धीमते ।
सिंहस्थाय च जीवाय त्रैलोक्यहितकारिणे ॥

गोदावरीतीर्थस्नानविधिः

प्रार्थना –

विष्णोः पादप्रसूतासि वैष्णवी सुरपूजिता ।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकम् ॥
विष्णुपादाब्जसंभूते गङ्गे त्रिपथगामिनि ।
गोदावरीति विख्याता पापं मे हर जाह्नवि ॥
तिस्रः कोट्यर्धकोटीनां तीर्थानां वायुरब्रवीत् ।
इयं माहेश्वरी गङ्गा गौतमी वैष्णवीति च ॥
ब्राह्मी गोदावरी नन्दा सुनन्दा कामदायिनी ।
ब्रह्मतेजःसमानीता सर्वपापप्रणाशिनी ॥
एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् ।
भवेत्सन्निहिता तत्र गङ्गा त्रिपथगामिनी ॥
गोदावरीतीर्थाय नमः ॥

स्नानसंकल्पः

अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा समस्तपातकनिर्मूलनपूर्वकं सार्धत्रिकोटितीर्थस्नानजन्यफलावाप्तये गोदावरीतीर्थे स्नानं करिष्ये.

कामधेनुपूजा.

प्रतिज्ञासंकल्पः-

अद्येह

अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये कृतस्य गोदावरीतीर्थस्नानकर्मणः साङ्गफलावाप्तिपूर्वक कामधेनुप्रीतिद्वारा दीर्घायुरारोग्यैश्वर्योदयावाप्तये (दीपकलशगणेशपूजनपूर्वकं) यथामिलितोपचारैः कामधेनुसंपूजनं करिष्ये. ।

ध्यानम्

त्वं देवी त्वं जगन्माता त्वमेवासि वसुन्धरा ।
सावित्री त्वं च गायत्री गङ्गा त्वं च सरस्वती ॥
सुरभी या भरद्वाजं कामधेनुः सुकामदा ।
भजते सर्वदा तस्यै कामधेन्वै नमोस्तु ते ॥

ध्यानं समर्पयामि कामधेनवे नमः
आसनं समर्पयामि कामधेनवे नमः
पाद्यं समर्पयामि कामधेनवे नमः
अर्घ्यं समर्पयामि कामधेनवे नमः
आचमनीयं समर्पयामि कामधेनवे नमः
मधुपर्कं समर्पयामि कामधेनवे नमः

मधुपर्कानन्तरं जलं समर्पयामि कामधेनवे नमः
पञ्चामृतस्नानं समर्पयामि कामधेनवे नमः
पञ्चामृतस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि कामधेनवे नमः
चन्दनं समर्पयामि कामधेनवे नमः
सिन्दूरं समर्पयामि कामधेनवे नमः
पिष्टातकं समर्पयामि कामधेनवे नमः
अक्षतान् समर्पयामि कामधेनवे नमः
यवान् तिलान् समर्पयामि कामधेनवे नमः
पुष्पाणि समर्पयामि कामधेनवे नमः
धूपम्

वनस्पति रसो दिव्यो गन्धाढ्यः सुमनोहरः।
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥

धूपं आघ्रापयामि कामधेनवे नमः
दीपम्

दीपं भक्त्या प्रयच्छामि सौरभेयघृतोद्भवम् ।
त्राहि मां निरयाद् घोराद्दीपज्योतिर्नमोस्तु ते ॥

दीपं दर्शयामि कामधेनवे नमः

नैवेद्यम्

नैवेद्यं गृह्यतां देवि भक्तिं मे ह्यचलां कुरु ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥

नैवेद्यं समर्पयामि कामधेनवे नमः

सद्रव्य नारिकेलफलम्

इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
हिरण्यगर्भगर्भस्थं हेमवीजं विभावसो ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

सद्रव्य नारिकेलफलं समर्पयामि कामधेनवे नमः

नीराजनम्

पञ्चवर्ति समायुक्तं वह्निना दीपितं मया ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदा भव ॥
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥

नीराजनं समर्पयामि कामधेनवे नमः

पुष्पाञ्जलिः

वन्दितासि वशिष्ठेन विश्वामित्रेण धीमता ।
सुरभे हर मे पापं यन्मया दुष्कृतं कृतम् ॥

याकामधेनु र्भवनेस्ति विष्णो
र्या धेनुरासीज्जमदग्नि गेहे ॥
या कामधेनुश्च वशिष्ठगेहे
सा कामधेनु र्वरदा ममास्तु ॥

पुष्पाञ्जलिं समर्पयामि कामधेनवे नमः

प्रदक्षिणा.

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

प्रदक्षिणां समर्पयामि कामधेनवे नमः

नमस्कार:

नमस्ते सर्वकल्याणि नमस्ते देववल्लभे ।
कामधेनो नमस्तुभ्यं नमस्ते ऋषिवन्दिते ॥

नमस्कारं समर्पयामि कामधेनवे नमः

अर्घ्यदानम्

क्षीरसागर संभूते सुरासुर नमस्कृते ।
सर्वदेवमये मातर्गृहाणार्घ्यं नमोस्तु ते ॥
भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेवशरणं मम ॥

विशेषार्घ्यं समर्पयामि कामधेनवे नमः

अर्घपात्रं पराङ्मुखं कृत्वा
पराङ्मुखार्घपात्राय नमः
तत्पात्रमुत्तानं कृत्वा.
अच्छिद्रमस्तु . इति जलं क्षिपेत् .

अञ्जलिं बध्वा
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
अच्युताय नमः
हस्ते जलं गृहीत्वा
कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतस्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥

[illegible]

"BULL-DOG"
EXERCISE BOOK
No. 2.

Subject..

Name..

Class..

Roll No......................... *Year*........................

शैय्यादानम्-

सव्येन आचम्य पूर्वाभिमुखो भूत्वा.
सोपस्करण शैयायै नमः इति शैय्यां संपूज्य.
ब्राह्मणाय नमः इति पात्रब्राह्मणं च संपूज्य.
कुशतिल जलान्यादाय.

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः वर्मा अहं मम काश्यपगोत्रायाः ६५ दिव्येश्वरी प्रेतायाः सकल नरकयातना- घर्म शीतादिबाधा- याम्यपुरुष प्रहारादि निवृत्ति पूर्वकं अनेककल्पान्तपर्यन्तं पुरन्दरादिलोक प्राप्त्यर्थं घृतकुम्भ जल घट ताम्बूल कुङ्कुमागरु कर्पूर दीपिका पादुकोपानत् छत्र चामरासन नानाविध सुवर्ण रजत ताम्रादि भाजन रत्नादि खचित सुवर्णादि भूषण- विविध भक्ष्य भोज्यादर्श पट्ट कौशेय क्षौम और्ण कार्पासादि परिधानीय वस्त्र वाहनायुधोपेतां गृह क्षेत्र दासदाशी हस्तिनिष्क्रयीभूत रजत युतां गवाश्वादिसमन्वितां हेम लक्ष्मीनारायण प्रतिमायुतां इमां सोपस्करण शैय्यां विष्णुदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना-

यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
शय्या अस्या ह्यशून्यास्तु तस्माज्जन्मनि जन्मनि ॥

दानप्रतिष्ठा-

अद्यकृतैतत् सोपस्करणशैय्यादानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

काञ्चनपुरुषदानम्

फलवस्त्र समन्वित काञ्चनपुरुषाय नमः .
ब्राह्मणाय नमः । इति देयद्रव्यं ब्राह्मणं च संपूज्य .
कुशतिलजलान्यादाय .

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [redacted] [redacted] वर्मा अहं मम काश्यपगोत्रायाः इप्र दिव्येश्वरीप्रेतायाः प्रेतत्वविमुक्तिपूर्वकस्वर्गप्राप्तिकामः इमं फलवस्त्रसमन्वितं काञ्चनपुरुषं विष्णुदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

दानप्रतिष्ठा-

अद्यकृतैतत् फलवस्त्रसमन्वितकाञ्चनपुरुषदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ....

शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· इति दद्यात्

ततो द्विजदम्पती पूजा·

आचम्य कुशतिलजलान्यादाय: प्रतिज्ञासंकल्प:—

अद्येह काश्यपगोत्र: काश्यपावत्सारनैध्रुवेतित्रिप्रवर:
वर्मा अहं मम काश्यपगोत्राया: इन्द्र दिव्येश्वरी
प्रेताया: स्वर्गप्राप्तिकाम: द्विजदंपतीपूजनं करिष्ये·
इति संकल्पं कृत्वा·

इदं आसनं समर्पयामि द्विजदंपतीभ्यां नम: ।
इमं अर्घं समर्पयामि द्विजदंपतिभ्यां नम: ।
इदं चन्दनं समर्पयामि द्विजदंपतीभ्यां नम: ।
इदं सिन्दूरं समर्पयामि द्विजदंपतीभ्यां नम: ।
एतान् अक्षतान् समर्पयामि· द्विजदंपतीभ्यां नम: ।
इमानि पुष्पाणि समर्पयामि द्विजदंपतीभ्यां नम: ।
वस्त्रं समर्पयामि द्विजदंपतीभ्यां नम: ।
यज्ञोपवीतं समर्पयामि द्विजदंपतीभ्यां नम: ।
धूपं आघ्रापयामि द्विजदंपतीभ्यां नम: ।
दीपं दर्शयामि द्विजदंपतीभ्यां नम: ।
इमानि नैवेद्यानि समर्पयामि द्विजदंपतीभ्यां नम: ।
उपायनद्रव्यं समर्पयामि द्विजदंपतीभ्यां नम: ।

इति संपूज्य· कुशतिलजलान्यादाय·

द्विजदंपतीदान संकल्पः–

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [redacted] शर्मा अहं मम काश्यपगोत्रायाः इन्द्रदिव्येश्वरी प्रेतायाः स्वर्गप्राप्तिकामनया इमौ द्विजदंपती विष्णुदेवताकौ ········ गोत्राय ·········· शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· इति दद्यात्·

दानप्रतिष्ठा·

अद्य कृतैतत् द्विजदंपतीदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ········ गोत्राय ············ शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

अथ वृषोत्सर्गः

सव्येन आचम्य· पूर्वाभिमुखो भूत्वा· कुशादिकमादाय·
प्रतिज्ञा संकल्पः–
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः राम विक्रम वर्मा अहं मम काश्यपगोत्रायाः लक्ष्मीदिव्येश्वरी प्रेतायाः अद्य आशौचान्त द्वितीये हनि· प्रेतत्व विमुक्तिपूर्वकं स्वर्गप्राप्तिकामः वत्सतरी सहित वृषोत्सर्गकर्म करिष्ये·

इति संकल्पं कृत्वा ब्राह्मणद्वारा होमकर्म समाप्य·
पूर्णपात्रम्
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः राम विक्रमवर्मा अहं मम· काश्यपगोत्रायाः लक्ष्मीदिव्येश्वरी प्रेतायाः प्रेतत्व विमुक्तिपूर्वक स्वर्गप्राप्तिकामः कृतैतद् वृषोत्सर्गाङ्ग हवनकर्मणि ब्रह्मकर्म प्रतिष्ठार्थं अपूर्णपूर्णार्थं पूर्णपात्रं प्रजापति देवताकं …… गोत्राय ……
……शर्मणे ब्राह्मणाय तुभ्यं संप्र

ततो वृषभं चतस्रो वत्सतरीश्च आनीय·
रुद्राध्यायं पठन् वृषभसमीपं गत्वा·
वृषभस्य अग्रिम दक्षिण पादे चन्दनादिना त्रिशूलं
लिखेत्·
तत्र मन्त्रः-
मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु
रीरिषः॥ मानो वीरान्रुद्रभामिनो वधीर्हविष्मन्तः सद
मित्वा हवामहे.॥
ततः पश्चिमवामपादे चक्रं लिखेत्·
तत्र मन्त्रः
वृषो ह्यसि भानुना द्युमन्तन्त्वा हवामहे· पवमानः सहृ
शाशम्·

ततो वत्सतरीभ्यो वृषभदानसंकल्पः-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः राम विक्रमवर्मा अहं मम· काश्यपगोत्रायाः लक्ष्मीदिव्येश्वरी प्रेतायाः अद्य आशौचान्तद्वितीयेऽहनि· प्रेतत्वविमुक्तिपूर्वकं अक्षय्यस्वर्गप्राप्तिकामनया रुद्रदैवतं पतिं वः ददामि· तेन क्रीडन्त्यः चरथ प्रियेण मानः साप्तजनुषा सुभगा रायस्पोषेण समिषा मदेम· इति पठित्वा कुशादिकं वत्सतरीभ्यो दद्यात्

अथ कपिलागोदानम्

कपिलायै गवे नमः । ब्राह्मणाय नमः इति संपूज्य · अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [redacted] [redacted] वर्मा अहं ममः काश्यपगोत्रायाः [redacted] इप्र दिव्येश्वरी प्रेतायाः अद्य आशौचान्तद्वितीये हनि स्वर्गप्राप्तिकामः इमां हेमशृङ्गीं रौप्यखुरां कांस्यदोहां ताम्रपृष्ठीं वस्त्रयुगच्छन्नां मुक्तालाङ्गूलभूषितां कपिलां गां रुद्रदेवताकां ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा·

अद्य कृतैतत्· कपिलागोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

ततो गोपुच्छं गृहीत्वा· अपसव्येन दक्षिणाभिमुख स्तर्पयेत्·

स्वधा पितृभ्यो मातृभ्यो बन्धुभ्यश्चापि तृप्तये ।
मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजाः ॥
गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ।

ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः ।
कपिलादानपुण्येन लभतां तृप्तिमुत्तमाम् ॥

इति कपिलादानविधिः

अथ आद्यमासिक श्राद्धप्रयोगः ।

कर्ता स्नातः शुचिः आचान्तः गोमयोपलिप्तायां भूमौ पुष्पाक्षतादिना भूम्यै नमः इति त्रिवारं संपूज्य· तस्यां भूमौ दर्भेषु तिष्ठन्·
ब्राह्मणाय च आचमनं दत्वा·
स्वागतमिति पृच्छेत्· ॐ सुस्वागतम् इति तेनोक्ते आसने उपवेशयेत्
ततः श्राद्धकर्ता अपसव्येन पुष्पचन्दनपूगीफलादीनि ब्राह्मणाय दत्वा· ब्राह्मणस्य दक्षिणजानुं स्पृष्ट्वा· निमन्त्रयेत्

आ॰ व्यादेव

अद्येह काश्यपगोत्रायाः इप्र दिव्येश्वरी प्रेतायाः आद्यमासिकश्राद्धकरणाय भवन्तं ब्राह्मणं अहं आमन्त्रये· आमन्त्रितोस्मि· इति प्रतिवचनम्· अञ्जलिं बध्वा

अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा· ॥

सर्वायासविनिर्मुक्तैःकामक्रोधविवर्जितैः।
भवितव्यं भवद्भिर्नो ह्यतने श्राद्धकर्मणि ॥

इति पठेत्. ॐ भवितव्यमिति तेनोक्ते।

पादार्घ्यं संपाद्य वामहस्ते कृत्वा.

कुशतिलजलान्यादाय.

आब्धादिक

अद्येह काश्यपगोत्रे .३प्र दिव्येश्वरी प्रेते आद्यमासिकश्राद्धे. एष पादार्घ्यस्ते मया दीयते नवोपतिष्ठताम्.

इति संकल्प्य पादर्घ्यं दद्यात्.

ततो दक्षिणाग्रकुशयुतं नेपालकम्बलात्मकं आसनं उपकल्प्य.

अत्रासने देवराजानुज्ञातो विश्रम्यतां द्विजवर्यानुग्रहात्.॥ प्रसादये त्वाऽसनं गृह्ण पूत ज्ञानाग्निपूतेन करेण विप्र।

इति मन्त्रं पठित्वा. पात्रब्राह्मणं उदङ्मुखं उपवेशयेत्.

ततः पात्रब्राह्मणस्य पादस्थले दक्षिणाग्रकुशत्रयं दद्यात्.

ब्राह्मणासन समीपे श्राद्धसमाप्तिपर्यन्तं दीपं स्थापयेत्.

रक्षोघ्नान् गौरसर्षपान् तिलांश्च श्राद्धदेशे विकिरेत्.

ततः पूर्वाभिमुखः सव्येनैव .कुशत्रयसहितं कर्मपात्रोदकमादाय.

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

पुण्डरीकाक्षः पुनातु · इत्युक्त्वा श्राद्धदेशे द्रव्याणि · आत्मानं च सिञ्चेत् ·

कुशतिलजलान्यादाय · प्रतिज्ञा संकल्पः —

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [redacted] वर्मा अहं मम · काश्यपगोत्रायाः [redacted] इप्र दिव्येश्वरी प्रेतायाः प्रेतत्वनिवृत्तिपूर्वकं [illegible] उत्तमलोकप्राप्तये षोडशश्राद्धान्तर्गतं आद्यमासिकश्राद्धं करिष्ये · इति प्रतिज्ञां कुर्यात् कुरुष्व इति ब्राह्मणप्रतिवचनम् · अञ्जलिं बध्वा ·

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिः पठेत् ·

ततो अपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः कुशादिकमादाय ·

[illegible]

अद्येह काश्यपगोत्रायाः [redacted] इप्र दिव्येश्वरी प्रेतायाः आद्यमासिकश्राद्धे इदं आसनं ते मया दीयते तवोपतिष्ठताम् ·

इति संकल्प्य कुशरूपं आसनं दद्यात् ·

श्राद्धदेशे
अपहता असुरा रक्षाꣳसि वेदिषदः इति तिलान् विकीर्य·
हस्तार्घपात्रोपरि·
पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनामि· अछि
द्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ इति पवित्रं क्षिपेत्·
शन्नो देवीरभिष्टय आपो भवन्तु पीतये ॥ शंयोरभिस्र
वन्तु नः ॥ इति जलं क्षिपेत्·
तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः
पृक्तः स्वधया पितॄन् लोकान् पृणाहि नः। इति तिलान्·
श्रीश्चते लक्ष्मीश्च पत्न्यावहो रात्रे पार्श्वे नक्षत्राणि रू
पमश्विनो व्यात्तम्·। इष्णन्निषाण मुम्म इषाण सर्व
लोकं म इषाण·। इति पुष्पं क्षिपेत्·
गन्धद्वारान्दुराधर्षांन्नित्यपुष्टां करीषिणीम्· ईश्वरीं
सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इति गन्धं क्षिपेत्
हस्तार्घपात्रं संपन्नमिति ब्राह्मणं पृच्छेत्· सुसंपन्नमि
ति तेनोक्ते· हस्तार्घपात्रं वामहस्ते कृत्वा· पुष्पसहि
तं पवित्रं गृहीत्वा नमो नारायणाय इति मन्त्रेण
विप्रहस्ते उत्तराग्रं धृत्वा·
या दिव्या आपः पयसा संबभूवु र्या अन्तरिक्षा उत
पार्थिवीर्याः हिरण्यवर्णा यज्ञिया स्तान आपः शिवा

सꣳस्योना सुहवा भवन्तु·
इति अर्घ पात्रस्थजलं अभिमन्त्र्य· कुशादिकमादाय·
आब्दिक
अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते आद्यमासिकश्राद्धे एष हस्तार्घ स्ते मया दीयते तवोपतिष्ठताम्·
इति विप्रकरे अर्घं दद्यात् ·पवित्र सहितं अर्घपात्रं ब्राह्मणस्य वामपार्श्वे· प्रेतार्थे स्थानमसि·इत्युक्त्वा उत्तानं स्थापयेत्· तदुपरि कुशान् दद्यात्·
ब्राह्मणं संपूज्य · धूपदीपो च कृत्वा·

संकल्पः-
आब्दिक
अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते आद्यमासिकश्राद्धे एतानि गन्धपुष्पाक्षतधूपदिपनैवेद्य यज्ञोपवीत वासांसि ते मया दीयते तवोपतिष्ठन्ताम्· इति उत्सृजेत्·
ततः सव्यं कृत्वा आचम्य· अपसव्यं कृत्वा·
अर्चनविधेः परिपूर्णमस्तु · इति विप्रहस्ते जलं दद्यात्· अस्तुपरिपूर्णं इति प्रतिवचनम्
ततो ब्राह्मणं जलेन वेष्टयित्वा मण्डलं कुर्यात्·
तिल घृत मधु जलयुत मन्त्र मुपनीय· मधुनाभिघार्य कुशतिलजलान्यादाय·

इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः
इति उत्सृजेत्· अथान्न संकल्पः–
सोपस्करतिलजलयुतमन्नमुपनीय मधुनाभि
घार्य · पात्रालम्भनाङ्गुष्ठावगाहनं विना·
पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृ
ते अमृतं जुहोमि स्वाहा · ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढ
मस्य पाꣳसुरे स्वाहा · ॥ इति पठित्वा·
अपहता असुरा रक्षाꣳसि वेदिषदः ॥
इति अन्नोपरि तिलान् विकीर्य·
कुशादिकमादाय·
अद्येह काश्यपगोत्राये ३प्र दिव्येश्वरी प्रेतायै आ
द्यमासिकश्राद्धे इदमन्नं सोपस्करणान्ते मया
दीयते तवोपतिष्ठताम्· इति उत्सृजेत्·
भवान् प्राशयतु · इत्युक्त्वा अपोशानं दद्यात्·
यथा सुखं जुषस्व· इति ब्राह्मणं ब्रूयात्·
तत सव्यं कृत्वा· अञ्जलिं बध्वा·
मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः ॥ माध्वी
र्नः सन्त्वोषधीः ॥

मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः॥ मधु
द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाꣳ२ अस्तु सूर्यः॥ माध्वी
र्गावो भवन्तु नः॥ मधु· मधु· मधु·॥

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।
तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥
नमस्तुभ्यं विरूपाक्ष नमस्तेनेकचक्षुसे ।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

इति पठेत्· ब्राह्मणं मन्दंमन्दं भोजयेत्·
ततो ब्राह्मणं तृप्तं ज्ञात्वा · अपसव्येन·
जलगण्डूषमिदन्ते · इति प्रत्यपोशानं दद्यात्·
पिण्डदानमहं करिष्ये·· कुरुष्व· इति तेनोक्ते·
पिण्डदानार्थं चतुरस्रां हस्तैकपरिमितां पिण्डि
का निर्माय· छिन्नमूलकुशान् दक्षिणाग्रान्
आस्तीर्य· अवनेजनसंकल्पः:-
अद्येह काश्यपगोत्रे ३प्र दिव्येश्वरी प्रेते आद्यमा
सिकश्राद्ध पिण्डस्थाने इदं अवनेजनं ते मया
दीयते तवोपतिष्ठताम्·
इति आस्तृतकुशोपरि अवनेजनं दद्यात्·

ततः कुशतिलजलसहितं पिण्डमादाय·
आद्यमासिक
अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते आ-
द्यमासिक श्राद्धे एष पिण्डस्ते मया दीयते तवो
पतिष्ठताम्· इति अवनेजनस्थाने पिण्डं दद्यात्·
आस्तृतकुशमूलेन करं प्रोक्ष्य· सव्येन आचम्य·
हरिं स्मरेत्· अपसव्यं कृत्वा· गन्धाक्षतपुष्पाणि
गृहीत्वा भास्करमूर्तिं प्रेतं चिन्तयित्वा पिण्डे क्षिपेत्·
प्रत्यवनेजनपात्रं वामहस्ते कृत्वा कुशादिकमादाय·
अद्येह काश्यपगोत्रे इप्र दिव्येश्वरीप्रेते आद्य
मासिक श्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते
तवोपतिष्ठताम्· इति पिण्डोपरि प्रत्यवनेजनं
दद्यात्· ततो नीवीं विस्रंस्य· सव्यं कृत्वा·
आचम्य· अपसव्यं कृत्वा·
वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय·
प्रेते एतत्ते वासः· इति पिण्डोपरि सूत्रं दद्यात्·
ततः पिण्डं गन्धादिभिः संपूज्य धूपदीपौ कृत्वा·
संकल्पः—
आद्यमासिके
अद्येह काश्यपगोत्रे इप्र दिव्येश्वरीप्रेते आद्यमा
सिक श्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूप

दीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम्॰
इत्युत्सृजेत्॰ पिण्डशेषान्नं पिण्डसमीपे विकिरेत्॰
सव्येन आचम्य॰ अपसव्यं कृत्वा ब्राह्मणकरे
शिवा आपः सन्तु इति जलम्॰ सौमनस्यमस्तु॰ इति पुष्पम्॰ अक्षतं चारिष्ठमस्तु इति तण्डुलान्
दत्वा॰ सन्तु इति प्रतिवचनम्॰
पुटकादिपात्रे शान्त्युदकं परिकल्प्य॰ मेदिनी शिरसा अभिवन्द्य॰ इमं मन्त्रं पठेत्॰
नमो नमो मेदिनि लोकधात्रि॰ उर्वी मही शैलधारिणी धरणि नमः॥ धरणि काश्यपि जगत्प्रतिष्ठे वसुधे नमोस्तु वैष्णवी लोकधात्रि नमोस्तु ते सर्वरस
प्रतिष्ठे॰ निवापना वीचि नमो नमोस्तु ते॰॥
इति पठित्वा कुशादिकमादाय॰
अद्येह काश्यपगोत्रायाः इन्द्र दिव्येश्वरीप्रेतायाः
[illegible]
आद्यमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम्॰ इति अक्षय्योदकं दद्यात्॰
ततः सव्यं कृत्वा॰ दक्षिणां दिशं पश्यन्
अघोरा प्रेतास्तु इति पूर्वाग्रां जलधारां दद्यात्॰
अपसव्यं कृत्वा॰ सपवित्रकुशान् पिण्डोपरि धारयेत्॰

अञ्जलिं वध्वा नमो वाचयित्वे. वाच्यनाभितिप्र
तिवचनम्, ततः प्रेतायै नमः इत्युच्यताम् इतिवदेत्.
अस्तु नमः इत्युक्ते पुटकादिपात्रे दुग्धमादाय.
इदं ऊर्जं ते मया दीयते तवोपतिष्ठताम्.
इति दक्षिणाग्रां पयोधारां दद्यात्.
ततो नम्रीभूय पिण्डमाघ्राय उत्थापयेत्.
छिन्नमूलकुशान् वह्नौ क्षिपेत्. अर्घपात्रं संचाल्य.
सव्यं कृत्वा - कुशादिसहितं दक्षिणाद्रव्यमादाय -
अद्येह काश्यपगोत्रायाः इन्द्र दिव्येश्वरी प्रेतायाः
अमुक
आद्यमासिकश्राद्धप्रतिष्ठार्थं इदं रजतं चन्द्रदेवता
कं .... गोत्राय .... शर्मणे ब्राह्मणाय.
दातुं समुत्सृजे. इति दद्यात्.
ततोऽपसव्येन स्वस्त्यस्तु इत्युक्ता ब्राह्मणमु
त्थाप्य शैय्यायां उपवेशयेत्.
ब्राह्मणचरणौ संवाह्य तं नमस्कुर्यात्.
ततो अञ्जनं कंकतिकांच ब्राह्मणाय दद्यात्.
ब्राह्मणश्च शैय्यायां मुहूर्तं विश्रामं कुर्यात्. ततः
सव्येन. देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच ।
नमः स्वाहायै स्वधायै नित्यमेव नमोनमः॥ इतित्रिः
पठेत्

अपसव्यं कृत्वा· दीपाच्छादनं विधाय·सव्येन हस्तौ
पादौ प्रक्षाल्य· आचम्य· अञ्जलिं वध्वा·

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥

इति आद्यमासिक श्राद्धविधिः समाप्ता·

अथ आद्यादिक मासिक श्राद्ध·
इद आद्य मासिक श्राद्ध एव·

उदकुम्भदानविधिः

कर्ता शुचिः आचान्तः प्राङ्मुख उपविश्य· सव्येन कुशतिलजलान्यादाय· प्रतिज्ञासंकल्पः-

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः वर्मा अहं मम· काश्यपगोत्रायाः ३प्र दिव्येश्वरी प्रेतायाः मरणादिनावधिकाशौचावच्छिन्नदिनोनवत्सरं यावत्· प्रतिदिनं सान्नोदकुम्भोपस्थिति स्वर्गताश्वमेधयज्ञजन्यफलसम फलप्राप्तिकाम ब्राह्मणस्थापनपूर्वकं नवत्यधिकशतत्रय सान्नोदकुम्भदानं तावत्संख्याक दन्तधावनकाष्ठदानं तावत्संख्याक जलाञ्जलिदानं च करिष्ये· इति प्रतिज्ञासंकल्पं कुर्यात्·

ततो दीपं प्रज्वाल्य· अपसव्येन दक्षिणाभिमुखः स्वाग्रस्थित अन्नोपरि स्थापितकलशमुखे आमान्नभागं संस्थाप्य· तत्र कुशनिर्मितं ब्राह्मणं संस्थाप्य· कुशादिकमादाय·

अद्येह काश्यपगोत्रायाः ३प्र दिव्येश्वरी प्रेतायाः इदं आसनं ते मया दीयते तवोपतिष्ठताम्· इति कुंभसमीपे उत्सृजेत्·

ब्राह्मणं कुम्भांश्च संपूज्य· कुशादिकमादाय·

संकल्पः-

अद्येह काश्यपगोत्रे ३प्र दिव्येश्वरीप्रेते एतानि गन्ध गन्धपुष्पाक्षतधूपदीपनैवेद्यवस्त्रोपायनादीनि ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्युत्सृज्य सान्नोदकुम्भ दानसंकल्पः-

अद्येह काश्यपगोत्रायै ३प्र दिव्येश्वरीप्रेतायै मरणदिनावधिकाशौचावच्छिन्नदिनेन वत्सरं यावत्संख्याकाः पञ्च उत्तर ~~नवत्य~~धिकशतत्रयसंख्याका उदकुम्भाः तावन्त एव दन्तधावकाष्ठास्तावन्त ए जलाञ्जलयश्च ते मया दीयन्ते तवोपतिष्ठन्ताम्। इत्युत्सृज्य तावन्त अञ्जलयो देयाः ॥

दक्षिणासंकल्पः-

अद्येह काश्यपगोत्रायाः ३प्र दिव्येश्वरीप्रेतायाः कृतैतत् नवत्यधिकशतत्रयसंख्याक उदकुम्भ दन्तकाष्ठ जलाञ्जलिदानकर्मणः प्रतिष्ठार्थं दक्षिणामेतां चन्द्रदेवताकं गोत्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

इत्युदकुम्भदान विधिः

वानौर्वजामदग्न्येति पञ्चप्रवरान्वितेन नरसिंहः वर्मणो पुत्राय
काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवेति त्रिप्रवरान्वितस्य
हिमेन्द्र विक्रम वर्मणो प्रपौत्रीं काश्यपगोत्रायाः का
श्यपावत्सारनैध्रुवेति त्रिप्रवरान्वितस्य [illegible] विक्रम वर्मणो
पौत्रीं काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवेति त्रिप्र
वरान्वितस्य [illegible] विक्रम वर्मणो पुत्रीं वत्सगोत्रस्य भार्गव
च्यावनाप्नवानौर्वजामदग्न्येति पञ्चप्रवरान्वितस्य नरसिं
हः वर्मणो प्रपौत्राय वत्सगोत्रस्य भार्गवच्यावना
प्नवानौर्वजामदग्न्येति पञ्चप्रवरान्वितेन नरसिंहः
वर्मणो ~~पौत्री~~ पौत्राय वत्सगोत्रस्य भार्गवच्यावनाप्नवा
नौर्वजामदग्न्येति पञ्चप्रवरान्वितेन नरसिंह वर्मणो
पुत्राय काश्यपगोत्रायाः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरान्वित हिमेन्द्र विक्रम वर्मणो प्रपौत्रीं काश्यप
गोत्रस्य काश्यपावत्सारनैध्रुवेति त्रिप्रवरान्वितस्य [illegible]
क्रम वर्मणो पौत्रीं काश्यपगोत्रस्य काश्यपावत्सार
नैध्रुवेति त्रिप्रवरान्वितस्य [illegible] विक्रम वर्मणो पुत्रीं वत्स
गोत्रस्य भार्गवच्यावनाप्नवानौर्वजामदग्न्येति पञ्चप्र
वरान्वितेन नरसिंहः वर्मणो प्रपौत्राय वत्सगोत्रस्य भार्ग

वराय वस्त्रभूषितैर्व अस्मद्गनेनेति पुत्र प्रपौत्र पितामहेति नामेद:
वर्मणो पौत्राय वत्सगोत्रस्य भार्गवच्यावनाप्नवानौर्वेञ
महुगनेति पुत्र प्रपौत्र पितृ विक्रम नामेर्हेउ. वर्मणो पुत्राय
काश्यपगोत्रस्य काश्यप पावत्सार नैध्रुवेति त्रिप्रवरस्य
शिक्षिकुम विक्रम वर्मणो प्रपौत्रीं काश्यपगोत्रस्य काश्यप
पावत्सार नैध्रुवेति त्रिप्रवरस्य रामविक्रम वर्मणो पौत्रीं
काश्यपगोत्रस्य काश्यप पावत्सार नैध्रुवेति त्रिप्रवरस्य इ
न्द्र विक्रम वर्मणो पुत्रीं वत्सगोत्रस्य भार्गवच्यावनाप्न
वानौर्व जामदग्न्येति प्रवरस्य दुष्यन्त वर्मणे, वर्मणे
वराय काश्यपगोत्रां काश्यपपावत्सार नैध्रुवेति त्रिप्रवरां
अरुणा नाम्नीं श्रीरूपिणीं वराचितां देवीनाम्नीं
सालङ्कृतां नानाविध कौतुकयुतां इमां कन्यां प्रजा
पति देवताकां स्वर्णमयालंकृत हस्तगृहीतकुश जो तिले
साक्षिक [illegible] फलावाप्ति पूर्वक [illegible]
नि: [illegible] पानन्त ब्रह्मलोक [illegible] फलावाप्ति पूर्वक
श्री लक्ष्मीनारायण प्रीतये तुभ्यं अहं संप्रददे आत्म
कन्यायां उत्पादयिष्यमाण सन्तत्या द्वादशावरान् द्वा
दश परान् पुरुषान् आत्मानं च पवित्रीकर्तुं ब्राह्मविवाह

विधिना देवाग्नि गुरु ब्राह्मण सान्निध्ये आत्मादि
पितृकन्यया सहधर्मं चरणाय पत्नीत्वेन तुभ्यमहं सं
प्रददे। प्रतिगृह्णातु भवान्।

प्रार्थना वाक्य

कन्यां कनक सम्पन्नां कनकाभरणैर्युताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोक जिगीषया ॥
विश्वम्भराः सर्वभूताः साक्षिण्यः सर्वदेवताः ।
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ॥
कन्या लक्ष्मी समाख्याता वरो नारायणः स्मृतः ।
तस्मात्कन्याप्रदानेन प्रीयतां मे श्रियापतिः ॥

कन्यायाः

कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः ।
कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥

वरकन्ययोः

त्रैलोक्य नाथ देवेश सर्वरत्न दयानिधे ।
दानेनानेन सुप्रीतः सदा शान्तिं प्रयच्छ मे ॥

तेनोक्तः

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां,

प्रजापतये कन्यां प्रतिगृह्णामि ॥
ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु । ॐ स्वस्ति ।
ॐ को दात् कस्मा ऽ अदात् कामो दात् कामायादात् ।
कामो दाता कामः प्रतिगृहीता कामैतत्ते ॥

दानप्रतिष्ठा ।

अद्य कृतैतत् कन्यादान कर्मणः प्रतिष्ठा [illegible] सुवर्णं वह्निदैवतं यथानामगोत्राय [illegible] शर्मणे ब्राह्मणाय [illegible] नाम दक्षिणा [illegible] दयाय [illegible] तुभ्यमहं सम्प्रददे ।

गोदान

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः । [illegible] अद्येह [illegible] काश्यप गोत्र [illegible] शर्मा विक्रम वर्मा अहं मम   [illegible] देवी नाम्न्याः कन्यायाः कन्यादान कर्मणि [illegible] प्रयोजक फल [illegible] [illegible] रुद्रदैवतां [illegible] सवत्सां [illegible] रुद्रदैवतां यथानामगोत्राय [illegible]

ग्रहदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः तुलाराशिः श्री विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सवकर्मणि

जन्मलग्नात् ८ वर्षलग्नात् ६ गोचरात् ३ स्थानस्थितेन चन्द्रग्रहेण सूचित सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याभ्युदयप्राप्त्यै चन्द्रग्रहप्रीतये · तण्डुलान्नं प्रजापति देवताकं · वंशपात्रं विश्वकर्मदेवताकं · कर्पूरं गन्धर्वदेवताकं · शङ्खं समुद्रदेवताकं · रजतचन्द्रबिम्बं चन्द्रदेवताकं · दधि सर्प देवताकं · श्वेतवस्त्रं बृहस्पति देवताकं · सुवर्णं वह्निदेवताकं · मौक्तिकं समुद्र देवताकं · तथा -

जन्मलग्नात् ५ वर्षलग्नात् १ गोचरात् १० स्थानस्थितेन भौमग्रहेण सूचित सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याभ्युदयप्राप्त्यै भौमग्रहप्रीतये · गोधूमान्नं प्रजापतिदेवताकं · मसूरान्नं प्रजापति देवताकं · गुडं रुद्रदेवताकं · ताम्रं सर्पदेवताकं · रक्तचन्दनं वनस्पति देवताकं · रक्तवस्त्रं बृहस्पति देवताकं · रक्तवृषभं रुद्रदेवताकं · सुवर्णं वह्निदेवताकं · प्रवालं समुद्र देवताकं · तथा -

जन्मलग्नात् ८ वर्षलग्नात् ७ गोचरात् ५ स्थानस्थितेन बृहस्पतिग्रहेण सूचित सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याभ्युदयप्राप्त्यै बृहस्पतिग्रहप्रीतये · पीतधान्यं प्रजापति देवताकं · हरिद्रां वनस्पति देवताकं · शर्करां सोमदेवताकां · लवणं समुद्र देवताकं · पीतवस्त्रं बृहस्पति देवताकं · सुवर्णं वह्निदेवताकं · पुष्परागमणिं समुद्र देवताकं · तथा -

जन्मलग्नात् ४ वर्षलग्नात् १२ गोचरात् १० स्थानस्थितेन राहुग्रहेण सूचित सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याभ्युदयप्राप्त्यै राहुग्रहप्रीतये · तिलान् सोमदेवताकान् · तैलं मैत्रदेवताकं · माषान्नं प्रजापति देवताकं · लोहं यम देवताकं · कृष्णवस्त्रं बृहस्पतिदेवताकं · सुवर्णं वह्निदेवताकं · कृष्णमेषं वायुदेवताकं · गोमेदमणिं समुद्र देवताकं · तथा -

योगिनीदशायां उल्कानाम्नि शंकटा योगिनी ~~[illegible]~~ स्थितेन सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्याभ्युदयप्राप्त्यै शंकटा योगिनी प्रीतये · ताम्रपात्रं विश्वकर्म देवताकं · घृतं कामधेनु देवताकं · मधु यक्ष्मादेवताकं · शर्करां सोमदेवताकां · पट्टवस्त्रं बृहस्पति देवताकं · हवनांगानि हरिद्रे देवताकां · नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो युष्मभ्यं अहं सम्प्रददे ·

प्रार्थना.

इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते ज्ञानराज्यायेन्द्रस्येन्द्रियाय । इममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥

बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥

कया नश्चित्र आभुवदूती सदा वृधः सखा । कया शचिष्ठया वृता: अम्बे अम्बिके ऽम्बालिके नमा नयति कश्चन: । ससस्त्यश्वक: सुभद्रिकां काम्पीलवासिनीम् ॥

दानप्रतिष्ठा.

अद्य कृतैतत् - चन्द्र: भौम: बृहस्पति: राहु: शंकटा · प्रीतये तत्तद्दानकर्मण: प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहं सम्प्रददे · तत्सन्मम ·

The ELEPHANT
EXERCISE BOOK

MADE FROM
ELEPHANT BRAND PAPER
MANUFACTURED IN INDIA BY
THE TITAGHUR PAPER MILLS CO., LTD.
CALCUTTA



Name जन्मोत्सव कर्म (५०) *Class* ______

Subject ______

^ तथा महामृत्युञ्जय देवता प्रीतये दश सहस्त्र संख्योक वैदिक मन्त्रेण ब्राह्मण द्वारा होम कर्म करिष्ये

ब्राह्मणवरणम्· पुण्याहवाचनम्:

वरणद्रव्यासनम्:

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर बिक्रम वर्मा अहं मम· शाकलागीव शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये जन्मोत्सव कर्म करिष्ये· तत्सुवाङ्गत्वेन दीप कलश गणेश पूजनं मातृकापूजनं आभ्युदयिक गोदानं ग्रहपूजनं वास्तुपूजनम् षोडश मण्डल देवता पूजनं तुला देवताधिवासन पुरःसरं मार्कण्डेयाद्यष्टचिरञ्जीवी सम्पूजनं षष्ठीका देवी सम्पूजनं तथा स्वगृह्योक्त प्रकारेण अग्निप्रज्वालन पूर्वक सम्पूजित देवता हवनादि कर्म करिष्ये, ^ तथा करिष्यमाण जन्मोत्सव कर्मणि सर्वाभ्युदय प्राप्तये ब्राह्मण द्वारा पुण्याहं वाचयिष्ये, तत्कर्म कर्तुं नानानाम गोत्रान् नानानाम शर्मणो ब्राह्मणान् एभिश्चन्दन पुष्पाक्षत धौतोत्तरीय मुद्रिका जलपात्रासनादिभिर्युष्मानहं वृणे· ॐ वृतास्मः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम· जन्मोत्सव कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहं ३ ॐ पुनन्तु मा देवजनाः पुनन्तु

मनसाधियः। पुनन्तु विश्वाभूतानिजातवेदः पुनीहिमा ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीर विक्रमवर्मा अहं मम जन्मोत्सव कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु २ ॐ स्वस्ति २ ॐ स्वस्तिन ऽ इन्द्रो वृद्धश्रवा स्वस्तिनः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पति र्दधातु ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीर विक्रमवर्मा अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु २ ॐ ऋद्ध्यतां २ ॐ सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृता अभूम। दिवं पृथिव्या अध्यारुहामा विदाम देवान्स्वर्ज्योतिः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीर विक्रमवर्मा अहंमम जन्मोत्सव कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे वृद्धिं भवन्तो ब्रुवन्तु २ ॐ वृद्ध्यतां २ ॐ ज्यैष्ठ्यञ्चमे ऽ आधिपत्यञ्चमे

मन्युश्चमे भामश्चमे मश्चमे म्भश्चमे जेमाचमे महिमाचमे वरिमाचमे प्रथिमाचमे वर्षिमाचमे द्राघिमाचमे वृद्धश्चमे वृद्धिश्चमे यज्ञेन कल्पन्ताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम जन्मोत्सव कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणा मम गृहे कल्याणं भवन्तो ब्रुवन्तु २ ॐ कल्याणं २ ॐ यथेमां वाचङ्कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्या ॐ शूद्राय चार्याय स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम जन्मोत्सव कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूना ॐ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम जन्मोत्सव कर्मणि सर्वा

भ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः २ ॐ द्यौ शान्ति रन्तरिक्ष६ं शान्तिः पृथिवी शान्ति रापः शान्तिः रोषधयः शान्तिः । वनस्पतयः शान्ति र्विश्वेदेवाः शान्ति ब्रह्म शान्तिः सर्व६ं शान्तिः शान्ति रेव शान्तिः सामा शान्ति रेधि ॥

विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्न आसुव ॥
मन्त्रार्था सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणां मुदयस्तव ॥

पुण्याहवाचनसमृद्धिरस्तु

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ३

प्रायश्चित्तगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूत रजतद्रव्याय नमः

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीरविक्रमवर्मा अहं मम करिष्यमाणजन्मोत्सव कर्मणि पूर्वकर्तव्यनियमानाचरणजन्य प्रत्यवायपरिहार पूर्वक तत्करिष्यमाण कर्माधिकार सिद्धये इदं गोनिष्क्रयीभूत रजतं चन्द्रदेवताकं ....गोत्राय .... शर्मणे ब्राह्मणाय सम्प्रददे.

प्रार्थना

कपिले सर्व देवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्यकृतैतत् गोनिष्क्रयीभूत रजत दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ....गोत्राय .... शर्मणे ब्राह्मणाय सम्प्रददे.

ॐ शान्तिरस्तु. पुष्टिरस्तु. वृद्धिरस्तु. यच्छ्रेयस्तदस्तु. यत्पा

पंरोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु . द्विपदेभ्यश्चतुष्पदेभ्य
श्च शान्तिर्भवतु . ॐ अमृताभिषेकोस्तु .

दीपप्रार्थना

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षि शिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटि युग धारिणेनमः ॥
दीपनारायणाय नमः

वरुण प्रार्थना

वरुणत्वं महाभाग सर्वदेव प्रपूजित ।
वितते मम यज्ञेस्मिन्ना विघ्नं कुरु सर्वदा ॥
वरुणाय नमः

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटीसूर्यसमप्रभ ।
अविघ्नं कुरुमे देव सर्व[illegible]र्येषु सर्वदा ॥
गणाधिपतये नमः

ग्रह प्रार्थना

ब्रह्मा मुरारी स्त्रिपुरान्त कारी

Nepal Sanskrit University, Balmiki Campus, Kathmandu

भानुः शशी भूमीसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः

मातृप्रार्थना

ब्रह्माणी कमलेन्दु सौम्य वदना माहेश्वरी लीलया
कौमारी रिपुदर्प नाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोर घर्घर मुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथ रुद्र सहिता रक्षन्तु नो मातरः ॥

मातृभ्यो नमः

वास्तु प्रार्थना

वास्तुदेव नमस्तुभ्यं भूमिशय्यारत प्रभो ।
मद्गृहं धन धान्यादि समृद्धं कुरु सर्वदा ॥

वास्तोस्पतये नमः

अग्निप्रार्थना

अग्निं प्रज्वलितं वन्दे जातवेद हुताशनम् ।
सुवर्ण वर्ण ममलं समृद्धं विश्वतो मुखम् ॥

अग्नये नमः

मार्कण्डेय प्रार्थना

चिरजीवि यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान्वित्तवाँश्चैव श्रिया युक्तश्च सर्वदा ॥

अष्टचिरञ्जीवीभ्यो नमः

षष्ठीका प्रार्थना

जयदेवि जगन्मात र्जगदानन्द कारिणि ।
प्रसीद मम कल्याणि नमस्ते षष्ठी देविके ॥

षष्ठीकायै नमः

तुला प्रार्थना

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्य मास्थिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ॥
एकतः सर्वसत्यानि तथानृत शतानि च ।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिता ॥
त्वं तुले सर्वभूतानां प्रयाणमिह कीर्तिता ।
मां तोलयन्ती संसारे दुद्धरस्व नमोस्तुते ॥
योसौ वज्राधिपो देवः पुरुषः पञ्चविंशकः ।
स एकोधिष्ठितो देवि त्वयि तस्मान्नमोस्तुते ॥

तुलायै नमः

गोविन्द प्रार्थना

नमो नमस्ते गोविन्द तुला पुरुष संज्ञक ।

त्वं हरे तारय स्वास्मानस्मात्संसार सागरात् ।

गोविन्दाय नमः

ततो दक्ष हस्ते स्वर्णं वामहस्ते धर्मराजं गृहीत्वा तुलायां आरोहयेत् ·

तुलाधिष्ठात्री देवता प्रार्थना

नमस्ते सर्वभूतानां साक्षी भूते सनातनी ।
पितामहेन देवी त्वं निर्मिता परमेष्ठिना ॥
त्वया धृतं जगत्सर्वं सह स्थावर जङ्गमम् ।
सर्वभूतात्म भूतस्थे नमस्ते सर्वधारिणि ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेद पुनीहि मा ॥
पवित्रेण पुनीहि मा शुक्रेण देवदिद्यत् ।
अग्ने क्रत्वा क्रतु रनु ॥
यत्ते पवित्र मर्चिष्यग्ने वितत मन्तरा ।
ब्रह्मतेन पुनातु मा ॥
पवमानः सो ऽ अद्य नः पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा ।
उभाभ्यां देवसवितः पवित्रेण सवेन च ।

मां पुनीहि विश्वतः ॥
वैश्वदेवी पुनती देव्यागाद्यस्यामिधा वह्वा स्तन्वो वीतपृष्ठाः ।
तया मदन्ता सदयादेषु वयं स्याम पतयो रयीणाम् ॥

अथ दानानि

पूर्णपात्र दानम्

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सव दिवसे सकलारिष्ट शान्ति पूर्वक दीर्घायुष्य प्राप्तये कृतस्य जन्मोत्सव कर्माङ्गभूत हवन कर्मणः अपूर्ण पूर्णार्थं पूर्णपात्रं प्रजापति देवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय सम्प्रददे ·

प्रणीता विमोक्षः

ॐ सुमित्रिया न ऽ आप ऽ ओषधयः सन्तु ।

इति प्रणीताजलेनाभिषिच्य ·

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥

इति प्रणीता पात्रं ऐशान्यां न्युब्जी कुर्यात् ·

वहिर्होम ·

ॐ देवागातु विदोगातुं वित्वागातु मित ।
मनसस्पत ऽ इमन्देव यज्ञँ स्वहा वातेधा ॥

मेधा

सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिम्मेधामया सिषंः स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मेस्वाहा ॥
इदं मे ब्रह्म च क्षत्रं चोमे श्रिय मश्नुताम् ।
मयि देवा दधतु श्रिय मुत्तमां तस्यैते स्वाहा ॥

वस्त्र होम

एधोस्येधिषिमहि समिदसि तेजोसि तेजो मयि धेहि ।
समावर्तिति पृथिवी समुषाः समुस[illegible] समु विश्वमिदं जगत् ॥
वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यषणवै भूः स्वाहा ।

चरुहोम·

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमीन्धे त्वां दीक्षितो अहं स्वाहा ॥

घृतच्छाया·

ससुवर्णघृतकांस्यप[illegible]य नमः

ॐ काण्डात्काण्डा[illegible]प्ररोहन्ति परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया पशुभिर्यात्
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ।

अलक्ष्मीर्यच्च दोषं मे सर्वगात्रेष्ववस्थितम् ।
तत्सर्वं शमयाज्यत्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

अद्येह काश्यपगोत्रः [illegible]श्यपावत्सारनैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीर विक्रमवर्मा अहं मम वर्षवृद्धि[illegible]न्मोत्सव कर्मणि दीर्घायुरारोग्यैश्वर्यादिप्राप्तये इदं [illegible]वर्तिताज्यं मृत्यु[illegible]यदेवताकं कांस्यपात्रं वि[illegible]श्वकर्मदैवताकं सुवर्णं वा[illegible]देवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।

प्रार्थना

कामधेनो समुद्भूत देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातु रा[illegible]ज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा

अद्य कृतैतत् आज्य[illegible]स्यपात्र सुवर्णदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे

ब्राह्मणाय तुभ्यं सम्प्रददे ·

यज्ञाङ्गगोदानम् ·

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रय रजत द्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः श्री न [illegible]ः देवेन्द्र वीर विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सव कर्मणि दीर्घायुरारोग्यैश्वर्यादि यावाप्त्यै कृतस्य दीपक लक्ष्मीगणेश मातृका ग्रह वास्तु मार्कण्डेयाष्ट चिरञ्जीवि नानादेवता पूजन हवन दान जप पाठादि कर्मणः साङ्गफलावाप्तये न्यूनातिरिक्त परिपूर्णार्थं इदं गोनिष्क्रयीभूतं रजत चन्द्रदेवताकं ……गोत्राय……शर्मणे ब्राह्मणाय सम्प्रददे ·

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्य कृतैतत् गोनिष्क्रयीभूत रजत दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……गोत्राय……शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ·

कन्यापूजा

ॐ मन्त्राक्षर मयीं लक्ष्मीं मातृणां रूप धारिणीम् ।
नवदुर्गात्मिकां देवीं कन्यां तां पूजयाम्यहम् ॥

आवाहनं समर्पयामि कन्यायै नमः ।
पाद्यं समर्पयामि कन्यायै नमः ।
आचमनीयं समर्पयामि कन्यायै नमः ।
वस्त्रं समर्पयामि कन्यायै नमः ।
गन्धं समर्पयामि कन्यायै नमः ।
अक्षतान्समर्पयामि कन्यायै नमः ।
पुष्पं समर्पयामि कन्यायै नमः ।
धूपं आघ्रापयामि कन्यायै नमः ।
दीपं दर्शयामि कन्यायै नमः ।
नैवेद्यं समर्पयामि कन्यायै नमः ।
दक्षिणां समर्पयामि कन्यायै नमः ।

जगत्पूज्ये जगद्वन्द्ये सर्व शक्ति स्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोस्तुते ॥

पुष्पाञ्जलीं समर्पयामि कन्यायै नमः ।

ब्राह्मणभोजनभ्यसी

हिरण्यगर्भ गर्भस्थं हेमवीजं विभावसोः ।

अनन्तपुण्यफलदः मतः शान्तिं प्रयच्छमे ॥

देयद्रव्यायनमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः सौनएणो: देवेन्द्र वीर विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सव कर्माणि सकलारिष्ट शान्ति पूर्वक दीर्घायुष्य प्राप्तये कृतस्य दीप कलश गणेश मातृका ग्रह वास्तु मार्कण्डेयाद्य छुचिरञ्जीवी तुलादेवता पूजन हवन दान कर्मणो न्यूनातिरिक्त परिपूर्णार्थं तथा करिष्यमाण ब्राह्मण भोजन कर्मणः प्रतिष्ठार्थं च इदं रजतं चन्द्र देवताकं नाना नाम गोत्रेभ्यो नाना नाम शर्मभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुमहं समुत्सृजे । तत्सन्मम ।

ततः उत्तराङ्ग पूजा ।

अभिषेक ।

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥
ॐ द्यौः शान्ती रन्तरिक्षं शान्तीः पृथिवी शान्ति रापः शान्ति रोषधयः शान्तीः ।

वनस्पतयः शान्ति विश्वेदेवाः शान्ति ब्रह्म शान्तिः सर्वं शा
न्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥
ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतञ्जीवेम शरदः शतं शृणुयाम शरदः शतं
प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्
ॐ स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्न ऽ आसुव ॥
ॐ शान्तिरस्तु · पुष्टिरस्तु · तुष्टिरस्तु · यच्छ्रेयस्तदस्तु · यत्पापं
रोगः शोको दुःखं दूरीभूतं तत्प्रतिहतमस्तु · द्विपदेभ्यश्चतुष्प
देभ्यश्च शान्तिर्भवतु · ॐ अमृताभिषेकोस्तु ·

आशीर्वाद ·

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शू
रूषव्योतिव्याधि महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वाना
शुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यज
मानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फल
वत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥
दीर्घायुत्व ऽ ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।

अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥
पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्मणो वसुनिधयज्ञैः
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥
मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

पौटलिका बन्धनम्:

मार्कण्डेय महाभाग आयुरारोग्य दायक ।
शुभदे विघ्नहन्तारै भानु विघ्नेश्वराधिपैः ॥
धारयामि भुजे दक्षे मम कल्याण हेतवे ।
पूरयध्वं सदास्माकं कामनाश्च मनोरथाः ॥

रक्षाबन्धनम्:

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

तिलकम्:

त्र्यायुषंजमदग्ने । ललाटे ॥
कश्यपस्य त्र्यायुषम् । ग्रीवायाम् ॥
यद्देवेषु त्र्यायुषम् । दक्षबाहुमूले ॥
तन्नो ऽअस्तु त्र्यायुषम् । हृदे ॥

प्रसाद

श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धान्यं धनं पशून्बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः ॥
अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नार्थिनामाशा स्त्वंजीव शारदां शतम् ॥

दुग्धपानमन्त्रः

सतिलं गुडसंमिश्रं मञ्जल्यर्धमिदं पयः ।
मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुः समृद्धये ॥

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ३

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृत स्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥

विष्णुपुष्पाञ्जलिः

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

नारायणाय नमः

७ जन्मोत्तिक, ६ गुलादान

जन्मोत्सवविधि ८

तुलादान

ब्राह्मणवरणम्

वरणद्रव्याय नमः अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... वर्मा अहं मम सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये जन्मोत्सवकर्म करिष्ये, तत्पूर्वाङ्गत्वेन दीप-कलश-गणेशपूजनं, मातृकापूजनं, आभ्युदयिकगोदानं, ग्रहपूजनं, वास्तुपूजनं, षोडशारमण्डलदेवतापूजनं, तुलादेवताधिवासनपुरःसरं मार्कण्डयाद्यष्टचिरञ्जीविसंपूजनं, षष्ठिकादेवीसंपूजनं तथा स्वगृह्योक्तप्रकारेण अग्निप्रज्वालनपूर्वक संपूजितदेवताहवनादिकर्म करिष्ये, तत्कर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतधौतोत्तरीयमुद्रिकाजलपात्रासनादिभिर्युष्मानहं वृणे । वृताः स्मः ॥

२ पुण्याहवाचनम् —

फलवस्त्रादिकं गृहीत्वा अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम करिष्यमाणजन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये

ब्राह्मणद्वारा पुण्याहं वाचयिष्ये, तदङ्गतया .... ऽभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवस्त्रोपायनादिभिः पुण्याहवाचनार्थं ब्रह्मन् त्वामहं वृणे । वृताः स्मः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैधुवेति त्रिप्रवरः .... अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयावाप्तये, भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥१॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैधुवेति त्रिप्रवरः .... अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु३ ॐ स्वस्ति३ ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥२॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैधुवेति त्रि

प्रवरः .... अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणा मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु३ ॐ ऋध्यताम्२ ॐ सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृता अभूम ॥ दिवं पृथिव्या अध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ ३ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे वृद्धिं भवन्तो ब्रुवन्तु२ ॐ वृध्यताम्२ ॐ ज्यैष्ठ्यञ्च मऽ आधिपत्यञ्चमे मन्युश्च मे भामश्च मे मश्च मेम्भश्चं मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे कल्याणं भवन्तो ब्रुवन्तु२ ॐ कल्याणम्३ ॐ यथे

मां वाचङ्कल्याणीमावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्याꣳशूद्रायचार्याय च स्वाय चारणाय च ॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यताम् ॥ ५ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रुवन्तु३ ॐ श्रीः३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥ पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥ ६ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे शान्तिं भवन्तो ब्रुवन्तु३ ॐ शान्तिः३ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा

माशान्तिरेधि ॥ ७ ॥
विश्वानि देवसवितर्दुरितानि परासुव ।
यद्भद्रं तन्नऽ आसुव ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥
पुण्याहवाचनसमृद्धिरस्तु ॥ ॥

प्रायश्चित्तगोदानम् —

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोनिष्क्रयीभूतरजतद्रव्याय नमः ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ब्राह्मणाय नमः । अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम करिष्यमाणजन्मोत्सवकर्मणि पूर्वकर्तव्यनित्यमानाचरणजन्यप्रत्यवायपरिहारपूर्वकतत्करिष्यमाणकर्माधिकारसिद्धये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदे

वताकं काश्यपगोत्राय ………………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्य कृतैतद्गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यपगोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु ॐ अमृताभिषेकोऽस्तु ॥ ॥

दीपप्रार्थना—

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनारायणाय नमः ।

वरुणप्रार्थना—

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेऽस्मिन्न विघ्नं कुरु सर्वदा ॥

वरुणाय नमः ।

गणेशप्रार्थना—

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

ग्रहप्रार्थना—

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।

गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥
नवग्रहेभ्यो नमः ।

मातृप्रार्थना—

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥
मातृभ्यो नमः ।

वास्तुप्रार्थना—

वास्तुदेव नमस्तेस्तु भूमिशय्यारत प्रभो ।
मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा ॥
वास्तोष्पतये नमः ।

अग्निप्रार्थना—

अग्निं प्रज्वलितं वन्दे जातवेद हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम् ॥
अग्नये नमः ।

मार्कण्डेयप्रार्थना—

चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान्वित्तवाँश्चैव श्रिया युक्तश्च सर्वदा ॥
अष्टचिरञ्जीविभ्यो नमः ।

षष्ठिका प्रार्थना—

जय देवि जगन्मातर्जगदानन्दकारिणि ।
प्रसीद मम कल्याणि नमस्ते षष्ठिदेवि ते ॥
षष्ठिकायै नमः ।

तुलाप्रार्थना—

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ॥
एकतः सर्वसत्यानि तथानृतशतानि च ।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिता ॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोस्तु ते ॥
योसो वज्ञाधिपो देवः पुरुषः पञ्चविंशकः ।
स एषोधिष्ठितो देवि त्वयि तस्मान्नमो नमः ॥

तुलायै नमः ।

गोविन्दप्रार्थना—

नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक ।
त्वं हरे तारयस्वास्मानस्मात्संसारसागरात् ॥

गोविन्दाय नमः ।

ततो दक्षहस्ते सूर्यं वामहस्ते धर्मराजं गृहीत्वा तुलायां आरोहेत् ॥

तुलाधिष्ठात्रीदेवताप्रार्थना—

नमस्ते सर्वभूतानां साक्षीभूते सनातनि ।
पितामहेन देवि त्वं निर्मिता परमेष्ठिना ॥
त्वया धृतं जगत्सर्वं सह स्थावरजङ्गमम् ।
सर्वभूतात्मभूतस्थे नमस्ते सर्वधारिणि ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥
पवित्रेण पुनीहि मा शुक्रेण देवदीद्यत् ।

अग्ने क्रत्वा क्रतूँ१ रनु ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनातु मा ॥
पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा ॥
उभाभ्यां देवसवितः पवित्रेण सवेन च ।
मां पुनीहि विश्वतः ॥

वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः । तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥ अथ दानानि ।

पूर्णपात्रदानम्—

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ………………………… अहं मम वर्षवृद्धौ जन्मोत्सवदिवसे सकलारिष्टशान्तिपूर्वकदीर्घायुष्यप्राप्तये कृतस्य जन्मोत्सवकर्माङ्गभूतहवनकर्मणः अपूर्णपूर्णार्थं पूर्णपात्रं प्रजापतिदेवताकं काश्यपगोत्राय …… ………… शर्मणे ब्राह्मणाय संप्रददे ॥

प्रणीताविमोकः ।

मेधा—

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिम्मेधामयासिषꣳ स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

वस्त्रहोमः—

एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि । समाववर्ति पृथिवी समुषाः समुसूर्यः समु विश्वमिदं जगत् । वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यषणावे भूः स्वाहा ॥

चरुहोमः—

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम् ॥ स्वाहा.

घृतच्छाया—

समुवर्णघृतकांस्यपात्राय नमः

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्यच्छदिरसि विश्वजनस्यच्छाया ॥ अलक्ष्मीर्यच्च दौर्भाग्यं मे सर्वगात्रे व्यवस्थितम् । तत्सर्वं शमयाज्यत्वं लक्ष्मीं पुष्टिंच वर्द्धय ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम वर्षवृद्धौ जन्मोत्सवकर्मणि दीर्घायुरारोग्यैश्वर्यादयावाप्तये इदं अवलोकितं आज्यं मृत्युञ्जयदेवताकं कांस्यपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदैवतं काश्यपगोत्राय.....शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना—

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा—

८

अद्यकृतैतत् आज्यकांस्यपात्रसुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यपगोत्राय ....
...... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

यज्ञान्तगोदानम्—

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयरजतद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम वर्षवृद्धौ जन्मोत्सवकर्मणि दीर्घायुरारोग्यैश्वर्याद्यवाप्तये कृतस्य दीप-कलश-गणेश-मातृका-ग्रह-वास्तु-मार्कण्डेयाद्यष्टचिरञ्जीविनुलादेवतापूजनहवनदान[illegible]दिकर्मणः साङ्गफलप्राप्तये न्यूनातिरिक्तपरिपूर्णार्थं इदं गोनि यीभूतं रजतं चन्द्रदेवताकं काश्यपगोत्राय ....
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।

तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्य कृतैतद्गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यपगोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

कन्यापूजा—

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम् ।
नवदुर्गात्मिकां देवीं कन्यां तां पूजयाम्यहम् ॥

आवाहनं समर्पयामि कन्यायै नमः। पाद्यं समर्पयामि कन्यायै नमः। आचमनीयं समर्पयामि कन्यायै नमः। वस्त्रं समर्पयामि कन्यायै नमः। गन्धं समर्पयामि कन्यायै नमः। अक्षतान्समर्पयामि कन्यायै नमः। पुष्पं समर्पयामि कन्यायै नमः। नैवेद्यं समर्पयामि कन्यायै नमः। धूपं आघ्रापयामि कन्यायै नमः। दीपं दर्शयामि कन्यायै नमः। दक्षिणां समर्पयामि कन्यायै नमः ॥ पुष्पाञ्जलिः—

जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते ॥
पुष्पाञ्जलिं समर्पयामि कन्यायै नमः ।

ब्राह्मणभोजनभूयसी—

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
देयद्रव्याय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम वर्द्धवृद्धौ जन्मोत्सवकर्मणि सकलारिष्टशान्तिपूर्वकदीर्घायुष्यप्राप्तये कृतस्य दीप-कलश-गणेश-मातृका-ग्रह-वास्तु-मार्कण्डेयाद्यष्टचिरञ्जीवि-तुलादेवतापूजनहवनदानजपपाठादिकर्मणो न्यूनातिरिक्तपरिपूर्णार्थं तथा करिष्यमाणब्राह्मणभोजनकर्मणः प्रतिष्ठार्थं च इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे ॥

तत उत्तराङ्गपूजा ।

अभिषेकः —

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्ति
रोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्ति
र्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शा-
मा शान्तिरेधि ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम श
रदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः
शतं भूयश्च शरदः शतात् ॥ स्वस्तिनऽ इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽ अरिष्टने
मिः स्वस्ति नो बृहस्पतिर्दधातु ॥ विश्वानि देवसवितर्दु
रितानि परासुव । यद्भद्रं तन्न आसुव ॥
शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु ।
यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु ।
द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु अमृताभिषेकोस्तु ॥

आशीर्वादमन्त्राः —

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राज-
न्यः शूर इषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनु
र्वोढा नड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः स
भेयो युवास्य यजमानस्य वीरो जायतान्निकामे निका
मे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां
योगक्षेमो नः कल्पताम् ॥ ॥ दीर्घायुस्तऽ ओषधे
खनिता यस्मै च त्वा खनाम्यहम् । अथो त्वन्दीर्घायु-
र्भूत्वा शतवल्शा विरोहतात् ॥ ॥ पुनस्त्वादित्या रुद्रा
वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृते-
न त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥
॥ मनसः काममाकूतिं वाचः सत्यमशीय । पशूना
ꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥ ॥

पोटलिकाबन्धनमन्त्रः —

मार्कण्डेय महाभाग आयुरारोग्यदायक ।
शुभदो विघ्नहर्तारो भानु विघ्नेश्वरावपि ॥
धारयामि भुजे दक्षे मम कल्याणहेतवे ।
पूरयध्वं सदास्माकं कामनाश्च मनोरथाः ॥

रक्षाबन्धनमन्त्रः—

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

तिलकमन्त्रः—

त्र्यायुषञ्जमदग्नेः ललाटे ॥ कश्यपस्य त्र्यायुषम् ग्रीवायाम् ॥ यद्देवेषु त्र्यायुषं दक्षबाहुमूले ॥ तन्नो अस्तु त्र्यायुषम् हृदि ॥

प्रसादमन्त्रौ—

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धान्यं धनं पशून्बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः॥
अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥

दुग्धपानमन्त्रः —

सतिलं गुडसंमिश्रमञ्जल्यर्द्धमितं पयः ।
मार्कण्डेयाद्वरं लब्ध्वा पिवाम्यायुःसमृद्धये ॥ ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात्
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत्

श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥ ॥

क्षेत्रपालबलिदानम् —

क्षेत्रपालाय भूत-प्रेत-पिशाच-राक्षस-शाकिनी-डाकिनी-वेतालादिपरिवारयुताय इमं बलिं समर्पयामि. भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य आयुष्कर्ता क्षेमकर्ता पुष्टिकर्ता पुष्टिदस्तुष्टिदो भव ॥

तुलादानम् —

काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम वर्षवृद्धौ जन्मोत्सवकर्मणि सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीपरमेश्वरप्रीतये आत्मसमतोलितं कर्पूरं गन्धर्वदेवताकं, आत्मसमतोलितं वस्त्रं बृहस्पतिदेवताकं, आत्मसमतोलितं श्रीखण्डं गन्धर्वदेवताकं, आत्मसमतोलितं घृतं मृत्युञ्जयदेवताकं, आत्मसमतोलितां शर्करां समुद्रदेवताकां, आत्मसमतोलितं मधु यक्षदेवताकं, आत्मसमतोलितं तिलान्नं सोमदेवताकं, आत्मसमतोलितं तण्डुलान्नं प्रजापतिदेवताकं, आत्मसमतोलितं लवणं समुद्रदेवताकं, आत्मसमतोलितं तैलं भैरवदेवताकं, आत्मसमतोलितं गुडं अब्देवताकं, आत्मसमतोलितं लोहं यमदेवताकं, आत्मसमतोलितं गोमयं विष्णुदेवताकं, नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुं जले समुत्सृजे तत्सन्न मम ।

प्रार्थना —

कर्पूरः कदलीभूतो देवदेवप्रियः सदा ।
भोग्योत्तमो नृपाणां च तद्दानात्सुखमस्तु मे ॥ कर्पूर

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ।
सुवेषधारित्वं यस्माद्वासः शान्तिं प्रयच्छ मे ॥ वस्त्र
नन्दनावास मन्दार सरवे वृन्दारकार्चित ।
चन्दन त्वत्प्रसादान्मे सान्द्रानन्दप्रदो भव ॥ श्रीखण्ड
कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्विवर्द्धनं पुंसामाज्यं पातु सदैव माम् ॥ घ्यू
अमृतस्य कुलोत्पन्न इक्षुसद्मशर्कराः ।
सूर्यप्रीतिकरा नित्यमतः शान्तिं प्रयच्छत ॥ चिनी
यस्मात्पितृणां श्राद्धेषु प्रियमस्यमृतोद्भव ।
तस्मात्तव प्रदानेन मम सन्तु मनोरथाः ॥ मह
तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानेन सर्वं मे पापं नाशय केशव ॥ तिल
पावनाः सर्वयज्ञेषु प्रशस्ता यज्ञकर्मणि ।
तस्मात्तण्डुलदानेन प्रीयन्तां विश्वदेवताः ॥ चामल
रसानामग्रगं श्रेष्ठं लवणं बलवर्द्धनम् ।
ब्रह्मणा निर्मितं साक्षादतः शान्तिं प्रयच्छ मे ॥ नून
आगतो मां प्रति किं नागतो यतः ।
स्वप्रकाशान्तिके यो विलम्बते ॥

इदं प्रार्थयामि श्रीसूर्यनारायणाय नमः

नैवेद्यमात्रां गृहीत्वा ईशानभागे स्थापयेत्

ॐ माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्वकाः ।
भास्करस्य प्रसादाय सर्वे गृह्णन्तु पार्षदाः ॥

सूर्यमन्त्रो समाप्तम्:

चन्द्रावाहनपूजनविधिः.

ॐ गावश्च देवताः सर्वाः पूजाकालाय पार्थिवम् ।
इहचाप्रतिसिद्धार्थं पूजां गृह्णन्तु मन्त्रा ॥

मन्त्रहीनं क्रियाहीनं विधिहीनं तन्नयद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

दीपनाथाय नमः: [illegible] नमः: गोरूपाय नमः:
आवाहितदेवता सहित श्रीसूर्यनारायणाय नमः:

अर्घ्यप्रदानम्.

भ्रष्टो स्खलितपादानां भ्रमीनां करलम्बनम् ।
कोपि याता परत्राणां त्वमेव शरणं मम ॥

अर्घ्यपात्रं पाद्युपरि कृत्वा

ॐ पादुकायै पात्राय नमः: तस्मान्न ऽ त्याग हस्त
ॐ आदित्याय नमः. दक्षिणां दद्यात्.

स्वर्णदानप्रतिपादनम्.

अद्येह काश्यपगोत्र, काश्यपावत्सार नैध्रुवेति त्रि
प्रवरः गंगाराम छेत्री रविविक्रम वर्मा अहं मम
आत्मनः इहजन्मनि सकलाशेषध्यानान्ते पर्वक
दोषापनोदार्थं सर्वपापक्षयार्थं आदित्य प्रीति
कर्मदिने श्रीसूर्यनारायण स्थापन पूजन इत्यादि
कर्म सांगतार्थं कृतैतत् ताम्रपात्रोपरि स्थापित
ताम्रस्थाल्युपरि स्थितां श्रीसूर्यनारायण सुवर्ण
प्रतिमा श्रीसूर्यदेवताकं काश्यपगोत्राय अमुक
नाम शर्मणे आचार्याय तुभ्यमहं सम्प्रददे.

प्रार्थना.

ॐ कालात्मन् सर्वभूतात्मन् वेदात्मन् सर्वतोमुखा ।
दानेनानेन श्रीसूर्य प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा.

अद्य कृतैतत् सुपूजित श्रीसूर्यनारायण प्रति
मादान कर्मणः प्रतिष्ठार्थं इदं रजत चन्द्रदेव
ताकं काश्यपगोत्राय अमुक नाम शर्मणे आ
चार्याय तुभ्यमहं सम्प्रददे. ततस्संनयम.

अभिषेक:

मन्त्रास्तेऽभिषेकस्य [illegible]

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान्यमो वै निरृतिस्तथा ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥
एतास्त्वामभिषिञ्चन्तु ~~देवपत्न्यः समागताः~~ ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
× देवपत्न्यः समागताः ।

एतास्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्याम् ॥ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्च
सायाभिषिञ्चामि ॥ सरस्वत्यै भैषज्येन वीर्या
यान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै
यशसेऽभिषिञ्चामि ॥ कोऽसि कतमोऽसि कस्मै त्वा
काय त्वा सुश्लोक सुमङ्गल सत्यराजन् ॥ शिरो मे
श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि । राजा मे
प्राणोऽअमृतं सम्राट् चक्षुर्विराट् श्रोत्रम् ॥
जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड् भामः मो
दाः । प्रमोदाऽअङ्गुलीरङ्गानि मित्रं मे सहः ॥
बाहू मे बलमिन्द्रियं हस्तौ मे कर्म वीर्यम् ।
आत्मा क्षत्रमुरो मम ॥ पृष्ठीर्मे राष्ट्रमुदरमंसौ
ग्रीवाश्च श्रोणी ऊरूऽअरत्नी जानुनी
विशो मेऽङ्गानि सर्वतः ॥ नाभिर्मे चित्तं विज्ञानं पायु
र्मेऽपचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौ
भाग्यं पसः । जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि
राजा प्रतिष्ठितः ॥ प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्य

स्वेषु प्रतिष्ठामि। गोषु प्रत्यङ्गेषु प्रतिष्ठाम्यात्
मन्प्रति प्राणेषु प्रतिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्र
तितिष्ठामि यज्ञे॥ त्रया देवा एकादश त्रयस्त्रिꣳ
शाः सुराधसः। बृहस्पतिः पुरोहिता देवस्य सवितुः
सवे देवा देवैरवन्तु मा॥ प्रथमा द्वितीयैर्द्वितीयास्
तृतीयैस्तृतीयाः। सत्येन सत्यं यज्ञेन यज्ञो यजूꣳ
षि यजुर्भिः सामानि सामभिर्ऋचः ऋग्भिः पुरो
ऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वष
ट्कारैर्वषट्काराऽऽहुतिभिराहुतयो मे
कामान्त्समर्धयन्तु भूः स्वाहा॥
शङ्खेन पाद्यं नो देव पाद्यं शङ्खेन चार्पिते।
धारास्विनेन नः पाद्यं गायत्र्यादिः स्वनेन च॥
प्राच्यां क्षेत्रतोन्नात्वं नागिवेदस्य दीपितो।
प्राणेनालक्ष्म कस्य ङना स्योक कलशस्थिते॥
सौम्याने पानीय पानेन सोऽपि विनाभितेन।
पानं चार्घ्यं च कोणे मे द्वारि स्नानार्थमुत्तमम्॥
स्वर्णकलशादौ हीनि पानीयं चाग्नेयेऽन्ये वे।
वायव्यं चैव सङ्कोनि नैर्ऋत्यां स्नानादि सर्वतः॥

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्ति
रापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्ति
र्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शा
न्तिरेव शान्तिः सा मा शान्तिरेधि। तच्चक्षुर्देव
हितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शत-
ञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्प्र
ब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूय
श्च शरदः शतात्। स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति
नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु। विश्वानि देव सवि
तर्दुरितानि परासुव। यद्भद्रं तन्न ऽआसुव॥
पूर्णकलशस्थापनम्॥

~~[illegible]~~ गोदानम्.

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कुलशाहो श्री विक्रमवर्माऽहं मम सकलजन्मोपार्जित सर्वपापापनोदनपूर्वक. श्रुतिस्मृतिपुराणोक्त फलावाप्त्यर्थं श्रीसूर्यनारायणप्रीतये इमां सोपस्करां सुपूजितां श्रीसूर्यनारायणदेवताप्रीतये दानकर्मणः प्रतिष्ठासाद्गुणाहितरूपे इमां ~~[illegible]~~ सालङ्कारां गां रुद्रदेवताकां काश्यपगोत्राय अच्युतशर्मणे आचार्याय तुभ्यमहं सम्प्रददे.

प्रार्थना

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा

अद्य कृतैतत् ~~[illegible]~~ सालङ्कार गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यपगोत्राय अच्युतशर्मणे आचार्याय तुभ्यमहं सम्प्रददे. तत्सन्नमम.

द्वादशपात्रदानम्.

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कुलशाहो श्री विक्रमवर्माऽहं मम सकलपापापनोदनं कुर्वे श्रुतिस्मृतिपुराणोक्त फलावाप्त्यर्थं श्रीसूर्यनारायणप्रीतये कृत फल कृष्ण साहित द्वादशपात्र पटान सूर्यदेवताकान् नानानाम गोत्रान् नानानाम शर्मणो ~~[illegible]~~ द्वादशब्राह्मणान् दातुमहं समुत्सृजे तत्सन्नमम.

प्रार्थना.

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः॥

दानप्रतिष्ठा

अद्य कृतैतत् द्वादशघटदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ~~[illegible]~~ नानानाम गोत्राय नानानाम शर्मणे द्वादशब्राह्मणेभ्यः दातुमहं समुत्सृजे. तत्सन्नमम.

एकादशगोदानम्:

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कृष्णमणिः श्रीवीरविक्रमवर्मा अहं मम निखिलव्याधिविनिवृत्तिपूर्वक धृतिकामनया रोगोत्पन्नफलावाप्त्यै श्रीसूर्यनारायणप्रीतये एकादशसंख्याका गावो रुद्रदेवताकाः तन्निष्क्रयीभूत एकादशसंख्याकं रजतं मानं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो एकादशब्राह्मणेभ्यो दातुमहं समुत्सृजे।

प्रार्थना:

यालक्ष्मी सर्वभूतानां याच देवेष्ववस्थिता।
धेनुरूपेण सादेवी मम पापं व्यपोहतु॥

दानप्रतिष्ठा:

अद्यकृतैतत् एकादशसंख्याकगोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं साङ्गतासिद्ध्यर्थं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो एकादशब्राह्मणेभ्यो दातुमहं समुत्सृजे। तेभ्यः सम्प्रददे।

अन्नपर्वतदानम्:

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कृष्णमणिः श्रीकीर्तिविक्रमवर्मा अहं मम निखिलव्याधिविनिवृत्तिपूर्वक दीर्घायुरारोग्यपुत्रकलत्रावाप्त्यै श्रीसूर्यनारायणप्रीतये गोदक्षिणां प्रजापतिदेवताकं माषान् प्रजापतिदेवताकं प्रसृतिं प्रजापतिदेवताकं वस्त्रं बृहस्पतिदेवताकं गुडं अग्निदेवताकं लवणं चन्द्रदेवताकं नवनीतं देवताकं श्रीरुद्रदेवताकं ~~[illegible]~~ सुवर्णं देवताकं सर्वदेवताकं माहिषं यमदेवताकं छत्रं पदेवताकं काश्यपविश्वकर्मदेवताकं ~~नानानाम~~ गोत्रेभ्यो ~~नानानामशर्मभ्यो~~ ब्राह्मणाय दातुमहं समुत्सृजे। तस्मै सम्प्रददे।

प्रार्थना:

द्योद्धमानो चवै पाता त्रिपापानि परमेश्वर।
तस्मात् दशप्रदानेन सूर्यः प्रीतो भवत्विह॥
~~[illegible]~~ पत्तान्नाद्युत्थयो कालो विद्यते
द समुद्रवा। पितृस्त्रीश्च आया अतः शान्तिप्रयत्नतः
नन्दनाभाससवदा सवे क्रन्दाग कीर्तित।

चन्दनं स्वस्त्रमादेवसान्द्रनन्द सदरात्मने ॥
शालग्राम सर्वलोकानां लक्ष्मीपाक्षालयत् ।
सुवेश स्वामिनं यस्माद्वासः शान्तिं प्रयच्छतु ॥
यथा देवेषु विश्वात्मा प्रव श्रीजनार्दनः ।
तथा सोना प्रवरः सर्वदेवेषु लोमतः ॥
सर्वालां सकलोके हा: हविर्भागि सवासनः ।
नराधमाः प्रसन्नाः स्युः मधुरसं प्रदवन्ताः ॥
पापवाद पैशुन्या दम्भक्षास्य न भक्ष्याणात् ।
तस्मात्स्य पलायं ताम्रदानात्प्रणश्यतु ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
कटुत्रयादि यस्माद्रोगघ्नं सर्वदेहिनाम् ।
तस्मादस्य प्रदानेन प्रीतो भवतु भास्करः ॥
यथा सर्वेषु लोकेषु सर्वदेवा व्यवस्थिताः ।
तथा शान्तिं प्रयच्छन्तु तैलदानेन मे सुराः ॥
कामधेनोसमुद्भूतं देवानाममृतं घृतं ।
आप्यायनं च यज्ञानां घृतपात्रं सदेवमाम् ॥
पापवाद पैशुन्याद् पम्यपस्य न भक्षणात् ।

उत्पन्नो यच्च मे पापं कांस्यदानात् प्रणश्यतु ॥

दानप्रतिष्ठा

अद्य कृतैतत् सर्वनारायणप्रीतये गुडकांस्यपु
त्र वस्त्रगुडतिलचन्दनताम्रशालग्राम सौवर्णेन्दि
लवण घृत कांस्यतैलान्यमीषां प्रतिष्ठार्थं इदं द्र
व्यं देवताकं ... गोत्राय ... शर्मणे ब्राह्मणाय
तुभ्यमहं सम्प्रददे ॥ इति सम्पन्नम

दीपप्रार्थना

नमोऽस्त्वनन्ताय सहस्रमूर्तये ।
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते ।
सहस्रकोटीयुगधारिणे नमः ॥

दीपनारायणाय नमः

वरुणप्रार्थना

वरुणस्त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेऽस्मिन्निर्विघ्नं कुरु सर्वदा ॥

वरुणाय नमः

गणेशप्रार्थना

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभः ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणेशाय नमः

ग्रहप्रार्थना

ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः

मातृकाप्रार्थना

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया ।
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी ऐन्द्री च वज्रायुधा ।
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥

मातृभ्यो नमः

अग्निप्रार्थना

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥

अग्नये नमः

पूर्णपात्रदानम्

ओं अद्य काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरान्वितो लगायत पृथ्वी एकैकक्रमन वर्णो अहं मम आदिदेश शान्तिद्वारा सकलकामनासिद्धिद्वारा पूर्वकदीर्घायुरारोग्यैश्वर्यावाप्त्यर्थं प्राप्ति कामनासिद्धि कलश गणेश ग्रह मातृका पूजन पूर्वक श्रीदुर्गार्चनार्पणा पूजन हवन कर्मणः अङ्गतेन स्वपूर्णार्थं पूर्णपात्रं प्रजापतिदेवताकं कोऽपि यगोत्राय अमुकशर्मणे आचार्याय तुभ्यमहं सम्प्रददे । ओं तत्सन्न मम

मेधा:

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनिं मेधामयासिषं स्वाहा॥
यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥
मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा॥

वास्तुहोमः

ॐ एचो ह्येपि पीमहे सालेदसि तेजोऽसि तेजो
मयि धेहि। समावर्तति पृथिवी समुषाः सम्
सूर्यः समुविश्वमिदं जगत्। वैश्वानरज्योति
र्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा॥

चरुहोमः

ॐ अग्नादित्यानि सविस्त भज्ञे व्रतपतेऽग्नये।
व्रातस्य भक्षुं चौपे मोन्धेता दीक्षितो आदे
नः स्वाहा॥

दूर्वा स्थापन।

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च॥
ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया
पशुभिर्भूयात्। घृतेन द्यावापृथिवी पूर्येथा
मिन्द्रस्य छदिरसि विश्वजनस्य छाया॥
अत्र द्युतो यन्त्र दौहत्यं मे सर्वमानन्दवर्धिताम्।
तमर्वतारिधायात्मस्थं तु कृतो ध्रुवेण वर्द्धय॥

सद्गुणवर्ण्यहतकौ हयपानाय यन्त्रः

अद्येह काश्यपगोत्रः कदुपचावताग लैधुबोरी
मित्रवरः तलारोहि: भुकरोदिव्यमवङा अहं काम
आदित्य शर्मा कर्मणि सफलतां इच्छमानो पूर्वक
दीर्घायुरारोग्यैश्वर्योदयार्थं इदं समुद्भवलो
कित आज्य मनुष्यापदेवताक काश्यपाय विप्र
कर्म देवताकं जपरो वृद्धिदेवताक काश्यपगोत्राय
अच्युतानन्द शर्मणे आचार्याय तुभ्यमहं सम्प्रद
दे न मम॥

प्रार्थना:

कामधेनो समुद्भूत देवानां मुक्तानां द्वाये:।

आयुर्वृद्धिकरं धातुसोमपात्र सदैव माम् ।।

दानप्रतिष्ठा:

अद्य कृतैतत् आज्य कांस्यपात्र सुवर्ण दानकर्म प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यप गोत्राय अच्युतदेशर्मणे आचार्याय तुभ्य महं संप्रददे न मम ।

पञ्चगोदानम् :

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।
~~गोनिष्क्रयीभूत रजत प्रत्याम्नाय सवत्साम्~~
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः गलगाल्हो ध्रुवीर विक्रमवर्मा अहम् आदित्य ह्यानौ कर्मणि श्री सूर्यनारायण पूजन हवनादि कर्मणः साङ्गता सिद्ध्यर्थं इमां गां रुद्रदैवताकां ~~गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं~~ काश्यपगोत्राय अच्युतदेशर्मणे आचार्याय तुभ्यमहं संप्रददे ।

∴ सवत्सां सालङ्कारां

प्रार्थना.

कपिले सर्वदेवानां पूजनीयासि रोहिणि । तीर्थदेवमयी यस्मात् अतः शान्तिं प्रयच्छ मे ।।

दानप्रतिष्ठा — सवत्सा सालङ्कारां गो दान

अद्य कृतैतत् ~~गोनिष्क्रयीभूत रजत दान~~ कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यप गोत्राय अच्युतदेशर्मणे आचार्याय तुभ्य महं संप्रददे न मम ।

ब्राह्मणभोजनदक्षिणा.

ॐ ब्रह्मणे नमः : ब्राह्मणेभ्यो नमः :
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः गलगाल्हो ध्रुवीरविक्रमवर्मा अहम् आदित्य ह्यानौ कर्मणि हवनादि सकल कर्म [illegible] तत्सम्पूर्ण फलप्राप्त्यर्थं होम दीपकलश गणेश पूजन पठित ब्राह्मणेभ्यः [illegible] यथोत्साह [illegible] प्रीतये [illegible] काले पात्रे [illegible] श्रीसूर्यनारायण

एवं प्रकारेण तथा श्रावणशुक्ल चतुर्थी दिनदे-
खि आषाढदिनपर्यन्त प्रतिदिन [illegible] स्वे [illegible]
गितापाठ श्रीदुर्गा पूजा प्रकारं तथा प्रति पिण्ड
त्ये श्री दुर्गा पूजा विशेष प्रकार तथा दशाल
दशलक्षयोजन [illegible] नैवेद्य मन्त्रेण स्नानः चण्डी
पाठ [illegible] च [illegible] दोषविकार सर्व
जीवित्वपाप ज्वराणि शान्ति [illegible] प्रकारको
वन [illegible] पूजा आचार्य दक्षिणा [illegible]
होमकर्म ~~[illegible]~~ तथा अर्घ्य दान करा(ई)
पः हवन पूर्णाहुति ब्राह्मण भोजन दक्षिणा तथा
क्षमा अपराध न्यून ब्राह्मण भोज्य दक्षिणा [illegible]
वा भूयसी दक्षिणा [illegible] दक्षिणा [illegible]
चन्द्र देवता [illegible] [illegible] [illegible]
[illegible] ब्राह्मण भोजन दान [illegible] [illegible]. [illegible].

अभिषेकः

ॐ सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥
ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे
देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्ति
रेव शान्तिः सा मा शान्तिरेधि॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदः शतं जीवेम शरदः शतं शृणुया
म शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम
शरदः शतं भूयश्च शरदः शतात्॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥
विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रं तन्न आसुव॥
ॐ शान्तिरस्तु। ॐ पुष्टिरस्तु। ॐ तुष्टिरस्तु। ॐ
[illegible] [illegible]। [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]। ॐ [illegible] [illegible]
श्री शान्ति भवतु। ॐ [illegible]

रक्षाबन्धन मन्त्रः

ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥

तिलक मन्त्रः

त्र्यायुषञ्जमदग्नेः ललाटे
कश्यपस्य त्र्यायुषम् ग्रीवायाम्:
यद्देवेषु त्र्यायुषम् दक्षबाहुमूले
तन्नो ऽस्तु त्र्यायुषम् हृदि:

प्रदानमन्त्रो:

श्रीवर्चस्वमायुष्यमारोग्यमाविधात् शोभमानं
महीयते। धान्यं धनं पशुं बहुपुत्रलाभं श
तसम्वत्सरं दीर्घमायुः॥
अव्याधिनाहारिरेणा महता च विलेपिना।
धूपेनार्घेना मालाभिर्वस्त्रेण शिवहारहारकम्।

अच्युतो ध्या:

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
ॐ अच्युताय नमः ॐ अच्युताय नमः ॐ अच्युताय नमः।

इतो कर्म समर्पणा:

कायेन वाचा मनसेन्द्रियैर्वा।
बुद्ध्यात्मना वा नुसृत स्वभावात्॥
करोति यद्यत्सकलं परस्मै।
नारायणायेति समर्पये तत्॥

श्री कृष्णार्पणमस्तु:

९०

Lion

2

वं (नेपाल विवाह विवरणी)



THE BEHAR COMMERCIAL AGENCY, MUZAFFARPUR.

प्रायश्चित्तगोदानम् -

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोनिष्क्रयीभूत रजतद्रव्याय नमः ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः । अद्येह काश्यपगोत्रः काश्यपावत्सा रनैध्रुवेति त्रिप्रवरः शर्मा: अहं मम करिष्यमाण वटाश्वत्थविवाहकर्मणि पूर्वकर्तव्यनीय मानाचरण जन्यप्रत्यवाय परिहारपूर्वकं तत्करिष्यमाण कर्माधिकारसिद्ध्ये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ...... गोत्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे,

प्रार्थना -

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा - अद्यकृतैतत् गोनिष्क्रयीभूत रजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं गोत्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे, ॥

ब्राह्मणवरणम्-

वरणद्रव्याय नमः अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः अहं मम अखिलपातकप्रशमनपूर्वकाभीष्टसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अश्वत्थविवाहं करिष्ये, तत्पूर्वाङ्गत्वेन दीप. कलश. गणेश. पूजनं. आभ्युदयिकगोदानम्. मातृकापूजनं ग्रहपूजनं सर्वतोभद्रमण्डलदेवतापूजनपुरःसरं वटाश्वत्थयोः पूजनं तथा स्वगृह्योक्तप्रकारेण अग्निप्रज्वालनपूर्वक संपूजिता हवनादिकर्म-करिष्ये, तत्कर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतधौतोत्तरीयमुद्रिकाजलपात्रासनादिभिर्युष्मानहं वृणे, वृताः स्मः ॥

पुण्याहवाचनम्-

फलवस्त्रादिकं गृहीत्वा. अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः अहं मम करिष्यमाण अश्वत्थविवाहकर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये, तदङ्गतया एभि

चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवस्त्रोपायनादिभिः पुण्याहवाचनार्थं ब्राह्मन् त्वामहं वृणे, वृताःस्मः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
अहं मम अश्वत्थविवाहकर्मणि
सर्वाभ्युदयावाप्तये भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु ३
ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥१॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
अहं मम अश्वत्थविवाहकर्मणि
सर्वाभ्युदयावाप्तये भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु ३
ॐ स्वस्ति ३ ॐ स्वस्तिन इन्द्रो वृद्धश्रवाःस्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो स्वस्तिनो बृहस्पतिर्दधातु ॥२॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
अहं मम अश्वत्थविवाहकर्मणि
सर्वाभ्युदयावाप्तये भो ब्राह्मणाः ऋद्धिं भवन्तो ब्रुवन्तु ३

ॐ ऋद्ध्यन्ताम् ३ ॐ सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृता
अभूम ।। दिवं पृथिव्या अध्यारुहामाविदाम देवान्स्वर्ज्योतिः ।।३।।
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
अहं मम· अश्वत्थविवाहकर्मणि सर्वा
भ्युदयावाप्तये भो ब्राह्मणा वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृद्ध्यन्ता
म ३ ॐ ज्यैष्ठ्यञ्च म आधिपत्यञ्चमे मन्युश्चमे भामश्च
मे मश्चमे म्भश्चमे जेमाचमे महिमाचमे वरिमाचमे प्र
थिमाचमे वर्षिमाचमे द्राघिमाचमे वृद्धंचमे वृद्धिश्चमे य
ज्ञेन कल्पन्ताम् ।।४।।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
अहं मम अश्वत्थविवाहकर्मणि सर्वा
भ्युदयावाप्तये भो ब्राह्मणाः कल्याणं भवन्तो ब्रुवन्तु· ३ ॐ
कल्याणम्· ३ ॐ यथेमां वाचं कल्याणी मावदानि जने
भ्यः ।। ब्रह्मराजन्याभ्यां (ं) शूद्राय चार्याय च ।। प्रियो
देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्य
ताम् ।। ५ ।।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
अहं मम अश्वत्थविवाहकर्मणि सर्वा
भ्युदयप्राप्तये भो ब्राह्मणाः श्रीरस्तु भवन्तो ब्रुवन्तु २ ॐ
श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥प
शूना (ं) रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥६॥
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
अहं मम अश्वत्थविवाहकर्मणि सर्वाभ्युद
यप्राप्तये भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु २ ॐ शान्तिः ३
ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरो
षधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शा
न्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥७॥
विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रन्त न्न आसुव ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ॥
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ ॥
पुण्याहवाचन समृद्धिरस्तु ॥ ॥

Tribhuvan University, Balmeeki Campus, Kathmandu

दीपप्रार्थना-

नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटियुगधारिणे नमः ॥

दीपनारायणाय नमः ।

वरुणप्रार्थना-

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेऽस्मि न्नविघ्नं कुरु सर्वदा ॥ वरुणाय नमः

गणेशप्रार्थना-

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

ग्रहप्रार्थना-

ब्रह्मा मुरारि स्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।

गुरुश्च शुक्र शनि राहु केतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु

नवग्रहेभ्यो नमः ।

मातृप्रार्थना -

ब्रह्माणीकमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः॥ ॥

मातृभ्यो नमः

अग्निप्रार्थना

अग्निं प्रज्वलितं वन्दे जातवेद हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम् ॥

अग्नये नमः ॥

ततो सर्वतोभद्रे विष्णुप्रतिमां पुरुषसूक्तेन संपूज्य, ततः स्वस्त्ययनारम्भं कृत्वा मङ्गलवाद्यैः सुगन्धितैलहरिद्रापुष्पोदकेन चाभिषिच्य वस्त्रादिना वेष्टनयज्ञोपवीत

चन्दनं दत्वा वटाय हरिद्राकुंकुमाक्तसूत्राद्यलंकाराणि दत्वा घण्टादिवाद्यघोषेण अश्वत्थपूजां कुर्यात्।

अश्वत्थपूजनम् -

ध्यानम् -

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय अश्वत्थाय नमो नमः ॥

ध्यानं [illegible]मर्पयामि अश्वत्थाय नमः ॥

आवाहनम् -

अश्वत्थाय वरेण्याय सर्वैश्वर्यप्रदायिने ॥
अन्ततः शिवरूपाय वृक्षराजाय ते नमः ॥॥

आवाहनं समर्पयामि अश्वत्थाय नमः ॥

आसनम् -

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
नमो दुःस्वप्ननाशाय सुस्वप्नफलदायिने ॥

आसनं समर्पयामि अश्वत्थाय नमः ॥

पाद्यम्-

अग्निगर्भः शमीगर्भो देवगर्भः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो यज्ञगर्भ नमोऽस्तु ते ॥
पाद्यं समर्पयामि अश्वत्थाय नमः ॥

अर्घ्यम्-

आयुर्बलं यशोवर्चः प्रजाः पशु वसूनि च ।
ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥
अर्घ्यं समर्पयामि अश्वत्थाय नमः ॥

आचमनीयम्-

त्वं क्षीरफलकश्चैव शीतलश्च वनस्पते ।
त्वामाराध्य नरो विन्द्यादैहिकामुष्मिकं फलम् ॥
आचमनीयं समर्पयामि अश्वत्थाय नमः ॥

स्नानम्-

चलद्दलाय वृक्षाय सर्वदाश्रितविष्णवे ।
बोधितत्वाय देवाय ह्यश्वत्थाय नमो नमः ॥
स्नानं समर्पयामि अश्वत्थाय नमः ॥

वस्त्रम्-

एकादशात्मरुद्रोसि वसुनाथशिरोमणिः ।
नारायणोसि देवानां वृक्षराजोऽसि पिप्पल ॥ ॥
वस्त्रं समर्पयामि अश्वत्थाय नमः ॥

यज्ञोपवीतम्-

क्षीरदस्त्वं हि येनेह येन श्रीस्त्वां निषेवते ।
सत्येन तेन वृक्षेन्द्र मामपि श्रीर्निषेवताम् ॥ ॥
यज्ञोपवीतं समर्पयामि अश्वत्थाय नमः ॥

चन्दनम्·

श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ गृहाणदेव पिप्पल· ॥
चन्दनं समर्पयामि अश्वत्थाय नमः ॥

पुष्पाणि

यं दृष्ट्वा मुच्यते रोगै स्पृष्ट्वा पापैः प्रमुच्यते ।
यदाश्रयाच्चिरञ्जीवितमश्वत्थं नमाम्यहम् ॥
पुष्पाणि समर्पयामि अश्वत्थाय नमः ॥

धूपम्-

वनस्पतिरसोद्भूतः सर्वौषधिविजृम्भितः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
धूपं समर्पयामि अश्वत्थाय नमः ॥

दीपम्-

साज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश मम ज्ञानप्रदो भव ॥
दीपं दर्शयामि अश्वत्थाय नमः ॥

नैवेद्यम्-

नैवेद्यं गृह्यतां देव मे भक्तिं ह्यचलां कुरु ।
ईप्सितं च वरं देहि परत्रेह परां गतिम् ॥
नैवेद्यं समर्पयामि अश्वत्थाय नमः ॥

आचमनीयम्-

त्वं क्षीरफलकश्चैव शीतलश्च वनस्पते ।
त्वामाराध्य नरो विन्द्यादैहिकामुष्मिकं फलम् ॥
आचमनीयं समर्पयामि अश्वत्थाय नमः ॥

नारिकेलफलम्-

आयुःप्रज्ञांधनंधान्यं सौभाग्यं सर्वसंपदाम्
देहिदेव महावृक्ष त्वामहं शरणं गतः ॥

नारिकेलफलं समर्पयामिअश्वत्थायनमः ॥

उपायनम्-

ऋग्यजुःसाममन्त्रात्मा सर्वरूपीपरात्परः ।
अश्वत्थोदेवमूलोसा ऋषिभिः प्रोच्यते सदा ॥

उपायनं समर्पयामि अश्वत्थायनमः ॥

पुष्पाञ्जलिः -

अश्वत्थयस्मात्त्वयि वृक्षराज
नारायणस्तिष्ठति सर्वकाले ।
अतः श्रुतस्त्वं सततं तरूणाम्
धन्योसि चारिष्टविनाशकोसि ॥

पुष्पाञ्जलिं समर्पयामि अश्वत्थायनमः ॥

प्रदक्षिणा-

यानिकानिचपापानि जन्मान्तरकृतानिच ।

तानिसर्वाणि नश्यन्ति प्रदक्षिणापदेपदे ॥

प्रदक्षिणां समर्पयामि अश्वत्थायनमः ॥

इतिषोडशोपचारैः संपूज्य· पूर्ववत्मधुपर्कादिदत्वा अश्वत्थाय वररूपां कन्यां दद्यात् ॥

अन्तःपटं धृत्वा मङ्गलाष्टकादिपद्यानि पठेत् ॥

वरस्रूप कन्यादानसंकल्प: -

अद्येह काश्यपगोत्र: काश्यपावत्सारनैध्रुवेति त्रिप्रवर: अहं मम इहजन्मनि जन्मान्तरे वा कृतसमस्तपापक्षयार्थं श्रीमत्परमेश्वरप्रीतये

वर्मण: प्रपौत्रीं वर्मण: पौत्रीं

वर्मण: पुत्रीं इति त्रिरुच्चार्य श्रीअश्वरूपिणे महाविष्णवे इमां वरस्रूपां कन्यां श्रीरूपिणीं संवर्द्धितां यथाशक्त्यलंकृतां तुभ्यं अश्वत्थाय संप्रददे, श्रीविष्णु: प्रीयताम् इति तिलजलमुत्सजेत् ॥

प्रार्थना:-

अनादिमध्यनिधन त्रैलोक्यपरिरक्षक ।
इमां गृहाण त्वं, वरस्रूपां, कन्यां विवाहविधिनेश्वर ॥

दानप्रतिष्ठा-

अद्यकृतैतत्- वरस्रूपकन्यादानकर्मण: प्रतिष्ठासाङ्गतासिद्ध्यै इदं सुवर्णं वन्हिदेवताकं अश्वत्थाय संप्रददे

ततोनिराजयित्वा शान्तिसूक्तादि पठेत्
विष्णु द्वादशाक्षरमन्त्रेण अष्टोत्तरशत संख्याक
हवनं च कारयेत् ॥ ॥

पूर्णपात्रम्-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः अहं मम अखिलपातकध्वंसनपूर्वककामीष्टसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं कृतस्य व्रतबन्धविधाङ्गकर्माङ्गभूत हवनकर्मणः अपूर्णपूरणार्थं पूर्णपात्रं प्रजापतिदैवताकं गोत्राय शर्मणे ब्राह्मणाय संप्रददे, ॥

प्रणीताविमोकः ।

मेधा-

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनि मेधा मयासिषं स्वाहा ॥
यांमेधां देवगणाः पितर श्चोपासते ।
तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ॥
मेधांमे वरुणोददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदंमे ब्रह्मच क्षत्रं चोभे श्रिय मश्नुताम् ।

मयि देवा दधतु श्रिय मुत्तमां तस्यैते स्वाहा ।।

वस्त्रहोम: -

एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ।
समाववर्ति पृथिवी समुषा समु सूर्यः समु विश्वमिदं जगत् ।
वैश्वानरज्योति र्भूयासं विभून्कामा न्व्यश्नवै: भूः स्वाहा ।।

चरुहोम: -

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम् स्वाहा ।।

घृतच्छाया-

ससुवर्णघृतकांस्यपात्राय नमः
ॐ काण्डात्काण्डात्प्ररोहन्ति परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ।।
ध्रुवासि ध्रुवोयं यजमानो स्मि न्नायतमे प्रजया पशुभि र्भूयात् । घृतेन द्यावा पृथिवी पूर्येथा मिन्द्रस्य छदिरसि विश्वजनस्य छाया ।। अलक्ष्मी र्यच्च दौष्ट्यं मे सर्व गात्रेष्ववस्थितम् । तत्सर्वं त्वा मयाऽपत्वं लक्ष्मीं पुष्टिं च

वेद्रुय ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
अहं मम· अखिलपातकप्रशमनपूर्व
कामिष्टसिद्धिद्वारा श्रीपरमेश्वरप्रीतये वराश्वत्थविवाहकर्म
णि दीर्घायुरारोग्यैश्वर्योदपायाप्तये इदं अवलोकितं आ
ज्यं मृत्युञ्जयदेवताकं कांश्यपात्रं विश्वकर्मदेवताकं सुवर्णं
वह्निदेवताकं गोत्राय शर्मणे
ब्राह्मणाय तुभ्यं संप्रददे, ॥

प्रार्थना-

कामधेनोः समुद्भूतं देवाना मुत्तमं हविः ।
आयुर्वृद्धिकरं दातु राज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा-

अद्यकृतैतत्- [illegible] स सुवर्णघृतकांश्यपात्रदानकर्मणः
प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं गोत्राय
शर्मणे ब्राह्मणाय· तुभ्यं सं
प्रददे· ॥

पश्चात गोदानम्·

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्यस्वच ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥
गोनिष्क्रयरजतद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः अहं ममः अखिलपातकप्रशमनपूर्वकाभीष्टसिद्धिद्वारा श्रीपरमेश्वरप्रीतये कृतस्य वटाश्वत्थ विवाहकर्मणि दीप·कलश·गणेश·मातृका·पूजनपूर्वक संपूजितदेवानां हवनादिकर्मणः साङ्गःफलप्राप्तये न्यूनातिरिक्तपरिपूर्णार्थं इदं गोनिष्क्रयामूतं रजतं चन्द्रदेवताकं गोत्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे, ॥

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयीयस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्यकृतैतत्-गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं
इदं रजतं चन्द्रदैवताकं   गोत्राय   शर्मणे
ब्राह्मणाय तुभ्यं संप्रददे ॥

ब्राह्मणभोजनभूयसी-

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे ॥
देयद्रव्याय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
अहं मम· वटाश्वत्थविवाहकर्मणि
अखिलपातकप्रशमनपूर्वकाभीष्टसिद्धिद्वारा श्रीपरमेश्वर
प्रीतये कृतस्य दीप कलश गणेश· मातृका· ग्रह·
संपूजनपुरःसरं वटाश्वत्थविवाहकर्म· संपूजितदेवानां
हवनादिकर्मणो न्यूनातिरिक्तपरिपूर्णतासिद्ध्ये नानाना
मगोत्रान् नानानामशर्मणो ब्राह्मणान् मिष्टान्नैः संभो

उपिष्ये, करिष्यमाणभोजनकर्मणा स्व प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे ॥

उत्तराङ्ग पूजा -

अभिषेकः -

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥
ॐ द्यौः शान्ति रन्तरिक्ष ँ शान्तिः पृथिवी शान्ति रापः शा
न्ति रोषधयः शान्तिः । वनस्पतयः शान्ति र्विश्वेदेवाः शा
न्ति र्ब्रह्मशान्तिः सर्व ँ शान्तिः शान्ति रेव शान्तिः सा मा शा
न्तिरेधि ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्ये
म शरदः शतञ्जीवेम शरदः शत ँ शृणुयाम शरदः शतं
प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च श
रदः शतात् ॥ स्वस्तिन ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः
पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति
नो बृहस्पति र्दधातु ॥ विश्वानि देव सवितर्दुरितानि प
रासुव । यद्भद्रन्तन्न आसुव ॥ शान्तिरस्तु
पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेय स्तदस्तु ।
यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहत मस्तु
द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु अमृताभिषेकोस्तु ॥

आशीर्वादमन्त्राः -

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः
शूर ऽइषव्योतिव्याधि महारथो जायतान्दोग्ध्री धेनुर्वोढा
नड्वानाशुःसप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभेयो यु
वास्य यजमानस्य वीरो जायतान्निकामे निकामेनः पर्ज
न्यो वर्षतु फलवत्योन ओषधयः पच्यन्तां योगक्षेमो
नः कल्पताम् ॥ दीर्घायुस्त ऽओषधे खनिता यस्मै च
त्वा खनाम्यहम् । अथो त्वन्दीर्घायुर्भूत्वा शतवल्शावि
रोहतात् ॥ ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां
पुनर्ब्रह्माणो वसुनीथ यज्ञैः ॥ घृतेन त्वं तन्वं वर्धयस्व
सत्याः सन्तु यजमानस्य कामाः ॥ मनसः काममा
कूतिं वाचः सत्यमशीय । पशूनां रूपमन्नस्य
रसो यशः श्रीः श्रयताम् ॥ ॥

रक्षावन्धनमन्त्रः -

येन वद्धो वली राजा दानवेन्द्रो महावलः ।
तेन त्वां प्रतिवध्नामि रक्षे मा चल मा चल ॥

तिलकमन्त्रः -

आयुष जमदग्नेः ललाटे ॥ कश्यपस्य आयुषम् ग्रीवायाम् ॥ यद्देवेषु आयुषम् दक्षवाहुमूले ॥ तन्नो अस्तु आयुषम् हृदि ॥

प्रसादमन्त्रौ -

श्रीर्वर्चस्व मायुष्य मारोग्य माविधात्पवमानं महीयते ॥ धान्यं धनं [illegible] वहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः
अव्याधिनाशरीरेण मनसा च निराधिना ॥
पूरयन्नर्थिनामाशा स्त्वं जीव शरदांशतम् ॥ ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्देत मच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
वुद्ध्यात्मना वानुसृतस्वभावात्
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत्
श्रीकृष्णार्पणमस्तु ॥ ॥

09)

3

PATEL'S

Exercise Book


PATEL'S
DAILY MEMORANDA
DESK CALENDAR
FOR
1940
PATEL'S
DAILY MEMORANDA
DESK CALENDAR
FOR
1
1
Patel's
1
2
3
4
5
6
7
Monday
JANUARY
1

Subject ~~Class~~ तडागोत्सर्ग विधे Class........... Sec....

Name...Roll No.......

MADE BY

The Bombay Fine Art Printing Works.

DIARIES, MEMORANDA DESK CALENDARS, EXERCISES
AND NOVELTY MANUFACTURERS.

56-1, CANNING STREET, CALCUTTA.

বাঙ্গলা, গুজরাতী, এবং হিন্দী ভাষার স্বরবর্ণ ও ব্যঞ্জনবর্ণ।

অ আ ই ঈ উ ঊ ঋ ৠ এ ঐ ও ঔ
અ આ ઇ ઈ ઉ ઊ ઋ ૠ એ ઐ ઓ ઔ
अ आ इ ई उ ऊ ऋ ॠ ए ऐ ओ औ

ক খ গ ঘ ঙ চ ছ জ ঝ ঞ
ક ખ ગ ઘ ઙ ચ છ જ ઝ ઞ
क ख ग घ ङ च छ ज झ ञ

ট ঠ ড ঢ ণ ত থ দ ধ ন
ટ ઠ ડ ઢ ણ ત થ દ ધ ન
ट ठ ड ढ ण त थ द ध न

প ফ ব ভ ম য র ল ব শ
પ ફ બ ભ મ ય ર લ વ શ
प फ ब भ म य र ल व श

ষ স হ ড় ঢ় য় ৎ ং ঃ ঁ
ષ સ હ ળ ઢ ય તુ ં ઃ ઁ
ष स ह ळ ढ य तु ं ः

तडागोत्सर्गविधि:

ब्राह्मणवरणम्

वरण द्रव्याय नमः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं ममभक्षुत्या ...... देव्या अनेककल्पव्यापि स्वर्गवास परार्द्ध कल्प व्यापि महत्तप: प्रभृति लोकाङ्गनाभोग पूर्वक विष्णुपद प्राप्त्यर्थं तडागोत्सर्गं महं करिष्ये तत्पूर्वाङ्गत्वेन दीप कलश गणेश पूजनं मातृका पूजनं आभ्युदयिक गोदानं ग्रहपूजनं वरुण लोकपाल ब्रह्मा विष्णु रुद्र संपूजनं तथा स्वगृह्योक्त प्रकारेण अग्निप्रज्वालन पूर्वक संपूजित देवता हवनादि कर्म करिष्ये तत्कर्म कर्तुं नानानाम गोत्रान् नानानाम शर्मणो ब्राह्मणान् एभिश्चन्दन पुष्पाक्षत धौतोत्तरीय मुद्रिका जलपात्र सत्तादिभिर्युस्मानहं वृणे ॥

वृता: स्मः ॥

पुण्याहवाचनम्

फलवस्त्रादिकं गृहीत्वा

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा .....
देवी अहं मम करिष्यमाण तडागोत्सर्गकर्मणि सर्वाभ्युदय प्राप्तये ब्राह्मण द्वारा पुण्याहं वाचयिष्ये· तदङ्गतया एभिश्चन्दन पुष्पाक्षत पूगीफल यज्ञोपवीत वस्त्रोपायनादिभि: पुण्याह वाचनार्थं युस्मानहं वृणे ॥

वृता: स्मः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा .....

देवी अहं मम तडागोत्सर्गकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ..... देवी अहं मम तडागोत्सर्गकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्तिन ऽ इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदा ॥ स्वस्तिनस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ..... देवी अहं मम तडागोत्सर्गकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋद्ध्यताम् ३ ॐ सत्रस्य ऋद्धिरस्य गन्मज्योति रमृता अभूम ॥ दिवं पृथिव्या अद्ध्यारुहामा विदाम देवान्स्वर्ज्योतिः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ..... देवी अहं मम तडागोत्सर्गकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृद्ध्यताम् ३ ॐ ज्यैष्ठ्यञ्चमे ऽ आधिपत्यञ्चमे मन्युश्चमे भामश्चमे मश्चमे ऽम्भश्चमे जेमाचमे महिमाचमे वरिमाचमे प्रथिमाचमे वर्षिमाचमे द्राघिमाचमे वृद्धञ्चमे वृद्धिश्चमे यज्ञेन कल्पन्ताम् ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ······ देवी अहं मम तडागोत्सर्गकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः कल्याणम् भवन्तो ब्रुवन्तु ३ ॐ कल्याणम् ३ ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्याँ शूद्राय चार्याय च स्वाय चारणाय च ॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यताम् ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ······ देवी अहं मम तडागोत्सर्गकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः श्रीरस्तु भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥ पशूनाँ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ······ देवी अहं मम तडागोत्सर्गकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॐ द्यौ शान्ति रन्तरिक्षँ शान्तिः पृथिवी शान्ति रापः शान्ति रोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे देवाः शान्ति र्ब्रह्मशान्तिः सर्वँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥

विश्वानि देव सवितर्दुरितानि परा सुव ।
यद्भद्रं तन्न ऽ आसुव ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥

पुण्याहवाचन समृद्धिरस्तु ॥

प्रायश्चित्त गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूतरजत द्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम करिष्यमाण तडागोत्सर्ग कर्मणि पूर्वकर्तव्य नियमानाचरणजन्य प्रत्यवाय परिहार पूर्वक तत्करिष्यमाण कर्माधिकारसिद्धये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ...... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्य कृतैतत् गोनिष्क्रयीभूत रजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ॥

ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शो

को दुःखं दारिद्र्यं तत्प्रतिहतमस्तु ।द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु ॐ अमृताभिषेकोस्तु ॥

दीप प्रार्थना

नमोस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादाक्षि शिरोरुबाहवे ।
सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटी युगधारिणे नमः ॥
दीपनारायणाय नमः ।

वरुण प्रार्थना

वरुण त्वं महाभाग सर्वदेव प्रपूजित ।
वितते मम यज्ञेऽस्मिन्न विघ्नं कुरु सर्वदा ॥
वरुणाय नमः ।

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
गणाधिपतये नमः ।

ग्रह प्रार्थना

व्रह्मामुरारि स्त्रिपुरान्तकारी भानुः शशी भूमिसुतो वुधश्च ।
गुरुश्च शुक्रः शनि राहु केतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥
नवग्रहेभ्यो नमः ।

मातृका प्रार्थना

व्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी लीलया ।
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥

वाराही घनघोर घर्घरमुखी चैन्द्री च वज्रायुधा ।
चामुण्डा गणनाथ रुद्रसहिता रक्षन्तु नो मातरः ॥
मातृभ्यो नमः ।

वरुण प्रार्थना

विद्याधरेन्द्रा मणीयमानः पाहि त्वस्मान् भगवन्नमस्ते ।
एह्येहि यादोगण वारिधीनां गणेन पर्जन्य महाप्सरोभिः ॥
वरुणाय नमः ।

लोकपाल प्रार्थना

आखण्डलोऽग्निर्भगवान् यमो वै निरृतिस्तथा ।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥
ब्रह्मणा सहितः शेषो दिक्पालास्त्वां नमोस्तु ते ॥
लोकपालाय नमः ।

ब्रह्मा प्रार्थना

पद्मयोनिश्चतुर्मूर्ति वेदावासः पितामहः ।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यन्नमो नमः ॥
ब्रह्मणे नमः ।

विष्णु प्रार्थना

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।

लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यान गम्यम्
वन्दे विष्णुं ~~भवभय~~हरं सर्वलोकैक नाथम् ॥
विष्णवे नमः ।

रुद्र प्रार्थना

सर्वाधिपो महादेव ईशानः शुक्र ईश्वरः ।
शूलपाणि विरूपाक्ष तस्मै नित्यन्नमो नमः ॥
रुद्राय नमः ।

* अग्नि प्रार्थना

अग्निं प्रज्वलितं वन्दे जातवेद हुताशनम् ।
सुवर्ण वर्ण ममलं समिद्धं विश्वतो मुखम् ॥
अग्नये नमः ।

* पूर्णपात्र दानम् ।

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा . . . . देवी अहं मम मद् पुत्र्या अक्षय्य स्वर्गवास कामनया कृतस्य तडागोत्सर्ग कर्माङ्ग भूत हवन कर्मणः अपूर्ण पूर्णार्थं पूर्णपात्रं प्रजापति देवताकं . . . . . . गोत्राय शर्मणे ब्राह्मणाय सम्प्रददे ॥

प्रणीता विमोकः

मेधा

सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधा मयासिषं स्वाहा ॥
याम्मेधा न्देवगणाः पितरश्चोपासते ।
तया माम द्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।

मेधा मिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रिय मश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

वन्ह होमः

एधोस्ये धिषीमहि समिदसि तेजोसि तेजोमयि धेहि ।
समावर्तति पृथिवी समुषा: समुसूर्य: समुविश्वमिदं जगत् ।
वैश्वानर ज्योति र्भूयासं विभून्कामा न्व्यश्नवै भूः स्वाहा ॥

व्रत होमः

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमि न्धे त्वा दीक्षितो अहम् स्वाहा ॥

* इरावती धेनुमती हि भूत छं सूयवसिनी मनवे दशस्या ।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः ॥

स्वर्णशृंगादि अलंकृतां गां सम्पूज्य यजमानः सकुटुम्बः पुच्छेन्वारब्धः ॥

ॐ इरावती वसिष्ठ गौ त्रिष्टुप्छन्दः सर्वभूतप्राणीनां कीटपतङ्गादीनां मत्स्यकूर्म मण्डूकादि सर्वजीवकादीनां रक्षमाणादीनां वसिष्ठ ऋषिना पालितानां धेनूनां प्रदक्षिणीनां वापीकूप तडागादीनां यावच्चन्द्रसूर्यादीनां तावत्कालपर्यन्तो जलस्थीरणं सकुटुम्बेन धेनुपुच्छ सहित प्रदक्षिणीनां अनेककल्प पर्य्यन्तो स्वर्गवास कामेन मया तडागादि खनित रचितानां गन्धपुष्पाक्षत धूपदीपनैवेद्यादि वस्त्र दूर्वालाजादीनां कलशजलेन त्रिः प्रदक्षिणे विनियोगः ॥

* इत्यनेन त्रिः तडागोपरि भ्रामयेत् ।

इदं शलिलं पवित्रं कुरुष्व॰ शुद्धा पूता ऽ अमृताः सन्तु॰ नित्यमनायनो कुरु॰ तीर्थाभिषेकं लोकालोकान्तरे तीर्थतेच ।

एताननुमन्त्र्य

ॐ समुद्रादूर्मिर्मधुमाँ२॥ ऽ उदारुपा ६ं शुना सममृतत्वमानट् ॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवाना ममृतस्य नाभिः ॥ ये वामी रोचने दिवो ये वा सूर्य्यस्य रश्मिषु ॥ ये वामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥

इति मन्त्रौ पठित्वा॰ ईशान्यां गोपुच्छेन तडागोदकेन तर्पणम् ।
देवर्षिभ्यो नमः ॥ सप्तमनुष्येभ्यो नमः ॥ यमादिभ्यो नमः ॥
पितृभ्यो नमः ॥ स्वपितृभ्यो नमः ॥ सर्वभूतेभ्यो नमः ॥

आब्रह्मस्तंव पर्यन्तं देवर्षि पितृ मानवाः ।
तृप्यन्तु पितरः सर्वे मातृमाता महादय ॥
इति तर्पणं कृत्वा ।
* ॐ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।
सूपवसाद्भगवती हि भूया अपो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिबशुद्ध मुदक माचरन्तौ ॥
इति इशान्यां ऽस्थाप्य
हिं कृ एवती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाऽभ्यागात् ।
दुहामश्विभ्यां पयो ऽअघ्न्येयं सावर्द्धतां महते सौभगाय ॥
इति अनुमन्त्र्य । दधि दूर्वा गन्धैः सम्पूज्य ।
वसूनां दुहिता ऽसि त्वं संसारार्णव तारिणी ।
तीर्थे पुण्योदके स्नाता पावयस्व जलाशयम् ॥
अर्चिता ऽसि सुगन्धेन चन्दनेन मयार्चिते ।
सत्कीर्ति सद्गतिं कर्तुं पावयस्व जलाशयम् ॥
सर्वदेवमयी यस्मात्पूजनीया ऽसि रोहिणी ।
सर्वकामदुघे धेनो सर्वपातक नाशिनी ॥
सर्वाङ्गैः सर्वभावेन पावयस्व जलाशयम् ।
त्वया कृतं पवित्रं तु त्रैलोक्यं सचराचरम् ॥
अतोऽस्माक मिमं धेनो पावयस्व जलाशयम् ॥

* विश्व ऽहि रिप्रं प्रवहन्ति देवी रुदिदाभ्यः शुचिरापूत ऽएमि ।

गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एवच ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गवे नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम तडागोत्सर्गकर्मणि मद्पुण्या अनेककल्पव्यापि स्वर्गवास परार्द्धद्वय कालव्यापि महत्स्वाय ब्रह्मादिलोकाङ्गना भोग पूर्वक विष्णुपदप्राप्तये इमां सालङ्कारां गां रुद्रदेवताकां ...... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे तत्सन्न मम ॥

प्रार्थना

कपिले सर्व देवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्य कृतैतत् सालङ्कृत गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... शर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम ॥

त्रिवृता सूत्रेण वाससा च ~~कूपम्~~ तडागं वेष्टयित्वा । विचित्र पताका एक युतं कृत्वा जल कुम्भ मादाय-

मित्रं शत्रुभिभूतानां धनदो धनकांक्षिणाम् ।
वैद्य रोगाभिभूतानां शरण्यः शरणार्थिनाम् ॥

इति पुन भौमैन्द्रियम् ।

इति आगाध जले स्पृष्टीकृत्वा । तद्वस्तूनि जलेक्षिप्त्वा कुम्भ मादध्यात् ।

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेतीत्रिप्रवरां .... देवी अहं मम मद् पुत्र्या अक्षय्य स्वर्गवास कामनया कृतम् इदं तडागं वरुण दैवतं स्नानपानावगाहनार्थं सर्वभूतेभ्योहमुत्सृजे नमम ॥

प्रार्थना

ॐ सर्वभूतेभ्य उत्सृष्ट मयैतज्जल मर्जितम् ।
रमन्तु सर्वभूतानि स्नानपानावगाहनैः ॥
सामान्यं सर्व भूतेभ्यो मया दत्तमिदं जलम् ।
रमन्तु सर्वभूतानि स्नानपानावगाहनैः ॥
सोपानात्पतितः खाताज्जले चैव निमज्जनात् ।
मरणे वास्थिभङ्गे वा कर्ता दोषैर्न लिप्यते ॥
कुरुक्षेत्रे गया गंगा यमुनायै सु भारती ।

कावेरी नर्मदाश्चैव तीर्थान्यावाह्यभाजले ॥
इति तीर्थान्यावाह्य जलमातृभ्यो नमः इति सम्पूज्य
आपो हि ष्ठा मयो भुवस्ता न ऽऊर्जे दधातन ॥
महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः ॥
अस्मा ऽअरङ्ग मामवो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥
इति कुम्भेन जलाशयं त्रिः प्रदक्षिणीकृत्य शेषं कुम्भं विप्रैश्च पाययेत् ॥

घृतच्छाया

सुवर्णघृतकांस्यपात्राय नमः ॥
ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।
घृतेन द्यावा पृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥
अलक्ष्मी यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् ।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥
अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ......

देवी अहं मम तडागोत्सर्ग कर्मणि दीर्घायुरारोग्यैश्वर्यो दयावाप्तये इदं अवलोकिताज्यं मृत्युञ्जय देवताकं काश्यपपात्रं विश्वकर्म देवताकं सुवर्णं वह्निदैवतं · · · · · · शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ॥

प्रार्थना

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातु राज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा

अद्य कृतैतत् आज्य काश्यपपात्र सुवर्ण दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं · · · · · · शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ॥

यज्ञान्तगोदानम्

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रय रजत द्रव्याय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा · · · · · देवी अहं मम मद् पुत्र्या · · · · दत्वा अक्षय्य स्वर्गवास कामनया कृतस्य तडागोत्सर्ग कर्मणि दीप कलश गणेश ग्रह मातृका वरुण लोकपाल ब्रह्मा विष्णु रुद्र संपूजन हवनादि कर्मणः साङ्ग फलप्राप्तये न्यूनातिरिक्त परिपूर्णार्थं इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं · · · · · शर्मणे ब्राह्मणाय

तुभ्यं सम्प्रददे ॥

प्रार्थना

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा

अद्य कृतैतत् गोनिष्क्रयीभूत रजतदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ॥

ब्राह्मणभोजन भूयसी

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

देयद्रव्याय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम मद् पुत्र्या ...... देव्या अक्षय्य स्वर्गवास कामनया कृतस्य तडागोत्सर्गकर्मणि दीपकलश गणेश ग्रह मातृका वरुण लोकपाल ब्रह्मा विष्णु रुद्र संपूजन हवनादि कर्मणो न्यूनातिरिक्त परिपूर्णार्थं तथा क्रियमाण ब्राह्मण भोजन कर्मणः प्रतिष्ठार्थं च इदं रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे ॥

तत उत्तराङ्ग पूजा

अभिषेक:

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरित क्षय कारकाः ॥
द्यौः शान्ति रन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्ति रोषध
यः शान्ति । वनस्पतयः शान्ति र्विश्वेदेवाः शान्ति र्ब्रह्मशान्तिः
सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जी
वेम शरदः शतꣳ शृणुयाम शरदः शतं ~~भूयश्च शरदः~~ प्रब्रवा
म शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥
स्वस्तिन ऽ इन्द्रो वृद्धश्रवा स्वस्तिनः पूषा विश्ववेदाः ।
स्वस्तिन स्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्तिनो बृहस्पति र्दधातु ॥
विश्वानि देवसवितर्दुरितानि परासुव ।
यद्भद्रं तन्न आसुव ॥
शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु ।
यत्पापं रोगः शोको दुःखं दौर्घ्यं तत्प्रतिहतमस्तु ॥
द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु अमृताभिषेकोस्तु ॥

आशीर्वाद मन्त्राः

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर
इष व्योति व्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढा नड्वा

नाशु: सप्ति: पुरन्धिर्योषा जिष्णू रथेष्ठा: सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामेन: पर्जन्यो वर्षतु फलवत्यो न ओषधय: पच्यन्तां योगक्षेमो न: कल्पताम् ॥

दीर्घायुस्त ऽ ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥
पुनस्त्वादित्या रुद्रा वसव: समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञै: ।
घृतेन त्वं तन्वं वर्धयस्व सत्या: सन्तु यजमानस्य कामा: ॥
मनस: काममाकूतिं वाच: सत्यमशीय ।
पशूना ँ रूपमन्नस्य रसो यश: श्री: श्रयताम् ॥

रक्षाबन्धन मन्त्र:

येन बद्धो बली राजा दानवेन्द्रो महाबल: ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

तिलक मन्त्र:

त्र्यायुषञ्जमदग्ने: ललाटे ॥ कश्यपस्य त्र्यायुषम् ग्रीवायाम् ॥
यद्देवेषु त्र्यायुषम् दक्षबाहुमूले ॥ तन्नो अस्तु त्र्यायुषम् हृदि ॥

प्रसाद मन्त्रौ

श्रीवर्चस्व मायुष्य मारोग्य माविधात्पवमानं महीयते ।
धान्यं धनं पशुन्बहुपुत्र लाभं शत सम्वत्सरं दीर्घमायु: ॥
अव्याधिना शरीरेण मनसा च निराधिना ।

पूर्णमन्त्रार्चिना प्राणास्त्वं जीव शरदां शतम् ॥

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः २
कायेनवाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥
श्रीकृष्णार्पणमस्तु ॥

যুক্তাক্ষর।

ঙ্ক	ঙ্খ	ঙ্গ	ঙ্ঘ	ঙ্ক্ষ	ঙ্ম	ঙ্মু	ঙ্কু	ঙ্কূ	ঞ্চ	ঞ্ছ	ঞ্জ
ঙ্‌ক	ঙ্‌খ	ঙ্‌গ	ঙ্‌ঘ	ঙ্‌ক্ষ	ঙ্‌ম	ঙ্‌মু	ঙ্‌কু	ঙ্‌কূ	ঞ্‌চ	ঞ্‌ছ	ঞ্‌জ
ङ्क	ङ्ख	ङ्ग	ङ्घ	ङ्क्ष	ङ्म	ङ्मु	ङ्कु	ङ्कू	ञ्च	ञ्छ	ञ्ज

ঞ্ঝ	জ্ঞ	ণ্ট	ণ্ঠ	ণ্ড	ণ্ঢ	ন্ত	ন্থ	ন্দ	ন্ধ	ম্প	ম্ফ
ঞ্‌ঝ	জ্‌ঞ	ণ্‌ট	ণ্‌ঠ	ণ্‌ড	ণ্‌ঢ	ন্‌ত	ন্‌থ	ন্‌দ	ন্‌ধ	ম্‌প	ম্‌ফ
ञ्झ	ज्ञ	ण्ट	ण्ठ	ण्ड	ण्ढ	न्त	न्थ	न्द	न्ध	म्प	म्फ

ম্ব	ম্ল	ম্ম	স্ক	স্খ	গ্দ দ্গ দ্ঘ	শ্চ	শ্ছ	ব্জ	ব্ঝ	ষ্ট
ম্‌ব	ম্‌ল	ম্‌ম	স্‌ক	স্‌খ	গ্‌দ দ্‌গ দ্‌ঘ	শ্‌চ	শ্‌ছ	ব্‌জ	ব্‌ঝ	ষ্‌ট
म्ब	म्ल	म्म	स्क	स्ख	ग्द द्‌ग द्घ	श्च	श्छ	ब्ज	ब्झ	ष्ट

ষ্ঠ	ষ্ড	ষ্ঢ	স্ত	স্থ	ব্দ	ব্ধ	স্প	স্ফ	দ্ব	দ্ধ	ষ্ক
ষ্‌ঠ	ষ্‌ড	ষ্‌ঢ	স্‌ত	স্‌থ	ব্‌দ	ব্‌ধ	স্‌প	স্‌ফ	দ্‌ব	দ্‌ধ	ষ্‌ক
ष्ठ	ष्ड	ष्ढ	स्त	स्थ	ब्द	ब्ध	स्प	स्फ	द्व	द्ध	ष्क

ষ্প	ষ্ফ	ত্ন	হ্ন	হ্ম	প্ত	ক্ত	ত্ত	টি	টী	ট্টি	ষ্টি
ষ্‌প	ষ্‌ফ	ত্‌ন	হ্‌ন	হ্‌ম	প্‌ত	ক্‌ত	ত্‌ত	টি	টী	ট্‌টি	ষ্‌টি
ष्प	ष्फ	त्न	ह्न	ह्म	प्त	क्त	त्त	टि	टी	ट्टि	ष्टि

ষ্ট্রী	গু	রু	রূ	শু	সু	হু	ন্তু	ন্দু	ন্ধু	ণ্ডু	ম্বু
ষ্‌ট্রী	গু	রু	রূ	শু	সু	হু	ন্‌তু	ন্‌দু	ন্‌ধু	ণ্‌ডু	ম্‌বু
ष्ट्री	गु	रु	रू	शु	सु	हु	न्तु	न्दु	न्धु	ण्डु	म्बु

স্থু	ম্পূ	কৃ	গৃ	সৃ	হৃ	ক্র	গ্র	দ্র	ন্দ্র	প্র	ষ্ক্র
স্‌থু	ম্‌পূ	কৃ	গৃ	সৃ	হৃ	ক্র	গ্র	দ্র	ন্‌দ্র	প্র	ষ্‌ক্র
स्थु	म्पू	कृ	गृ	सृ	हृ	क्र	ग्र	द्र	न्द्र	प्र	ष्क्र

শ্র	হ্র	ক্ব	গ্ব	ল্ব	ত্ব	ষ্ব	শ্ব	স্ব	হ্য	দ্ধ্ব	ন্ব
শ্র	হ্র	ক্‌ব	গ্‌ব	ল্‌ব	ত্‌ব	ষ্‌ব	শ্‌ব	স্‌ব	হ্য	দ্ধ্‌ব	ন্‌ব
श्र	ह्र	क्व	ग्व	ल्व	त्व	ष्व	श्व	स्व	ह्य	द्ध्‌व	न्व

सौभाग्यालङ्करण परिधानम् -

ॐ अलङ्करणमिति मंत्रस्य भरद्वाज ऋषि उष्णि
क्छन्द अलङ्करणो देवता अलङ्करण परिधाने वि
नियोगः ॐ अलङ्करणमसि भूयो लङ्करणं
भूयात् ॥ ॥ माङ्गल्यतन्तुनानेन मम जीवनहे
तुना ॥ कण्ठे बध्नामि सुभगे त्वंजीव शरदां श
तम् ॥ ॥

वस्त्रपरिधानम् -

ॐ जराङ्गच्छ परिधत्स्व वासो भवाकृष्टीना मभि
शस्ति पावा. ॥ शतं च जीव शरदः सुवर्चा र
यिं च पुत्रा ननु संव्ययस्वा युष्मतीदं परिधत्स्व
वासः ॥ ॥

उत्तरीय परिधानम्

ॐ अकृन्त न्नवयं या अतन्वत. याश्च देवी स्तन्
नभितो ततन्थ. ॥ तास्त्वा देवी जरसे संव्ययस्वा
युष्मतीदं परिधत्स्व वासः ॥ ॥

वर कर्तृक गोदानम्-

ॐ नमो गोभ्यः श्रीमतीभ्य सौरभेयीभ्य एवच ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

ॐ सालङ्कृत गवे नमः   इति संपूज्य·

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीरविक्रम वर्मा अहं मम· कन्यादानकर्मणि गोप्रतिग्रह स्वीकारजन्य सकलप्रत्यवाय परिहारपूर्वक सालंकार गोदानजनित यथोक्तफलावाप्तये इमां सालंकारां गां रुद्रदेवताकां ······ गोत्राय ······ शर्मणे ब्राह्मणाय तुभ्यं संप्रददे,

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयीयस्मा तस्माच्छान्तिं प्रयच्छ मे

दानप्रतिष्ठा-

अद्यकृतैतत्· सालङ्कार गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ····· गोत्राय ··· ········ शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

अभिषेकः · ॥

अथ वरकर्तृक चतुर्थी-

ब्राह्मणवरणम्.

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः देवेन्द्रवीरविक्रमवर्मा अहं मम. विवाहकर्मणो यथोक्तफलावाप्तये विवाहाङ्गभूत चतुर्थीनिमित्तक हवनकर्म ब्राह्मणद्वाराकरिष्ये. तदङ्गतया तत्कर्मणि एभि श्चन्दन पुष्पाक्षतादिभि र्युष्मा नहं वृणे. ॐ वृताः स्मः ॥ ॥.

जलपूर्णताम्रकलशं उत्तरतः संस्थाप्य.

घृतहोमः ४

प्रजापतय इति प्रजापति ऋषि त्रिष्टुप्छन्दः प्रजापतिर्देवता चतुर्थीहोमे विनियोगः. ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम इति मनसा १

इन्द्रायेति प्रजापति ऋषि त्रिष्टुप्छन्द इन्द्रो देवता चतुर्थीहोमे विनियोगः ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम. इत्याघारौ. प्रोक्षणीपात्रेप्रक्षेपः २

ॐ अग्नय इति प्रजापतिऋषि स्त्रिष्टुप्छन्द अग्नि
देवता चतुर्थीहोमे विनियोगः ॐ अग्नये स्वाहा
इदं अग्नये नमम. ॥ ३ ॥

ॐ सोमायेति प्रजापति ऋषि स्त्रिष्टुप्छन्दः सो
मो देवता चतुर्थीहोमे विनियोगः ॐ सोमाय
स्वाहा इदं सोमाय. न मम. ४ इत्याज्यभागौ.
इति प्रोक्षीपात्रे प्रक्षेपः ४

अथ पृथूदकपात्रे प्रक्षेपः

अथ स्थालीपाक, लाहुकादि, विशेषहोमः -५
ॐ प्रायश्चित्त इत्यादीनां पञ्चाहुतिक प्रायश्चि
त्त मन्त्राणां प्रजापति ऋषि रग्नि वायु सूर्य चन्द्र
गन्धर्वा देवता अनुष्टुप्छन्द चतुर्थीहोमे विनियो
गः ॥

अग्नये प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्रा
ह्मणस्त्वा नाथकामः उपधावामि यास्ये पतिघ्नी
तनू स्तामस्ये नाशय स्वाहा. इदं अग्नये नमम.

ॐ वायोः प्रायश्चित्ते त्वन्देवानां प्रायश्चित्ति रसि ब्रा
ह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी
तनूस्तामस्यै नाशय स्वाहा· इदं वायवे: न मम·

२

ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्रा
ह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी
तनूस्तामस्यै नाशय स्वाहा· इदं सूर्याय न मम·

३

ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि
ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृह
घ्नी तनूस्तामस्यै नाशय स्वाहा· इदं चन्द्रमसे न मम·

४

ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि
ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशो
घ्नी तनूस्तामस्यै नाशय स्वाहा· इदं गन्धर्वाय न
मम·

५

ततस्थालीपाकेन प्रजापतय इति एकाहुतिः
ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम·

६

आसां षडाहुतीनां पृथूदकपात्रे प्रक्षेपः ॥

तत्पात्रस्थ संस्रवप्राशनम् ॥

उत्तराङ्गहोमं समाप्य ॥

पूर्णपात्रदानम् -

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीनरगन्त्राःदेवेन्द्रुवीरविक्रम वर्मा सवधूकः अहं मम विवाहाङ्गभूत चतुर्थीहवनकर्मणि अपूर्णे पूर्णार्थं पूर्णपात्रं प्रजापतिदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे,

ततः पृथूदकपात्रस्थजलं आम्रपल्लवेन वरः वधूं अभिषिञ्चति -

ॐ याते पतिघ्नीति मन्त्रस्य प्रजापति ऋषिस्त्रिष्टुप्छन्दः पत्युर्देवता अभिषेचने विनियोगः

ॐ याते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी य
शोघ्नी निन्दिता तनू जारघ्नी तत एनां करो
मि सा जीर्यत्वं मया सह . श्री .... देवि.
इति मन्त्रेण अभिषेकः ॥

वरः हुतशेषं स्थालीपाकं प्राशयति -
ॐ प्राणैस्ते इति मन्त्रस्य प्रजापति ऋषि र्यजुर्व
धूर्देवता चरुशेषप्राशने विनियोगः -
ॐ प्राणैस्ते प्राणान्संदधामि. अस्थिभिस्ते अ
स्थीनि संदधामि. मांसैस्ते मांसान्संदधामि.
त्वचा ते त्वचं संदधामि,
इति मन्त्रान्ते सकृत्प्राशनम् ॥

वरो वधूहृदयं स्पृष्ट्वा पठति -
ॐ यत्ते सुसीमे हृदय मिति प्रजापति ऋषि र्जगती
छन्दो हृदयं देवता हृदयस्पर्शने विनियोगः -
ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् . वेद
हं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः
शतं शृणुयाम शरदः शतम् ॥

प्रणीता विमोकः –

ॐ सुमित्रिया न आप ओषधयः सन्तु · इति प्रणीता जलेन शिरोभिषिच्य

ॐ दुर्मित्रिया स्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः ॥ इति प्रणीतापात्रं ऐशान्यां न्युब्जीकुर्यात् ॥

बर्हिहोमः –

ॐ देवा गातु विदो गातुं वित्वा गातु मित ।
मनस्पत इमन्देवयज्ञ ꣳ स्वाहा वातेधाः ॥

मेधा –

सदसस्पति मद्भुतं प्रिय मिन्द्रस्य काम्यम् ॥ सनि स्मेधा मयासिष ꣳ स्वाहा ॥ ॥

यां मेधान्देवगणाः पितरश्चोपासते ॥ तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ ॥

मेधांमे वरुणो ददातु मेधा मग्निः प्रजापतिः ॥ मेधा मिन्द्रश्च वायुश्च मेधा-धाता ददातु मे स्वाहा ॥॥

इदं मे ब्रह्म च क्षत्रं चोभे श्रिय मश्नुताम् ॥ मयि देवा दधतु श्रिय मुत्तमां तस्यै ते स्वाहा ॥ ॥

वस्त्रहोमः -

ॐ एधोस्येधिषीमहि समिदसि तेजोसितेजो मयि
धेहि ॥ समाववर्ति पृथिवीसमुखाः समु सूर्यः समु
विश्वमिदं जगत् ॥ वैश्वानरज्योति भूयासं विभून्
कामा-व्यश्नावै: भूः स्वाहा ॥

चरुहोमः

ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि ॥
व्रतंच श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा ॥

घृतछाया -

ॐ काण्डात्काण्डात्प्ररोहन्ति परुषः परुषस्परि ॥
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया
नैवेद्यं समर्पयामि प्रद्युम्नाय नमः ।
जलं समर्पयामि प्रद्युम्नाय नमः ।
करोद्वर्तनं समर्पयामि प्रद्युम्नाय नमः ।
ताम्बूलं समर्पयामि प्रद्युम्नाय नमः ।
उपायनद्रव्यं समर्पयामि प्रद्युम्नाय नमः ।
नीराजनं समर्पयामि प्रद्युम्नाय नमः ।

ततः उत्तर कलशे अनिरुद्ध पूजा.

ॐ भूर्भुवः स्वः अनिरुद्ध इहा गच्छ, इह तिष्ठ यावत् पूजां करोमि तावत्वं सुस्थिरो भव.

आसनं समर्पयामि अनिरुद्धाय नमः ।
पाद्यं समर्पयामि अनिरुद्धाय नमः ।
अर्घ्यं समर्पयामि अनिरुद्धाय नमः ।
आचमनीयं समर्पयामि अनिरुद्धाय नमः ।
गङ्गाजलं समर्पयामि अनिरुद्धाय नमः ।
मधुपर्कं समर्पयामि अनिरुद्धाय नमः ।
8। शुद्धोदक स्नानं समर्पयामि अनिरुद्धाय नमः ।
पञ्चामृतस्नानं समर्पयामि अनिरुद्धाय नमः ।
9 पुनः शुद्धोदक स्नानं समर्पयामि अनिरुद्धाय नमः ।
सुगन्धि द्रव्यं समर्पयामि अनिरुद्धाय नमः ।
वस्त्रं समर्पयामि अनिरुद्धाय नमः ।
यज्ञोपवीतं समर्पयामि अनिरुद्धाय नमः ।
पुनराचमनीयं समर्पयामि अनिरुद्धाय नमः ।
चन्दनं समर्पयामि अनिरुद्धाय नमः ।
अक्षतान् समर्पयामि अनिरुद्धाय नमः ।
तिलयवान् समर्पयामि अनिरुद्धाय नमः ।
सिन्दूरं समर्पयामि अनिरुद्धाय नमः
पिष्टातकं समर्पयामि अनिरुद्धाय नमः ।
पुष्पाणि समर्पयामि अनिरुद्धाय नमः ।
माल्यं समर्पयामि अनिरुद्धाय नमः ।
धूपं समर्पयामि अनिरुद्धाय नमः ।
दीपं दर्शयामि अनिरुद्धाय नमः ।
नैवेद्यं समर्पयामि अनिरुद्धाय नमः ।
जलं समर्पयामि अनिरुद्धाय नमः ।
करोद्वर्तनं समर्पयामि अनिरुद्धाय नमः ।
ताम्बूलं समर्पयामि अनिरुद्धाय नमः ।
उपायनद्रव्यं समर्पयामि अनिरुद्धाय नमः ।

नीराजनं समर्पयामि अनिरुद्धाय नमः ।

भ दे

राधिकासहितपुरुषोत्तमध्यानम्

श्रीवत्सवक्षसं शान्तं नीलोत्पलदलच्छविम्।
त्रिभङ्गललितं ध्यायेत्सराधं पुरुषोत्तमम् ॥

ध्यानं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

आवाहनम्

आगच्छ देवदेवेश श्रीकृष्ण पुरुषोत्तम
राधया सहितश्चात्र गृहाण पूजनं मम ॥

एतन्तेदेवसवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ॥
तेनयज्ञमवतेन यज्ञपतिं तेनमामव ॥
मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं
यज्ञꣳ समिमन्दधातु॥
विश्वेदेवासऽइहमादयन्तामों प्रतिष्ठ॥

राधिकासहितपुरुषोत्तमनारायण इहागच्छ इहतिष्ठ
यावत्पूजां करोमि तावत्त्वं स्थिरो भव॥
आवाहनं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

आसनम् नानारत्नसमायुक्तं कार्तस्वरविभूषितम्
आसनं देवदेवेश गृहाण पुरुषोत्तम ॥

आसनं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः

पाद्यम्

गंगादिसर्वतीर्थेभ्यो मया प्रार्थनया हृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥

पाद्यं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः ॥

अर्घ्यम्

नन्दगोपगृहे जातो गोपिकानन्दहेतवे
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥

अर्घ्यं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः ॥

आचमनीयं

मधुपर्कम् गङ्गाजलं समानीतं सुवर्णकलशे स्थितम् ॥
आचम्यतां हृषीकेश पुराणपुरुषोत्तम ॥
सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ॥
मधुपर्कमिदं देव कल्पयामि प्रसीद मे ॥

मधुपर्कं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः

शुद्धोदकम्

~~गंगाजलं समानीतं सुवर्णकलशे स्थितम् ॥~~
~~आचम्यतां हृषीकेश पुराणपुरुषोत्तम ॥~~

मधुपर्कस्नानानन्तरं जलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः ॥

पयस्नानम्

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्॥
पावनं यज्ञहेतुश्च पयःस्नानार्थमर्पितम् ॥

पयः स्नानं समर्पयामि राधिकासहित पुरुषोत्तमनारायणाय नमः

पयःस्नानानन्तरं जलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः

दधिस्नानम्

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्
दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्॥

दधिस्नानं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

दधिस्नानानन्तरं जलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः

घृतस्नानम्

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्

घृतस्नानं समर्पयामि राधिकासहित पुरुषोत्तमनारायणाय नमः॥

घृतस्नानानन्तरं जलं समर्पयामि राधिकासहितपुरुषोत्तम नारायणाय नमः॥

मधुस्नानम्

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्।

मधुस्नानं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

मधुस्नानानन्तरं जलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः

शर्करास्नानम्

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥

शर्करास्नानं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

शर्करास्नानानन्तरं जलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

मिश्रितपंचामृतस्नानम्

पंचामृतं मयानीतं पयो दधि घृतं मधु॥
शर्करा गुणासंयुक्तं स्नानार्थं प्रतिगृह्यताम्॥

पञ्चामृतं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

पञ्चामृतस्नानानन्तरं जलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

गंगाजलम्

गङ्गा कृष्णा गौतमी च कावेरी च सरस्वती
ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम्॥

गंगाजलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

सुगन्धीद्रव्यम्

गन्ध कर्पूर संयुक्तं कस्तूर्यादि सुवासितम्
अङ्गोद्वर्तनकं देव गृहाण परमेश्वर

सुगन्धीद्रव्यं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

वस्त्रम्

ॐ क्षौमादिसमायुक्तं नानागन्धितवासितम्।
इदं वस्त्रं मया दत्तं श्रीविष्णो प्रतिगृह्यताम्॥

वस्त्रं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः॥

येगो

उपवीतम्

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्॥
उपवीतं मया दत्तं गृहाण परमेश्वर
उपवीतंसमर्पयामि राधिकासहितपुरुषोत्तमनारायणायनमः

चन्दनम्

श्रीखण्डचन्दनं दिव्यं केशरादिसमन्वितम्॥
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
चन्दनंसमर्पयामिराधिकासहितपुरुषोत्तमनारायणायनमः

अक्षता:

अक्षतांश्च सुरश्रेष्ठ कुंकुमाक्तान्सुशोभनाम्।
मया निवेदितान्भक्त्या गृहाण परमेश्वर
अक्षतान्समर्पयामिराधिकासहितपुरुषोत्तमनारायणायनमः

यवतिलान्

विष्णुप्रिया धान्यराजा माङ्गल्याः सतिला यवाः।
तस्मात्तेषां प्रदानेन ममास्त्वविकलं फलम् ॥
यवतिलान्समर्पयामिराधिकासहितपुरुषोत्तमनारायणायनमः

सिन्दूरम् उद्यदादित्यसंकाशं स्त्रीणांसीमन्तभूषणम्॥
वीरालंकरणं देव सिन्दूरं प्रतिगृह्यताम्॥

सिन्दूरं समर्पयामि राधिकासहितपुरुषोत्तमनारायणायनमः

पिष्टातकं

पुष्पोद्भवं रक्तचूर्णं देवानां प्रीतिदायकम्
पिष्टातकं गृहाणेदं शरणागतवत्सल-

पिष्टातकंसमर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः

पुष्पाणि

तुरीयवनसम्भूतं नानागुणमनोहरम्॥
अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम्॥

पुष्पाणिसमर्पयामिराधिकासहितपुरुषोत्तमनारायणायनमः

माल्यम्

माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः॥
मयाहृतानि पूजार्थं गृहाण पुरुषोत्तम॥

माल्यानिसमर्पयामिराधिकासहितपुरुषोत्तमनारायणायनमः

तुलसीपत्रंसमर्पयामिराधिकासहितपुरुषोत्तमनारायणायनमः

अङ्गपूजा

नन्दात्मजायनमः। पादौपूजयामि॥ यशोदातनयायनमः
गुल्फौपूजयामि॥ केशिसूदनायनमः जानुनीपूजयामि॥
भूभारोत्तारकायनमः जघनेपूजयामि॥
अनन्तायनमः कटिंपूजयामि॥

विश्वरूपधृषे नमः। मेढ्रं पूजयामि ॥
प्रद्युम्नाय नमः। नाभिं पूजयामि ॥
अनिरुद्धाय नमः। हृदयं पूजयामि ॥
श्रीकंठाय नमः। कण्ठं पूजयामि ॥
सकलास्त्रधृषे नमः। वाहुं पूजयामि ॥
वाचस्पतये नमः। मुखं पूजयामि ॥
केशवाय नमः। नेत्रे पूजयामि ॥
सर्वात्मने नमः। शिरः पूजयामि ॥
विश्वरूपिणे नमः। सर्वाङ्गं पूजयामि ॥

धूपम्-

वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः।
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥

धूपं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः ॥

दीपम्

सुप्रकाशो महान्दीपस्त्रैलोक्यतिमिरापहम्।
सबाह्याभ्यन्तरं ज्योतिर्दीपोयं प्रतिगृह्यताम् ॥

दीपं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः।

नैवेद्यम्

सत्पात्रशुद्धं सुहविर्विविधानेकभक्षणम् ।
निवेदयामि देवेश सानुगाय गृहाण तत् ॥
नैवेद्यं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः

जलम्

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥
जलं समर्पयामि राधिकासहितपुरुषोत्तमनारायणाय नमः ॥

करोद्वर्तनम्

गन्धं कर्पूरसंयुक्तं कस्तूर्यादि सुवासितम् ।
करोद्वर्तनकं देव गृहाण परमेश्वर ॥
करोद्वर्तनं समर्पयामि राधिका सहित पुरुषोत्तमनारायणाय नमः

ताम्बूलम्

पूगीफल समायुक्तं सुधा खदिर संयुतम् ।
भक्त्या दत्तं मया देव ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं समर्पयामि राधिका सहित पुरुषोत्तम नारायणाय नमः

सद्रव्य नारिकेल फलम्

फलानीमानि देवेश स्थापितानि पुरस्तव ।
तेन मे सफलावाप्ति र्भवेज्जन्मनि जन्मनि ॥

हिरण्यगर्भगर्भस्थं हेमवीजं विभावसो ।
अनन्तपुण्यफलदमत शान्तिं प्रयच्छ मे ॥
उपायनद्रव्यं समर्पयामि राधिकासहित पुरुषोत्तमाय नमः।

नीराजनम्

पञ्चवर्ति समायुक्तं घृतेन ज्वलितं मया ।
आरार्तिक प्रदानेन तेन तुष्टः सदा भव ॥
नीराजनं समर्पयामि राधिकासहित पुरुषोत्तमाय नमः

कर्पूरदीपं कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥ कर्पूरदीपं समर्पयामि

चामरम्

शशाङ्ककरसंकाश हिमडिण्डीरपाण्डर ।
प्रोत्सारयासु दुरितं चामरामरवल्लभ ॥
चामरं समर्पयामि राधिकासहित पुरुषोत्तमनारायणाय नमः

व्यजनम्

व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखावहम् ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥
व्यजनं समर्पयामि राधिकासहित पुरुषोत्तमनारायणाय नमः।

पुजारीपीठ ३ मा

~~पुष्पाञ्जली~~

१ यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च
यज्ञानां पतये नाथ गोविन्दाय नमोनमः ॥

पुष्पाञ्जलिं समर्पयामि राधिकासहित पुरुषोत्तम नारायणाय नमः

प्रदक्षिणा -

यानिकानि च पापानि ब्रह्महत्यासमानि च ।
तानि तानि प्रणश्यन्तु प्रदक्षिणपदेपदे ॥

एषा प्रदक्षिणा समर्पयामि राधिकासहित पुरुषोत्तम नारायणाय नमः ॥

नमस्कारः ॥ ऽऽवाँ ×

१ विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च ॥
विश्वस्य पतये तुभ्यं गोविन्दाय नमोनमः

नमस्कारं समर्पयामि राधिकासहित पुरुषोत्तम नारायणाय नमः ॥

अर्घ्यदानम्

देवदेव नमस्तुभ्यं पुराण पुरुषोत्तम ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥

पेसे स्य मीत ती

उत्तराङ्ग पूजा

आसने उपविश्य · आचम्य ·

दीपपूजा

दीपनारायणाय नमः ।

कलशपूजा

कलशे आवाहित देवताभ्यो नमः ।

गणेश पूजा ·

गणाधिपतये नमः
पूर्वकलशे · ॐ वासुदेवाय नमः ।
दक्षिण कलशे ॐ हलधराय नमः ।
पश्चिम कलशे ॐ प्रद्युम्नाय नमः ।
उत्तर कलशे ॐ अनिरुद्धाय नमः ।
मध्य कलशे ॐ राधिका सहित पुरुषोत्तम नारायणाय नमः

अर्घ्यप्रदानम्

भूमौ स्खलित पादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं मम ॥
ततोर्घपात्रं पराङ्मुखं कृत्वा·

ॐ पराङ्मुखार्घपात्राय नमः ।
तत्पात्रमुत्तानं कृत्वा . ॐ अच्छिद्रमस्तु .इति
जलं दद्यात् .

विसर्जनम् .

गच्छन्तु देवताःसर्वा पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
मन्त्र पूजां न जानामि क्षमस्व परमेश्वर ॥

नैवेद्य भागं गृहीत्वा ईशानभागे स्थापयेत्
विश्वक्सेनोद्धवाक्रूर सनकाद्या महर्षयः ।
वासुदेवप्रसादोयं सर्वे गृह्णन्तु वैष्णवाः ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृत
स्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ।

पूर्णपात्रम्

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रि
प्रवरा मेषराशिः .... देवी अहं मम.
पुरुषोत्तममासे पञ्च दिवस पर्यन्तं राधिका सहित
पुरुषोत्तम व्रत, पूजन, दान, ब्राह्मण भोजनादि कर्मण
अपूर्ण पूर्णार्थं पूर्णपात्रं प्रजापतिदेवताकं ...... गो
त्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. ।
तत्सन्त मम.

दंपती पूजा.

प्रतिज्ञा संकल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रव
रा मेषराशिः .... देवी अहं मम. श्रुतिस्मृ
ति पुराणोक्त फलावाप्त्यर्थं श्रीराधिका सहित पुरुषोत्त
म नारायण प्रीतये यथा मिलितोपचारैः दंपती पूजनं
करिष्ये .

पादप्रक्षालनम्

आप द्घन ध्वान्त सहस्र भानवः
समीहितार्थार्पण कामधेनवः ॥

अपार संसार समुद्र सेतवः
पुनन्तु मां ब्राह्मणपादरेणवः ॥

आचमनं कारयित्वा, तिलकं दद्यात्.
पुष्प माला, धूपं, दीपं, नैवेद्यं.

नमो ब्रह्मण्यदेवाय गोब्राह्मण हिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥

दंपति प्रार्थना-

पूजित स्त्वं यथा शक्त्या नमस्ते स्तु वेश्वर ।
ऐहिकामुष्मिकीं देव कार्यसिद्धिं दिशस्व मे ॥

वस्त्रभूषण दानम्

अद्येह काश्यप गोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः .... देवी अहं मम. पुरुषोत्तम मासोपवर्णित सकल फलप्राप्त्यर्थं उद्यापन कर्मणि प्रदेयत्वेन विहितं परिधानीय वस्त्राभरण भोजनोपयोगीय वस्तु सौभाग्य द्रव्य कांश्यपात्र रजतादि पात्र छत्रोपान घ घि मञ्जूषादीनि तत्तद्देवताकानि (सोपस्करण शैय्यानिष्क्रयीभूतं रजतं चन्द्रदेवताकं) सोपस्करामानं प्रजापतिदेवताकं .... गोत्राय .... शर्मणे

सपत्नीकाय आचार्याय तुभ्यं संप्रददे· तत्सन्न मम·

प्रार्थना–

पुरुषोत्तम देवेश राधिका सहितो हरे ।
तव दानात्स्थिरा लक्ष्मी मे गृहे स्यात् सदा ध्रुवम्

नीरसक प्रभु

दान प्रतिष्ठा–

अद्यकृतैतद्वस्त्राभूषण भोजन मिष्टान्नादि तत्तद्वस्तु दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ······ ·····गोत्राय ·········· शर्मणे सपत्नीकाय आचार्याय तुभ्यं संप्रददे· दक्षिणा

ग
गि
प

वृद्ध दंपती पूजा

संकल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा मेषराशिः ··············· देवी अहं मम· समस्त पापोपशमनपूर्वक श्रुति स्मृति पुराणोक्त फलावाप्तये पुरुषोत्तम मासव्रताङ्गत्वेन पञ्चदिवस पर्यन्तं कृतस्य व्रतपूजन दानादिकर्मणो यथोक्त फलावाप्तये राधिका सहित पुरुषोत्तम नारायणप्रीतये तदुद्यापनकर्मणि यथामिलितोपचारैश्चतुर्द्विज दंपती पूजनं करिष्ये·

पादप्रक्षालनम्

आपद्घनध्वान्तसहस्रभानवः ।
समीहितार्थार्पणकामधेनवः ॥
अपारसंसारसमुद्रसेतवः ।
पुनन्तु मां ब्राह्मणपादरेणवः ॥

आचमनं कारयित्वा· तिलक पुष्प मालादिकं कुर्यात्·

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥

धूप दीप नैवेद्यादिकं कुर्यात्

प्रार्थना–

पूजितस्त्वं यथाशक्त्या नमस्तेस्तु वरेश्वर ।
ऐहिकामुष्मिकीं देव कार्यसिद्धिं दिशस्वमे ॥

वस्त्रभूषणदानम्

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा मेषराशिः .... देवी अहं मम· समस्त पापोपशम पूर्वकि श्रुतिस्मृति पुराणोक्त फलावाप्तये·पुरुषोत्तम मासव्रताङ्गत्वेन पञ्च दिवस पर्यन्तं कृतस्य व्रत पूजन दानादि कर्मणो यथोक्त फलाप्तये तद्व्रतोद्यापन कर्मणि प्रदेयत्वेन विहितं परिधानीय वस्त्राभरण भोजनोपयोगि

वस्तु. सौभाग्यद्रव्य कांश्य राजतादि पात्र. सोपस्करामान. छत्रोपानद् यष्टि प्रभृति वस्तूनि तत्तद्देवताकानि नानानाम गोत्रेभ्यो नानानामशर्मभ्यः सपत्नीकेभ्यो. ब्राह्मणेभ्यो यथा भागं विभज्य दातुं समुत्सृजे. तत्सन्नमम.

प्रार्थना-

पुरुषोत्तम देवेश राधिकासहितो हरे ।
तव दानात्स्थिरा लक्ष्मी मद्गृहे स्यात्सदा ध्रुवम् ।

दान प्रतिष्ठा

अद्यकृतैतत् वस्त्राभरण भोजन मिष्टान्नादि तत्तद्वस्तुदान कर्मणः प्रतिष्ठार्थमिदं रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नानानामशर्मभ्यः सपत्नीकेभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुं समुत्सृजे. तत्सन्न मम दक्षिणा.

३१ (ख)

शुभ राज्याभिषेकको

अभिषेक
र
राज्याभिषेकको
दिनको
अरु काम स्मेतको

प्रायश्चित्तगोदानम्·

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

गवे नमः

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

ब्राह्मणाय नमः

हरिः ॐ तत्सत् ३ विष्णुः ३ अद्येह श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्स्राष्टिकारिणो ब्रह्मणो द्वितीय परार्द्धे श्रीश्वेतवाराहकल्पे मनोः सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे प्रह्लादाधिपत्ये सत्यत्रेताद्वापरान्ते कलियुगस्य प्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्यावर्तान्ता हिमवत्पर्वतैकदेशे पशुपतिक्षेत्रे इष्टपुण्यभूमौ·

षष्ठी संवत्सराणां मध्ये सौम्यनाम संवत्सरे श्रीसूर्ये उत्तरायणे वसन्तऋतौ मासोत्तमे मासे वैशाखे मासे कृष्णे पक्षे बुधवासरान्वितायां सप्तम्यां पुण्यतिथौ मेषराशिस्थिते श्रीसूर्ये मकरराशिस्थिते चन्द्रमसि कर्कराशिस्थिते देवगुरौ अन्येषु ग्रहेषु यथा यथास्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषेण विशिष्टायाम्·

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मौन शर्मा: देवेन्द्रवीरविक्रम वर्मा सपत्निकः अहं मम श्रीपरमेश्वरप्रीती पूर्वक सकल शत्रुवाधा निवारण पूर्वक सकल ऐश्वर्य वृद्ध्यर्थ कामनया करिष्यमाण एतस्य निषेक कर्मणः पूर्वकर्तव्य निषकाना च एतज्जन्य प्रत्यवाय परिहार पूर्वकं सद्योदेह शुद्धि द्वारा तत्कर्माधिकार सिद्धये प्रायश्चित्त प्रत्याम्नायी भूतां सालङ्कारां गां रुद्रदेवताकां ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मात् अतः शान्तिं प्रयच्छ मे॥

अद्य कृतैतत् प्रायश्चित्त प्रत्याम्नायीभूत सालङ्कार गोदान कर्मणः प्रतिष्ठा साङ्गता सिद्धये इदं रजतं चन्द्र देवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

ॐ शान्तिरस्तु. ॐ पुष्टिरस्तु. ॐ वृद्धिरस्तु. ॐ [illegible] यत्नदस्तु. यत्पापं रोगो शोको दुःखं दारिद्र्यं तद्दूरे प्रतिहतमस्तु. ॐ यजमानाभिषेकोऽस्तु.

देवप्रार्थना.

दीपप्रार्थना.

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः॥

दीपनारायणाय नमः

वरुण प्रार्थना.

वरुणस्त्वं महाभाग सर्वदेवप्रपूजितः।
विनतो मम यज्ञेस्मिन्नाविघ्नं कुरु सर्वदा॥

वरुणाय नमः

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

गणाधिपतये नमः

मातृका प्रार्थना.

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी।

वाराही घनघोर घर्घर मुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथ रुद्रसहिता रक्षन्तु नो मातरः॥
मातृभ्यो नमः

ग्रह प्रार्थना.

ब्रह्मा मुरारि त्रिपुरान्तकारी
भानुः शशी भूमी सुतो बुधश्च।
गुरुश्च शुक्रः शनि राहु केतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु॥
नवग्रहेभ्यो नमः

वास्तु प्रार्थना.

वास्तुदेव नमस्तेस्तु भूमी शय्याभिरत प्रभो।
मद् गृहं धनधान्यादि समृद्धं कुरु सर्वदा॥
वास्तोस्पतये नमः

अग्नि प्रार्थना.

अग्निं प्रज्वलितं वन्दे जातवेद हुताशनम्।
सुवर्ण वर्ण ममलं समिद्धं विश्वतो मुखम्॥
अग्नये नमः

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगन सदृशं मेघवर्णं शुभाङ्गम्
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्
विष्णवे नमः वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्

सिंहासनमा राख्ने

ततः पुरोधा राजानं शुभलग्ने उत्तरेण क्रमेण वृष मार्जार द्वीपि सिंह व्याघ्र चर्मासने सित वस्त्रा च्छादित मध्ये उपवेशयेत्:

ॐ ध्रुवाद्यौ ध्रुवापृथिवी ध्रुवं विश्वमिदं जगत्।
ध्रुवासः पर्वता इमे ध्रुवो राजा विशामयत्॥
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।
ध्रुवंत इन्द्रश्चाग्निश्च राष्ट्रं धारयता ध्रुवम्॥
ध्रुवाच्युतः प्रमृणीहि शत्रू यतो धरान् पादयस्व।
सर्वादिशः सम्मनसः सध्रीची ध्रुवायन्ते समिति
कल्पतामिह॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

चतुर्वर्ण अभिषेक

विप्रामात्य प्राच्यां स्थित्वा चन्दनपूर्ण सुवर्ण कुम्भेन अभिषिञ्चेत्:

ॐ तेजोसि शुक्रमस्य मृतमसि धामना मासि प्रियन्देवा नाधृष्टन्देव यजनमसि:

ॐ देवस्यत्वा सवितुः प्रसवेश्विनो र्बाहुभ्यां पूष्णो हस्ता भ्याम्· अग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रसेन्द्रियाया भिषिञ्चामि:

क्षत्रियामात्य दक्षिणतः स्थित्वा दुग्धपूर्ण रजत कुम्भेन अभिषिञ्चेत्:

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्· भवा वाजस्य संगथे:

वैश्यामात्य पश्चिमतः स्थित्वा दधिपूर्णताम्र कुम्भेन अभिषिञ्चेत्·

ॐ दधिक्राव्णो· अकारिषञ्जिष्णो रश्वस्य वाजिनः सुरभिनो मुखाकरत्प्रण आयूंषितारिषत्:

शूद्रामात्य उत्तरतः स्थित्वा मधुपूर्ण ताम्र कुम्भेन अभिषिञ्चेत्·

Nepal Sanskrit University, Bai[illegible] Campus, Kathmandu

ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः पिता· मधुमान्नो वृहस्पतिर्मधुमां२ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः

॥

पुनः स एव छन्दोगामात्यो तत्रैव स्थित्वा कुशोदक पूर्ण मृण्मय कुम्भेन अभिषिञ्चेत्.

ॐ देवस्यत्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्· अग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियायाभिषिञ्चामि.

Nepal Sanskrit University, Balmiki Campus, Kathmandu

पुरोहितले अभिषेक·

ततः पुरोहितः अग्नि संरक्षणार्थं सदस्यान् नियुज्य स्थानात्पुनः हेमकुम्भं आदाय राजस्याभिषेकं मन्त्रै रभिषिञ्चेत्·

ॐ सोमस्या द्युम्नेनाभिषिञ्चामि·

ॐ अग्ने भ्राजसा सूर्यस्य वर्चसेन्द्र स्येन्द्रियेण क्षत्राणां क्षत्रपतिरेध्यति द्यून्पाहि·

(पुत्री ॐ इमं देवेन्द्रवीरविक्रम वर्माणं देवा असपत्नꣳ· सुवध्वं महते क्षत्राय महते जान राज्यायेन्द्रस्येन्द्रियाय·

(पुत्री देवेन्द्रवीर विक्रम वर्माणं पेशोल वीर विक्रम [illegible]णः पुत्रं ईश्वरीराज्यलक्ष्मी देव्याः पुत्रं अस्यै विश एव वोमी राजा सोमोस्माकं ब्राह्मणा ॐ राजा·

ॐ इमा आपः शिवतमा इमा राष्ट्रस्य भेषजी· इमा राष्ट्रस्य वद्धनी इमा राष्ट्रभृतो मता:

ॐ याभीरिन्द्रमभ्यषिञ्चत्प्रजापतिं सोमं राजानं वरुणं ताभिरिन्द्रमभिषिञ्चामि·

ॐ महान्तं त्वा महीनं सम्राजं चर्षणीनाम्· देवी व्यजीजनत् भद्रजानित्र्यजीजनत्·

ॐ भूः अभिषिञ्चामि·

ॐ भुवः अभिषिञ्चामि·

ॐ स्वः अभिषिञ्चामि·

ॐ भूर्भुवः स्वः अभिषिञ्चामि.
ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्
तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिः सर्व
ꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि.
ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं
जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः
शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्.
ॐ राजन्तमध्वराणां गोपामृतस्य दीदिविम्. वर्द्धमानꣳ
स्वेदमे.
ॐ विश्वानि देव सवितर्दुरितानि परासुव. यद्भद्रं तन्न
आसुव.
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्
अग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रियेणाभिषिञ्चामि.

पद पैरी बक्साने

ततः प्रेष्या पदं ललाटे वन्दीयात्।
मुकुन्दं हरिं वन्दीयात्।

पद लक्षण

१५ अंगुल लामो ।११ अंगुल चौडा तिनमा १६।। अंगुलको चिन्हमा

श्री ५ महाराजधिराजको { १६ कमलको फूलको आकार. श्रीवत्सको आकार. मदारको मुर्तीको आकार. शंखको आकार. गाई बैलको मुर्तीको आकार. बेल हातीको दाँतको आकार. गणेशको मुर्तीको आकार.

श्री ५ बडा महारानीको { १६ कमलको फूलको आकार.

गुरुले अभिषेक

आचार्यैर्राजानं शान्तिकृद सौवर्णकुम्भेन अभिषिञ्चेत्:

सर्वौषधीनामुदकेन

ॐ या ओषधीः पूर्वाजाता देवेभ्यः त्रियुगंपुरा: मनै नुव भ्रूणामहं शतन्धामानि सप्तच॰

गन्धोदकेन॰

ॐ येनिष्टुनायाति वाजिनः प्रेरे यत्र यत्र कामयते सुषारथिः मित्रा अभीशूनाम्महिमान म्पनायतः पश्चादनुयच्छन्ति रश्मयः तीव्रान्घोषा कृण्वते वृषपाण्यो श्वारथेभिः सह वाजन्तः अवक्रामन्तः प्रपदै रमित्रान्क्षिणन्ति शत्रूँऽरनपव्ययन्तः रथवाहनं ह॰ हविरस्यनाम यत्रा युधं निहितं मस्यवर्म॰ तत्राप्रथमुपशग्म ह॰ सदेव विश्वाहा वयं ह॰ सुमनस्यमाना:

बिजोदकेन॰

ॐ आब्रह्मन्‌ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योति व्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्यो वाजिहन्‌ रथेष्ठाः सभेयोयुवास्य यजमानस्य वीरो जायतां निकामे निकामेनः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो

नकल्पन्ताम्·

पुष्पाणामुदकेन·

ॐ पुष्पवती प्रसुमती फलिनी रफलायुत· समाना इव दुग्धा मह्मा ओषधिनातये·

फलानामुदकेन·

ॐ पुष्पवती प्रसुमती फलिनी रफलायुत· समाना इव दुग्धा मह्मा ओषधिनातये·

रत्नानामुदकेन·

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्· संक्रन्दनो निमिष एकवीर शतं· सेना अजयत्साकमिन्द्रः संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना· तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा· स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन· संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता· बृहस्पते परिदीया रथेन रक्षोहामित्राँ ऽअपबाधमानः प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्· बलविज्ञाय स्थविरः

प्रवीरः सहस्वान्वाजी सहमान ऽउग्रः अभिवीरो अभिसत्वा
सहोजाजैत्रमिन्द्र रथमातिष्ठ गोवित्. गोत्राभिदङ्गोविदं
वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा. इमꣳ सजाता ऽ
अनुवीरयध्वमिन्द्रꣳ सखायो ऽ अनुसꣳ रभध्वम्. अभि
गोत्राणि सहसा गाहमानो दयो वीरः शतमन्युरिन्द्रः दुश्च्य
वनः पृतनाषाडयुध्योस्माकꣳ सेना ऽ अवतु प्रयुत्सु. इन्द्र ऽआ
सान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु ~~[illegible]~~ सोमः देवसेना
नामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम्. इन्द्रस्य
वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध ऽउग्रम्. म
हामनसाम्भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात्.

कुशोदकेन.

ॐ ये देवा दिविषदो अन्तरिक्षसदश्च ये ये मे भूम्यामधि
तेभ्यस्त्वाधुक्ष्व सर्वदा क्षीरं सर्पिरथो मधु.

गोरोचनले शिरः कण्ठ लेपन गरि वकोने

ततो विप्राः गोरोचनया शिरः कण्ठं च लिपेत्ः
ॐ गन्धद्वाराण्दुराधर्षा नित्यपुष्टा करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

ततो विप्राः क्षत्रिया वैश्याश्च गंगा यमुना नदी
नद सरः कूप समुद्रोदक पूर्णैः कलशैः स्वस्गावेद
मन्त्रैः अभिषिञ्चेयुः
शूद्रानुलोमादयश्च तूष्णीमेवाभिषिञ्चेयुः
ततः अमात्य मुख्याश्च छत्रचामरादिर धायेयुः
वादकाः शंखभेर्यादिन् वादयेयुः
विप्राः मन्त्रपाठं कुर्युः
वन्दिन स्तोत्रं कुर्युः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

दैवज्ञले अभिषेक

ततो दैवज्ञः सुरास्त्वामित्यादि श्लोकैस्साप्त्येक हातमन्त्रैः हेमकुम्भेन अभिषिञ्चेत्।

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥१॥
प्रद्युम्नश्चानिरुद्धस्तु भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान्यमो वै नैरृतिस्तथा॥२॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितश्शेषो दिक्पालाः पान्तु ते सदा॥३॥
भद्रो धर्मो मनुर्दक्षो रुचिः श्रद्धा च पार्थिव।
भृगुरत्रिर्वसिष्ठश्च सनकश्च सनन्दनः॥४॥
सनत्कुमारश्च तथा भगवानपि चाङ्गिराः।
पुलहश्च पुलस्त्यश्च मरीचिः कश्यपः प्रभुः॥५॥
एते त्वामभिषिञ्चन्तु प्रजाध्यक्षाः समागताः।
प्रभासुरा बर्हिषदो ह्यग्निष्वात्तास्तथैव च॥६॥
क्रव्यादाश्चोपहूताश्च आज्यपाश्च सुकालिनः।
एते त्वामभिषिञ्चन्तु पितरश्चाग्निभिः सह॥७॥
लक्ष्मीर्देवी सती ख्यातिरनसूया तथा स्मृतिः।
सम्भूतिस्सन्नतिश्चैव क्षमा प्रीतिस्तथैव च॥८॥
स्वाहा स्वधा च त्वा राजन्नभिषिञ्चन्तु मातरः।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा॥९॥

वुद्धिर्लज्जा वपुःशान्तिस्तुष्टिःसिद्धिश्च पार्थिव।
एतेत्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः ॥१०॥
अरुन्धती वसुर्जामी लम्बा भानुर्मरुत्वती।
संकल्पा च मुहूर्ता च साध्या विश्वा तथैव च ॥११॥
धर्मपत्न्यस्तथान्यास्त्वामभिषिञ्चन्तु पार्थिव।
अदितिश्च दितिर्नाम्ना ह्यरिष्टा सुरसा मुनिः ॥१२॥
कद्रूः क्रोधवशा प्राधा विनता सुरभिस्तिमिः।
एतास्त्वामभिषिञ्चन्तु कश्यपस्य प्रिया स्त्रियः ॥१३॥
पत्नी ते बहुपुत्रस्य सुप्रभा या च भामिनी।
समायात्वभिषेकाय विजयाय च पार्थिव ॥१४॥
कृशाश्वपत्नी च तथा सुप्रभा च जया तथा।
अस्त्रग्रामस्तयोः पुत्रो विजयं विदधातु ते ॥१५॥
मनोरमा भानुमती विशाला या च बाहुदा।
अरिष्टनेमी पत्न्यस्त्वामभिषिञ्चन्तु पार्थिव ॥१६॥
कृत्तिका रोहिणी देवी इल्वला बाहुरेव च।
पुनर्वसुश्च तिष्यश्च तथाश्लेषा च पार्थिव ॥१७॥
मघा च फाल्गुनी पूर्वा तथैवोत्तरफाल्गुनी।
हस्ताश्चित्रा तथा स्वाति विशाखा च नराधिप ॥१८॥
अनुराधा तथा ज्येष्ठा मूलं च वसुधाधिप।
आषाढा च तथा पूर्वा तथैव नृप चोत्तरा ॥१९॥

अभिजिच्च तथा श्रवणो धनिष्ठा च वरानने।
तथा शतभिषक्चैव पूर्वभाद्रपदा तथा ॥ २०॥
उत्तरा रेवती एव नाश्विनी भरणी तथा।
एतास्त्वामभिषिञ्चन्तु सोमपत्न्यः समागताः ॥२१॥
मृगी च मृगमन्दा च श्वेता भद्रासना हरिः।
मृगा च कपिशा दंष्ट्री सुरसा सरमा तथा ॥२२॥
एता पुलहपत्न्यस्त्वामभिषिञ्चन्तु पार्थिव।
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुकी तथा ॥२३॥
पत्न्यस्त्वामभिषिञ्चन्तु अरुणस्यार्कसारथेः।
आयतिर्नियतिश्चैव रात्रिर्निद्रा तथैव च ॥२४॥
एतास्त्वामभिषिञ्चन्तु लोकसंस्थापहेतवः।
उमा मेना शची चैव धूमोर्णा निर्ऋतिस्तथा ॥२५॥
गौरी शिवा च सिद्धिश्च वेला चैवाथ नड्वला।
असिक्नी च तथा ज्योत्स्ना या च देवी वनस्पतेः ॥२६॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः।
महाकल्पश्च कल्पश्च मन्वन्तरयुगानि च ॥२७॥
संवत्सराणि सर्वाणि तथा चैवायनद्वयम्।
ऋतवश्च तथा मासाः पक्षो रात्र्यहनी तथा ॥२८॥
संध्याश्च तिथयश्चैव मुहूर्ताः करणानि च।
एते त्वामभिषिञ्चन्तु कालस्यावयवाः शुभाः ॥२९॥

आदित्यश्चन्द्रमा भौमो बुधो जीवः सितार्कजौ ।
ग्रहास्त्वामभिषिञ्चन्तु राहुकेतू च पार्थिव ॥३०॥
स्वायम्भुवो मनुः पूर्व मनुः स्वारोचिषस्तथा ।
औत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥३१॥
वैवस्वतो यथाकर्णौ दक्षो ब्रह्मसुतावुभौ ।
धर्मपुत्रो रुद्रपुत्रो रौच्यो भौत्यश्च यो मनुः ॥३२॥
एते त्वामभिषिञ्चन्तु मनवश्च चतुर्दश ।
विश्वभुक् च विपश्चिच्च सुशान्तिश्च शिखी विभुः ॥३३॥
मनोजवस्तथोजस्वी बलिरद्भुतशान्तिकौ ।
वृषश्च ऋतधामा च दिवस्पाच्छुचिरेव च ॥३४॥
एते त्वामभिषिञ्चन्तु देवनाथाश्चतुर्दश ।
रैवतश्च कुमारश्च तथा वर्चीविनायकः ॥३५॥
वीरभद्रश्च नन्दी च विश्वकर्मा मनोजवः ।
एते त्वामभिषिञ्चन्तु सुरमुख्याः समागताः ॥३६॥
आत्मा चायुर्मनो दक्षो मदः प्राणस्तथैव च ।
हविष्मांश्च गविष्ठश्च ऋतः सत्यश्च पार्थिव ॥३७॥
अभिषिञ्चन्तु एते त्वां देवा ह्याङ्गिरसा दश ।
क्रतुर्दक्षो वसुस्सत्यः कालकामो धुनिस्तथा ॥३८॥
कुरवान्मनुजश्चैव रोचमानस्तथैव च ।
एते त्वामभिषिञ्चन्तु विश्वेदेवास्तथा दश ॥३९॥

अङ्गारकस्तथा सर्पो निऋतिश्च तथा घसः।
अजैकपादहिर्बुध्न्यो धूपकेतुस्तथा ध्वजः ॥४०॥
भरतश्च तथा मृत्युः कापालिरथ किङ्किणिः।
एकादशैते रुद्रास्त्वामभिषिञ्चन्तु पार्थिव ॥४१॥
भुवनो भावनश्चैव सुजन्यः सुजनस्तथा।
क्रतु सर्वश्च मूर्धा च त्याज्यश्चैव तनस्तथा ॥४२॥
प्रसवश्चाव्ययश्चैव दक्षश्च मनुजाधिप।
एते त्वामभिषिञ्चन्तु भृगवो नाम देवताः ॥४३॥
मनो मन्ता च प्राणश्च नरो पानश्च वीर्यवान्।
विनिर्भयो नयश्चैव हंसो नारायणस्तथा ॥४४॥
विभुश्चापि प्रभुश्चापि देवश्रेष्ठा जगद्धिताः।
एते त्वामभिषिञ्चन्तु साध्या द्वादश पार्थिव ॥४५॥
धाता मित्रोर्यमा पूषा शक्रोंशो वरुणो भगः।
त्वष्टा विवस्वान्सविता विष्णुर्द्वादशमस्तथा ॥४६॥
एते त्वामभिषिञ्चन्तु कश्यपादितिसम्भवाः।
एकज्योतिश्च द्विज्योतिस्त्रिचतुर्ज्योतिरेव च ॥४७॥
एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः।
इन्द्रश्च गत्या दृश्यन्तो ततः प्रतिसकृत्तथा ॥४८॥
मितश्च सम्मितश्चैव अमितश्च महाबलः।
ऋतजित्सत्यजिच्चैव सुषेणः सत्यजित्तथा ॥४९॥

अतिमित्रो नमित्रश्च प्रमित्रः प्रणेतः ।
क्रतश्च क्रतधाता च विधाता धारणो ध्रुवः ॥५०॥
विधारणो महातेजा वासवस्य परः सखा ।
ईदृक्षश्चाप्यदृक्षश्च एतादृगमिताशनः ॥५१॥
क्रीडितः प्रसदृक्षश्च सरभश्च महायशाः ।
धातुरुग्रो ध्वनिर्भीमो ह्यभियुक्तः क्षिपः सहः ॥५२॥
द्युतिर्वपुष्मानाधृष्यो वासः कामो जयो विराट् ।
एते त्वामभिषिञ्चन्तु मारुतास्ते समागताः ॥५३॥
देवा एकोनपञ्चाशन्महाबलपराक्रमाः ।
चित्राङ्गदश्चित्ररथश्चित्रसेनश्च वीर्यवान् ॥५४॥
ऊर्णायुरनघश्चैव उग्रसेनश्च वीर्यवान् ।
धृतराष्ट्रश्च गोपश्च सूर्यवर्चास्तथैव च ॥५५॥
युगपस्तृणपः कार्ष्णिर्नन्दश्चित्रस्तथैव च ।
कलिः शालिः शिरा राजन्पर्जन्यो नारदस्तथा ॥५६॥
वृषपर्वा च हंसश्च तथा चैव हहाहूहूः ।
विश्वावसुस्तुम्बुरुश्च तथा च सुरुचिश्च यः ॥५७॥
एते त्वामभिषिञ्चन्तु गन्धर्वाः पृथिवीपते ।
आहुत्यस्ता भवन्त्यश्च वर्गवत्यस्तथैव च ॥५८॥
आयुर्वत्यस्तथोर्जाश्च तथा वै कुरवाः स्तवाः ।
वह्नायुश्चामृतायुश्च भवश्चैव रुचस्तथा ॥५९॥

मौरकः शोभयन्त्यश्च दिव्या याश्चाप्सरोगणाः।
एतास्त्वामभिषिञ्चन्तु समागत्य महीपते ॥६०॥
अनवद्या सत्यकामा चारुला वरुणप्रिया।
अनूपा सुभगा चैव सुकेशा च मनोवती ॥६१॥
मेनका सहजन्या च पर्णिका पुञ्जिकस्थला।
क्रतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि ॥६२॥
प्रम्लोचा चाप्यनुम्लोचा रम्भा चैवोर्वशी तथा।
पञ्चचूडा सानुमती चित्रलेखा च पार्थिव ॥६३॥
मिश्रकेशी मरीचिश्च विद्युत्पर्णा तिलोत्तमा।
अद्रिका लक्ष्मणा क्षेपा असिता रोचिका तथा ॥६४॥
सुहेमा चापहेमा च शाङ्गली च वसुस्तथा।
सुव्रता च सुबाहुश्च सुगन्धा सुवपुस्तथा ॥६५॥
पुण्डरिका सुदामा च सुदाना सुरसा तथा।
हेमा शारद्वती चैव सुनन्दा कमला तथा ॥६६॥
सुमुखी हंसपादी च वारुणी रतिलालसा।
एतास्त्वामभिषिञ्चन्तु राजन्नप्सरसः शुभाः ॥६७॥
प्रह्लादश्च महातेजास्तथा राजन्विरोचनः।
बलिर्बाणस्तथान्ये च दितिपुत्राः समागताः ॥६८॥
अभिषिञ्चन्तु दैत्यास्त्वां दिव्येनाप्यम्भसा स्वयम्।
विप्रचित्तिर्नमुचिः सर्वे दानवास्त्वां समागताः ॥६९॥

अभिषिञ्चन् राजेन्द्र राजराज्येन सत्वरः ।
द्युतिश्चैव प्रद्युतिश्च मालो शङ्कुस्तथैव च ॥१०॥
सुकेशी पौरुषेयश्च वज्रहा प्रह्लादकः ।
विद्युत्स्फूर्जस्तथा व्याघ्रो वघश्च रसनस्तथा ॥११॥
एतेत्वामभिषिञ्चन् समागम्याथ राक्षसाः ।
सिद्धार्थो मणिभद्रश्च सुमनो नन्दनस्तथा ॥१२॥
काण्डभिः पञ्चमश्चैव मणिमान् यमोंस्तथा ।
सर्वानुभूतः संवेश्च पिङ्गाक्षश्च तारस्तथा ॥१३॥
पद्मो मन्दरोभीच पद्मचन्द्र प्रभङ्करः ।
मेघवर्णः सुभद्रश्च प्रद्योतश्च महाबलः ॥१४॥
द्युतिमान्केतुमांश्चैव मौलिमांश्च सुदर्शनः ।
श्वेतश्च विपुलश्चैव पुष्पदन्तो जयावहः ॥१५॥
पद्मवर्णो बलाकश्च कुमुदश्च बलाहकः ।
पद्मनाभः सुगन्धश्च प्रवीरो विजयःकृतिः ॥१६॥
पूर्णमासो हिरण्याक्षः शतजिह्वश्च वीर्यवान् ।
एतेत्वामभिषिञ्चन् राजन्यक्षेन्द्र सत्तमाः ॥१७॥
शंखपद्मस्तु राजेन्द्र मकरः कच्छपस्तथा ।
एतेत्वामभिषिञ्चन् निधयस्ते समागताः ॥१८॥
फल्गाश्चैव वक्राश्च येच सूचीमुखानृप ।
दुःप्रणो विषादाश्च ज्वलनाङ्गारकास्तथा ॥१९॥

Sanskrit University, Varanasi

कुम्भपात्राः प्रचण्डाश्च तपवीरेडलम्बकाः।
अकर्णाश्च कुपण्डाश्च तथा ये पात्रपाणयः॥८०॥
पांसवश्च वितुण्डाश्च निपुणाः स्कन्दनास्तथा।
एते त्वामभिषिञ्चन्तु पिशाचानाञ्च जातयः॥८१॥
ब्रह्मचर्ये स्थिता दान्ताः सर्वज्ञाः सर्वदर्शिनः।
नानाप्रकारवन्दना नानावाद्यह्रिरेधराः॥८२॥
चतुष्पथप्रह्रालशून्यालयनिकेतनाः।
मनुष्ये भवेदेवं ये गता मनुजेश्वरः॥८३॥
ते त्वामद्याभिषिञ्चन्तु भूताः भूतपतेस्वयम्॥
महाकालं पुरस्कृत्य नरसिंहं च मातरः॥८४॥
सर्वास्त्वामभिषिञ्चन्तु राजराज्ये नराधिप।
गुहः स्कन्दो विशाखश्च नैगमेयस्तथैव च॥८५॥
अभिषिञ्चन्तु राजंस्त्वां सर्वे स्कन्दग्रहाः शुभाः।
डाकिन्यो याश्च योगिन्यः खेचरीभूचरीश्च याः॥८६॥
सर्वास्त्वामभिषिञ्चन्तु समेत्य मनुजेश्वर।
गरुडश्चारुणश्चैव आरुणिश्च महाखगः॥८७॥
संपाति विनतश्चैव विद्युगन्धः कुमारकः।
एते त्वामभिषिञ्चन्तु सुपर्णाः पृथिवीपते॥८८॥
अनन्तश्च महानागः शेषो वासुकि तक्षकौ।
सपर्णश्चैव कुम्भश्च वामनश्चाञ्जनस्तथा॥८९॥

ऐरावतो महानागः कम्बलाश्वतरावुभौ ॥
ऐलमत्रश्च शंखश्च कर्कोटकधनञ्जयौ ॥९०॥
महाकर्णो महानीलो धृतराष्ट्र बलाहकौ।
कुम्भः पुष्पदन्तश्च सुमुखो दुर्मुखस्तथा ॥९१॥
सूचीमुखो दधिमुखः कालियः शालिपिण्डकः।
विल्वपादः पाण्डुको नागश्चापूरणस्तथा ॥९२॥
कपिलश्चाम्बरीषश्च कुम्भश्चापि कश्यपः।
प्रह्लादः पुष्पदन्तश्च गन्धर्वश्च मनस्विकः ॥९३॥
नहुषः खररोमा च शंखपालस्तथैव च।
पद्मश्च कुलिकश्चैव पालिरित्येवमादयः ॥९४॥
नागास्त्वामभिषिञ्चन्तु राजराज्येन पार्थिव।
कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ॥९५॥
सुप्रतीकोऽञ्जनो नीलः पान्तु त्वां सर्वतः सदा।
चक्रं त्रिशूलं वज्रश्च नन्दको ग्रामणिश्चाप्यथ ॥९६॥
पैतामहस्तथा हंसो वृषभः शङ्करस्य च।
दुर्गासिंहश्च पान्तु त्वां यमस्य माहिषस्तथा ॥९७॥
उच्चैःश्रवाश्चाश्वपतिस्तथा धन्वन्तरिर्नृप।
कौस्तुभः शंखराजश्च पान्तु त्वां सर्वतः सदा ॥९८॥
सर्वाभिषेक दत्वानि दिशन्तु विजयं ध्रुवम्।
धर्मश्च व्यवसायश्च सत्यो दानं तपस्तथा ॥९९॥

यमो यज्ञस्तथा वायुर्ब्रह्मचर्यं दमः शमः।
एते त्वामभिषिञ्चन्तु चित्रगुप्तश्च पार्थिव ॥१००॥
दण्डश्च पिङ्गलश्चैव मृत्युकालावुभौ तथा।
~~यमो यज्ञस्तथा वायुर्ब्रह्मचर्यं दमः शमः ॥१०१॥~~
वालखिल्यास्तथा सर्वे भवन्तु विजयाय ते ॥१०१॥
दिग्धेनवश्चतास्त्वा सुरभिश्च तथा नृप।
अभिषिञ्चन्तु सर्वाभिर्गोभिः सार्धं नरेश्वर ॥१०२॥
देवव्यासश्च वाल्मीकिः कमठोऽथ पराशरः।
देवलः पर्वतश्चैव दुर्वासाश्च तथा मुनिः ॥१०३॥
याज्ञवल्क्यश्च जावालिः जमदग्निः शुचिश्रवाः।
विश्वामित्रः स्थूलशिराश्च्यवनोऽत्रिर्विदूरथः ॥१०४॥
एकतश्च द्वितश्चैव त्रितो गौतमगालवौ।
शाण्डिल्यश्च भरद्वाजो मौद्गल्यो वेदवाहनः ॥१०५॥
बृहदश्वः कुटिशठो जटाजानुर्घटोदरः।
पवक्रोनोथ रैत्यश्च आत्मवानथ जैमिनिः ॥१०६॥
ऋषिः शार्ङ्गरवश्चैव तथागस्त्यो महातपाः।
उन्मुचुर्मुमुचुश्चैव इध्मवाहुर्महोदयः ॥१०७॥
कात्यायनश्च कण्वश्च वल्वकाम्यो हृनन्दनः।
एते त्वामभिषिञ्चन्तु ऋषयः पार्थिवोत्तम ॥१०८॥
पृथुर्दिलीपो भरतो दुष्यन्तः शत्रुजिद्बली।

मनुः ककुत्स्थश्चानेना युवनाश्वो जयद्रथः ॥१०९॥
मान्धाता मुचुकुन्दश्च तथा राजा पुरूरवाः।
आयुश्च नहुषश्चैव ययातिरपराजितः ॥११०॥
इक्ष्वाकुश्च यदुश्चैव पुनर्भूरिश्रवास्तथा।
अम्बरीषश्च नाभागो वृहदश्वो महाहनुः ॥१११॥
प्रद्युम्नचाथ सुद्युम्नो भूरिद्युम्नश्च सृञ्जयः।
एते चान्येच राजानस्तव राजन्दिवङ्गताः ॥११२॥
समायान्त्वभिषेकाय विजयाय तथा श्रिये।
पर्जन्याद्यास्तथा सर्वे वासुदेवास्समासतः ॥११३॥
द्रुमाश्चौषधयो रत्नबीजानि विविधानिच।
सर्वे त्वामभिषिञ्चन्तु राजन्राज्येन सत्वरः ॥११४॥
पुरुषश्चाप्रमेयात्मा महाभूतानि यानि च।
पृथिवी वायुराकाशमापो ज्योतिस्तथैव च ॥११५॥
मनो बुद्धिस्तथैवात्मा अव्यक्तश्च महीपते।
एते त्वामभिषिञ्चन्तु समेता वसुधाधिप ॥११६॥
रुक्मभौमः शिलाभौमः पातालो नीलमृत्तिकः।
पीतो रक्तक्षितिश्चैव श्वेतभौमस्तथैव च ॥११७॥
एते त्वामभिषिञ्चन्तु विजयाय महीपते।
भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः ॥११८॥
तपः सत्यश्च राजेन्द्र विजयाय भवन्तु ते।

Kathmandu

जम्बूशाककुशक्रौञ्चाः शाल्मलिद्वीप एव च ॥११९॥
गोमेधः पुष्करश्चैव स्वसाम्यं प्रदिशन्तु ते ।
उत्तराः कुरवः पुण्या रम्या हैरण्वतास्तथा ॥१२०॥
भद्राश्वः केतुमालश्च वर्षश्चैव इलावृतः ।
हरिवर्षः किंपुरुषो वर्षो भारतसंज्ञकः ॥१२१॥
एते त्वामभिषिञ्चन्तु समेत्य वसुधाधिप ।
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ॥१२२॥
नागद्वीपस्तथा सौम्यो गान्धर्वो वारुणस्तथा ।
अयं च नवमस्तेषां स्वसाम्यं प्रदिशन्तु ते ॥१२३॥
हिमवान्हेमकूटश्च निषधो नीलपर्वतः ।
श्वेतश्च शृङ्गवान्मेरुर्माल्यवान्गन्धमादनः ॥१२४॥
महेन्द्रो मलयो सह्यः शुक्तिमानृक्षवांस्तथा ।
विन्ध्यश्च पारियात्रश्च सर्व एव महीधराः ॥१२५॥
समागम्याभिषिञ्चन्तु त्वामद्य वसुधाधिप ।
ऋग्वेदोथ यजुर्वेदः सामवेदस्तथैव च ॥१२६॥
अथर्ववेदो वेदास्त्वामभिषिञ्चन्तु पार्थिव ।
इतिहासो धनुर्वेदो गन्धर्वश्चायुसंज्ञितः ॥१२७॥
वेदोपवेदश्च तथा विजयाय भवन्तु ते ।
शिक्षाकल्पो व्याकरणं निरुक्तं ज्योतिषाङ्गतिः ॥१२८॥
छन्दो विचितिरङ्गानि विजयं प्रदिशन्तु ते ।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ॥१२९॥
धर्मशास्त्रं पुराणञ्च विद्या एताश्चतुर्दश ।
सांख्ययोगः पञ्चरात्रं वेदाः पाशुपतं तथा ॥१३०॥
कृतान्तपञ्चकं ह्येतच्छास्त्राणि विविधानि च ।
गायत्री पापशमनी दुर्गादेवी महाशिवा ॥१३१॥
गान्धारी च तथा विद्या विजयं प्रदिशन्तु ते ।
देवदानवगन्धर्वयक्षराक्षसपन्नगाः ॥१३२॥
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमाः नागाः दैत्याश्चाप्सरसाङ्गणाः ॥१३३॥
शस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवास्तथा ॥१३४॥
स्थानानि च समस्तानि पुण्यान्यायतनानि च ।
जीमूतानि च सर्वाणि नाट्टकाराश्च ये तथा ॥१३५॥
उक्तानि चाप्यनुक्तानि विजयाय भवन्तु ते ।
लवणः क्षारतोयश्च घृतमण्डोदकस्तथा ॥१३६॥
दधिमण्डोदकश्चैव सुरोदश्च नराधिप ।
तथैवेक्षुरसोदश्च तथा स्वादूदकश्च यः ॥१३७॥
गर्भोदश्च स्वतोयैस्त्वामभिषिञ्चन्तु पार्थिव ।
चत्वारः सागराश्चैव स्वेन तोयेन पार्थिव ॥१३८॥
समागम्याभिषिञ्चन्तु विजयं प्रदिशन्तु ते ।

Kathmandu

पुष्करश्च प्रयागश्च प्रभासो नैमिषस्तथा ।।१३९।।
तथा ब्रह्मसरः पुण्यं गयाशीर्षं च पार्थिव ।
कालोदको नन्दिकुण्डः तथैवोत्तरमानसः ।।१४०।।
स्वर्गमार्गप्रदश्चैव तथा पञ्चनदश्च यः ।
भृगुतीर्थं चौजसश्च तथैवामरकण्टकः ।।१४१।।
आश्रमः कालिकायाश्च तृणविन्दोस्तथाश्रमः ।
गोपतीर्थं चापतीर्थं विमलः स्वर्ग एव च ।।१४२।।
जम्बूमार्गश्च राजेन्द्र पुण्यस्तण्डुलिकाश्रमः ।
कपिलस्य तथा तीर्थं तीर्थं वाटेकषाण्डिके ।।१४३।।
महासरस्तथागस्त्यः कुमारी तीर्थ एव च ।
गङ्गातीरे कुशावर्तो विल्वको नीलपर्वतः ।।१४४।।
वराह पर्वतश्चैव तीर्थः कनखलस्तथा ।
स्वर्गन्धा वसुकुम्भा च तथा शाकम्भरी च या ।।१४५।।
भृगुतुङ्गः सकुब्जाम्रः कपिलस्य तथाश्रमः ।
चमसोद्भेदनः पुण्यस्तथा विनशनः शुभः ।।१४६।।
अजतुङ्गश्च सोमश्च अक्रोगन्धश्च पार्थिव ।
कालिञ्जरश्च केदारो रुद्रकोटिस्तथैव च ।।१४७।।
महालयनश्च राजेन्द्र बदर्याश्रम एव च ।
नन्दा च सूर्यतीर्थं च सोमतीर्थं शतक्रतो ।।१४८।।
अश्विनोर्वरुणस्यापि वायोर्वै श्रवणस्य च ।

ब्रह्मणश्चैव शर्वस्य यमस्य च्यवनस्य च ॥१४९॥
विरूपाक्षस्य धर्मस्य तथा चाप्सरसां नृप ।
ऋषीणां च वसूनां च नागो वैश्रवणस्य च ॥१५०॥
~~ब्रह्मणश्चैव शर्वस्य यमस्य च्यवनस्य च ।~~
आदित्यानां च रुद्राणां तथा चाङ्गिरसां नृप ।
विश्वेदेव भृगुणां च गन्धर्वाणां च मानद ॥१५१॥
हंस प्रस्रवणश्चैव सुषेणश्च नराधिप ।
शालिग्रामस्तथैवैव वाराहो वामनस्तथा ॥१५२॥
कामक्रमा त्रिकूटश्च चित्रकूटस्तथैव च ।
सप्तर्चैः क्रतुसारश्च तथा विष्णुपदं सरः ॥१५३॥
कपिलस्य तथा तीर्थं वासुकेस्तीर्थमेव च ।
सिन्धूत्तमं तपो दानं तथा स्वर्णाकरः शुभः ॥१५४॥
पौण्डरीकश्च राजेन्द्र गङ्गायाः सङ्गमः ।
सिन्धुसागरयोश्चैव सङ्गमः सुमनोहरः ॥१५५॥
तथा कुण्डं वासुकेश्च मानसं च महत्सरः ।
तथा विन्दुसरः पुण्यं सारस्वाच्छोदकं तथा ॥१५६॥
धर्मारण्यं फल्गुतीर्थं साविमुक्तं तथैव च ।
लौहित्यश्च तथा पुण्यो वदरीपावनः शिवः ॥१५७॥
तीर्थं सप्तर्षीणां च वह्नितीर्थं च पार्थिव ।
वस्त्रापथरजतो मेघश्छागलेशश्च पार्थिव ॥१५८॥

पुष्पन्यासस्सकामेश स्तीर्थो हंसपदस्तथा।
अश्वशीर्षः सकृहनाख्यो मणिभद्रस्तथैव च ॥१५९॥
देविका सिन्धुमार्गश्च स्वर्णविन्दुस्तथैव च।
आहल्यकस्तथा तीर्थ स्तीर्थश्चोणवनस्तथा ॥१६०॥
ऐरावतिसमुद्रे तीर्थं भोगयशस्तथा।
करवीराश्रमश्चैव नागमोदानिकस्तथा ॥१६१॥
पापमोचनिकश्चैव ऋणमोचनिकस्तथा।
उद्वेजनस्तथा पुण्यः पुण्यश्च हीशोभ्मः ॥१६२॥
देवब्रह्मणः पुण्यं सर्पिदर्वी च पार्थिव।
एते चान्येच बहवः पुण्यसङ्कीर्तिताः शुभाः ॥१६३॥
तोयैस्त्वामभिषिञ्चन्तु सर्वपातकनाशनैः।
गङ्गा महानदी पुण्या ह्रादिनी ह्रादिनी तथा ॥१६४॥
पावनी च तथा सीता चक्षुः सिन्धुश्च नर्मदा।
सुप्रभा कातणाक्षी च विशाला मानसी ह्रदा ॥१६५॥
सरस्वत्यो घनादा च सुवेणुर्विमलोदका।
सिप्रा शोणः शतद्रुश्च सरयू गण्डकी तथा ॥१६६॥
अच्छोदा च विपाशा च चन्द्रभागा इरावती।
वितस्ता देविका रम्या सीता देवह्रदा शिवा ॥१६७॥
तथैवक्षुमती पुण्या कौशिकी यमुना तथा।
गोमती धूतपापा च बाहुदा च दृषद्वती ॥१६८॥

निःशीरा च तृतीया च लौहित्यश्च महानदः।
वेदस्मृतिर्वेदशिनी वेत्रघ्नी वरदा तथा ॥१६९॥
वर्णाशा चन्दना चैव वहुनीरा कुमुद्वती।
पारा चर्मण्वती रूपा विदिशा वेणुवत्यपि ॥१७०॥
अवन्ती च तथा कुन्ती सुरसा च पलाशिनी।
मन्दाकिनी दशार्णा च चित्रकूटा दृषद्वती ॥१७१॥
तमसा पिप्पलाश्येनी करमोदा पिशाचिका।
चित्रोपला चित्रवर्णा मञ्जुला वालुकावति ॥१७२॥
शुक्तिमती शिली रुन्ध्रा लङ्गणात्यथ कक्षतः।
तापी पयोष्णी निर्विन्ध्या शिप्रा च निषधावती ॥१७३॥
वेण्णा वैतरणी भीमा चर्मारम्भा तथा कुहूः।
तोया चैव महागौरी दुर्गा मनुःशिला तथा ॥१७४॥
गोदावरी भीमरथी कृष्णा वेणा च वंजुला।
तुङ्गभद्रा सुप्रकारा वाह्या कावेरी रेव च ॥१७५॥
कृतमाला ताम्रपर्णी पुष्पजा उत्पलावती।
त्रिसामा ऋषिकुल्या च इक्षुका त्रिदिवालया ॥१७६॥
लाङ्गुलिनी वंशधरा सुकुमारी कुलावती।
ऋषिका कारी वेगा च मन्दगा मन्दवाहिनी ॥१७७॥
कृपी दर्वी दया व्योमा पराषणी कोलवाहिनी।
कम्पना च विशल्या च करतोयाम्बुवाहिनी ॥१७८॥

Kathmandu

ताम्रारुणा वेत्रवती गोमती चापनद्यापि।
अद्रिणी त्रिकसा चैव सुप्रकारा हिरण्वती ॥१७९॥
आपगा चालका मासी सन्ध्या च मडवा नदी।
नन्दा चालकनन्दा च सुभ्रा च वसुवाहिनी ॥१८०॥
एताश्चान्याश्च राजेन्द्र नद्यस्त्वां विमलोदकाः।
सर्वपापप्रशमनास्सर्वलोकस्य मातरः ॥१८१॥
स्वतोयपूर्णैः कलशैरभिषिञ्चन्तु पार्थिव ॥१८२॥
एते यथोक्तै नृपराज राज्ये
दत्ताभिषेकः पृथिवीं समग्राम्।
ससागरां भुंक्ष्व चिरं च जीव
धर्मे च ते बुद्धिरतीव चास्तु ॥१८३॥

ततः एकशङ्कुरेण दक्षिणाक्षि [illegible] शङ्कुरेण लेपयेत्

पूर्णपात्र

देवद्रुणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीरविक्रम वर्मा सपत्नीकः अहं मम सकल राज्ञवस्यता कामनया कृते राज्याभिषेचन कर्मणः कृतस्य हवन कर्मणः अपूर्णपूर्णार्थं पूर्णपात्रं प्रजापति देवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय सम्प्रददे.

प्रणीताविमोक

ॐ सुमित्रिया न ऽ आप ऽ ओषधय सन्तु. इति प्रणीता जलेन शिरसि लिम्पेत्.

ॐ दुर्मित्रिया यस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः इति प्रणीता पात्रं ऐशान्यां न्युब्जी कुर्यात्.

बर्हि होम:

ॐ देवा गातु विदो गातुं वित्वा गातुमित. मनसस्पत ऽ इम न्देव यज्ञ ं स्वाहा वाते धाः.

मेधा.

ॐ सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम्. सनिं मेधा मयासिषं स्वाहा. याम्मेधान्देवगणाः पितरश्चोपासते. तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा.

Kathmandu

मेधाम्मे वरुणो ददातु· मेधामग्निः प्रजापतिः मेधामिन्द्र
श्च वायुश्च मेधां धाता ददातु मे स्वाहा· इदं मे ब्रह्म च क्षत्रं
चोभे श्रियमश्नुताम्· मयि देवा दधतु श्रियमुत्तमां तस्यै
ते स्वाहा·

वह्निहोम·

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धे
हि· समाववर्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं
जगत्· वैश्वानरज्योतिर्भूयासं विभुन्कामान्व्यश्नवै भूः
स्वाहा·

शेष चरुहोम·

ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि· व्रतं च श्रद्धां
चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा·

घृतच्छाया

ततो राजा दर्पे आज्ये च प्रतिबिम्बं दृष्ट्वा तत् आज्य पात्रं ब्राह्मणाय दद्यात् .

आज्यनिरीक्षणम्.

ॐ तेजोसि शुक्रमस्य मृतमसि धामनामासि प्रियोदेवानामनाधृष्टन्देवयजनमसि.

ॐ ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया पशुभिर्भूयात्. घृतेन द्यावा पृथिवी पूर्येथा मिन्द्रस्य छदिरसि विश्वजनस्य छाया:

ॐ अलक्ष्मीर्यस्य दौस्थ्यं मे सर्वं [illegible] गात्रेष्ववस्थितम्.
तत्सर्वं शमयाऽज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय.

आज्य स्पर्शः

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा. दिशः प्रदिशं आदिशो उद्दिशो विदिशो दिग्भ्यः स्वाहा.

ॐ आज्यं तेज समुद्दिष्टम आज्यं पापहरं परम्।
आज्यं सुराणामाहार आज्येलोका प्रतिष्ठिता॥
ॐ दिव्यभौमान्तरिक्षाच्च यच्च किल्विषमागतम्।
सर्वं तदाज्य संस्पर्शात् प्रणाशमुपगच्छतु॥

दूर्वालोडनम्:

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।

एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
ॐ याक्षीर सागरोत्पन्ना दूर्वा पीयूष सम्भवा ।
तस्यास्पर्शन मात्रेण चायुं वृद्धि र्यशो वरम् ॥
ॐ कांस्यपात्राय नमः ॐ घृताय नमः ॐ सुवर्णाय नमः
ॐ मृत्युञ्जयाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा सपत्निकः अहं मम सकल ऐश्वर्य वस्थता कामनया कृते ऽस्याभिषेचन कर्मणि इदं स्वमुखावलोकितं आज्यं मृत्युञ्जय देवताकं सुवर्णं वह्नि देवताकं कांस्यपात्रं विश्वकर्म देवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय संप्रददे ।

कामधेनो समुद्भूतं देवानां मृतमं हविः ।
आयुर्वृद्धिकं दानं आज्यं पातु सदैव माम् ॥

अद्य कृतैतत् स्वमुखावलोकिताज्य सुवर्ण कांस्यपात्र दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय संप्रददे । तत्सन्न मम ।

विष्णुप्रार्थना.

शङ्खः चक्रं सकिरीट कुण्डलम्
सपीत वस्त्रं सरसीरुहेक्षणम्।
सहार वक्षःस्थल कौस्तुभः श्रियम्
नमामि विष्णुं शिरसा चतुर्भुजम्॥
शान्ताकारं भुजग शयनं पद्मनाभं सुरेशं
विश्वाधारं गगन सदृशं मेघवर्णं शुभाङ्गं।
लक्ष्मीकान्तं कमल नयनं योगिभिर्ध्यानगम्यम्.
वन्दे विष्णुं भव भय हरं सर्वलोकैक नाथम्॥

विष्णवे नमः

यज्ञान्त गोदान

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

गोनिष्क्रय जल द्रव्याय नमः

अद्येह काश्यप गोत्रः काश्यप वत्सार नैध्रुवेति त्रिप्रवर मीनराशिः देवेन्द्रवीरविक्रम वर्मा सपत्नीकः अहं मम सकलारिष्ट वस्थिता कामनया कृतस्य राज्याभिषेचन कर्मणि तत्तद्देवता स्थापन पूजन हवन कर्मणश्च प्रतिष्ठा साङ्गता सिद्ध्यर्थं इदं गोप्रत्याम्नायीभूतं जलं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय संप्रददे।

कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

अद्य कृतैतत् गोप्रत्याम्नायीभूत जल दान कर्मणः प्रतिष्ठार्थं इदं जलं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय संप्रददे। तत्सन्नमम।

उत्तराङ्ग पूजा।

गुरु पुरोहितलाई दान

देयद्रव्याय नमः   दान ब्राह्मणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीरविक्रम वर्मा सपत्नीकः अहं मम सकलाभीष्ट वाञ्छिता कामनया कृतस्य राज्याभिषेक कर्मणो यथोक्त फलावाप्तये गो॰ भूमी॰ गृह॰ हस्ती॰ अश्व॰ यान॰ अज॰ मेष॰ अलङ्कार॰ सुवर्ण॰ परिधानीय वस्त्र॰ छत्र॰ धान्यादि वस्तूनि प्रत्याम्नायीभूतं दानं चन्द्रदेवताकं तथा सहस्रगो प्रत्याम्नायीभूतं दानं चन्द्रदेवताकं काश्यपगोत्राभ्यां गुरु पुरोहिताभ्यां संप्रददे॰

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्मात् शान्तिं प्रयच्छ मे ॥
सर्वभूताश्रया भूमि वराहेण समुद्धृता ।
अनन्त सस्य फलदा ह्यतः शान्तिं प्रयच्छ मे ॥

अद्य कृतैतत् गो॰ भूमी॰ गृह॰ हस्ती॰ अश्व॰ यान॰ अज॰ मेष॰ अलङ्कार॰ सुवर्ण॰ परिधानीय वस्त्र॰ छत्र॰ धान्य सहस्रगौ दान कर्मणः प्रतिष्ठार्थं इदं दानं चन्द्रदेवताकं काश्यपगोत्राभ्यां गुरु पुरोहिताभ्यां संप्रददे॰ नतन्न मम॰

ततो दधि दूर्वादीनि मङ्गल द्रव्याणि संस्पृश्य सदस्याः चापहस्तः अग्निं प्रदक्षिणीकृत्य गुर्वादीन् नत्वा हृष्टः सवत्सां गां पृष्ठदेशे स्पृशेत्॰

ब्राह्मणभोजन भूपती

देवद्रुपाय नमः   रजतखण्डाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः कन्याराशिः देवेन्द्रवीर विक्रम वर्मा सपत्नीकः अहं मम सचक्र पञ्चक्र ज्ञातिन सकल बाधा निवृत्ति पूर्वक सकलाभिवश्यता कामनया कृतस्य राज्याभिषेक कर्मणो न्यूनातिरिक्त परिपूर्ति यथोक्त फलावाप्तये तथा कोषिमाले अष्टोत्तर शत ब्राह्मणभोजनस्य प्रतिष्ठार्थं इमां भूपती दक्षिणां रजत चन्द्रदेवताकं गुरु पुरोहित गणपति स्वरूप होतृ दैवज्ञ ऋत्विक आचार्य कर्णपाल परिचारकेभ्यश्च तथा नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो अन्येभ्यो ब्राह्मणेभ्यश्च दातुं मनसे समुत्सृजे. तेनसन्तमम.

देवविसर्जनम्:

अभिषेक

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

ॐ द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिः आपः शान्तिः ओषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतँ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।

ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ।

ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु ।
ॐ यच्छ्रेयस्तदस्तु । यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु । द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु । ॐ अमृताभिषेकोऽस्तु ।

तिलक प्रसाद.

तिलक मन्त्र:

त्र्यायुषं जमदग्नेः	ललाटे.
कश्यपस्य त्र्यायुषम्.	ग्रीवायाम्.
यद्देवेषु त्र्यायुषम्:	दक्षबाहुमूले.
तन्नो अस्तु त्र्यायुषम्:	हृदि.

प्रसाद मन्त्र:

श्रीर्वर्चस्य मायुष्य मारोग्य माविधात् पवमानं महीयते.
धान्यं धनं पशु बहु पुत्रलाभं शत संवत्सरं दीर्घमायु:

अव्याधिना शरीरेण मनसा च निराधिना ।
पूर्णतार्पिता माह्या त्वं जीव शरदां शतम् ॥

भद्रमस्तु शिवं चास्तु महालक्ष्मी प्रसीदतु ।
(रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

मण्डपदान

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः शौनण्डी: देवेन्द्रवीर विक्रम वर्मा ~~अहं~~ ~~नाम~~नेपालिकः अहं मम स्वचक्रपरचक्रजनित सकलबाधानिवृत्ति विपुलयशः प्राप्तिपूर्वक सकलराष्ट्राभ्युदयताकामनया कृतस्य एतस्याग्निचयन कर्मणो यथोक्तफलावाप्तये सुपूजित ग्रहवास्तु प्रजापादि देवताप्रतिमायुतं ध्वजमाला विभूषित पताकादि शोभितं सोपस्करं इदं मण्डपं श्रीविश्वकर्मदेवताकं ~~[illegible]~~ ..... गोत्राय ..... शर्मणे ब्राह्मणाय संप्रददे।

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम।
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

अद्यकृतैतत् सुपूजित सोपस्कर मण्डपदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय संप्रददे। तत्सन्नमम।

अञ्जलिं बध्वा।

यस्यस्मृत्याच नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
ॐ अच्युताय नमः ३
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः॥

हस्ते जलं गृहीत्वा।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मनावा प्रकृत स्वभावात्।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयेतत्॥

वादिकोसींहासनमा राज्ञकै

ॐ ध्रुवा द्या पृथिवी ध्रुवा विश्वमिदं जगत्· ध्रुवासः पर्वता इमे ध्रुवो राजा विशामयम्· ध्रुवन्ते राजा वरुणो ध्रुवं देवो बृहस्पति ध्रुव इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्· ध्रुवाच्युत प्रमृणीहि शत्रून् यतो धरान् पादयस्व· सर्वादिशः संमनसः सध्रीचीर्ध्रुवायते समितिः कल्पतामिह·

ततो द्वारपाल तत्रो पविष्टाय राज्ञे अमात्यान् पौरान् वणिजश्च दर्शयेत्·

अश्व गज अभिमन्त्रण·

ततो पुरोधाः सलक्षणं जात्यश्वं महागजं च तत्रान्याय्य तौ सर्वौषधी कलशेन अभिषिञ्चेत्·

ॐ या ओषधीः पूर्वजाता देवेभ्यः स्त्रियुगं पुरः।
मनुनैव भ्रूणामहं शतधामानि सप्त च ॥

ततः अश्वं राज्ञः पुरतः आनीयाभिमन्त्रयेत्·

जयाश्वत्वं महाराज तुरङ्गम प्रतिष्ठितः।
रमणेशलक्ष्म्याः पुत्रस्त्वं गन्धर्वत्वं यथास्मर ॥
यथा नृणां नृपं राजा तथा त्वं भव वाजिनाम्।
यथा भवन्तं नृपति र्नित्यमेवं रक्षतीति ॥
तथा त्वं रक्ष राजानं सर्वावस्थागतं हयः।
दर्शयाश्वं तथा सर्वो देवदोषमुपागतम् ॥
तुरगान् सकलान् रक्ष त्वयो भारो मयोर्पितः।
अद्यप्रभृति राजान्या मध्येण प्यांति भक्तिनः ॥
अभ्यर्चायिष्यति सदा गन्धमाल्यानुलेपनैः।
आशीर्भिश्च द्विजातीनां तथा च स्वाति वाचनैः ॥
रक्षतु त्वां महेन्द्रस्तु पूर्वेण त्रिदशाधिपः।
दक्षिणेन यमोदेवः पश्चिमेन जलाधिपः ॥
उदग्वै श्रवणो देवः सर्वे रक्षतु सर्वतः ॥

ततः गजं राज्ञः पुरतः आनीय अभिमन्त्रेत्·

श्रीगजस्त्वं कृतो राज्ञा भवतस्त्वं गजाग्रणीः।

गन्धमाल्यान्न भक्षैस्त्वां पूजयिष्यति पार्थिवः ॥
लोकः सदाभयं पूजा करिष्यति यथातव ।
पालनीयस्त्वया राजा युद्धे चापि तथा गृहे ॥
तीर्यग्भावं समुत्सृज्य दिव्यभाव मनुस्मर ।
देवासुरे पुरा युद्धे श्रीगज स्त्रिदशैः कृत ॥
ऐरावत सुतः श्रीमान्नारिष्टो नामवारणः ।
श्रीगजानान्तु यत्तेजः सर्वमेवो पातिष्ठतु ॥
तत्तेजस्तव नागेन्द्र दिव्य भाव समन्वितम् ।
उपातिष्ठतु भद्रन्ते रक्षराजानमाहव ॥

ततः राजा गजं आरोहयेत्·

आरुह्य राजा मार्गेण स्वपुरन्तु परिभ्रमेत् ।
मुख्यामात्यै ससामन्तैः सान्त्वनश्च पुरोहितैः ॥
सहितः कुंजरारुढो ऽभिगच्छेच्चदेवताः ।
तासां सम्पूजनं कृत्वा नगरं पातिवेष्टितः ॥
प्रविश्यात्मगृहं राजा प्रहृष्टनरवाहनः ।
दान मानादि सत्कारै र्गृह्णीयात्प्रकृतिस्ततः ॥

गणेश प्रार्थना

ॐ विनायक गणेशाय सर्वदेव नमस्कृत।
पार्वतीप्रिय विघ्नेश मम विघ्नं विनाशय॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि· तन्नो दन्ती प्रचोदयात्॥

सूचना विभाग

प्रसार विभाग

२६
१५

१५४
२६

२८४
१३½

२९४
७२½

५१७½

भद्रासन॥ तमेव राजानं शतछिद्रसौवर्णकुंभेनाभिषिंचेत्. सर्वौषधीनामु
दकेन. ॐ या ओषधीः पूर्वजाता देवेभ्यस्त्रियुगम्पुरा ॥ मनै नु बभ्रूणामहं
शतं धामानि सप्त च ॥ इति । गंधोदकेन. रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र
कामयते सुषारथिः । अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति र
श्मयः. तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः । अवप्रय
न्तः प्रपदैरमित्रान् । क्षिणन्ति शत्रूंरनपव्ययन्तः. ॥२॥ रथवाहनं हविरस्य
नाम यत्रायुधं निहितमस्य वर्म. तत्रा रथमुपशग्मं सदेम विश्वाहा वयं सुमन
स्यमानः ॥ बीजोदकेन. आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इ
षव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू र
थेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो
न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्. ॥ पुष्पोदकेन. पुष्पवतीः प्रसूमतीः
फलिनीरफला उत. संमातर इव दुह्रामस्मा अरिष्टतातये । रत्नोदकेन. आशुः शि
शानः इति । कुशोदकेन. ये देवा दिविषदो अन्तरिक्षसदश्च ये चेमे भूम्यामधि.
तेभ्यस्त्वं धुक्ष्व सर्वदा क्षीरं सर्पिरथो मधु. ॥ ॥ तत अन्यः ऋग्वेदी विप्रो गोरोच
नया शिरः कण्ठं च लिंपेत्. गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्.
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्. ॥ ॥ ततो विप्राः क्षत्रिया वैश्याश्च
गंगा यमुना नदी नदसरः कूपसमुद्रोदकपूर्णैः कलशैः स्वस्वशाखीयैर्मंत्रैरभिषिं
चेयुः. शूद्रानुलोमादयश्च तूष्णीमेवाभिषिंचेयुः. ॥ ॥ तत अमात्यमुख्या
श्च छत्रचामरादीन् धारयेयुः. वादकाः शंखभेर्यादीन् वादयेयुः. विप्रा मंत्र
पाठं कुर्युः. बन्दिनः स्तुतिं कुर्युः ॥ ॥ ततो दैवज्ञविप्रो हेमकुंभोदकेन सुरास्त्वामित्या
दि मंत्रैरभिषिंचेत्. । ॐ सुरास्त्वामभिषिंचन्तु ब्रह्मविष्णुमहेश्वराः. वासुदेवो जग
न्नाथस्तथा संकर्षणो विभुः. प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निरृतिस्तथा. ॥२। वरुणः पवनश्चैव
धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहिताः शेषो दिक्पालाः पान्तु ते सदा. ।३।
रुद्रो धर्मो मनुर्दक्षो रुचिः श्रद्धा च पार्थिवः. भृगुरत्रिर्वशिष्ठश्च सनकश्च स
नंदनः ॥४॥ सनत्कुमारश्च तथा भगवानपि चांगिराः. पुलहश्च पुलस्त्यश्च

श्च मरीचिः कश्यपः प्रभुः. ॥५॥ एते त्वामभिषिञ्चन्तु प्रजाध्यक्षाः समागताः ॥ प्रभाक
रा वर्हिषदो अग्निष्वात्तास्तथैव च. ॥६॥ क्रव्यादश्चोपहूताश्च आज्यपाश्च सुका
लिनः ॥ एते त्वामभिषिंचन्तु पितरश्चाग्निभिः सह. ।७॥ लक्ष्मीर्वेदी शची ख्यातिर
नसूया तथा स्मृतिः. । संभूतिः सन्नतिश्चैव क्षमा प्रीतिस्तथैव च. ।८। स्वाहा स्वधा
चाते राजन्नभिषिंचन्तु मातरः. । कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टि लक्ष्मीस्तथा क्रिया. ९
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः सिद्धिश्च पार्थिव:. एतास्त्वामभिषिंचन्तु धर्मपत्न्यः समाग
ताः. १० अरुन्धती वसुर्यामी लंबा भानुर्मरुत्वती. संकल्पा च मुहूर्ता च साध्या विश्वा त
थैव च. ।११॥ धर्मपत्न्यो दशान्यास्त्वामभिषिंचन्तु पार्थिव:. अदितिर्दितिर्दनुः
कालाःसुहसा नायुषामनिः. ।१२॥ कद्रूः क्रोधवशा प्राची विनता सुरभिस्त
था. एतास्त्वामभिषिंचन्तु कश्यपपत्न्यः प्रियाः स्त्रियः. ।१३॥ पत्नीते बहुपुत्र
स्य सुपर्णाख्या च भामिनी. समायात्वाभिषेकाय विजयाय च पार्थिव. १४
कृशाश्वपत्नी च तथा सुप्रभा जजया तथा. सुदर्शना तयोः पुत्रो विजयं
।ददधातु ते ॥१५॥ मनोरमा भानुमती विशाला या च बहुदा.। अरिष्टनेमि
पत्न्यस्त्वामभिषिंचन्तु पार्थिव. १६। कृत्तिका रोहिणी देवी विशाखा च तथा नृ
प. अनुराधा तथा ज्येष्ठा मूलं च वसुधाधिप ।१७। आषाढा च तथा पूर्वा तथा
न्या चोत्तरा हया. अभिजिच्च तथा श्रुत्या धनिष्ठा च तथैव च. ॥१८।
तथा शतभिषक्चैव पूर्वा भाद्रपदा तथा. । उत्तरा रेवती राजन् अश्विनी
भरणी तथा. । १९ एतास्त्वामभिषिंचन्तु सोमपत्न्यः समागताः. मृगी
च मृगचर्मा च श्वेता भद्रचरा हीः. । २० इरा च कपिना दंष्ट्रा सुरभा सुलभा तथा.
एताः पुलस्त्यपत्न्यस्त्वामभिषिंचन्तु पार्थिव. २१ ।। श्येनी भासी तथा क्रौञ्ची

धृतराष्ट्री तथा शुकी । पत्न्यस्त्वामभिषिंचन्तु अरुणस्यार्कसारथेः ॥२२॥
आयतिर्नियतिश्चैव रात्रिर्निद्रा च पार्थिव । एतास्त्वामभिषिंचन्तु लोकस्थि
स्थानहेतवः । २३ उमा सेना शची चैव धूमोर्णा निर्ऋतिस्तथा । गौरी शिवा
च ऋद्धिश्च वल्लया चैव नंदना । ॥२४॥ आनंदका च तथा ज्योत्स्ना या च दे
वी वनस्पतिः । एतास्त्वामभिषिंचन्तु कालस्यावयवा शुभाः । २५ आदि
त्यश्चंद्रमा भौमो बुधजीवसितार्कजाः । ग्रहास्त्वामभिषिंचन्तु राहुः केतुश्च
तर्पिताः २६ स्वायंभुवो मनोः पुत्रो मनुः स्वारोचिषस्तथा । औत्तमस्तामसश्चै
व रैवतश्चाक्षुषस्तथा । २७ वैवस्वतोऽथ सावर्णो दक्षब्रह्मसुतावुभौ । धर्म
पुत्रो रुद्रपुत्रो रौच्यो भौत्यश्च यो मनुः । २८ एते त्वामभिषिंचन्तु मनवश्च चतु
र्दश । ~~२९~~ विश्वभुग्विश्वयाश्चित्र सुशांतः सुमुखी विभुः । २९ मनोजवस्त
थौजस्वी वलिरद्भुतशांतिकौ । वृषश्च ऋतधामा च दिविस्पृक्कविरे
व च । ३० एते त्वामभिषिंचन्तु देवपालाश्चतुर्दश । रेवतश्च कुमारश्च तथा
वर्चाः कुमारकः । ३१ वीरभद्रश्च नंदी च विश्वकर्मा पुरोजवः । एते त्वाम
भिषिंचन्तु सुरमुख्याः समागताः । ३२ आत्मा ह्यायुर्मनो दक्षः मदः प्रा
णस्तथैव च । हविष्मांश्च गरिष्ठश्च ऋतः सत्यश्च पार्थिव । ३३ अभिषिंच
न्तु राजंस्त्वां देवा ह्यंगिरसो दश । क्रतुर्दक्षो वसुः सत्यः कालका
मो मुनिस्तथा । ३४ धृतिमान् मनुजश्चैव रोचमानस्तथैव च । एते त्वामभि
षिंचन्तु विश्वेदेवास्तथा दश । ३५ अजैकपादहिर्बुध्न्यः धूम्रकेतुस्तथा
बुधः । भरतश्च तथा मृत्युः कापालिरथ किंकिणिः ॥ ३६ एकाद

शैते रुद्रास्त्वामभिषिंचन्तु पार्थिव:। भुवनो भावनश्चैव सुजन्य: सुजन
स्तथा। ३७ क्रतु: सुवर्ण वर्णाश्च प्रजश्च अमृतस्तथा। प्रलम्बश्चाव्ययश्चैव दक्षश्च
मनुजाधिप ३८ एतेत्वामभिषिंचन्तु भृगवो नामदेवता:। मनोप्रणश्च प्राणश्च नर
पानश्च वीर्यवान ३९ चितिर्हयो नयश्चैव हंसो नारायणस्तथा। विभुश्चापि
दिविश्रेष्ठस्तथान्यश्च जगाद्धित:। ४० एतेत्वामभिषिंचन्तु साध्या द्वादश पार्थिव,
धातामित्रोर्यमा पूषा शक्रोंशो वरुणो भग:। ४१ त्वष्टा विवस्वान् सविता विष्णु
र्द्वादशम: स्मृत:।। एतेत्वामभिषिंचन्तु कश्यपादितिसंभवा:। ४२ एकद्वित्रि
चतुर्ज्योति: पंचज्योतिस्तथैव च।। एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबल।
४३ इन्द्रश्च मत्यादृश्यंते तत: प्रतिमकृत्तथा। मितश्च संमितश्चैव अमितश्च महा
बल:। ४४ ऋतजित्सत्यजिच्चैव सुषेण: श्येनजित्तथा। अतिमित्रस्तथामित्र:
पुरुजिच्चापराजित: ४५ ऋतश्च ऋतवान् धाता वरुणो विधृतो ध्रुव:, विधा
रणो महातेजा वासवस्यपर: सखा। ४६ ईदृगन्या दृशश्चैव एतादृगमिता
शन:। क्रीडकश्च तथा शक्ति: सभश्च महायश:। ४७ धातुरुग्रो धुनिर्भीमो
अभियुक्त:। क्षिप: सह:। द्युतिर्वपुरनाधृष्यो वास: कामो जयो विराट्,
४८ एतेत्वा० मरुतश्च समागता:। देवाह्येकोनपंचाशन्महाबलपराक्रमा:। ४९ चित्रां
गद: श्चित्रसेनश्च वीर्यवान्। ऊर्णायुरनघश्चैव उग्रसेनश्च वीर्यवान्।।
५० धृतराष्ट्रश्च सोमश्च सूर्यवर्चास्तथैव च। युगपस्तृणप: कार्ष्णि र्नंदिश्चि
त्रस्तथैव च। ५१ कलिश्चाप्यङ्गिरा राजन् पर्जन्यो नारदस्तथा। वृषपर्वा च
हंसश्च तथा चैव हाहा हूहू:। ५२ विश्वावसुस्तुम्बरुश्च तथा च सुरुचि
श्चय:। एतेत्वा० गंधर्वा पृथिवीपते:। ५३ आहूत्य: शोभयंत्यश्च वेगवत्य
स्तथैव च। आपुवत्यस्तथोर्जश्च तथा वै कुरुपश्रुभा:। ५४ वभ्रुवश्चा
मनस्वो भुवश्चैव रुचकस्तथा।। भीरव: शोचयंत्यश्च दिव्या ह्यप्सर
संगणा:। ५५ एताह्त्वा० कामिन्यस्तरुणप्रिया:। अनन्तमासुद

पाच सुकेशीच मनोवती । ५७ मेनका सहजन्या च पर्णशा पुंजिकस्थला ।
कृतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि । प्रेम्लोचा थाप्यनुम्लो
चा रंभा चैवोर्वशी तथा । पंचचूडा सामवती चित्रलेखा च पार्थिव ।
५८ । मिश्रकेशी सुगंधिश्च विद्युत्पर्णा तिलोत्तमा । अदृत्क्षमणाक्षेमा अलि
ताम्रचिका तथा । ५९ सुव्रता च सुबाहुश्च सुबोधा सुवपुस्तथा । पुंडरीका
सुदाशा च सुरथा सुरसा तथा । हेमा सरस्वती चैव कामला सूर्यता
लया । सुमुखा हंसपादी च वालोल्वी इति नालसा । ६१ एतास्त्वा०
राजन्नप्सरसः शुभाः । स्व प्रह्लादश्च महातेजास्तथा राजन्विरो
६२ चनः धन्वी वाणस्तथान्येन्य दितिपुत्राः समागताः । अभिषिंचंतु
दैत्याश्च दिव्यो न्याय्यं भसास्त्वयम ६३ विप्रचित्तिमुखाः सर्वे दानवा
स्त्वां समागताः । अभिषिंचंतु राजानं राज्ये कर्तुं सुसत्वराः ६४ हेत्य
श्चैव प्रहेत्यश्च मालितेन्द्रस्तथैव च । सुकेशी पौरुषेयश्च यज्ञहा
पुरुषादकः ६५ विद्युत्पर्णस्तथा व्यासो वधश्च रसनस्तथा ।
एते त्वाम० समागम्या राक्षसाः ६६ सुसिद्धो माणिभद्रश्च सुम
नो नंदनस्तथा । कंडूतिः पंचगश्चैव माणिमान् वसुमान्
स्तथा ६७ सर्वजित्सूतिः शंखश्च पिंगाक्षश्चजरस्तथा । यमो
मंदरसोभीमः पद्मचंद्रः प्रभाकरः । ६८ मेघवर्णश्च भव्यश्च
प्रद्योतश्च महायशाः । भूतिमान् केतुमांश्चैव मौलिमी
६९ चचतुर्दष्टा । श्वेतश्च विपुलश्चैव प्रद्युम्नश्च जयावहः । पद्म
पक्षो वलाकश्च कुमुदश्च वहलाहकः । ७० पद्मनागः सुगंध

६

श्वसुवीरो विजयाकृतिः पोर्णमासो हिरण्याक्षः शतजिह्वश्च
वीर्यवान्। एते त्वा॰ राजवद्धश्च सत्तमाः। शङ्खपद्मश्च राजेन्द्र
मकरः कच्छपस्तथा महापद्मश्च नीलश्च खर्वः कुन्दो मुकुन्दकः
एते त्वा॰ निधयस्तु समागताः। छगलाश्चैकचक्राश्च पञ्चसूची
मुखानूपाः दुःपूरणाविषादाश्च ज्वलनीगात्रकालधाः
१० कुम्भमात्राः प्रजङ्घाश्च ऽपवीरा ऽलूखलाः।

॥ अप्सराश्च करवंडाश्च तथा येषा नपाणपः ॥ ७५ पांसवश्च पितुंजाश्च विपुरास्कंद
गास्तथा । एते त्वामभिषिंचन्तु पिशाचा मांतृजातयः ॥ ७६ ॥ ~~३८॥~~ ब्रह्मचर्येस्थि
ता दांताः सर्वज्ञाः सर्वदर्शिनः ॥ नानाप्रकारवदना नाना वायुशिरोधराः ॥ ७७ चतुष्पथ
पराद्वाल शून्यालयनिकेतनाः ॥ त्रिपुरारिं भवं देवं ये धाना मनुजेश्वर ॥ ७८ तेत्वा
मभिषिंचंतु गणा भूतपतेः स्वयम् ॥ ~~३८~~ महाकालं पुरस्कृत्य नरसिंह
च मातरः ॥ ७९ सर्वे त्वामभिषिंचन्तु राजराज्ये नराधिप ॥ ~~३९~~ ८० ॥ ग्रहः स्कं
दो पिशाचश्च नैगमेयस्तथैव च ॥ अभिषिंचंतु राजं त्वा सर्वे स्कंदग्रहाः
शुभा ॥ ~~३८~~ ८१ ॥ डाकिन्यो याश्च योगिन्यः खेचर्यो भूचरास्तथा ॥
८१ सर्वास्त्वामभिषिंचंतु समेत्य मनुजेश्वर ॥ ~~३९~~ ८२ ॥ गरुडश्चारुणश्चैव
आरुणिश्च महाखगः ॥ ८२ संपाती विनतश्चैव विष्णुगंधि कुमारकः ॥ एते त्वा
मभिषिंचंतु सुपर्णाः पृथिवीपते ॥ ~~४६~~ ८३ अनन्तश्च महानागो वासुकिः
शेषतक्षकौ । सुपर्णाश्च कुंभश्च लामनोधाजनोत्तमः । ८४ ऐरावतो
महापद्मः कंबलाश्वतरावुभौ । एलापत्रश्च खंडश्च कर्कोटकधनं
जयो । ८५ महाकर्णो महानीलो धृतराष्ट्रवलाहकौ । कुमारः पुष्प
दंतश्च गंधर्वश्च मनस्विकः । ८६ नहुषः खररोमा च शंखपालस्त
थैव च ॥

पद्मश्च कुलिकश्चैव पाणिनीत्येवमादयः । ८७ नागास्त्वामभिषिञ्चन्तु राजराज्ये न
राज्ञिव । ऐरा कुमुदैरावतौ पद्मः पुष्पदन्तोथ वामनः । ८८ सुप्रतीकोञ्जनो नीलः
पान्तु त्वां सर्वतो द्विपाः ॥ पैतामहस्तथा हंसो वृषभः शंकरस्तथा । ८९ उच्चैःश्र
वाश्वाश्वपतिस्तथा धन्वन्तरिर्नृप । कौस्तुभः शंखराजश्च पान्तु त्वां सर्वतः
९० सदा । चक्रं त्रिशूलं वज्रञ्च नंदकोऽस्त्राणि चाप्यथ । सर्वमभिषेकं दत्वा चादिश
न्तु विजयं ध्रुवम् । ९१ धर्मश्च वृद्धशार्ङ्गश्च सत्यं दानं तपस्तथा । यशोप्यज्ञा स
पोवायुर्ब्रह्मचर्यं दमः शमः । एतेत्वा० चित्रगुप्तश्च पार्थिव । रुद्र दं
डः पिंगलकश्चैव मृत्युः कालांतकावुभौ । ९३ तालविल्वा तथा सर्वे भ
वन्तु विजयाय ते । दिग्धेनवश्चतस्त्वां सुरभिश्च तथा नृप । ९४ अभि
षिञ्चन्तु सर्वाभिर्गोभिः सार्द्धं नरेश्वर । वेदव्यासश्च वाल्मीकिः शम
नोथ पराशरः । ९५ देवलः पर्वतश्चैव दुर्वासा भार्गवः शुचिः । याज्ञवल्क्य
सनायातिर्जमदग्निः शुचिश्रवाः । ९६ विश्वामित्रः स्थूलकक्षो व
र्द्धनोत्रिर्विदूरथः । एकतश्च द्वितश्चैव त्रितो गोतमगालवौ । शां
डिल्यश्च भरद्वाजो मौद्गल्यो वेदवाहनः । ९८ वृहदश्वः कुटिमडो जप
जानुर्धृतिधरः । पवक्रीतोथ रैभ्यश्च आत्मा धौम्यश्च जै[illegible]निः
ऋषिः सारंगवश्चैव तथागस्त्यो महातपाः । ९९

[illegible] महेन्द्रो मलयः सह्यः ११ शुक्तिमान्दे
वास्तथा ॥ विन्ध्यश्च पारियात्रश्च सर्व एव महीधराः ॥ समागम्याभिषिञ्चन्तु
त्वामद्य वसुधाधिपः ॥ [illegible] ॥ ऋग्वेदोथ यजुर्वेदः सामवेदस्तथैव च ॥ ११ अथर्ववे

मृन्थोत्क

डुडुर्मदुर्मिशश्चैव इन्दुवाहुर्महोदय: ॥ कात्यायनश्च कण्वश्च वलाकश्चैव मतं
दन ॥१००॥ एतेत्वामभिषिञ्चन्तु मुनय: पार्थिवोत्तम: ॥ ~~अत~~ पृथुर्दिलीपो
भरतो दु:ष्वन्त: शत्रुजिद्वली ॥ १०१ मनुककुत्स्थश्चानेना युवनाश्वोजयद्रथ: ॥ मान्धा
ता मुचुकुन्दश्च तथा राजा पुरूरवा: ॥ १०२ इक्ष्वाकुश्च यदुश्चैव पुरुर्भूरिश्रवास्तथा ॥ अ
म्बरीषश्च नाभागो वृहदश्वो महाहनु: ॥ १०३ प्रद्युम्नश्चाथ सुद्युम्नो भूरिद्युम्नश्च सञ्जय: ॥
एते चान्ये च राजानस्तव राजन्दिवं गता: ॥ १०४ समायान्त्वभिषेकाय विजयाय तथा श्रियै ॥
पर्जन्याद्यास्तथा भूप मेघा: सर्वे समागता: ॥ १०५ द्रुमाश्चौषधयो रत्नं वीजानि विविधा
यानि च ॥ सर्वे त्वामभिषिञ्चन्तु राजराज्ये सुसत्वरा: ॥ १०६ ~~[illegible]~~ पुरुषश्चाप्रमेयात्मा मह
न्तानि यानि च ॥ पृथिवीवायुराकाशमापो ज्योतिस्तथैव च ॥ १०७ मनो बुद्धिस्तथै
वात्मा अव्यक्तश्च महीपते ॥ एतेत्वामभिषिञ्चन्तु समेता वसुधाधिप: ॥ १०८ ~~ह्ल~~ ॥ रुक्म
भौम: शिलाभौम: पातालो नीलमृत्तिक: ॥ पीतरक्तकसिताश्चैव श्वेतभौमास्तथैव च
१०९ एते त्वामभिषिञ्चन्तु विजयाय महीपते ॥ ~~७~~ ॥ जम्बूशाक: कुश: क्रौञ्च: शाल्मली
द्वीप एव च ॥ ११० प्लक्ष: पुष्करश्चैव स्वस्त्ययनं प्रदिशन्तु ते ॥ उत्तरा: कुरव: पुण्या रम्या
हैरण्वतास्तथा ॥ १११ भद्राश्व: केतुमालश्च वर्षश्चैव इलावृत: ॥ हरिवर्ष: किंपुरुषो वर्षो
भारत संज्ञक: ॥ ११२ एते त्वामभिषिञ्चन्तु समेत्य वसुधाधिप: ॥ ~~र्न~~ ॥ ११२ ॥ इन्द्रद्वीप:
कशेरुश्च ताम्रवर्णो गभस्तिमान् ॥ ११३ नागद्वीपस्तथा सौम्यो गान्धर्वो वारुणस्तथा ॥ अ
यञ्च नवमस्तेषां स्वस्त्ययनं प्रदिशन्तु ते ॥ ११४ हिमवान् हेमकूटश्च निषधो नील एव च
श्वेतश्च शृङ्गवान् मेरुर्माल्यवद्गन्धमादनौ ॥ ११५ महेन्द्रो मलय: ११६ सह्य: शुक्तिमानृक्ष
वांस्तथा ॥ विन्ध्यश्च पारियात्रश्च सर्व एव महीधरा: ॥ समागम्याभिषिञ्चन्तु
त्वामद्य वसुधाधिप: ॥ ~~ह्र~~ ॥ ऋग्वेदोथ यजुर्वेद: सामवेदस्तथैव च ॥ ११७ अथर्वे

दो वेदास्त्वाभिषिंचंतु पार्थिव ~~[illegible]~~ आयवन ॥ इतिहासो धनुर्वेदो गांधर्वश्चायु

सीक्षितः ॥ ११८ सांगोपवेदाश्च तथा विजयाय भवंतु ते ॥ शिक्षा कल्पो करणं निरुक्तं

ज्योतिषां गतिः। ११९ छंदोविचितिरक्षाणि विजयाय भवंतु ते ॥ अंगानि वेदाश्चत्वारो मी

मांसा न्यायविस्तरः ॥ १२० धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥ सांख्य योगः

पांचरात्रो वेदः पाशुपतं तथा ॥ १२१ कृतांतपंचकं चैव शास्त्राणि विविधानि च ॥

गायत्री पापशमनी गंगा देवी महाशिवा ॥ १२२ गांधारी च तथा नारी विजयं प्रदिशंतु ते ॥

देव दानव गंधर्वा यक्षराक्षसपन्नगाः ॥ १२३ ऋषयो मनवो गावो देवमातर एव च ॥

देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणा ॥ १२४ अस्त्राणि सर्वशस्त्राणि राजानो वाह

नानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ १२५ स्थानानि नसमस्तानि

पुण्यान्यायतनानि च ॥ जीमूतानि च सर्वाणि नदिकाराश्च सर्वशः ॥ १२६ उक्तानि यान्य

नुक्तानि विजयाय भवंतु ते ॥ लवणक्षीरतोयाश्च घृतमंडोदकास्तथा ॥

१२७ दधिमंडोदकाश्चैव सुरोदश्च नराधिप ॥ तथैवेक्षुरसोदश्च तथा स्वादूदकश्च यः ॥

१२८ गर्भोदकश्चतो ये त्वामभिषिंचंतु पार्थिव ॥ ~~स्व~~ ॥ समागम्याभिषेके तु विजयं

प्रदिशंतु ते ॥ १२९ पुष्करश्च प्रयागश्च प्रभासो नैमिषं तथा ॥ तथा ब्रह्मसरः पुण्यं गया

शीर्षं च पार्थिव ॥ १३० कालोदको नंदिकुंडस्तथैवोत्तरमानसः ॥ स्वर्गमार्गप्रदश्चैव

तथा पंचनदश्च यः ॥ १३१ भृगुतीर्थं प्रभासश्च तथैवामरकण्टकः ॥ आश्रमः कालिकाया

श्च तथा बिंदोस्तथाश्रमः ॥ १३२ गौतीर्थं चाग्नितीर्थं च विमलस्वर्ग एव च ॥ जम्बूमार्गश्च

विमलः पुण्यस्तत्पुलिकाश्रमः ॥ १३३ कापिलश्च तथा तीर्थौ वातिकवोटिकौ ॥ महाल

स्तथागस्त्यकुमारो तीर्थमेव च ॥ १३४ अरुद्धाः कुब्जावर्त्तो विल्वको नीलपर्वतः ॥ वराह

पर्वतश्चैव तीर्थं कनखलं तथा ॥ १३५ सुगन्धा च वधरा कुब्जास्तथा श्रावणभीतिया ॥

ऽटय्युत्रू: सकुक्काम्र: कपिलस्य तथाश्रम:॥ १३६ चमसोद्भेदन: पुण्यस्तथा विनशनं शुभ:॥अ
जतुङ्गश्च मोजश्च अश्वगन्धश्च पार्थिव॥ १३७ कालंजर: सकेदारो रुद्रकोटि स्तथैव च॥
महालयश्च राजेन्द्र वदर्याश्रम एव च॥ १३८ नन्दा च सोमतीर्थंच सूर्यतीर्थं शतक्रतो:॥अ
ग्नितीर्थं वरुणस्याथ वायोर्वै श्रवणस्य च॥ १३९ ब्रह्मणश्चैव शर्वस्य यमस्य च्यवनस्य च॥
विरूपाक्षस्य धर्मस्य तथाचाप्सरसां नृप:॥ १४० ऋषीणांच वसूनांच साध्यानां महतां
तथा॥ आदित्यानां च रुद्राणां तथा चाङ्गिरसां नृप॥ १४१ विश्वेदेव मरुणांच तथान्ये षा
चमानद॥ प्लक्षप्रस्रवणश्चैव कुपत्राच नराधिप॥ १४२ शालग्राम स्सश्चैव वाराहो मानस्त
था॥ कामाश्रम स्त्रिकूटश्च चित्रकूट स्तथैव च॥ १४३ सपूर्व: क्रतुसाम्ब्व तथा विद्युम्नदं
कापिलंच तथा तीर्थं वासुके स्तीर्थमेव तु॥ १४४ सौन्ध्र जम्म स्तपो द्वारे पद्म सूर्यार्कुंमक्र:
पुण्डरीकश्च राजेन्द्र गङ्गासागर सङ्गम:। १४५ सिन्धुसागरयोश्चैव सङ्गम: सुमनोहर:॥
तथा कुम्भावपुन्दश्च मानसश्च तथा सर:॥ १४६ तथा विन्दुसर: पुण्यं सत्त्वच्छोदकं तथा
धर्मारण्यं फल्गुतीर्थं मावि मुक्तं तथैव च॥ १४७ लौहित्यश्च तथा पुण्यो वदरी पावन: शिव
तीर्थं सप्तऋषीणांच वह्नितीर्थं नृपार्थिव॥ १४८ प्राप्य वस्त्रापथो मेघकूगटेश नृप
र्थिव। पृष्यन्यास स्तथा चैव तीर्थोद्दं सपदस्तथा॥ १४९ अश्वतीर्थश्च कर्णाश्वो मार्गम
श्यत्तपैव च॥ देविका इन्द्रमार्गश्च सर्णविन्दुस्तथैव च॥ १५० आहन्यक स्तथा तीर्थस्ती
र्थश्चै रावतस्तथा॥ ऐरावती समुद्रे दे तीर्थं मोगपरा: पाह॥ १५१ कवीरास्यं चैव
नागमो वारणकस्तथा॥ पापमोचनिकश्चैव ऋणमोचनिकस्तथा॥ १५२ दुग्धजन स्तथा
पुण्य: सम्प्रज्य: सरोसोवर:॥ देवब्रह्मसर: पुण्यं सापर्दीधिन्नु पार्थिव॥ १५३ एते चान्ये चु
वहव: पुण्यं सङ्कीर्तनाश्रुभा:॥ तोपे स्नात्वा सममिषिञ्चन्तु सर्वपातक नाशन:॥ ~~१५~~ १५४
गङ्गा महानदी पुण्या ह्रादिनी ह्रादिनी तथा॥ पावनीच तथा सीता चक्षु: सिन्धुश्च नर्मद

११४ सुप्रभा काञ्चनाक्षीच विशाला मानसी ह्रदा॥ सरस्वत्यो घवतीच सुवेषा विमलोद
का॥ १४६ द्रीप्रश्नोणश्च तर्वेश्च सरयूर्गण्डकी तथा॥ अच्छोदाच विभागाच चन्द्रभागा
इरावती॥ १४७ वितस्ता देविका रम्या केशा देवह्रदा शिवा॥ तथा चेक्षुमती पुण्या कौशिकी
यमुना तथा॥ १४८ गोमती धूतपापाच बाहुदा च सरस्वती॥ त्रिविन्ध्याच तृतीयाच
लोहितश्च महानदः॥ १४९ देवस्मृतिर्वेदमाता वेदचुर्चुरदा तथा॥ पर्णाशा वन्दना चैव
१५० सदानीरा कुमुद्वती॥ पीता चर्मण्वती चूर्णा विदर्भा वेणुमत्यपि॥ अवन्तीच त
थाकुन्ती सुसा चपलाशिनी॥ १५१ मन्दाकिनी दशार्णाच सिन्धुरेवा कुमुद्वती॥ तपती
पिप्पली श्येनीकरतोया पिशाचिका॥ १५२ चित्रोपला चित्रवर्णा मञ्जुला वाकुलामती
शुक्तिमती सिनीवाली मण्डूणी रूपिका कपूः॥ १५३ तापी पयोष्णी निर्विन्ध्या सिताच
निषधावती॥ वेणा वैतरणी भीमा मन्द एव तथा कुहूः॥ १५४ तोयाचैव महागौरी दु
र्गा तीर्थशिला तथा॥ गोदावरी भीमरथी कृष्णवर्णा सपङ्कणी॥ १५५ तुङ्गभद्रा सुप्र
कारा वाह्या कावेरी चैव च॥ कृतमाला ताम्रवर्णा पुष्पभद्रोत्पलावती॥ १५६ वैसमा
ऋषिकुल्याच इक्षुका त्रिदिवालपा॥ लाङ्गलिनी वंशधारी जम्बूश्च सुकलावती॥
१५७ ऋषिका वकेगाच मन्दका मन्दवाहिनी॥ क्षमा देवी दयाबीमा पयोष्णी कालव
१५८ हिनी॥ कम्पना च विशाला च करतोया सुवाहिनी॥ ताम्रारुणा वेत्रवती सुभद्रा
चाश्ववत्यपि॥ १५९ औदिकाच इलाचैव सुप्रकारोहिरण्मयी॥ आपगा लोपला भासी सं
ध्यानुवडुवानदी॥ १६० महेन्द्रवाणी शालाच मालिका वलयावती॥ नीलोत्पला कराचैव वाहु
दा वनवासिनी॥ १६१ नन्दा चापरनन्दाच सुनन्दा वसुवासिनी॥ एताचान्याश्च सुजे
नद्यः सर्वा विविधोदकाः॥ १६२ सर्वपापप्रशमनाः सर्वलोकस्य मातरः॥ सन्तोपपौ
कलहा एभिश्च नृपाधिपः॥ १६३ एते पर्वतैर्नैपातज्येद्वाभिबद्धः पृथिवीं समग्राम्

[illegible] Sanskrit University, Balmeeki Campus, Kathmandu

सरोगां भुंक्ष्वा चैं चिरंजीव धर्मेच ते बुद्धि लीयताम् ॥ ६२॥ इती ५१००

ततो रोगी सुगन्धितैलोद्वर्तनं कृत्वा शुद्धोदकैः स्नात्वा श्वेतोष्णीषादि वस्त्राणि धृत्वा
दर्शे आज्ये च प्रतीबिंबं दृष्ट्वा तदाज्यपात्रं सुवर्णं ब्राह्मणाय दद्यात् ॥ ततो
छायाच्छायापा विधिः तेजोसीत्याज्यनिरीक्षणम् । ॐ तेजोसीति परमेष्ठी=ऋषि
र्गायत्रीछन्दः आज्यं देवता आज्यावेक्षणे विनियोगः ॥ ॐ तेजोसि शुक्रमस्य
मृतमसि धामनामासि प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥१॥ ॐ ध्रुवासि ध्रु
वोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावा पृथिवी पूर्येथा
मिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥ अलक्ष्मी यच्च दौर्भाग्यं मे सर्वगात्रेष्ववस्थि
तम् ॥ तत्सर्वं शमयाज्यत्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥ आज्यस्पर्शः ॐ घृतं घृत
पावानः पिबत वसां वसापावानः पिबतान्तरीक्षस्य हविरसि स्वाहा ॥ दिशः प्रदिश
आदिश उद्दिशो विदिशो दिग्भ्यः स्वाहा ॥१॥ आज्यं तेजः समुद्दिष्टमाज्यं पापह
रम् ॥ आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिता ॥२॥ दिव्यभौमान्तरीक्षा
श्च यन्मे किल्बिषमागतम् ॥ सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥३॥
दूर्वालोडनम् । ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनु
सहस्रेण शतेन च ॥१॥ या श्री लोकगेस्मिन् दूर्वा पीयूष सम्भवा ॥ तस्याः स्प
र्श मात्रेण चायुर्वृद्धिर्यशो बलम् ॥२॥ ॐ कांस्यपात्राय नमः ॐ घृताय नमः
ॐ सुवर्णाय नमः ॐ मृत्युंजयाय नमः इति सम्पूज्य अद्येत्यादि मम सकल
एश्र वद्पताकामनया कृते रोगाभिविचन कर्मणो इदं स्वमुखावलोकितं आज्यं
मृत्युंजय देवताकं सुवर्णं वह्निदेवताकं कांस्यपात्रं विश्वकर्म देवताकं यथा
नामगोत्राय आचार्याय सम्प्रददे । कामधेनोस्समुद्भूतं देवानाममृतं हविः

आयुर्वृद्धिकं दानमाज्यंपात्र सदैव माम् । कृतैतत्स्वमुखावलोकिताज्य सुवर्ण कांस्यपात्र दानकर्मणः प्रतिष्ठासिद्ध्यर्थं रजतं चन्द्रदेवताकं यथानामगोत्राय आचार्याय संप्रददे । इति घृतच्छाया दानम् । ताम्बवदरकुंकुम दधिदूर्वादि मंगलद्रव्याणि संस्पृशेत् ॥ ततो विघ्नो गणपतिं विघ्नं पूजयेत् । आवाहनासन पाद्यार्घ्याचमनीय पंचामृत स्नानीय वस्त्र यज्ञोपवीत गन्ध पुष्पाक्षतादि धूप दीप नैवेद्य दक्षिणान्तं सम्पूज्य । पुष्पाञ्जलिः । ॐ विघ्नो गणपतिर्विघ्नोः अपसेध्यो विघ्नोः स्थूलेसे विघ्नो धुर्वासि वैश्रवणासि विघ्नवेत्

मधुपर्क

ततो वस्त्रालङ्कारादिभिः साम्वत्सरं पुरोहितं च पूजयेत् । अथ दैवज्ञः पट्टं ललाटे मुकुटं शिरसि बध्नीयात् । ततो पुरोधा राजानं शुभलग्ने उत्तरेण क्रमेण वृष मार्जार द्वीपि सिंह व्याघ्र चर्मासने सितवस्त्राच्छादिते मंचे उपवेशयेत् । ॐ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ॥ ध्रुवासः पर्वता इमे ध्रुवो राजा विशामयम् ॥१॥ ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ॥ ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥ ध्रुवाच्युतः प्रमृणीहि शत्रून् शत्रूयतोऽधरान् पादयस्व ॥२॥ सर्वा दिशः संमनसः सध्रीची ध्रुवाय ते समितिः कल्पतामिह ॥ इति मन्त्रेणोपवेशयेत् ॥ ततो द्वारपालः तत्रोपविष्टाय राज्ञे अमात्यान् पौरान् वणिजश्च दर्शयेत् ॥

(३-२)

३

ध्रुवराज्याभिषेकको

पूर्वाङ्कको

दीप कलश गणेश प्रार्थना

दीप प्रार्थना

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षि शिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥
दीपनारायणाय नमः

वरुण प्रार्थना

वरुणस्त्वं महाभाग सर्वदेवप्रपूजित ।
विनते मम यदेस्मिनाविघ्नं कुरु सर्वदा ॥
वरुणाय नमः

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
गणाधिपतये नमः

स्वस्तिवाचन

ततः शंख घण्टा वादन पूर्वकं दीपकलश गणेशं नत्वा मण्डपं त्रिः प्रदक्षिणी कृत्य पश्चिमद्वारेण प्रविशेत्।

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतो दब्धासो ऽ अपरीतास उद्भिदः। देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे। देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्त्तताम्। देवानाꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे। तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम्। अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत्। तन्नो वातो मयो भु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम्। तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये। स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह। भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः

ॐ स्वस्ति नो मिमिता मश्विना भगः स्वस्ति ने व्यदितिरनर्वणः स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावा पृथिवी सुचेतुना· स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः विश्वेदेवा अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये· स्वस्तये देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति· स्वस्ति न ऽ इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि· स्वस्ति पन्था मनु चरेम सूर्या चन्द्रमसाविव· पुनर्ददता घ्नता जानता सङ्गमेमहि· स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम्· असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवा रुहेम· अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्· प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नो अस्तु·

वरणम्·

वरणद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः सोन
गाह्नो: देवेन्द्र वीर विक्रम वर्माहपालिकः अहं मम राज्याभिषेचन
कर्म निर्विघ्नता सिद्धये पूर्वाङ्गत्वेन दीप· कलश· गणेश
मातृकापूजनं· पुण्याहवाचनं· आभ्युदयिक श्राद्धं ग्रह·वा
स्तु· मण्डप देवतापूजनं· ध्वजापताकोच्छ्रयणादि प्र:
स्तरं· स्वगृह्योक्त प्रकारेण अग्निप्रज्वालन पूर्वक ऐन्द्रीशा
नि प्रयोग लिखितेन प्रकारेण अग्निस्थापनादि हवन
कर्म· तथा सौवर्ण राजत ताम्र मृत्तिकादि कुम्भेषु अनेक
तीर्थ जल चन्दुग्ध दधि सर्वौषध्यादिभि स्थापन पूजन
कर्म च करिष्ये· तत्कर्म कर्तुं नानानाम गोत्रान् नानानाम
शर्मणो ब्राह्मणान्· एभिश्चन्दन पुष्पाक्षत धौतोत्तरीय रा
जत जलपात्र सौवर्णाङ्गुलीयक केयूर कंकण वलय रु
द्राक्ष कण्ठाभरणादिभि: गृह्य पुरोहितत्वेन· तथा एभि
श्चन्दन पुष्पाक्षत धौतोत्तरीयासन राजत जलपात्र सौ
वर्णाङ्गुलीयकादिभि: गणपति ब्रह्म सदस्य होतृ देवक
र्त्विक जापक द्वारपालत्वेन· तथा एभि श्चन्दन पु
ष्पाक्षत धौतोत्तरीयादिभि: पौराणिकत्वेन च युष्मा
नहं वृणे·   ॐ वृतास्मः

मधुपर्क

ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम्. ॐ अर्चय.

विष्टरमादाय.

ॐ विष्टरो विष्टरो विष्टरो इत्यन्येनोक्ते. ॐ विष्टरः प्रतिगृह्यताम्. ॐ विष्टरं प्रतिगृह्णामि.

विष्टरं गृहीत्वा.

ॐ वर्ष्मोऽस्मि इत्यार्वण ऋषिर्वीराट् देवता अनुष्टुप्छन्दः आत्मस्तुति पूर्वको पवेशने विनियोगः

ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः इमन्तमभितिष्ठामि यो मा कश्चाभिदासति. इति उत्तराग्रे विष्टरे उपविशति.

पाद्यं अञ्जलिनादाय.

ॐ पाद्यं पाद्यं पाद्यमित्यन्येनोक्ते. ॐ पाद्यं प्रतिगृह्यताम्. ॐ पाद्यं प्रतिगृह्णामि.

अञ्जलिना पाद्यं गृहीत्वा.

ॐ विराजो दोहोसीति प्रजापति ऋषिरापो देवता यजुः पाद प्रक्षालने विनियोगः

ॐ विराजो दोहोसि विराजो दोहमशीय मयी पाद्यायै विराजो दोहः इति दक्षिणं पादं प्रक्षालयति.

एवं वामपादम्.

ततो विष्टरान्तरं पादयोरधः स्थापयति.

ततो दुर्वाक्षत चन्दनजलयुतमर्घ्यं गृहीत्वा.

ॐ अर्घोऽर्घोऽर्घ इत्यनेनोक्ते. ॐ अर्घं प्रतिगृह्यताम्: अर्घं प्रतिगृह्णामि.

अर्घं गृहीत्वा:

ॐ आपस्थेति प्रजापति ऋषिरापो देवता यजुरर्घ्यग्रहणे विनियोगः

ॐ आपस्थ युष्मान्सर्वान्कामानवाप्नवान्. इति शिरसि अङ्गनादिकं दत्वा.

ॐ समुद्रं व इत्यथर्वण ऋषिरापो देवता त्रिष्टुप्छन्दः अर्घाभिमन्त्रणे विनियोगः

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत. अरिष्टास्माकं वीरा मा परासेचि मत्पयः इत्यर्घमीशाने त्यजति.

तत आचमनीयमादाय.

ॐ आचमनीयमाचमनीयमाचमनीयमित्यनेनोक्ते. आचमनीयम् प्रतिगृह्यताम्. आचमनीयं प्रतिगृह्णामि.

आचमनीयं गृहीत्वा.

ॐ आमागन्निति परमेष्ठी ऋषिरापो देवता बृहती छन्दः शकृदाचमने विनियोगः

ॐ आमागन्यशसा संसृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्.

इति द्विराचमनम्· द्विरपामि·

ततो कांस्यपात्रस्थं दधिमधु घृतानि कांस्यपात्र पिहितान्यादाय·

ॐ मधुपर्को मधुपर्को मधुपर्क इत्यन्येनोक्ते·

मधुपर्कः प्रतिगृह्यताम्· मधुपर्कं प्रतिगृह्णामि·

ॐ मित्रस्य त्वेति बृहस्पति ऋषिर्मधुपर्को देवता यजुर्मधुपर्कावेक्षणे विनियोगः

ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे· इति दातृकरस्थमेव निरीक्ष्य·

ॐ देवस्य त्वेति बृहस्पतिराङ्गिरस ऋषिः सविता देवता यजुर्मधुपर्क ग्रहणे विनियोगः

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि· इति मधुपर्कं गृहीत्वा वामहस्ते धृत्वा·

ॐ नमः श्यावेति प्रजापति ऋषिः सविता देवता यजुर्मधुपर्कालोडने विनियोगः

ॐ नमः श्यावास्यायान्नाशने यत्र आविद्धं तत्ते निःकृन्तामि· इति अनामिकया प्रदक्षिणं त्रिवारमालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिद्भूमौ विनिक्षिपेत्·

ॐ यन्मधुन इति कुत्स ऋषिर्मधुपर्को देवता

जगती छन्दो मधुपर्कप्राशने विनियोगः
ॐ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादो ऽसानि । इति वारत्रयं मधुपर्कप्राशनम् ।

ततः आचम्य ।

ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठी ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता प्राणस्पर्शने विनियोगः

ॐ वाङ्म आस्येऽस्तु । ॐ नसोर्मे प्राणोऽस्तु । ॐ अक्ष्णोर्मे चक्षुरस्तु । ॐ कर्णयोर्मे श्रोत्रमस्तु । ॐ बाह्वोर्मे बलमस्तु । ॐ ऊर्वोर्मे ओजोऽस्तु । ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु ।

ॐ गौर्गौर्गौरित्यावेदिते ।

ॐ मातारुद्राणामिति ब्रह्म ऋषिर्गौर्देवता त्रिष्टुप्छन्दो गोरभिमन्त्रणे विनियोगः

ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट । मम च देवेन्द्रवीरविक्रमवर्मणो यजमानस्य पाप्मा हतः ॐ उत्सृजत तृणान्यत्तु । इति संछिन्द्यात् ।

आचार्यादि पूजनम्

आचार्यं सम्पूज्य. ममास्मिन्यज्ञे आचार्यत्वेन त्वामहं वृणे. ॐ वृतोस्मि. प्रार्थना.

आचार्यत्वे यथा स्वर्गे शक्रादीनां बृहस्पतिः
तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत.
ॐ भवानि.

पुरोहितं सम्पूज्य. ममास्मिन्यज्ञे पुरोहितत्वेन त्वामहं वृणे. ॐ वृतोस्मि. प्रार्थना.

भगवन् सर्वधर्मज्ञ सर्वधर्मविदां वर।
विततेस्मिन्महायज्ञे पुरोधात्वं भवे भव॥
ॐ भवानि.

गणेशं सम्पूज्य. ममास्मिन्यज्ञे गणेशत्वेन त्वामहं वृणे. ॐ वृतोस्मि. प्रार्थना.

देवानामसुराणां च यदे प्राक्पूजितस्तु यः।
निर्विघ्नं कुरु ते यज्ञं मे गणपति भव॥ ॐ भवानि

ब्रह्माणं सम्पूज्य. ममास्मिन्यज्ञे ब्रह्मत्वेन त्वामहं वृणे. ॐ वृतोस्मि. प्रार्थना:

यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः।
तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम॥ ॐ भवा

सदस्यं सम्पूज्य· ममास्मिन्यज्ञे सदस्यत्वेन
त्वामहं वृणे· ॐ वृतोस्मि· प्रार्थना·

यथा विश्वसृजो यज्ञे याज्ञवल्क्यो द्विजोत्तमः।
तथा त्वं मम यज्ञेस्मिन् सदस्यो भव सुव्रत॥

ॐ भवानि·

होतारं सम्पूज्य· ममास्मिन्यज्ञे होतृत्वेन
त्वामहं वृणे· ॐ वृतोस्मि· प्रार्थना·

भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर।
वितते मम यज्ञेस्मिन् होता भव द्विजोत्तम॥

ॐ भवानि·

दैवज्ञं सम्पूज्य ममास्मिन्यज्ञे दैवज्ञत्वेन
त्वामहं वृणे· ॐ वृतोस्मि प्रार्थना·

भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर।
वितते मम यज्ञेस्मिन् दैवज्ञो भव सुव्रत॥

ॐ भवानि·

ऋत्विजं सम्पूज्य· ममास्मिन्यज्ञे ऋत्विक्त्वेन
त्वामहं वृणे· ॐ वृतोस्मि· प्रार्थना·

भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर।
वितते मम यज्ञेस्मिन् ऋत्विक्त्वंमे भवे भव॥

ॐ भवानि·

जापकं सम्पूज्य॰ ममास्मिन्यज्ञे ऋग्वेदमन्त्रजपकर्म कर्तुं जापकत्वेन त्वामहं वृणे॰ ॐ वृतोस्मि॰ प्रार्थना॰

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः।
आत्रेगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥

ॐ भवानि॰

अन्यं जापकं सम्पूज्य॰ ममास्मिन्यज्ञे यजुर्वेदमन्त्रजपकर्म कर्तुं जापकत्वेन त्वामहं वृणे॰ ॐ वृतोस्मि॰ प्रार्थना॰

कानराक्षो यजुर्वेद त्रैष्टुभो विष्णुदैवतः।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥

ॐ भवानि॰

अन्यं जापकं सम्पूज्य॰ ममास्मिन्यज्ञे सामवेदमन्त्रजपकर्म कर्तुं जापकत्वेन त्वामहं वृणे॰ ॐ वृतोस्मि॰ प्रार्थना॰

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥

ॐ भवानि॰

अन्यं जापकं सम्पूज्य॰ ममास्मिन्यज्ञे अथर्ववेदमन्त्र जपकर्मकर्तुं जापकत्वेन त्वामहं वृणे॰ ॐ वृतोस्मि॰ प्रार्थना॰

ब्रह्मनेत्रोथर्ववेदो त्रुष्टुभो रुद्रदैवतः।
वैशम्पायन विप्रेन्द्र ऋत्विक् त्वंमे मखे भव॥
ॐ भवानि:

द्वारपालं सम्पूज्य. ममास्मिन्यज्ञे ऋग्वेदसूक्तपाठनार्थं
द्वारपालत्वेन त्वामहं वृणे. ॐ वृतोस्मि. प्रार्थना.
ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः।
आत्रेगोत्रज् विप्रेन्द्र ऋत्विक् त्वं मे मखे भव॥
ॐ भवानि.
अन्यं द्वारपालं सम्पूज्य. ममास्मिन्यज्ञे यजुर्वेदसूक्तपाठ
नार्थं द्वारपालत्वेन त्वामहं वृणे. ॐ वृतोस्मि. प्रार्थना.
कानराक्षो यजुर्वेद स्त्रैष्टुभो विष्णुदैवतः।
काश्यपेयज् विप्रेन्द्र ऋत्विक् त्वंमे मखे भव॥
ॐ भवानि.

अन्यं द्वारपालं सम्पूज्य. ममास्मिन्यज्ञे सामवेदसूक्तपाठ
नार्थं द्वारपालत्वेन त्वामहं वृणे. ॐ वृतोस्मि. प्रार्थना.
सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः।
भारद्वाजज् विप्रेन्द्र ऋत्विक् त्वंमे मखे भव॥
ॐ भवानि.

अन्यं द्वारपालं स्पृशेत्. ममास्मिन्यज्ञे अथर्ववेदस्य रक्षणाय मार्गर्षिं द्वारपालत्वेन त्वामहं वृणे. ॐ वृतोऽस्मि. प्रार्थना.

हृद्गतो ह्यथर्ववेदो वृषभो रुद्रदैवतः।
वैशम्पायन विप्रेन्द्र द्वारिकस्त्वं मे मखे भव॥

ॐ भवामि.

ततः पीठचक्रादींश्च पूजयेत्.

सर्वेषां प्रार्थना.

अस्य यागस्य निष्पत्त्यै भवन्तोऽभ्यर्थिता मया।
सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम्॥

यथाविहितं कर्म कुरुत. यथामति करवाम:

पुण्याहवाचनम्

देयद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीरविक्रमवर्मा सपत्नीकः अहं मम करिष्यमाण राज्याभिषेचन कर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये। तदङ्गतया एभिश्चन्दन पुष्पाक्षत पूगीफल यज्ञोपवीत वस्त्रोपायनादिभिः पुण्याहवाचनार्थं ब्राह्मणं त्वामहं वृणे। ॐ वृतोऽस्मि।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीरविक्रमवर्मा सपत्नीकः अहं मम राज्याभिषेचन कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रुवन्तु। ३ ॐ पुण्याहम्। ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्रवीरविक्रमवर्मा सपत्नीकः अहं मम राज्याभिषेचनकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्ता

ॐ ऽ औषधयोपि: स्वस्तिनो बृहस्पतिर्दधातु:

—:—

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीर विक्रम वर्मा नेपालेशः अहं मम राज्याभिषेचन कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणा मम यज्ञे ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋद्ध्यताम् ३ ॐ सत्रस्य ऋद्धिरस्य गन्म ज्योतिर मृता अभूम। दिवं पृथिव्या अद्ध्यारुहामा देवान्स्वर्ज्योतिः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीर विक्रम वर्मा नेपालेशः अहं मम राज्याभिषेचन कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणा मम यज्ञे वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृद्ध्यताम् ३ ॐ ज्यैष्ठ्यं च मऽआधिपत्यं च मे मन्युश्च मे भामश्च मे मश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीर विक्रम वर्मा नेपालेशः अहं मम

राज्याभिषेचन कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणा
मम गृहे कल्याणं भवन्तो ब्रुवन्तु ३ ॐ कल्याणम् ३
ॐ यथेमां वाचङ्कल्याणीमावदानि जनेभ्यः ब्रह्मरा
जन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च. प्रियो
देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृ
द्ध्यताम्.

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीनराशिः देवेन्द्र वीरविक्रम वर्मा [illegible] अहं मम राज्याभिषे
चनकर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणा मम गृहे
श्रीरस्तु भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३ ॐ मनसः
काममाकूतिं वाचः सत्यमशीय. पशूनां रूपमन्न
स्य रसो यशः श्रीः श्रयताम्.

ॐ अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्र
वरः मीनराशिः देवेन्द्र वीरविक्रम वर्मा [illegible] अहं मम राज्या
भिषेचन कर्मणि सर्वाभ्युदय प्राप्तये भो ब्राह्मणा मम
गृहे शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॐ
द्यौःशान्ति रन्तरिक्षं. शान्तिः पृथिवी शान्तिरापः शा
न्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वे देवाः

शान्तिः सर्वꣳ· शान्तिः शान्तिरेव शान्तिः सामाशान्ते रेधि·

विश्वानि देव सवितर्दुरितानि परासुव · यद्भद्रं तन्न ऽआसुव·

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तथा ॥

पुण्याहवाचन समृद्धिरस्तु·

पूजन हवन कर्म.

अथ मातृका पूजन. नान्दी श्राद्ध. ग्रहवास्तु मण्डपदेवता पूजन. ध्वजापताको स्थापन. स्वगृह्योक्त प्रकारेण अग्नि प्रज्वालन पूर्वक ऐन्द्रीशान्तो प्रयोग लिखितेन प्रकारेण अग्निस्थापनादि हवनादि कर्म. सौवर्ण रजत ताम्र मृत्तिकादि कलशेषु अनेक तीर्थ जल घृत दुग्ध दधि सर्वौषधीभिः सं स्थापन पूजन कर्म च ब्राह्मण द्वारा कारयेत्.

अञ्जलिं बध्वा.

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
ॐ अच्युताय नमः
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनः द्वाभ्यां समे विष्णुः प्रसीदतु॥

(३२)

४

शुभ राज्याभिषेकको

ऐन्द्री·विनायक शान्तिको

प्रायश्चित्तगोदानम्.

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

गवे नमः। ज्ञात गेउडाय नमः

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

ब्राह्मणाय नमः

हरिः ॐ तत्सत् ३ विष्णुः ३ अद्येह श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे मनो सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे प्रह्लादाधिपत्ये सत्यत्रेताद्वापरान्ते कलियुगस्य प्रथमचरणे जम्बूद्वीपे भारतखण्डे आर्यावर्तान्तरे हिमवत्पर्वतैकदेशे पाशुपतक्षेत्रे इह जगप्रभो षष्ठी सम्वत्सराणां मध्ये सौम्य नाम सम्वत्सरे श्रीसूर्ये उत्तरायणे वसन्त ऋतौ मासोत्तमे मासे वैशाख मासे कृष्णे पक्षे सोमवासरान्वितायां पंचम्यां पुण्यतिथौ मेषराशिस्थिते श्रीसूर्ये धनुराशिस्थिते चन्द्रमसि कर्कटराशिस्थिते देवगुरौ अन्येषु ग्रहेषु यथा यथा स्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषेण विशिष्टायाम्.

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रि

वरः मौन एरीः देवेन्द्र वीर विक्रम वर्मा· सपत्नीकः अहं मम

श्री परमेश्वर प्रीति पूर्वक श्रुति स्मृति पुराणोक्त फलावाप्त्यै करिष्यमाण राज्याभिषेक कर्मणः प्राक् इमानि कर्माणि पूर्वकर्तव्य नियमानाचरण जन्य प्रत्यवाय परीहार पूर्वक सद्योदेह शुद्धि द्वारा तत्कर्माधिकार सिद्ध्यै प्रायश्चित्त प्रत्याम्नायी भूतं गो रुद्रदेवताकं तन्निष्क्रयी भूतं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

अद्य कृतैतत् प्रायश्चित्त प्रत्याम्नायी भूत गोदान कर्मणः प्रतिष्ठार्थं साङ्गता सिद्ध्यै इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

ततस्नानम·

ॐ शान्तिरस्तु· ॐ पुष्टिरस्तु· ॐ वृद्धिरस्तु· ॐ यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःख दारिद्र्यं तन्मस्मो प्रतिहतमस्तु· ॐ अमृताभिषेकोस्तु·

देवप्रार्थना.

दीपप्रार्थना.

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥
दीपनारायणाय नमः

वरुण प्रार्थना:

वरुणस्त्वं महाभाग सर्वदेव प्रपूजित ।
वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥
वरुणाय नमः

गणेश प्रार्थना.

वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
गणाधिपतये नमः

मातृका प्रार्थना.

ब्रह्माणीकमलेन्दु सौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।

वाराही घनघोर चर्चमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथ रुद्र सहिता रक्षन्तु नो मातरः॥
मातृभ्यो नमः

ग्रह प्रार्थना.
ब्रह्मा मुरारी त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनि राहु केतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु॥
नवग्रहेभ्यो नमः

अग्नि प्रार्थना.
अग्निं प्रज्वलितं वन्दे जातवेद हुतासनम्।
सुवर्ण वर्ण ममलं समिद्धं विश्वतो मुखम्॥
अग्नये नमः

इन्द्र प्रार्थना.
एह्येहि सर्वामर सिद्ध साध्यै
रभिष्टुतो वज्रधरामरेश।
संवीज्यमानोऽप्सरसां गणेन

एषाध्वरं नो भगवन् नमस्ते ॥
इन्द्राय नमः

विनायक प्रार्थना·
विनायक गणेशाय सर्वदेव नमस्कृत।
पार्वती प्रियविघ्नेश मम विघ्नं विनाशय ॥
विनायकाय नमः

अम्बीका प्रार्थना·
प्रजानां भूतये मातः अम्बिकारूपधारिणी।
जगन्मातर्जगद्धात्रि अम्बिकायै नमो नमः ॥
अम्बिकायै नमः

४ दिशाको ४ कलशले अभिषेक

ततः राजानं भद्रासने उपवेश्य अभिषिंचेत्.

पूर्वकलशमादाय.

ॐ सहस्राक्षं शतधारमृषिभिः पावनं कृतम्. तेन
त्वामभिषिंचामि पावमान्यः पुनन्तु ते.

दक्षिण कलशमादाय.

ॐ भगन्ते वरुणो राजा भगं सूर्यो बृहस्पतिः।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः॥

पश्चिम कलशमादाय.

ॐ यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि।
ललाटे कर्णयो रक्ष्णोरापस्तद्घ्नन्तु सर्वदा॥

उत्तर कलशमादाय.

ॐ सहस्राक्षं शतधारमृषिभिः पावनं कृतम्।
तेन त्वामभिषिंचामि पावमान्यः पुनन्तु ते॥
भगन्ते वरुणो राजा भगं सूर्यो बृहस्पतिः।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि।

ललाटे कर्णयो रक्ष्णो रापस्तद्घ्नन्तु सर्वदा॥
एनद्देहं पापं स्नानं सद्यस्नाताः ऋषि स्मृतम्।
तेनत्वां स्नानकारेण पावमान्यः पुनन्तु मा:॥
शक्रादि देवता दिक्पाला ब्रह्मेशः केशवादयः।
आपस्ते घ्नन्तु दौर्भाग्यं शान्तिं ददतु सर्वदा॥
समुद्राश्री स्यो नद्यो मुनयश्च पतिव्रता।
दौर्भाग्यं घ्नन्तु ते सर्वे शान्तिं यच्छन्तु सर्वदा॥
पादगुल्फोरुजंघासु नितंबेदर नाभिषु।
स्तनोरे वाहु हस्ताग्र ग्रीवां सगण्ड स्कन्धेषु॥
नासा ललाट कर्णभ्रू केशान्तेषु च पास्थितम्।
तदापो घ्नन्तु दौर्भाग्यं शान्तिं यच्छन्तु सर्वदा॥
ॐ सुमित्रियान ऽ आप ऽ ओषधयः सन्तु।
दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयन्द्विष्मः

शेषाग्नि हवन.

ततः आचार्य एकाकीएनै सर्षपतैलं औदुम्बरस्रुवेण जुहुयात्.

ॐ मिताय स्वाहा. इदं मिताय नमम.
ॐ संमिताय स्वाहा. इदं संमिताय नमम.
ॐ शालाय स्वाहा. इदं शालाय नमम.
ॐ कटंकटाय स्वाहा. इदं कटंकटाय नमम.
ॐ कुष्माण्डाय स्वाहा. इदं कुष्माण्डाय नमम.
ॐ राजपुत्राय स्वाहा. इदं राजपुत्राय नमम.

ततः पूर्व संकल्पितेन ब्राह्मणा वन्हौ षडाहुतीर्जुहुयात्.

ॐ मिताय स्वाहा. इदं मिताय.
ॐ संमिताय स्वाहा. इदं संमिताय.
ॐ शालाय स्वाहा. इदं शालाय.
ॐ कटंकटाय स्वाहा. इदं कटंकटाय.
ॐ कुष्माण्डाय स्वाहा. इदं कुष्माण्डाय.
ॐ राजपुत्राय स्वाहा. इदं राजपुत्राय.

नवग्रह अष्टयोगिनी दान

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः सोमवंशीः देवेन्द्रवीरविक्रम वर्मा नृपालिनः अहं मम श्रुति स्मृति पुराणोक्त फल प्राप्ती पूर्वक ग्रह योगिनीजनित सकलविघ्नबाधा निरसन पूर्वक राज्याभिषेक कर्म निर्विघ्नतासिद्ध्ये·

सूर्यग्रह प्रीतये गोधूमान्नं प्रजापति देवताकं· मसूरान्नं प्रजापति देवताकं· माणिक्यं समुद्रदेवताकं· सुवर्णं वह्नि देवताकं· ताम्रं सूर्यदेवताकं· रक्तवस्त्रं बृहस्पति देवताकं· तथा·

चन्द्र ग्रह प्रीतये तण्डुलान्नं प्रजापति देवताकं· दधि सर्पदेवताकं· शंखं समुद्रदेवताकं· कर्पूरं गन्धर्व देवताकं· वंशपात्रं विश्वकर्म देवताकं· मौक्तिकं समुद्र देवताकं· वस्त्रं बृहस्पति देवताकं· सुवर्णं वह्नि देवताकं· तथा·

भौम ग्रह प्रीतये गोधूमान्नं प्रजापति देवताकं· गुडं भूपदेवताकं· मसूरान्नं प्रजापति देवताकं· रक्तचन्दनं वनस्पति देवताकं· ताम्रं सूर्यदेवताकं· प्रवालं समुद्रदेवताकं· रक्तवस्त्रं बृहस्पति देवताकं· सुवर्णं वह्नि देवताकं· तथा·

बुधग्रह प्रीतये मुद्गान्नं प्रजापति देवताकं· श्रीखण्डं गन्धर्व देवताकं· मरकतमणिं समुद्र देवताकं· हरितवस्त्रं बृहस्पति देवताकं· सुवर्णं वह्नि देवताकं· तथा·

बृहस्पति ग्रह प्रीतये शर्करा सोमदेवताकं· धान्यं प्रजा

पति देवताकं · पुष्पराग मणिं समुद्र देवताकं · पीतवस्त्रं बृहस्पति देवताकं · सुवर्णं वह्नि देवताकं · हरिद्रां वनस्पति देवताकं · तथा ·

शुक्र ग्रह प्रीतये श्रीखण्डं वनस्पति देवताकं · चूर्णं मनुष्याय देवताकं · तण्डुलान् प्रजापति देवताकं · हीरकं समुद्र देवताकं · श्वेत वस्त्रं बृहस्पति देवताकं · रजत चन्द्र देवताकं · सुवर्णं वह्नि देवताकं · तथा ·

शनि ग्रह प्रीतये माषान्न प्रजापति देवताकं · तिलान् सोमदेवताकान् · तैलं भैरव देवताकं · लौह यम देवताकं · कृष्ण वस्त्रं बृहस्पति देवताकं सुवर्णं वह्नि देवताकं माहिषिं · यम देवताकां · तथा ·

राहु ग्रह प्रीतये माषान्न प्रजापति देवताकं · गोधुमान्नं प्रजापति देवताकं · तैलं भैरव देवताकं · लौह खड्गं · भैरव देवताकं · धूम्र वस्त्रं बृहस्पति देवताकं · सुवर्णं वह्नि देवताकं · माहिषं यम देवताकं · तथा

केतु ग्रह प्रीतये माषान्न प्रजापति देवताकं · गोधुमान्न प्रजापति देवताकं · तिलान् सोमदेवताकान् · तैलं भैरव देवताकं · वस्त्रं बृहस्पति देवताकं · सुवर्णं वह्नि देवताकं · छागं वह्नि देवताकं · तथा ·

मंगल योगिनी प्रीतये शर्करं सोमदेवताकान् ·

मधु यक्षदेवताकं·घृतं मृत्युञ्जय देवताकं·पट्टवस्त्रं बृहस्पति देवताकं·ताम्रपात्रं विश्वकर्म देवताकं·सुवर्णं वह्नि देवताकं·तथा

पिङ्गला योगिनी प्रीतये शर्करं सोम देवताकान्·मधु यक्ष देवताकं·घृतं मृत्युञ्जय देवताकं·पट्टवस्त्रं बृहस्पति देवताकं·ताम्रपात्रं विश्वकर्म देवताकं·सुवर्णं वह्नि देवताकं·तथा

धान्या योगिनी प्रीतये शर्करं सोमदेवताकान्·मधु यक्ष देवताकं·घृतं मृत्युञ्जय देवताकं·पट्टवस्त्रं बृहस्पति देवताकं·ताम्रपात्रं विश्वकर्म देवताकं·सुवर्णं वह्नि देवताकं·तथा

भ्रामरी योगिनी प्रीतये शर्करं सोमदेवताकान्·मधु यक्ष देवताकं·घृतं मृत्युञ्जय देवताकं·पट्टवस्त्रं बृहस्पति देवताकं·ताम्रपात्रं विश्वकर्म देवताकं·सुवर्णं वह्नि देवताकं·तथा

भद्रिका योगिनी प्रीतये शर्करं सोमदेवताकान्·मधु यक्ष देवताकं·घृतं मृत्युञ्जय देवताकं·पट्टवस्त्रं बृहस्पति देवताकं·ताम्रपात्रं विश्वकर्म देवताकं·सुवर्णं वह्नि देवताकं·तथा

उल्का योगिनी प्रीतये शर्करं सोमदेवताकान्·मधु यक्ष देवताकं·घृतं मृत्युञ्जय देवताकं·पट्टवस्त्रं बृहस्पति देवताकं·ताम्रपात्रं विश्वकर्म देवताकं·सुवर्णं वह्नि देवताकं·तथा

सिद्धा योगिनी प्रीतये शर्करं सोम देवताकान्·मधु यक्ष देवताकं·घृतं मृत्युञ्जय देवताकं·पट्टवस्त्रं बृहस्पति देवताकं·ताम्रपात्रं विश्वकर्म देवताकं·सुवर्णं वह्नि देवताकं·तथा

शङ्कुःटा योगिनीः प्रीतये शर्करां सोमदेवताकान् · मधु यक्षदेवताकं · घृतं मृत्युञ्जय देवताकं · पट्टवस्त्रं बृहस्पति देवताकं · ताम्रपात्रं विश्वकर्म देवताकं · सुवर्णं वह्नि देवताकं · नाना नाम गोत्रेभ्यो नाना नाम शर्मभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुं जले समुत्सृजे ·

प्रार्थना ·

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च · हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ·

ॐ इमन्देवा असपत्न ᳪ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्याय येन्द्रस्येन्द्रियाय · इमममुष्य पुत्र ममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणा ᳪ राजा ·

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् · अपा ᳪ रेता ᳪ सि जिन्वति ·

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते स ᳪ सृजेथामयञ्च · अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ·

ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु · यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रवि

णं धेहि चित्रम्·
ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्र
जापतिः ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्र
स्येन्द्रियमिदं पयोमृतं मधु·
ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये· शंयो रभिस्र
वन्तु नः
ॐ कयानश्चित्र आभुवदूतिः सदावृधः सखा· कयाश
चिष्ठया वृता·
ॐ केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे· समुषद्भिर
जायथाः
ॐ अम्बे अम्बिके म्बालिके न मा नयति कश्चन· ससस्त्य
श्वकः सुभद्रिकां काम्पीलवासिनीम्·

दानप्रतिष्ठा·

अद्य कृतैतत्· सूर्य· चन्द्र· भौम· बुध· बृहस्पति· शुक्र· शनि·
राहु· केतु· मङ्गला· पिङ्गला· धान्या· भ्रामरी· भद्रिका· उल्का·
सिद्धा· संकटा· प्रीतये तत्तद्द्रव्य दानकर्मणः प्रतिष्ठार्थं इदं
रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नाना नाम शर्मभ्यो
ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे· तत्स
नमम·

पूर्णपात्र दानम् ।

पूर्णपात्राय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः श्रीमन् एषः देवेन्द्रवीर विक्रम वर्मा सपत्नीकः अहं मम राज्याभिषेक कर्मणः प्राक् शान्तिकर्मणि कृतस्य हवन कर्मणः अपूर्णपूर्णार्थं पूर्णपात्रं प्रजापति दैवतकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यमहं

प्रणीता विमोकः

ॐ सुमित्रिया न ऽ आप ऽ ओषधयः सन्तु । इति प्रणीता जलेन ऐशान्याऽभिषिच्य ।

ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः इति प्रणीता पात्रं ऐशान्यां न्युब्जीकुर्यात् ।

बर्हिर्होमः

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पत ऽ इमन्देव यज्ञꣳ स्वाहा वाते धाः ।

मेधा

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषꣳ स्वाहा । याम्मेधान्देवगणाः पितरश्चोपासते । तया मामद्य मेधयाग्ने मेधाविनं कुरु

स्वाहा. मेधामे वरुणो ददातु मेधामग्निः प्रजापतिः मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा. इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्. मयि देवा दधतु श्रियमुत्तमां तस्यैते स्वाहा.

वस्त्रहोम:

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि: समाववर्त्ति पृथिवी समुषाः समुसूर्यः समुविश्वमिदं जगत्. वैश्वानर ज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा.

शेष चरुहोम:

ॐ अध्यादधामि समिधमग्ने व्रतपते त्वयि. व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा.

घृतच्छाया

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि· एवानो दूर्वे प्रतनु सहस्रेण शतेन च·

ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभि र्भूयात्· घृतेन द्यावा पृथिवी पूर्येथा मिन्द्रस्य छदिरसि विश्वजनस्य छाया·

अलक्ष्मीर्यच्च दौस्वप्नं सर्वगात्रेष्ववास्थितम्।
तत्सर्वं शमयाज्यत्वं लक्ष्मीं पुष्टींच वर्द्धय॥

सस्वर्ण घृत कांस्य पात्राय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मोनण्हो: देवेन्द्रवीर विक्रम वर्मा क्षिपतोक: अहं मम राज्याभिषेककर्मणः प्राक् कृतस्य ऐन्द्री विनायक शान्ति कर्मणि इदं स्वमुखावलोकिताज्य मृत्युञ्जय देवताकं सुवर्णं वह्नि देवताकं कांस्यपात्रं विश्वकर्म देवताकं ·····गोत्राय····· शर्मणे ब्राह्मणाय संप्रददे·

कामधेनो समुद्भूत देवनामुत्तमं हविः।
आयुर्वृद्धिकरं दत्त राज्यं पातु सदैव माम्॥

अद्य कृतैतन् स्वमुखावलोकिताज्य सुवर्ण कांस्यपात्र दानकर्मणः प्रतिष्ठासिद्ध्यर्थं इदं रजतं चन्द्रदेवताकं ·····गोत्राय····· शर्मणे ब्राह्मणाय सम्प्रददे· तत्सन्न मम·

पञ्चाङ्गगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः
गोनिष्क्रय रजत द्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीरविक्रमवर्मा नपाले अहं मम राज्याभिषेक कर्मणः प्राक् ऐन्द्री विनायकशान्ति कर्मणि इन्द्र विनायक अम्बिकायाः संपूजन हवनादि कर्मणः साङ्गता सिद्ध्यर्थं इदं गोप्रत्याम्नायीभूत रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

अद्य कृतैतत् गोप्रत्याम्नायीभूत रजतदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्मम.

उत्तराङ्ग. पूजा.

ऐन्द्री स्थापन कलशले अभिषेक

ततः राजत कलशोदकेन राजानं ऽभिषिंचेयुः
ॐ हिरण्यवर्णाः शुचयः पावकायासु जातः सविता या
स्वग्निः या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं
स्योना भवन्तु.
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्
जनानाम्. या अग्निं गर्भं दधिरे सुवर्णास्तान आपः
शं स्योना भवन्तु.
यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भव
न्ति. या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्योना
भवन्तु.
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत
त्वचं मे. घृतश्चुतः शुचयो याः पावकास्तान आपः
शं स्योना भवन्तु.

संपूजित इन्द्र प्रतिमा दानम्।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः नाम शर्मा: देवेन्द्र वीर विक्रम वर्मा सपत्निकः अहं मम कोष्ठिमाण ग्रहाभिषेक कर्मणि सकलोपद्रव निरसनार्थं कृतस्य ऐन्द्री शान्तिकर्मणः यथोक्तफलावाप्तये इमां एतत्कलश सहितां संपूजित सौवर्णि शक्र प्रतिमां विश्वकर्म देवताकां ...... गोत्राय शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे।

ऐरावत गजारूढ बलदैत्य निसूदन।
दानेनानेन देवेश मम शान्ति प्रदो भव॥

अद्य कृतैतत् संपूजित शक्र प्रतिमा दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्र देवताकं ......गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे। तत्सन्मम॥

संपूजित विनायक आम्बिका प्रतिमादानम्

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मोक्षणेच्छुः देवेन्द्र कोविक्रम वर्मा सपत्निकः अहं मम करिष्यमाण एतस्मिन्वैक कर्मणि सर्वोत्पात निरसनार्थं कृतस्य विनायक शान्ति कर्मणः साद्गुण्यार्थं संपूजितो विनायक अम्बिका प्रतिमा रूपो विष्णुदेवताको ......गोत्राय श्री......शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे।

विनायक महाबाहो सर्वोत्पात विनाशक।
दानेनानेन देवेश मम शान्ति प्रदो भव॥
अम्बिके जगदे देवि आदि शक्ति स्वरूपिणि।
दानेनानेन देवेशि मम शान्ति प्रदा भव॥

अथ कृतैतत् संपूजित विनायक अम्बिका प्रतिमादान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ......गोत्राय ......शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। तत्सन्मम।

भूयसी दक्षिणा

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

एतद्द्रव्येभ्यो नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः श्रीमान् राज्ञो देवेन्द्र वीर विक्रम वर्मा नेपालिकः अहं मम करिष्यमाण राज्याभिषेककर्मणि सकलोपद्रवनिरसनार्थं कृतस्य ऐन्द्रीशान्ति ~~[illegible]~~ तथा सर्वोत्पात निरसनार्थं कृतस्य विनायकशान्ति पूर्वक राज्याभिषेक निर्विघ्नतासिद्धये कृतस्य दीप कलश गणेश मातृका ग्रह संपूजन तत्तद्देवतानां हवन पूर्वक प्रधानभूत इन्द्र विनायक अम्बिकायाः पूजन हवन कर्मणः न्यूनातिरिक्त परिपूर्ति पूर्वक साद्गुण्यसिद्धये इमां भूयसीं दक्षिणां एतत् चन्द्रदैवताकं नानानाम गोत्रेभ्यो नाना नाम शर्मभ्यो ब्राह्मणेभ्यो दातुं जले सम्प्रसृजे। तत्सन्मम।

देवीविसर्जनम्।

अभिषेक·तिलक·प्रसाद·

ॐ सर्वे समुद्राः सरितेतीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षय कारकाः॥

द्यौःशान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा माशान्तिरेधि·

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्· पश्येम शरदः शतंजीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्·

स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिन पूषा विश्ववेदाः स्वस्तिनस्तार्क्ष्यो ऽरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु·

विश्वानि देव सवितर्दुरितानि परासुव· यद्भद्रन्तन्न आसुव·

ॐ शान्तिरस्तु· ॐ पुष्टिरस्तु· ॐ तुष्टिरस्तु· ॐ यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु· द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु· ॐ अमृताभिषेकोऽस्तु·

तिलकमन्त्रः

स्वायुष्यंजयदन्तेः ललाटे

कस्यपस्य त्र्यायुषम् · ग्रीवायाम् ·
यद्देवेषु त्र्यायुषम् · दक्षवाहुमूले ·
तन्नो अस्तु त्र्यायुषम् · हृदि ·

प्रसाद मन्त्राः
श्रीर्वर्चस्यमायुष्यमारोग्यमाविधात्पवमानं महीयते ·
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः
अव्याधिना शरीरेण मनसा च निराधिना ।
पूर्णलोर्चिना भाग्या त्वंजीव शरदो शतम् ॥
भद्रमस्तु शिवं चास्तु महालक्ष्मी प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

अञ्जलिं बध्वा ·
यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः

हस्ते जलं गृहीत्वा ·
कायेन वाचा मनसेन्द्रियैर्वा

बुद्ध्यात्मना वा प्रकृते स्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयेतत् ॥

(३४) ग्रहशान्ती संबन्धी

ईपद्रव्यानम:

षष्ठी सम्वत्सराणां मध्ये मन्मथ नाम सम्वत्सरे श्रीसूर्ये दक्षिणायने हेमन्तौ मासोत्तमे मासे सौरेण मार्ग मासे चान्द्रेण कार्तिक मासे शुक्ले पक्षे सोमवासरान्वितायां नवम्यां पुण्यतिथौ वृश्चिक राशिस्थिते श्रीसूर्ये कुंभराशौ स्थिते चन्द्रमसि कर्कट राशौ स्थिते देवगुरौ अन्येषु ग्रहेषु यथा यथा स्थान स्थितेषु सत्सु एवं ग्रहगुण विशेषेण विशिष्टायाम्.

अद्येह काश्यपगोत्र: काश्यपावत्सारनैध्रुवेति त्रिप्रवर: मीनराशि: देवेन्द्र वीर विक्रमवर्मा अहं मम.

जन्मलग्नात् २ वर्षलग्नात् ३ गोचरात् ८ स्थानस्थितेन भौम ग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्त्यर्थ भौमग्रह प्रीतये. गोधूमान्नं प्रजापति देवताकं. मसूरान्नं प्रजापति देवताकं. गुडं अब्देवताकं. ताम्रसूर्यदेवताकं. रक्तचन्दनं वनस्पति देवताकं. रक्तवस्त्रं बृहस्पति देवताकं. सुवर्णं वन्हिदेवताकं. प्रवालं समुद्रदेवताकं. तथा —

जन्मलग्नात् १ वर्षलग्नात् १ गोचरात् ३ स्थान स्थितेन शनिग्रहेण सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्त्यर्थ शनिग्रह प्रीतये. तिलान् सोमदेवताकान्. माषान्नं प्रजापति देवताकं. कुलत्थान्नं प्रजापति देवताकं. तैलं भैरवदेवताकं. लोहं यमदेवताकं. नीलवस्त्रं बृहस्पति देवताकं. सुवर्णं वह्निदेवताकं. नीलवस्त्रं समुद्र देवताकं. तथा —

योगिनी दशायां पिङ्गलानन्तर भ्रामरी योगिन्या सूचित सकलारिष्ट शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्याद्यवाप्त्यर्थ भ्रामरी योगिनी प्रीतये. ताम्रपात्रं विश्वकर्म देवताकं. घृतं मृत्युञ्जय देवताकं. शर्करां सोमदेवताकां. मधु यक्षदेवताकं. पट्टवस्त्रं बृहस्पति देवताकं. सुवर्णं वन्हिदेवताकं. तथा —

सर्वारिष्ट शान्तये सवत्सां गां रुद्र देवताकां. गजाश्वादिक्रयीभूतं रजतं चन्द्रदेवताकं. सर्वोपस्करयुतं आमान्नं प्रजापति देवताकं. नानानाम गोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुं जले समुत्सृजे.

प्रार्थना.

अग्निर्मूर्धा दिव: ककुत्पति: पृथिव्या अयम् । अपाᳫं रेताᳫंसि जिन्वति ॥
शन्नो देवी रभिष्टय आपो भवन्तु पीतये । शंयो रभि स्रवन्तु न: ॥
अम्बे अम्बिके ऽम्बालिके नमा नयति कश्चन : ससस्त्यश्वक: सुभद्रिकां काम्[illegible]वासिनीम् ॥
अन्नमेव यतो लक्ष्मी रन्नमेव जनार्दन: । अन्नं ब्रह्माखिलं त्राणमस्तु मे जन्म जन्मनि ॥
कपिले सर्वदेवानां पूजनीयासि रोहिणी । तीर्थ देवमयी यस्मात्तस्माच्छान्तिं प्रयच्छमे ॥

दानप्रतिष्ठा.

अद्य कृतैतत् . भौम. शनि. भ्रामरी. प्रीतये तत्तद्द्रव्यदान. सर्वारिष्टशान्ते गोदान. गजाश्वादिक्रयीभूत रजत दान. सर्वोपस्करणामान्नादि तत्तद्वस्तु दान. कर्मण: प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नाना नाम गोत्रेभ्यो नाना नाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे. तत्सन्न मम.

(३५)

करन्यासः ।

क्रां अङ्गुष्ठाभ्यां नमः ।
क्रीं तर्जनीभ्यां स्वाहा ।
क्रूं मध्यमाभ्यां वषट् ।
क्रैं अनामिकाभ्यां हूम् ।
क्रौं कनिष्ठिकाभ्यां वौषट् ।
क्रः करतलकरपृष्ठाभ्यां फट् ।

षडङ्गन्यासः ।

क्रां हृदयाय नमः ।
क्रीं शिरसे स्वाहा ।
क्रूं शिखायै वषट् ।
क्रैं कवचाय हुम् ।
क्रौं नेत्रत्रयाय वौषट् ।
क्रः अस्त्राय फट् ।

श्रीगणेशाय नमः ॥ ॥ अथ दक्षिणकालिकापूजाविधिः ॥ ॥ देवीस्थानमागत्य पूजासामग्रीं संपाद्य आसने उपविश्य दीपं प्रज्वाल्य आचमनं कुर्यात् ॥ ह्रीँ आत्मतत्वाय स्वाहा । ह्रीँ विद्यातत्वाय स्वाहा । ह्रीँ शिवतत्वाय स्वाहा ॥ ह्रीँ सर्वतत्वाय नमः इतिकरप्रक्षालनं कृत्वा आसनशुद्धिं कुर्यात् ॥ ह्रीँ आधारशक्तये कंकमलासनाय नमः ॥ इत्यासनं संपूज्य आसनं धृत्वा पठेत् ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥ हस्ते सर्षपाक्षतान्गृहीत्वा परितो विकिरेत् ॥ ॐ अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ अञ्जलिं बध्वा विष्णुं प्रार्थयेत् ॥ ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ जलं गृहीत्वा आत्मशुद्धिं कुर्यात् ॥ ॐ देव त्वं प्राकृतं चित्तं पापाक्रान्तमभून्मम ॥ तन्निःसारय चित्तान्मे पापं फट् फट् च ते नमः ॥ पुष्पादिकं गृहीत्वा देवान्प्रार्थयेत् ॥ ॐ सूर्यः सोमो यमः कालो महाभूता

नि पञ्च च ॥ एते शुभाशुभस्येह कर्मणो नव साक्षिणः ॥ अञ्जलिं बध्वा भैरवं प्रार्थयेत् ॥ ॐ तीक्ष्णादंष्ट्र महाकाय कल्पान्तदहनोपम ॥ भैरवाय नमस्तुभ्यं ममाज्ञां दातुमर्हसि ॥ ततः कर्मपात्रं कुर्यात् ॥ कुशान् ॥ ॐ पवित्रेस्थो वैष्णव्यो सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ जलम् ॥ ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये ॥ शं यो रभिस्रवन्तु नः ॥ यवान् ॥ ॐ यवोसि यवयास्मद्द्वेषो यवया रातीः ॥ तिलान् ॥ ॐ तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्पृणाहि नः स्वाहा ॥ गन्धम् ॥ ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम् ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ पुष्पाणि ॥ ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनो व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण सर्वलोकं मऽइषाण ॥ पवित्रीकरणम् ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु ॥ इति द्रव्याणि; आत्मानं

नपर्ते
च सिञ्चेत् ।। (अथ प्रायश्चित्तगोदानम् ।। ॐ नमो गो
भ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।। नमो ब्रह्मसुता
भ्यश्च पवित्राभ्यो नमो नमः ।। गोप्रत्याम्नायरजतद्रव्या
य नमः ।। ॐ अद्येह काश्यपगोत्रा काश्यपावत्सा
रनैध्रुवेति त्रिप्रवरा .... देवी अहं मम
कायिकवाचिकमानसिकसांसर्गिकादिज्ञाताज्ञानकृतस
कलपापक्षयपूर्वकसद्यो देहशुद्धिद्वारा श्रीस्वेष्टदेवता
याः दक्षिणकालिकायाः पूजनाधिकारतासिद्धये प्रा
यश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयरजतद्रव्यं चन्द्रदेवता
कं काश्यपगोत्राय .... शर्मणे ब्राह्मणाय तुभ्य
महं संप्रददे ।। प्रार्थना ।। कपिले सर्वदेवानां पूजनी
यासि रोहिणि ।। तीर्थदेवमयी यस्मादतः शान्तिं प्र
यच्छ मे ।। दानप्रतिष्ठा ।। अद्यकृतेन गोनिष्क्रयरज
तद्रव्यदानकर्मणः साङ्गफलप्राप्त्यर्थं रजतं चन्द्रदे
वतं काश्यपगोत्राय .... शर्मणे ब्राह्मणा
य दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे ।।) ततः पूजा
सङ्कल्पः ।। ॐ अद्येह काश्यपगोत्रा काश्यपावत्सा
रनैध्रुवेति त्रिप्रवरा .... देवी अहं मम

इह जन्मनि जन्मान्तरे वोपार्जित सकलपापक्षयपूर्वक श्रुतिस्मृति पुराणोक्तफलावाप्तिपुरःसरं मनसेप्सितावाप्तिकामनया विशेषतः श्रीस्वेष्टदेवतादक्षिणाकालीदेवीप्रीतये नानाविधोपचारैः श्रीस्वेष्टदेवता दक्षिणाकालीदेव्याः संपूजनं, तदङ्गत्वेन सुवर्णनेत्रार्पणकर्म करिष्ये, तथा कुक्कुट-हंस-मेषा-ऽज-महिष पञ्चजीवबलिप्रदानकर्म च करिष्ये ॥ अथाऽर्घस्थापनम् ॥ भूमौ चन्दनेन त्रिकोणवृत्तचतुरस्रमण्डलं विलिख्य तन्मध्ये शङ्खचक्रादि लिखित्वा ॐ शङ्खाय नमः ॥ ॐ चक्राय नमः इति संपूज्य फट् इति त्रिपादिकां प्रक्षाल्य शंखचक्रोपरि संस्थाप्य ॐ वह्निमण्डलाय दशकलात्मने नमः इति त्रिपादिकां संपूज्य तदुपरि अर्घं संस्थाप्य ॐ अर्कमण्डलाय द्वादशकलात्मने नमः ॥ इत्यर्घं संपूज्य ॐ नमः इति जलेनाऽऽपूर्य चन्दना-ऽक्षत-यव-सर्षप-दूर्वा-कुश-फल-पञ्चामृतादिकं दत्वा ॐ सोममण्डलाय षोडशकलात्मने नमः इति जलं संपूज्य अङ्कुशमुद्रया— ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥

नर्मदे सिन्धो कावेरि जलेस्मिन्सन्निधिं कुरु ॥ इति तीर्थान्यावाह्य धेनुमुद्रया अमृतीकृत्य मत्स्यमुद्रया आच्छाद्य ॐ इति दशधा जप्त्वा पात्रान्तरगृहीततज्जलेन ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥ इति पूजासामग्रीं आत्मानं च संप्रोक्ष्य प्राणायामं कुर्यात् ॥

पाठवहुणहँ कल्पः — १८ पत्रः

ततो दीपकलशगणेशादीन्संपूज्य हस्ते पुष्पादीन्यादाय ध्यायेत् ॥

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ॥ कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ॥ १ ॥
सद्यश्छिन्नशिरःखड्गवामोर्ध्वाधःकराम्बुजाम् ॥ अभयं वरदं चैव दक्षिणाधोर्ध्वपाणिकाम् ॥ २ ॥
महामेघप्रभां श्यामां तथा चैव दिगम्बराम् ॥ कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम् ॥ ३ ॥
कर्णावतंसतानीतशवयुग्मभयानकाम् ॥ घोरदंष्ट्राकरालास्यां पीनोन्नतपयोधराम् ॥ ४ ॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम् ॥ सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ॥ ॥ ५ ॥
घोररूपां महारौद्रीं श्मशानालयवासिनीम् ॥

दन्तुरां दक्षिणव्यापिमुक्तलम्बकचोच्चयाम् ॥ ६ ॥ शवरूपमहादेव हृदयोपरि संस्थिताम् ॥ शिवाभिर्घोररूपाभिश्चतुर्दिक्षु समन्विताम् ॥ ७ ॥ महाकालेन सार्द्धोर्द्धमुपविष्टरतातुराम् ॥ सुखप्रसन्नवदनां स्मेराननसरोरुहाम् ॥ ८ ॥ एवं संचिन्तयेद्देवीं श्मशानालयवासिनीम् ॥ आसनम् ॥ अस्मिन्वरासने देवि सुखासीनेऽक्षरात्मिके ॥ प्रतिष्ठिता भवेस्मा त्वं प्रसीद परमेश्वरि ॥ आसनं समर्पयामि दक्षिणकालिकायै नमः ॥ पाद्यम् ॥ पाद्यं गृहाण देवेशि सर्वदुःखापहारकम् ॥ त्रायस्व वरदे देवि नमस्ते शङ्करप्रिये ॥ पाद्यं समर्पयामि दक्षिणकालिकायै नमः ॥ अर्घ्यम् ॥ दूर्वाक्षतसमायुक्तं विल्वपत्रसमन्वितम् ॥ शोभनं शङ्खपात्रस्थं गृहाणार्घ्यं नमोस्तु ते ॥ अर्घ्यं समर्पयामि दक्षिणकालिकायै नमः ॥ आचमनम् ॥ मन्दाकिन्याश्च यद्वारि सर्वपापहरं शुभम् ॥ गृहाणाचमनीयं त्वं नस्ये भक्त्याहृतं मया ॥ आचमनं समर्पयामि दक्षिणकालिकायै नमः ॥ स्नानम् ॥ मन्दाकिनी गौतमी च यमुना च सरस्वती ॥ स्नानार्थं ते

प्रयच्छामि गृहाण जगदम्बिके ॥ स्नानं समर्पयामि दक्षिणकालिकायै नमः ॥ मधुपर्कः ॥ मधुपर्कं महादेवि ब्रह्माद्यैः परिकल्पितम् ॥ मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥ मधुपर्कं समर्पयामि दक्षिणकालिकायै नमः ॥ मधुपर्कस्नानाङ्ग शुद्धोदक स्नानम् ॥ मधुपर्कस्नानाङ्ग शुद्धोदकस्नानं समर्पयामि दक्षिणकालिकायै नमः ॥ पुनराचमनीयम् ॥ उच्छिष्टोप्यशुचिर्वापि यस्याः स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्यै तत्पुनराचमनीयकम् ॥ पुनराचमनीयं समर्पयामि दक्षिणकालिकायै नमः ॥ पञ्चामृतम् ॥ पञ्चामृतं मयानीतं पयोदधिघृतं च वै ॥ शर्करामधुसंयुक्तं स्नानार्थं प्रतिगृह्यताम् ॥ पञ्चामृतं समर्पयामि दक्षिणकालिकायै नमः ॥ शुद्धोदकम् ॥ मन्दाकिन्याः समानीतं हेमाम्भोरुहवासितम् ॥ स्नानाय ते मया भक्त्या गाङ्गं स्वीक्रियतां जलम् ॥ शुद्धोदकं समर्पयामि दक्षिणकालिकायै नमः ॥ श्वेत-रक्तादिवस्त्रम् ॥ बहुतन्तुसमायुक्तं पट्टसूत्रादिनिर्मितम् ॥ वासः शुक्लं तथा रक्तं गृहाण वरव

रीणि ॥ श्वेत-रक्तादिवस्त्रं समर्पयामि दक्षिणकालिकायै नमः॥ सौभाग्यद्रव्यम्॥ हरिद्रां कुंकुमं चैव सिन्दूरं कज्जलान्वितम्॥ सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरि॥ सौभाग्यद्रव्यं समर्पयामि दक्षिणकालिकायै नमः॥ सुगन्धिद्रव्यम्॥ अनुलेपनमेतत्ते महासुरभिशीतलम्॥ मया निवेदितं देवि गृहाण जगदम्बिके॥ सुगन्धिद्रव्यं समर्पयामि दक्षिणकालिकायै नमः॥ चन्दनम्॥ श्रीखण्डचन्दनं दिव्यं कुंकुमेन समन्वितम्॥ विलेपनं महाकालि प्रीत्यर्थं प्रतिगृह्यताम्॥ चन्दनं समर्पयामि दक्षिणकालिकायै नमः॥ रक्तचन्दनम्॥ रक्तचन्दनं समर्पयामि दक्षिणकालिकायै नमः॥ सिन्दूरम्॥ सिन्दूरं शचीदैवत्यं निर्मितं विश्वयोनिना॥ मया निवेदितं देवि सिन्दूरं प्रतिगृह्यताम्॥ सिन्दूरं समर्पयामि दक्षिणकालिकायै नमः॥ पिष्टातकम्॥ शरीरं ते न जानामि चेष्टान्नैव च नैवच॥ मया निवेदितान् चूर्णान्गृहाण कालि ते नमः॥ पिष्टातकं समर्पयामि दक्षिणकालिकायै नमः॥ केशरी ॥ केशरी

चन्दनं समर्पयामि दक्षिणकालिकायै नमः ॥ रोच
ना ॥ रोचनां समर्पयामि दक्षिणकालिकायै नमः ॥
अक्षताः ॥ रञ्जिताः कुंकुमौघेन चाक्षताश्चातिशोभ
नाः ॥ ममैषां देवि दानेन प्रसन्ना भव चण्डिके ॥
अक्षतान् समर्पयामि दक्षिणकालिकायै नमः ॥ यवा
क्षतान् ॥ धान्यराजाश्च माङ्गल्या विष्णोः प्रीतिकरा
यवाः ॥ तेषां प्रदानमात्रेण ह्यायुर्वृद्धिकराः सदा ॥
यवाक्षतान्समर्पयामि दक्षिणकालिकायै नमः ॥
तिलाः ॥ तिलान्समर्पयामि दक्षिणकालिकायै न
मः ॥ पुष्पाणि ॥ पुष्पं मनोहरं दिव्यं गन्धाढ्यं सुम
नोहरम् ॥ घ्राशस्त्वं तर्पणं हृद्यं देवि दत्तं प्रगृह्यता
म् ॥ पुष्पाणि समर्पयामि दक्षिणकालिकायै नमः
॥ पुष्पमाला ॥ सूत्रेण ग्रथितां मालां नानापुष्प
समन्विताम् ॥ श्रीयुक्तां लम्बमानां च गृहाण प
रमेश्वरि ॥ पुष्पमालां समर्पयामि दक्षिणकालिका
यै नमः ॥ बिल्वपत्राणि ॥ अमृतोद्भवं श्रीवृक्षं त
व प्रीतिकरं सदा ॥ बिल्वपत्रं प्रयच्छामि पवित्रं
ते सुरेश्वरि ॥ बिल्वपत्राणि समर्पयामि दक्षिणका

नपर्तैः क्षता

लिकायै नमः॥(ततो गणिताद्दीनि समर्पयेत्॥ सङ्कल्पः — ॐ अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा………………… देवी अहं मम इहजन्मनि जन्मान्तरे वोपार्जितसकलपापक्षयद्वारा श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकं मनोभिलसितावाप्तिकामनया विशेषतः श्रीस्वेष्टदेवतायाः दक्षिणकालिकायाः प्रीतये………………… संख्याकान् अक्षतान् समर्पयिष्ये॥ गणिताक्षतान्समर्पयामि दक्षिणकालिकायै नमः॥ धूपः॥ वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥ धूपं आघ्रापयामि दक्षिणकालिकायै नमः॥ दीपः॥ अग्निर्ज्योती रविर्ज्योतिश्चन्द्रज्योतिस्तथैव च॥ ज्योतिषामुत्तमोज्योतिर्दीपोयं प्रतिगृह्यताम्॥ दीपं दर्शयामि दक्षिणकालिकायै नमः॥ नैवेद्यम्॥ घृतपक्वं हविष्यान्नं नानारूपविनिर्मितम्॥ भक्त्या निवेदितं देवि ग्रहाण जगदम्बिके॥ नैवेद्यं समर्पयामि दक्षिणकालिकायै नमः॥ फलनैवेद्यम्॥ फलमूलानि चान्यानि ग्राम्यारण्यानि यानि च॥ना

नाविधानि दिव्यानि गृह्ण देवि मयार्पितम् ॥ फलनैवेद्यं समर्पयामि दक्षिणकालिकायै नमः ॥ पानीयम् ॥ जलं च शीतलं स्वच्छं सुगन्धि सुमनोहरम् । मया निवेदितं भक्त्या पानीयं प्रतिगृह्यताम् ॥ पानीयं समर्पयामि दक्षिणकालिकायै नमः ॥ करोद्वर्तनम् ॥ मृगनाभिसुसंयुक्तं शर्करादिसमन्वितम् ॥ करोद्वर्तनकं देवि गृहाण जगदम्बिके ॥ करोद्वर्तनं समर्पयामि दक्षिणकालिकायै नमः ॥ पूगीफलम् ॥ इदं फलं मया देवि स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ पूगीफलं समर्पयामि दक्षिणकालिकायै नमः ॥ ताम्बूलम् ॥ फलपत्रकसंयुक्तं कर्पूरेण समन्वितम् ॥ मया निवेदितं भक्त्या ताम्बूलं प्रतिगृह्यताम् ॥ ताम्बूलं समर्पयामि दक्षिणकालिकायै नमः ॥ द्राक्षालवङ्गजातीफलादिनानाफलानि ॥ द्राक्षालवङ्गजातीफलादिनानाफलानि समर्पयामि दक्षिणकालिकायै नमः ॥ नारिकेलफलम् ॥ नारिकेलफलं दिव्यं शङ्करेण विनिर्मितम् ॥ पयसा पूरितं देवि गृहाण परमेश्वरि ॥ नारिकेलफलं समर्पयामि

दक्षिणकालिकायै नमः ॥ द्रव्यम् ॥ उपायनं प्रदास्यामि सुवर्णरजनादिकम् ॥ पूजिता कृत्रिमं वापि गृहाण धातुमुत्तमम् ॥ द्रव्यं समर्पयामि दक्षिणकालिकायै नमः ॥ ॥ ततो देव्या दक्षिणभागे महाकालं पूजयेत् ॥ ॐ महाकालाय नमः ॥ इति मन्त्रेण पाद्यादिभिः पूजयेत् ॥ ॥ ततो ब्राह्म्याद्यष्टमातृपूजनम् ॥ ॐ ब्राह्म्यै नमः इति पाद्यादिभिः पूजयित्वा प्रार्थयेत् ॥ चतुर्मुखीं जगद्धात्रीं हंसारूढां वरप्रदाम् ॥ सृष्टिरूपां महाभागां ब्राह्मीं वन्दे जगन्मयीम् ॥ पुष्पाञ्जलिं समर्पयामि ब्राह्म्यै नमः ॥ ॐ माहेश्वर्यै नमः ॥ इति पाद्यादिभिः पूजयित्वा पुष्पादिकमादाय प्रार्थयेत् ॥ वृषारूढां शुभां शुभ्रां त्रिनेत्रां वरदां शिवाम् ॥ माहेश्वरीं नमाम्यद्य सृष्टिसंहारकारिणीम् ॥ पुष्पाञ्जलिं समर्पयामि माहेश्वर्यै नमः ॥ ॐ कौमार्यै नमः इति पाद्यादिभिः पूजयित्वा पुष्पादिकमादाय प्रार्थयेत् ॥ कौमारीं पीतवसनां मयूरवरवाहिनीम् ॥ शक्तिहस्तां शुभाङ्गीं तां नमामि वरदां सदा ॥ पुष्पाञ्जलिं समर्पयामि कौ-

मायै नमः ॥ ॐ वैष्णव्यै नमः इति पाद्यादिभिः पूजयित्वा पुष्पादिकमादाय प्रार्थयेत् ॥ शङ्खचक्रगदापद्मधारिणीं कृष्णरूपिणीम् ॥ सृष्टिरूपां खगेन्द्रस्थां वैष्णवीं तां नमाम्यहम् ॥ पुष्पाञ्जलिं समर्पयामि वैष्णव्यै नमः ॥ ॐ वाराह्यै नमः इति पाद्यादिभिः पूजयित्वा पुष्पादिकमादाय प्रार्थयेत् ॥ वराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ॥ शुभदां पीतवसनां वाराहीं तां नमाम्यहम् ॥ पुष्पाञ्जलि समर्पयामि वाराह्यै नमः ॥ ॐ इन्द्राण्यै नमः ॥ इति पाद्यादिभिः पूजयित्वा पुष्पादिकमादाय प्रार्थयेत् ॥ इन्द्राणीं गजमध्यस्थां सहस्रनयनोज्ज्वलाम् ॥ नमामि वरदां देवीं सर्वदेवनमस्कृताम् ॥ पुष्पाञ्जलिं समर्पयामि इन्द्राण्यै नमः ॥ ॐ चामुण्डायै नमः इति पाद्यादिभिः पूजयित्वा पुष्पादिकमादाय प्रार्थयेत् ॥ चामुण्डां मुण्डमथनीं मुण्डमालोपशोभिताम् ॥ अट्टाट्टहासमुदितां प्रणमामि विभूतये ॥ पुष्पाञ्जलिं समर्पयामि चामुण्डायै नमः ॥ ॐ चण्डिकायै नमः इति पाद्यादिभिः पूजयित्वा पुष्पादिकमादाय प्रार्थयेत् ॥ चण्डिके न

वदुर्गे त्वं महादेवमनोरमे॥ पूजां समस्तां संगृह्य रक्षमां त्रिदशेश्वरि॥ पुष्पाञ्जलिं समर्पयामि चण्डिकायै नमः॥ ॥ ततो यथाशक्ति कालीबीजजपं कृत्वा नीराजनं कुर्यात्॥ नीराजनं गृहाणाम्ब बहुदीपविराजितम्॥ प्रभापूरितसर्वाङ्गं मङ्गले मङ्गलास्पदे॥ नीराजयामि दक्षिणकालिकायै नमः॥ ततो लक्षादिवर्तिकादानम्॥ वर्तिकाः प्रज्वाल्य सम्पूज्य कुशादिकमादाय ॐ अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ……………… देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकं श्रीस्वेष्टदेवतादक्षिणकालीदेवीप्रीतये राजतदीपपात्रस्थितसुवर्णवर्तिकासहितघृताक्तप्रज्वलितलक्षसंख्याकवर्तिकाभिर्नीराजयिष्ये· इत्युत्सृज्य नीराजयेत्॥ नीराजनं गृहाणाम्ब बहुदीपविराजितम्॥ लक्षदीपप्रदानेन मम सन्तु मनारथाः॥ लक्षदीपैर्नीराजयामि दक्षिणकालिकायै नमः॥ अथ पञ्चबलिदानम्॥ बलिं संप्रोक्षेत्॥ प्राणिनामुपकारार्थं पशुश्रेष्ठो मयाधुना॥ प्रोक्षितो भवतु प्रीत्यै तमेवार्थं विभा

मा. नयस्त्र

न पश्चस्तूत्र

वये ॥ इति संप्रोक्ष्य ॐ परमपशुरूपिणे नमः इति संपूज्य प्रार्थयेत् ॥ छाग त्वं बलिरूपेण मम भाग्यादुपस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ कालिकाप्रीतिदानेन दातुरापद्विनाशनम् ॥ कालिकाबलिरूपोयं बले तुभ्यं नमो नमः ॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोवधः ॥ इति संप्रार्थ्य सङ्कल्पं कुर्यात् ॥ ॐ अद्येह .... गोत्रः .... प्रवरः .... अहं मम भूतप्रेतपिशाचयक्षराक्षसवेतालकूष्माण्डविनायकडाकिनीशाकिनीग्रहाद्यावेशजन्यसकलबाधोपसर्गनिवृत्तिपूर्वकं श्रीदक्षिणकालिकादेवताप्रसादतो विविधविभूतिसमृद्धिनैरुज्योदयप्राप्तये श्रीदक्षिणकालिकाप्रीतये कुक्कुट-हंस-मेषा-ऽज-महिषपञ्चजीवबलिं इमं सुपूजितं घातनेन समर्पयिष्ये ॥ ततः पशोर्दक्षिणकर्णे पशुगायत्रीं श्रावयेत् ॥ पशुपाशाय विद्महे शिरश्छेदनाय धीमहि ॥ तन्नः पशुः प्रचोदयात् ॥ ततो बलिं दद्यात् ॥ ॥ ततः पञ्चाङ्गपाठादि संक

ल्पः ॥ ॐ अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा …………………… देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वकं श्रीस्वेष्टदेवतादक्षिणकालिकाप्रीतये (एकावृत्त कालिकापञ्चाङ्ग-स्तोत्रपाठकर्म) तथा नवावृत्त ककारादि कालिकासहस्रनामस्तोत्रपाठकर्म. तथा नवावृत्त सप्तशती स्तोत्र-पाठकर्म ब्राह्मणद्वारा करिष्ये; तत्कर्मकर्तुं नानानामगोत्रान्नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतादिभिर्युष्मानहं वृणे; (करिष्यमाण तत्तत्पाठकर्मणः साङ्गतासिद्ध्यर्थं, तथा श्रीस्वेष्टदेवतायाः दक्षिणकालिकायाः कृतस्य पञ्चबलिसहितसंपूजनकर्मणो न्यूनातिरिक्तपरिपूर्णार्थं च इमां दक्षिणां रौप्यं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य पाठदक्षिणात्वेन भूयसीदक्षिणात्वेन च दातुमहमुत्सृजे तत्सन्न मम ॥ ततः कर्पूरनीराजनम् ॥ कन्दर्पदर्पकं यस्मात्कर्पूरेण च तर्पणम् ॥ अहर्पतिभवस्तापस्त्वद्दानादपसर्पतु ॥ कर्पूरेण नीराज

यामि श्रीदक्षिणकालिकायै नमः ॥ पुष्पाञ्जलिः ॥ ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥१॥ कालिकां त्वां महादेवीं दैत्यवर्गविनाशिनीम् ॥ भक्तानामभयं कर्त्रीं नमामि विश्वमातरम् ॥२॥ जय देवि कालिके त्वं जय देवप्रमोदिनि ॥ जय दुर्गे प्रपन्नार्तिपरित्राणपरायणे ॥३॥ प्रणमामि महामायां संसारार्णवनाशिनीम् ॥ शान्तिं पुष्टिं च मे देहि सततं प्रणमाम्यहम् ॥४॥ भक्तिपूजां न जानामि क्षमस्व परमेश्वरि ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥५॥ अपराधसहस्राणि सहस्रमयुतं तथा ॥ तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥६॥ पुष्पाञ्जलिं समर्पयामि दक्षिणकालिकायै नमः ॥ प्रदक्षिणा ॥ यानि कानि च पापानि जन्मान्तरकृतानि च ॥ तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे ॥ प्रार्थना ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ अज्ञानाद्विस्मृतेर्भ्रान्त्या य

न्यूनमधिकं कृतम् ॥ तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ नमस्कारः ॥ महाकालि नमस्तेऽस्तु नमस्त्रैलोक्यनायिके ॥ शिवकान्ते नमस्तेऽस्तु त्राहि मां परमेश्वरि ॥ ॥ पाठ भूयसी दक्षिणा संकल्पः

अथ, उत्तराङ्ग पूजनं विधाय;

दीप-कलश-गणेशविसर्जनं कृत्वा ॐ यस्य स्मृत्या च नामोक्त्या जपो यज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ॥ करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ श्रीदेव्यर्पणमस्तु ॥ ॥ इति श्रीदक्षिणाकालिका पूजाविधिः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

शतनाम

१ ॐ काल्यै नमः
२ ॐ कपालिन्यै नमः
३ ॐ कान्तायै नमः
४ ॐ कामदायै नमः
५ ॐ कामसुन्दर्यै नमः
६ ॐ कालरात्र्यै नमः
७ ॐ कालिकायै नमः
८ ॐ कालभैरवपूजितायै नमः
९ ॐ कुरुकुल्लायै नमः
१० ॐ कामिन्यै नमः
११ ॐ कमनीयस्वभाविन्यै नमः
१२ ॐ कुलीनायै नमः
१३ ॐ कुलकर्त्र्यै नमः
१४ ॐ कुलवर्त्मप्रकाशिन्यै नमः
१५ ॐ कस्तूरीरसनीलायै नमः
१६ ॐ काम्यायै नमः
१७ ॐ कामस्वरूपिण्यै नमः
१८ ॐ ककारवर्णनिलयायै नमः

१९ ॐ कामधेनवे नमः
२० ॐ करालिकायै नमः
२१ ॐ कुलकान्तायै नमः
२२ ॐ करालास्यायै नमः
२३ ॐ कामार्तायै नमः
२४ ॐ कलावत्यै नमः
२५ ॐ कृशोदर्यै नमः
२६ ॐ कामाख्यायै नमः
२७ ॐ कौमार्यै नमः
२८ ॐ कुलपालिन्यै नमः
२९ ॐ कुलजायै नमः
३० ॐ कुलकन्यायै नमः
३१ ॐ कलहायै नमः
३२ ॐ कुलपूजितायै नमः
३३ ॐ कामेश्वर्यै नमः
३४ ॐ कामकान्तायै नमः
३५ ॐ कुञ्जरेश्वरगामिन्यै नमः
३६ ॐ कामदात्र्यै नमः

३७ ॐ कामहर्त्र्यै नमः
३८ ॐ कृष्णायै नमः
३९ ॐ कपर्दिन्यै नमः
४० ॐ कुमुदायै नमः
४१ ॐ कृष्णदेहायै नमः
४२ ॐ कालिन्द्यै नमः
४३ ॐ कुलपूजितायै नमः
४४ ॐ काश्यप्यै नमः
४५ ॐ कृष्णमात्रे नमः
४६ ॐ कुलिशाङ्ग्यै नमः
४७ ॐ कलायै नमः
४८ ॐ क्रींरूपायै नमः
४९ ॐ कुलगम्यायै नमः
५० ॐ कमलायै नमः
५१ ॐ कृष्णपूजिनायै नमः
५२ ॐ कृशाङ्ग्यै नमः
५३ ॐ क्लिन्नायै नमः
५४ ॐ कर्त्र्यै नमः

५५ ॐ कलकण्ठ्यै नमः
५६ ॐ कार्तिक्यै नमः
५७ ॐ कम्बुकण्ठ्यै नमः
५८ ॐ कौलिन्यै नमः
५९ ॐ कुमुदायै नमः
६० ॐ कामजीविन्यै नमः
६१ ॐ कुलस्त्रीयै नमः
६२ ॐ कीर्तिकायै नमः
६३ ॐ कृत्यायै नमः
६४ ॐ कीर्तये नमः
६५ ॐ कुलपालिकायै नमः
६६ ॐ कामदेवकलायै नमः
६७ ॐ कल्पलतायै नमः
६८ ॐ कामाङ्गवर्द्धिन्यै नमः
६९ ॐ कुन्तायै नमः
७० ॐ कुमुदप्रीतायै नमः
७१ ॐ कदम्बकुसुमोत्सुकायै नमः
७२ ॐ कादम्बिन्यै नमः

७३ ॐ कमलिन्यै नमः
७४ ॐ कृष्णानन्दप्रदायिन्यै नमः
७५ ॐ कुमारीपूजनरतायै नमः
७६ ॐ कुमारीगणशोभितायै नमः
७७ ॐ कुमारीरञ्जनरतायै नमः
७८ ॐ कुमारीव्रतधारिण्यै नमः
७९ ॐ कङ्काल्यै नमः
८० ॐ कमनीयायै नमः
८१ ॐ कामशास्त्रविशारदायै नमः
८२ ॐ कपालखट्वाङ्गःधरायै नमः
८३ ॐ कालभैरवरूपिण्यै नमः
८४ ॐ कोटर्यै नमः
८५ ॐ कोटराक्ष्यै नमः
८६ ॐ काश्यै नमः
८७ ॐ कैलासवासिन्यै नमः
८८ ॐ कात्यायन्यै नमः
८९ ॐ कार्यकर्यै नमः
९० ॐ काव्यशास्त्रप्रमोदिन्यै नमः

९१ ॐ कामाकर्षणरूपायै नमः
९२ ॐ कामपीठनिवासिन्यै नमः
९३ ॐ कङ्किन्यै नमः
९४ ॐ काकिन्यै नमः
९५ ॐ क्रीडायै नमः
९६ ॐ कुत्सिनायै नमः
९७ ॐ कलहप्रियायै नमः
९८ ॐ कुण्डगोलोद्भवप्राणायै नमः
९९ ॐ कौशिक्यै नमः
१०० ॐ कीर्तिवर्द्धिन्यै नमः
१०१ ॐ कुम्भस्तन्यै नमः
१०२ ॐ कटाक्षायै नमः
१०३ ॐ काव्यायै नमः
१०४ ॐ कोकनदप्रियायै नमः
१०५ ॐ कान्तारवासिन्यै नमः
१०६ ॐ कान्त्यै नमः
१०७ ॐ कठिनायै नमः
१०८ ॐ कृष्णावल्लभायै नमः

इति.

सहस्रनाम

१ ॐ क्रीँ काल्यै नमः
२ ॐ क्रूँ कराल्यै नमः
३ ॐ कल्याण्यै नमः
४ ॐ कमलायै नमः
५ ॐ कलायै नमः
६ ॐ कलावत्यै नमः
७ ॐ कलाढ्यायै नमः
८ ॐ कलापूज्यायै नमः
९ ॐ कलात्मिकायै नमः
१० ॐ कलाहृष्टायै नमः
११ ॐ कलापुष्टायै नमः
१२ ॐ कलामस्तायै नमः
१३ ॐ कलाकरायै नमः
१४ ॐ कलाकोटिसमाभासायै नमः
१५ ॐ कलाकोटिप्रपूजितायै नमः
१६ ॐ कलाकर्मकलाधारायै नमः
१७ ॐ कलापरायै नमः
१८ ॐ कलागमायै नमः
१९ ॐ कलधारायै नमः
२० ॐ कमलिन्यै नमः
२१ ॐ ककारायै नमः
२२ ॐ करुणायै नमः
२३ ॐ कव्यै नमः
२४ ॐ ककारवर्णसर्वाङ्ग्यै नमः
२५ ॐ कलाकोटिप्रभूषितायै नमः
२६ ॐ ककारकोटिगुणितायै नमः
२७ ॐ ककारकोटिभूषणायै नमः
२८ ॐ ककारवर्णहृदयायै नमः
२९ ॐ ककारमनुमण्डितायै नमः
३० ॐ ककारवर्णनिलयायै नमः
३१ ॐ काकशब्दपरायणायै नमः
३२ ॐ ककारवर्णमुकुटायै नमः
३३ ॐ ककारवर्णभूषणायै नमः
३४ ॐ ककारवर्णरूपायै नमः
३५ ॐ ककशब्दपरायणायै नमः
३६ ॐ ककवीरास्फालरतायै नमः
३७ ॐ कमलाकरपूजितायै नमः
३८ ॐ कमलाकरनाथायै नमः

३९ ॐ कमलाकररूपधृषे नमः
४० ॐ कमलाकरसिद्धिस्थायै नमः
४१ ॐ कमलाकरपारदायै नमः
४२ ॐ कमलाकरमध्यस्थायै नमः
४३ ॐ कमलाकरतोषितायै नमः
४४ ॐ कथङ्कारपरालापायै नमः
४५ ॐ कथङ्कारपरायणायै नमः
४६ ॐ कथङ्कारपदान्तस्थायै नमः
४७ ॐ कथङ्कारपदार्थभुवे नमः
४८ ॐ कमलाक्ष्यै नमः
४९ ॐ कमलजायै नमः
५० ॐ कमलाक्षप्रपूजितायै नमः
५१ ॐ कमलाक्षवरोद्युक्तायै नमः
५२ ॐ ककारायै नमः
५३ ॐ कर्बूराक्षरायै नमः
५४ ॐ करतारायै नमः
५५ ॐ करच्छिन्नायै नमः
५६ ॐ करश्यामायै नमः
५७ ॐ करार्णवायै नमः
५८ ॐ करपूज्यायै नमः
५९ ॐ कररतायै नमः
६० ॐ करदायै नमः
६१ ॐ कर पूजितायै नमः
६२ ॐ करतोयायै नमः
६३ ॐ करामर्षायै नमः
६४ ॐ कर्मनाशायै नमः
६५ ॐ करप्रियायै नमः
६६ ॐ करप्राणायै नमः
६७ ॐ करकजायै नमः
६८ ॐ करकायै नमः
६९ ॐ करकान्तरायै नमः
७० ॐ करकाचलरूपायै नमः
७१ ॐ करकाचलशोभिन्यै नमः
७२ ॐ करकाचलपुत्र्यै नमः
७३ ॐ करकाचलतोषितायै नमः
७४ ॐ करकाचलगेहस्थायै नमः
७५ ॐ करकाचलरक्षिण्यै नमः
७६ ॐ करकाचलसम्मान्यायै नमः

७७ ॐ करकाचलकारिण्यै नमः
७८ ॐ करकाचलवर्षाढ्यायै नमः
७९ ॐ करकाचलरञ्जितायै नमः
८० ॐ करकाचलकान्तारायै नमः
८१ ॐ करकाचलमालिन्यै नमः
८२ ॐ करकाचलभोज्यायै नमः
८३ ॐ करकाचलरूपिण्यै नमः
८४ ॐ करामलकसंस्थायै नमः
८५ ॐ करामलकसिद्धिदायै नमः
८६ ॐ करामलकसंपूज्यायै नमः
८७ ॐ करामलकतारिण्यै नमः
८८ ॐ करामलककाल्यै नमः
८९ ॐ करामलकरोचिन्यै नमः
९० ॐ करामलकमात्रे नमः
९१ ॐ करामलकसेविन्यै नमः
९२ ॐ करामलकवद्ध्येयायै नमः
९३ ॐ करामलकदायिन्यै नमः
९४ ॐ कञ्जनेत्रायै नमः
९५ ॐ कञ्जमन्यै नमः
९६ ॐ कञ्जस्थायै नमः
९७ ॐ कञ्जधारिण्यै नमः
९८ ॐ कञ्जमालाप्रियकर्यै नमः
९९ ॐ कञ्जरूपायै नमः
१०० ॐ कञ्जजायै नमः
१०१ ॐ कञ्जजात्यै नमः
१०२ ॐ कञ्जगत्यै नमः
१०३ ॐ कञ्जहोमपरायणायै नमः
१०४ ॐ कञ्जमण्डलमध्यस्थायै नमः
१०५ ॐ कञ्जाभरणभूषितायै नमः
१०६ ॐ कञ्जसम्माननिरतायै नमः
१०७ ॐ कञ्जोत्पत्तिपरायणायै नमः
१०८ ॐ कञ्जराशिसमाकारायै नमः
१०९ ॐ कञ्जारण्यनिवासिन्यै नमः
११० ॐ करञ्जवृक्षमध्यस्थायै नमः
१११ ॐ करञ्जवृक्षवासिन्यै नमः
११२ ॐ करञ्जफलभूषाढ्यायै नमः
११३ ॐ करञ्जारण्यवासिन्यै नमः
११४ ॐ करञ्जमालाभरणायै नमः

११५ ॐ करवालपरायणायै नमः
११६ ॐ करवालप्रहृष्टात्मने नमः
११७ ॐ करवालप्रियागत्यै नमः
११८ ॐ करवालप्रियाकन्थायै नमः
११९ ॐ करवालविहारिण्यै नमः
१२० ॐ करवालमय्यै नमः
१२१ ॐ कर्मायै नमः
१२२ ॐ करवालप्रियङ्कर्यै नमः
१२३ ॐ कबन्धमालाभरणायै नमः
१२४ ॐ कबन्धराशिमध्यगायै नमः
१२५ ॐ कबन्धकूटसंस्थानायै नमः
१२६ ॐ कबन्धानन्तभूषणायै नमः
१२७ ॐ कबन्धनादसन्तुष्टायै नमः
१२८ ॐ कबन्धासनधारिण्यै नमः
१२९ ॐ कबन्धगृहमध्यस्थायै नमः
१३० ॐ कबन्धवनवासिन्यै नमः
१३१ ॐ कबन्धकाञ्च्यै नमः
१३२ ॐ करण्यै नमः
१३३ ॐ कबन्धराशिभूषणायै नमः
१३४ ॐ कबन्धमालाजयदायै नमः
१३५ ॐ कबन्धदेहवासिन्यै नमः
१३६ ॐ कबन्धासनमान्यायै नमः
१३७ ॐ कपालमाल्यधारिण्यै नमः
१३८ ॐ कपालमालामध्यस्थायै नमः
१३९ ॐ कपालव्रततोषितायै नमः
१४० ॐ कपालदीपसन्तुष्टायै नमः
१४१ ॐ कपालदीपरूपिण्यै नमः
१४२ ॐ कपालदीपवरदायै नमः
१४३ ॐ कपालकज्जलस्थितायै नमः
१४४ ॐ कपालमालाजयदायै नमः
१४५ ॐ कपालजलतोषिण्यै नमः
१४६ ॐ कपालसिद्धिसंहृष्टायै नमः
१४७ ॐ कपालभोजनोद्यतायै नमः
१४८ ॐ कपालव्रतसंस्थानायै नमः
१४९ ॐ कपालकमलालयायै नमः
१५० ॐ कवित्वामृतसारायै नमः
१५१ ॐ कवित्वामृतसागरायै नमः
१५२ ॐ कवित्वसिद्धिसंहृष्टायै नमः

१५३ ॐ कवित्वादानकारिण्यै नमः
१५४ ॐ कविपूज्यायै नमः
१५५ ॐ कविगत्यै नमः
१५६ ॐ कविरूपायै नमः
१५७ ॐ कविप्रियायै नमः
१५८ ॐ कविब्रह्मानन्दरूपायै नमः
१५९ ॐ कवित्वव्रततोषितायै नमः
१६० ॐ कवित्वव्रतसंस्थानायै नमः
१६१ ॐ कविवाञ्छाप्रपूरिण्यै नमः
१६२ ॐ कविकण्ठस्थितायै नमः
१६३ ॐ कं ह्रीं कं कं कं कविपूर्तिदायै नमः
१६४ ॐ कज्जलायै नमः
१६५ ॐ कज्जलदानमानसायै नमः
१६६ ॐ कज्जलप्रियायै नमः
१६७ ॐ कपालकज्जलसमायै नमः
१६८ ॐ कज्जलेशप्रपूजितायै नमः
१६९ ॐ कज्जलार्णवमध्यस्थायै नमः
१७० ॐ कज्जलानन्दरूपिण्यै नमः
१७१ ॐ कज्जलप्रियसन्तुष्टायै नमः
१७२ ॐ कज्जलप्रियतोषिण्यै नमः
१७३ ॐ कपालमालाभरणायै नमः
१७४ ॐ कपालकरभूषणायै नमः
१७५ ॐ कपालकरभूषाढ्यायै नमः
१७६ ॐ कपालचक्रमण्डितायै नमः
१७७ ॐ कपालकोटिनिलयायै नमः
१७८ ॐ कपालदुर्गकारिण्यै नमः
१७९ ॐ कपालगिरिसंस्थानायै नमः
१८० ॐ कपालचक्रवासिन्यै नमः
१८१ ॐ कपालपात्रसन्तुष्टायै नमः
१८२ ॐ कपालार्घ्यपरायणायै नमः
१८३ ॐ कपालार्घ्यप्रियप्राणायै नमः
१८४ ॐ कपालार्घ्यवरप्रदायै नमः
१८५ ॐ कपालचक्ररूपायै नमः
१८६ ॐ कपालरूपमात्रगायै नमः
१८७ ॐ कदल्यै नमः
१८८ ॐ कदलीरूपायै नमः
१८९ ॐ कदलीवनवासिन्यै नमः
१९० ॐ कदलीपुष्पसंप्रीतायै नमः

१९१ ॐ कदलीफलमानसायै नमः
१९२ ॐ कदलीहोमसन्तुष्टायै नमः
१९३ ॐ कदलीदर्शनोद्युतायै नमः
१९४ ॐ कदलीगर्भमध्यस्थायै नमः
१९५ ॐ कदलीवनसुन्दर्यै नमः
१९६ ॐ कदम्बपुष्पनिलयायै नमः
१९७ ॐ कदम्बवनमध्यगायै नमः
१९८ ॐ कदम्बकुसुमामोदायै नमः
१९९ ॐ कदम्बवनतोषिण्यै नमः
२०० ॐ कदम्बपुष्पसंपूज्यायै नमः
२०१ ॐ कदम्बपुष्पहोमदायै नमः
२०२ ॐ कदम्बपुष्पमध्यस्थायै नमः
२०३ ॐ कदम्बफलभोजिन्यै नमः
२०४ ॐ कदम्बकाननान्तस्थायै नमः
२०५ ॐ कदम्बाचलवासिन्यै नमः
२०६ ॐ कक्षपायै नमः
२०७ ॐ कक्षपाराध्यायै नमः
२०८ ॐ कक्षपासनसंस्थितायै नमः
२०९ ॐ कर्णपूरायै नमः
२१० ॐ कर्णनासायै नमः
२११ ॐ कर्णाढ्यायै नमः
२१२ ॐ कालभैरव्यै नमः
२१३ ॐ कलप्रीतायै नमः
२१४ ॐ कलहदायै नमः
२१५ ॐ कलहायै नमः
२१६ ॐ कलहातुरायै नमः
२१७ ॐ कर्णयक्ष्यै नमः
२१८ ॐ कथिन्यै नमः
२१९ ॐ कर्णसुन्दर्यै नमः
२२० ॐ कर्णपिशाचिन्यै नमः
२२१ ॐ कर्णमञ्जर्यै नमः
२२२ ॐ कपिकक्षदायै नमः
२२३ ॐ कविकक्षविरूपाढ्यायै नमः
२२४ ॐ कविकक्षस्वरूपिण्यै नमः
२२५ ॐ कस्तूरीमृगसंस्थानायै नमः
२२६ ॐ कस्तूरीमृगरूपिण्यै नमः
२२७ ॐ कस्तूरीमृगसन्तोषायै नमः
२२८ ॐ कस्तूरीमृगमध्यगायै नमः

२२९ ॐ कस्तूरीरसनीलाङ्ग्यै नमः
२३० ॐ कस्तूरीगन्धतोषितायै नमः
२३१ ॐ कस्तूरीपूजकप्राणायै नमः
२३२ ॐ कस्तूरीपूजकप्रियायै नमः
२३३ ॐ कस्तूरीप्रेमसन्तुष्टायै नमः
२३४ ॐ कस्तूरीप्राणधारिण्यै नमः
२३५ ॐ कस्तूरीपूजकानन्दायै नमः
२३६ ॐ कस्तूरीगन्धरूपिण्यै नमः
२३७ ॐ कस्तूरीमालिकारूपायै नमः
२३८ ॐ कस्तूरीभोजनप्रियायै नमः
२३९ ॐ कस्तूरीतिलकानन्दायै नमः
२४० ॐ कस्तूरीतिलकप्रियायै नमः
२४१ ॐ कस्तूरीहोमसन्तुष्टायै नमः
२४२ ॐ कस्तूरीतर्पणोद्यतायै नमः
२४३ ॐ कस्तूरीमार्जनोद्युक्तायै नमः
२४४ ॐ कस्तूरीचक्रपूजितायै नमः
२४५ ॐ कस्तूरीपुष्पसंपूज्यायै नमः
२४६ ॐ कस्तूरीचर्वणोद्यतायै नमः
२४७ ॐ कस्तूरीगर्भमध्यस्थायै नमः
२४८ ॐ कस्तूरीवस्त्रधारिण्यै नमः
२४९ ॐ कस्तूरिकामोदरतायै नमः
२५० ॐ कस्तूरीवनवासिन्यै नमः
२५१ ॐ कस्तूरीवनसंरक्षायै नमः
२५२ ॐ कस्तूरीप्रेमधारिण्यै नमः
२५३ ॐ कस्तूरीशक्तिनिलयायै नमः
२५४ ॐ कस्तूरीशक्तिकुण्डगायै नमः
२५५ ॐ कस्तूरीकुण्डसंस्नातायै नमः
२५६ ॐ कस्तूरीकुण्डमज्जनायै नमः
२५७ ॐ कस्तूरीजीवसन्तुष्टायै नमः
२५८ ॐ कस्तूरीजीवधारिण्यै नमः
२५९ ॐ कस्तूरीपरमामोदायै नमः
२६० ॐ कस्तूरीजीवनक्षमायै नमः
२६१ ॐ कस्तूरीजातिभावस्थायै नमः
२६२ ॐ कस्तूरीगन्धचुम्बनायै नमः
२६३ ॐ कस्तूरीगन्धसंशोभाविराजितकपालभुवे नमः
२६४ ॐ कस्तूरीमदनान्तस्थायै नमः
२६५ ॐ कस्तूरीमदहर्षदायै नमः

१९१ ॐ कदलीफलमानसायै नमः
१९२ ॐ कदलीहोमसन्तुष्टायै नमः
१९३ ॐ कदलीदर्शनोद्युतायै नमः
१९४ ॐ कदलीगर्भमध्यस्थायै नमः
१९५ ॐ कदलीवनसुन्दर्यै नमः
१९६ ॐ कदम्बपुष्पनिलयायै नमः
१९७ ॐ कदम्बवनमध्यगायै नमः
१९८ ॐ कदम्बकुसुमामोदायै नमः
१९९ ॐ कदम्बवनतोषिण्यै नमः
२०० ॐ कदम्बपुष्पसंपूज्यायै नमः
२०१ ॐ कदम्बपुष्पहोमदायै नमः
२०२ ॐ कदम्बपुष्पमध्यस्थायै नमः
२०३ ॐ कदम्बफलभोजिन्यै नमः
२०४ ॐ कदम्बकाननान्तस्थायै नमः
२०५ ॐ कदम्बाचलवासिन्यै नमः
२०६ ॐ कक्षपायै नमः
२०७ ॐ कक्षपाराध्यायै नमः
२०८ ॐ कक्षपासनसंस्थितायै नमः
२०९ ॐ कर्णपूरायै नमः
२१० ॐ कर्णनासायै नमः
२११ ॐ कर्णाढ्यायै नमः
२१२ ॐ कालभैरव्यै नमः
२१३ ॐ कलप्रीतायै नमः
२१४ ॐ कलहदायै नमः
२१५ ॐ कलहायै नमः
२१६ ॐ कलहातुरायै नमः
२१७ ॐ कर्णयक्ष्यै नमः
२१८ ॐ कथिन्यै नमः
२१९ ॐ कर्णसुन्दर्यै नमः
२२० ॐ कर्णपिशाचिन्यै नमः
२२१ ॐ कर्णमञ्जर्यै नमः
२२२ ॐ कपिकक्षदायै नमः
२२३ ॐ कविकक्षविरूपाढ्यायै नमः
२२४ ॐ कविकक्षस्वरूपिण्यै नमः
२२५ ॐ कस्तूरीमृगसंस्थानायै नमः
२२६ ॐ कस्तूरीमृगरूपिण्यै नमः
२२७ ॐ कस्तूरीमृगसन्तोषायै नमः
२२८ ॐ कस्तूरीमृगमध्यगायै नमः

२२९ ॐ कस्तूरीरसनीलाङ्ग्यै नमः
२३० ॐ कस्तूरीगन्धतोषितायै नमः
२३१ ॐ कस्तूरीपूजकप्राणायै नमः
२३२ ॐ कस्तूरीपूजकप्रियायै नमः
२३३ ॐ कस्तूरीप्रेमसन्तुष्टायै नमः
२३४ ॐ कस्तूरीप्राणधारिण्यै नमः
२३५ ॐ कस्तूरीपूजकानन्दायै नमः
२३६ ॐ कस्तूरीगन्धरूपिण्यै नमः
२३७ ॐ कस्तूरीमालिकारूपायै नमः
२३८ ॐ कस्तूरीभोजनप्रियायै नमः
२३९ ॐ कस्तूरीतिलकानन्दायै नमः
२४० ॐ कस्तूरीतिलकप्रियायै नमः
२४१ ॐ कस्तूरीहोमसन्तुष्टायै नमः
२४२ ॐ कस्तूरीतर्पणोद्यतायै नमः
२४३ ॐ कस्तूरीमार्जनोद्युक्तायै नमः
२४४ ॐ कस्तूरीचक्रपूजितायै नमः
२४५ ॐ कस्तूरीपुष्पसंपूज्यायै नमः
२४६ ॐ कस्तूरीचर्वणोद्यतायै नमः
२४७ ॐ कस्तूरीगर्भमध्यस्थायै नमः
२४८ ॐ कस्तूरीवस्त्रधारिण्यै नमः
२४९ ॐ कस्तूरिकामोदरतायै नमः
२५० ॐ कस्तूरीवनवासिन्यै नमः
२५१ ॐ कस्तूरीवनसंरक्षायै नमः
२५२ ॐ कस्तूरीप्रेमधारिण्यै नमः
२५३ ॐ कस्तूरीशक्तिनिलयायै नमः
२५४ ॐ कस्तूरीशक्तिकुण्डगायै नमः
२५५ ॐ कस्तूरीकुण्डसंस्नातायै नमः
२५६ ॐ कस्तूरीकुण्डमज्जनायै नमः
२५७ ॐ कस्तूरीजीवसन्तुष्टायै नमः
२५८ ॐ कस्तूरीजीवधारिण्यै नमः
२५९ ॐ कस्तूरीपरमामोदायै नमः
२६० ॐ कस्तूरीजीवनक्षमायै नमः
२६१ ॐ कस्तूरीजातिभावस्थायै नमः
२६२ ॐ कस्तूरीगन्धचुम्बनायै नमः
२६३ ॐ कस्तूरीगन्धसंशोभाविराजितकपालभुवे नमः
२६४ ॐ कस्तूरीमदनान्तस्थायै नमः
२६५ ॐ कस्तूरीमदहर्षदायै नमः

२६६ ॐ ~~[illegible] नमः~~
कस्तूरी
२६७ ॐ कवितानाख्यायै नमः
२६८ ॐ कस्तूरीगृहमध्यगायै नमः
२६९ ॐ कस्तूरीस्पर्शकप्राणायै नमः
२७० ॐ कस्तूरीविन्दकान्तकायै नमः
२७१ ॐ कस्तूर्यामोदरसिकायै नमः
२७२ ॐ कस्तूरीक्रीडनोद्यतायै नमः
२७३ ॐ कस्तूरीदाननिरतायै नमः
२७४ ॐ कस्तूरीवरदायिन्यै नमः
२७५ ॐ कस्तूरीस्थापनाशक्तायै नमः
२७६ ॐ कस्तूरीस्थानरञ्जिन्यै नमः
२७७ ॐ कस्तूरीकुशलप्राणायै नमः
२७८ ॐ कस्तूरीस्तुतिवन्दितायै नमः
२७९ ॐ कस्तूरीवन्दकाराध्यायै नमः
२८० ॐ कस्तूरीस्थानवासिन्यै नमः
२८१ ॐ कहरूपायै नमः
२८२ ॐ कहाढ्यायै नमः
२८३ ॐ कहानन्दायै नमः
२८४ ॐ कहात्मभुवे नमः
२८५ ॐ कहपूज्यायै नमः
२८६ ॐ कहेत्याख्यायै नमः
२८७ ॐ कहहेयायै नमः
२८८ ॐ कहात्मिकायै नमः
२८९ ॐ कहमालायै नमः
२९० ॐ कण्ठभूषायै नमः
२९१ ॐ कहमन्त्रजपोद्यतायै नमः
२९२ ॐ कहनामस्मृतिपरायै नमः
२९३ ॐ कहनामपरायणायै नमः
२९४ ॐ कहपरायणरतायै नमः
२९५ ॐ कहदेव्यै नमः
२९६ ॐ कहेश्वर्यै नमः
२९७ ॐ कहहेत्वै नमः
२९८ ॐ कहानन्दायै नमः
२९९ ॐ कहनादपरायणायै नमः
३०० ॐ कहमात्रे नमः
३०१ ॐ कहान्तस्थायै नमः
३०२ ॐ कहमन्त्रायै नमः
३०३ ॐ कहेश्वरायै नमः

३०४ ॐ कहगेयायै नमः
३०५ ॐ कहाराध्यायै नमः
३०६ ॐ कहध्यानपरायणायै नमः
३०७ ॐ कहतन्त्रायै नमः
३०८ ॐ कहकहायै नमः
३०९ ॐ कहचर्यापरायणायै नमः
३१० ॐ कहाचारायै नमः
३११ ॐ कहगत्यै नमः
३१२ ॐ कहताण्डवकारिण्यै नमः
३१३ ॐ कहारण्यायै नमः
३१४ ॐ कहगत्यै नमः
३१५ ॐ कहशक्तिपरायणायै नमः
३१६ ॐ कहराज्यरतायै नमः
३१७ ॐ कर्मसाक्षिण्यै नमः
३१८ ॐ कर्मसुन्दर्यै नमः
३१९ ॐ कर्मविद्यायै नमः
३२० ॐ कर्मगत्यै नमः
३२१ ॐ कर्मतन्त्रपरायणायै नमः
३२२ ॐ कर्ममात्रायै नमः
३२३ ॐ कर्मगात्रायै नमः
३२४ ॐ कर्मधर्मपरायणायै नमः
३२५ ॐ कर्मरेखानाशकर्त्र्यै नमः
३२६ ॐ कर्मरेखाविनोदिन्यै नमः
३२७ ॐ कर्मरेखामोहकर्यै नमः
३२८ ॐ कर्मकीर्तिपरायणायै नमः
३२९ ॐ कर्मविद्यायै नमः
३३० ॐ कर्मसारायै नमः
३३१ ॐ कर्माधारायै नमः
३३२ ॐ कर्मभुवे नमः
३३३ ॐ कर्मकार्यै नमः
३३४ ॐ कर्महार्यै नमः
३३५ ॐ कर्मकौतुकसुन्दर्यै नमः
३३६ ॐ कर्मकाल्यै नमः
३३७ ॐ कर्मतारायै नमः
३३८ ॐ कर्मछिन्नायै नमः
३३९ ॐ कर्मदायै नमः
३४० ॐ कर्मचाण्डालिन्यै नमः
३४१ ॐ कर्मवेदमात्रे नमः

३४२ ॐ कर्मभुवे नमः
३४३ ॐ कर्मकाण्डरतानतायै नमः
३४४ ॐ कर्मकाण्डानुमानितायै नमः
३४५ ॐ कर्मकाण्डपरीणाहायै नमः
३४६ ॐ कमठ्यै नमः
३४७ ॐ कमठाकृत्यै नमः
३४८ ॐ कमठाराध्यहृदयायै नमः
३४९ ॐ कमठायै नमः
३५० ॐ कण्ठसुन्दर्यै नमः
३५१ ॐ कमठासनसंसेव्यायै नमः
३५२ ॐ कमठ्यै नमः
३५३ ॐ कर्मतत्परायै नमः
३५४ ॐ करुणाकरकान्तायै नमः
३५५ ॐ करुणाकरवन्दितायै नमः
३५६ ॐ कठोरायै नमः
३५७ ॐ करमालायै नमः
३५८ ॐ कठोरकुचधारिण्यै नमः
३५९ ॐ कपर्दिन्यै नमः
३६० ॐ कपटिन्यै नमः
३६१ ॐ कठिन्यै नमः
३६२ ॐ कङ्कभूषणायै नमः
३६३ ॐ करभोर्वै नमः
३६४ ॐ कठिनदायै नमः
३६५ ॐ करभायै नमः
३६६ ॐ करभालयायै नमः
३६७ ॐ कलभाषामय्यै नमः
३६८ ॐ कल्पायै नमः
३६९ ॐ कल्पनायै नमः
३७० ॐ कल्पदायिन्यै नमः
३७१ ॐ कमलस्थायै नमः
३७२ ॐ कलामालायै नमः
३७३ ॐ कमलास्यायै नमः
३७४ ॐ क्वणत्प्रभायै नमः
३७५ ॐ ककुद्मिन्यै नमः
३७६ ॐ कष्टवत्यै नमः
३७७ ॐ करणीयकथार्चितायै नमः
३७८ ॐ कचार्चितायै नमः
३७९ ॐ कचतन्वै नमः

३८० ॐ कचसुन्दरधारिण्यै नमः
३८१ ॐ कठोरकुचसँल्लग्नायै नमः
३८२ ॐ कटिसूत्रविराजितायै नमः
३८३ ॐ कर्णभक्षप्रियायै नमः
३८४ ॐ कन्दायै नमः
३८५ ॐ कथायै नमः
३८६ ॐ कन्दवत्यै नमः
३८७ ॐ कल्यै नमः
३८८ ॐ कलिघ्न्यै नमः
३८९ ॐ कलिदूत्यै नमः
३९० ॐ कपिनायकपूजितायै नमः
३९१ ॐ कणकक्षानियन्त्र्यै नमः
३९२ ॐ कश्चित्कविवरार्चितायै नमः
३९३ ॐ कर्त्र्यै नमः
३९४ ॐ कर्तृकाभूषायै नमः
३९५ ॐ कारिण्यै नमः
३९६ ॐ कर्णशत्रुपायै नमः
३९७ ॐ कर्णेश्यै नमः
३९८ ॐ कर्णपायै नमः
३९९ ॐ कलवाचायै नमः
४०० ॐ कलानिध्यै नमः
४०१ ॐ कलनायै नमः
४०२ ॐ कलनाधारायै नमः
४०३ ॐ कारिकायै नमः
४०४ ॐ करकायै नमः
४०५ ॐ करायै नमः
४०६ ॐ कलगेयायै नमः
४०७ ॐ कर्कराश्यै नमः
४०८ ॐ कर्कराशिप्रपूजितायै नमः
४०९ ॐ कन्याराश्यै नमः
४१० ॐ कन्यकायै नमः
४११ ॐ कन्यकाप्रियभाषिण्यै नमः
४१२ ॐ कन्यकादानसन्तुष्टायै नमः
४१३ ॐ कन्यकादानतोषिण्यै नमः
४१४ ॐ कन्यादानकरानन्दायै नमः
४१५ ॐ कन्यादानग्रहेष्टदायै नमः
४१६ ॐ कर्षणायै नमः
४१७ ॐ कक्षदहनायै नमः

४१८ ॐ कामिनायै नमः
४१९ ॐ कमलासनायै नमः
४२० ॐ करमालानन्दकर्त्र्यै नमः
४२१ ॐ करमालाप्रतोषितायै नमः
४२२ ॐ करमालाशयानन्दायै नमः
४२३ ॐ करमालासमागमायै नमः
४२४ ॐ करमालासिद्धिदात्र्यै नमः
४२५ ॐ करमालायै नमः
४२६ ॐ करप्रियायै नमः
४२७ ॐ करप्रियाकररतायै नमः
४२८ ॐ करदानपरायणायै नमः
४२९ ॐ कलानन्दायै नमः
४३० ॐ कलिपूज्यायै नमः
४३१ ॐ कलिप्रस्वे नमः
४३२ ॐ कलनादनिनादस्थायै नमः
४३३ ॐ कलनादवरप्रदायै नमः
४३४ ॐ कलनादसमाजस्थायै नमः
४३५ ॐ कहोलायै नमः
४३६ ॐ कहोलदायै नमः
४३७ ॐ कहोलगेहमध्यस्थायै नमः
४३८ ॐ कहोलवरदायै नमः
४३९ ॐ कहोलकविताधारायै नमः
४४० ॐ कहोलऋषिमानितायै नमः
४४१ ॐ कहोलमानसाराध्यायै नमः
४४२ ॐ कहोलवाक्यकारिण्यै नमः
४४३ ॐ कर्तृरूपायै नमः
४४४ ॐ कर्तृमय्यै नमः
४४५ ॐ कर्तृमात्रे नमः
४४६ ॐ कतर्यै नमः
४४७ ॐ कनीयायै नमः
४४८ ॐ कनकाराध्यायै नमः
४४९ ॐ कनीनकमय्यै नमः
४५० ॐ कनीयानन्दनिलयायै नमः
४५१ ॐ कनकानन्दतोषितायै नमः
४५२ ॐ कनीनककरायै नमः
४५३ ॐ काष्ठायै नमः
४५४ ॐ कथार्णवकर्यै नमः
४५५ ॐ कर्यै नमः

४५६ ॐ करिगम्यायै नमः
४५७ ॐ करीगत्यै नमः
४५८ ॐ करिध्वजपरायणायै नमः
४५९ ॐ करिनाथप्रियायै नमः
४६० ॐ कण्ठायै नमः
४६१ ॐ कथानकप्रतोषितायैनमः
४६२ ॐ कमनीयायै नमः
४६३ ॐ कमनकायै नमः
४६४ ॐ कमनीयविभूषणायै नमः
४६५ ॐ कमनीयसमाजस्थायै नमः
४६६ ॐ कमनीयव्रतप्रियायै नमः
४६७ ॐ कमनीयगुणाराध्यायै नमः
४६८ ॐ कपिलायै नमः
४६९ ॐ कपिलेश्वर्यै नमः
४७० ॐ कपिलाराध्यहृदयायै नमः
४७१ ॐ कपिलाप्रियवादिन्यै नमः
४७२ ॐ कहचक्रमन्त्रवर्णायै नमः
४७३ ॐ कहचक्रप्रसूनकायै नमः
४७४ ॐ कएईलह्रींस्वरूपायै नमः
४७५ ॐ कएईलह्रींवरप्रदायै नमः
४७६ ॐ कएईलह्रींसिद्धिदात्र्यै नमः
४७७ ॐ कएईलह्रींस्वरूपिण्यै नमः
४७८ ॐ कएईलह्रींमन्त्रवर्णायै नमः
४७९ ॐ कएईलह्रींप्रसूकलायै नमः
४८० ॐ कवर्गायै नमः
४८१ ॐ कपाटस्थायै नमः
४८२ ॐ कपाटोद्घाटनक्षमायैनमः
४८३ ॐ कङ्काल्यै नमः
४८४ ॐ कपाल्यै नमः
४८५ ॐ कङ्कालप्रियभाषिण्यै नमः
४८६ ॐ कङ्कालभैरवाराध्यायैनमः
४८७ ॐ कङ्कालमानसंस्थितायैनमः
४८८ ॐ कङ्कालमोहनिरतायै नमः
४८९ ॐ कङ्कालमोहदायिन्यै नमः
४९० ॐ कलुषघ्न्यै नमः
४९१ ॐ कलुषहायै नमः
४९२ ॐ कलुषार्तिविनाशिन्यै नमः
४९३ ॐ कलिपुष्पायै नमः

४९४ ॐ कलादानायै नमः
४९५ ॐ कशिप्वे नमः
४९६ ॐ कश्यपार्चितायै नमः
४९७ ॐ कश्यपायै नमः
४९८ ॐ कश्यपाराध्यायै नमः
४९९ ॐ कलिपूर्णकलेवरायै नमः
५०० ॐ कलेवरकर्यै नमः
५०१ ॐ काञ्च्यै नमः
५०२ ॐ कवर्गायै नमः
५०३ ॐ करालकायै नमः
५०४ ॐ कालभैरवाराध्यायै नमः
५०५ ॐ कालभैरवेश्वर्यै नमः
५०६ ॐ करालायै नमः
५०७ ॐ कलनाधारायै नमः
५०८ ॐ कपर्दीशवरप्रदायै नमः
५०९ ॐ कपर्दीशप्रेमलतायै नमः
५१० ॐ कपर्दिमालिकायै नमः
५११ ॐ कपर्दिजपमालाढ्यायै नमः
५१२ ॐ करवीरप्रसूनदायै नमः
५१३ ॐ करवीरप्रियप्राणायै नमः
५१४ ॐ करवीरप्रपूजितायै नमः
५१५ ॐ कर्णिकारसमाकारायै नमः
५१६ ॐ कर्णिकारप्रपूजितायै नमः
११७ ॐ करीषाग्निस्थितायै नमः
५१८ ॐ कर्षायै नमः
५१९ ॐ कर्षमात्रसुवर्णदायै नमः
५२० ॐ कलशायै नमः
५२१ ॐ कलशाराध्यायै नमः
५२२ ॐ कषायायै नमः
५२३ ॐ करिगानदायै नमः
५२४ ॐ कपिलायै नमः
५२५ ॐ कलकण्ठ्यै नमः
५२६ ॐ कविकल्पलतायै नमः
५२७ ॐ कल्पलनायै नमः
५२८ ॐ कल्पमात्रे नमः
५२९ ॐ कल्पकार्यै नमः
५३० ॐ कल्पभुवे नमः
५३१ ॐ कर्पूरामोदरुचिरायै नमः

५३२ ॐ कर्पूरामोदधारिण्यै नमः

५३३ ॐ कर्पूरमालाभरणायै नमः
५३४ ॐ कर्पूरवासपूर्त्तिदायै नमः
५३५ ॐ कर्पूरमालाजयदायै नमः
५३६ ॐ कर्पूरार्णवमध्यगायै नमः
५३७ ॐ कर्पूरतर्पणरतायै नमः
५३८ ॐ कटकाम्बरधारिण्यै नमः
५३९ ॐ कपटेश्वरसम्पूज्यायै नमः
५४० ॐ कपटेश्वररूपिण्यै नमः
५४१ ॐ कट्वै नमः
५४२ ॐ कपिध्वजाराध्यायै नमः
५४३ ॐ कलापपुष्परूपिण्यै नमः

५४४ ॐ कलापपुष्परुचिरायै नमः
५४५ ॐ कलापपुष्पपूजितायै नमः
५४६ ॐ क्रकचायै नमः
५४७ ॐ क्रकचाराध्यायै नमः
५४८ ॐ कथम्ब्रूमायै नमः
५४९ ॐ करालतायै नमः
५५० ॐ कथङ्कारविनिर्मुक्तायै नमः

५५१ ॐ काल्यै नमः

५५२ ॐ कालक्रियायै नमः
५५३ ॐ क्रत्वै नमः
५५४ ॐ कामिन्यै नमः
५५५ ॐ कामिनीपूज्यायै नमः
५५६ ॐ कामिनीपुष्पधारिण्यै नमः
५५७ ॐ कामिनीपुष्पनिलयायै नमः
५५८ ॐ कामिनीपुष्पपूर्णिमायै नमः
५५९ ॐ कामिनीपुष्पपूजार्हायै नमः
५६० ॐ कामिनीपुष्पभूषणायै नमः
५६१ ॐ कामिनीपुष्पतिलकायै नमः
५६२ ॐ कामिनीकुण्डचुम्बनायै नमः

५६३ ॐ कामिनीयोगसन्तुष्टायै नमः
५६४ ॐ कामिनीयोगभोगदायै नमः
५६५ ॐ कामिनीकुण्डसंमग्नायै नमः
५६६ ॐ कामिनीकुण्डमध्यगायै नमः
५६७ ॐ कामिनीमानसाराध्यायै नमः
५६८ ॐ कामिनीमानतोषितायै नमः
५६९ ॐ कामिनीमानसञ्चारायै नमः

५७० ॐ कालिकायै नमः

५७१ ॐ कालकालिकायै नमः
५७२ ॐ कामायै नमः
५७३ ॐ कामदेव्यै नमः
५७४ ॐ कामेश्यै नमः
५७५ ॐ कामसम्भवायै नमः
५७६ ॐ कामभावायै नमः
५७७ ॐ कामरतायै नमः
५७८ ॐ कामार्तायै नमः
५७९ ॐ काममञ्जर्यै नमः
५८० ॐ काममञ्जीररणितायै नमः
५८१ ॐ कामदेवप्रियान्तरायै नमः

५८२ ॐ कामकाल्यै नमः
५८३ ॐ कामकलायै नमः
५८४ ॐ कालिकायै नमः
५८५ ॐ कमलार्चितायै नमः
५८६ ॐ कादिकायै नमः
५८७ ॐ कमलायै नमः
५८८ ॐ काल्यै नमः

५८९ ॐ कालानलसमप्रभायै नमः

५९० ॐ कल्पान्तदहनायै नमः
५९१ ॐ कान्तायै नमः
५९२ ॐ कान्तारप्रियवासिन्यै नमः
५९३ ॐ कालपूज्यायै नमः
५९४ ॐ कालरतायै नमः
५९५ ॐ कालमात्रे नमः
५९६ ॐ कालिन्यै नमः
५९७ ॐ कालवीरायै नमः
५९८ ॐ कालघोरायै नमः
५९९ ॐ कालसिद्धायै नमः
६०० ॐ कालदायै नमः

६०१ ॐ कालाञ्जनसमाकारायै नमः
६०२ ॐ कालञ्जरनिवासिन्यै नमः
६०३ ॐ कालऋद्ध्यै नमः
६०४ ॐ कालवृद्ध्यै नमः
६०५ ॐ कारागृहविमोचिन्यै नमः
६०६ ॐ कादिविद्यायै नमः
६०७ ॐ कादिमात्रे नमः

६०८ ॐ कादिस्थायै नमः
६०९ ॐ कादिसुन्दर्यै नमः
६१० ॐ काञ्च्यै नमः
६११ ॐ कान्त्यै नमः
६१२ ॐ काञ्चीशायै नमः
६१३ ॐ काशीवरदायिन्यै नमः
६१४ ॐ क्रींबीजायै नमः
६१५ ॐ क्रांबीजाहृदयायनमस्मृतायैनमः
६१६ ॐ काम्यायै नमः
६१७ ॐ कामगत्यै नमः
६१८ ॐ काम्यसिद्धिदात्र्यै नमः
६१९ ॐ कामभुवे नमः
६२० ॐ कामाख्यायै नमः
६२१ ॐ कामरूपायै नमः
६२२ ॐ कामचापविमोचिन्यै नमः
६२३ ॐ कामदेवकलारामायैनमः
६२४ ॐ कामदेवकलालयायै नमः
६२५ ॐ कामराज्ञ्यै नमः
६२६ ॐ कामदात्र्यै नमः
६२७ ॐ कान्ताराचलवासिन्यै नमः
६२८ ॐ कालरूपायै नमः
६२९ ॐ कालगत्यै नमः
६३० ॐ कामयोगपरायणायै नमः
६३१ ॐ कामसंमर्दनरतायै नमः
६३२ ॐ कामगेहविनाशिन्यै नमः
६३३ ॐ कालभैरवभार्यायै नमः
६३४ ॐ कालभैरवकामिन्यै नमः
६३५ ॐ कालभैरवयोगस्थायै नमः
६३६ ॐ कालभैरवभोगदायै नमः
६३७ ॐ कामधेन्वै नमः
६३८ ॐ कामदोग्ध्र्यै नमः
६३९ ॐ काममात्रे नमः
६४० ॐ कान्तिदायै नमः
६४१ ॐ कामुकायै नमः
६४२ ॐ कामुकाराध्यायै नमः
६४३ ॐ कामुकानन्दवर्द्धिन्यै नमः
६४४ ॐ कार्तवीर्यायै नमः
६४५ ॐ कार्तिकेयायै नमः

६४६ ॐ कार्तिकेयप्रपूजितायै नमः
६४७ ॐ कार्यायै नमः
६४८ ॐ कारणदायै नमः
६४९ ॐ कार्यकारिण्यै नमः
६५० ॐ कारणान्तरायै नमः
६५१ ॐ कान्तिगम्यायै नमः
६५२ ॐ कान्तिमय्यै नमः
६५३ ॐ कात्यायै नमः
६५४ ॐ कात्यायन्यै नमः
६५५ ॐ कायै नमः
६५६ ॐ कामसारायै नमः
६५७ ॐ काश्मीरायै नमः
६५८ ॐ काश्मीराचारतत्परायै नमः
६५९ ॐ कामरूपाचाररतायै नमः
६६० ॐ कामरूपप्रियंवदायै नमः
६६१ ॐ कामरूपाचारसिद्ध्यै नमः
६६२ ॐ कामरूपमनोमय्यै नमः
६६३ ॐ कार्तिक्यै नमः
६६४ ॐ कार्तिकाराध्यायै नमः
६६५ ॐ काञ्चनारप्रसूनभुवे नमः
६६६ ॐ काञ्चनारप्रसूनाभायै नमः
६६७ ॐ काञ्चनारप्रपूजितायै नमः
६६८ ॐ काञ्चरूपायै नमः
६६९ ॐ काञ्चभूम्यै नमः
६७० ॐ कांस्यपात्रप्रभोजिन्यै नमः
६७१ ॐ कांस्यध्वनिमय्यै नमः
६७२ ॐ कामसुन्दर्यै नमः
६७३ ॐ कामचुम्बनायै नमः
६७४ ॐ काशपुष्पप्रतीकाशायै नमः
६७५ ॐ कामद्रुमसमागमायै नमः
६७६ ॐ कामपुष्पायै नमः
६७७ ॐ कामभूम्यै नमः
६७८ ॐ कामपूज्यायै नमः
६७९ ॐ कामदायै नमः
६८० ॐ कामदेहायै नमः
६८१ ॐ कामगेहायै नमः
६८२ ॐ कामबीजपरायणायै नमः
६८३ ॐ कामध्वजसमारूढायै नमः

६८४ ॐ कामध्वजसमास्थितायै नमः
६८५ ॐ काश्यप्यै नमः
६८६ ॐ काश्यपाराध्यायै नमः
६८७ ॐ काश्यपानन्ददायिन्यै नमः
६८८ ॐ कालिन्दीजलसङ्काशायै नमः
६८९ ॐ कालिन्दीजलपूजितायै नमः
६९० ॐ कादेवपूजानिरतायै नमः
६९१ ॐ कादेवपरमार्थदायै नमः
६९२ ॐ कार्मणायै नमः
६९३ ॐ कार्मणाकारायै नमः
६९४ ॐ कामकार्मणकारिण्यै नमः
६९५ ॐ कार्मणत्रोटनकर्यै नमः
६९६ ॐ काकिन्यै नमः
६९७ ॐ कारणाह्वयायै नमः
६९८ ॐ काव्यामृतायै नमः
६९९ ॐ कालिङ्गायै नमः
७०० ॐ कालिङ्गमर्दनोद्यतायै नमः
७०१ ॐ कालागुरुविभूषाढ्यायै नमः
७०२ ॐ कालागुरुविभूतिदायै नमः
७०३ ॐ कालागुरुसुगन्धायै नमः
७०४ ॐ कालागुरुप्रतर्पणायै नमः
७०५ ॐ कावेरीनीरसंप्रीतायै नमः
७०६ ॐ कावेरीतीरवासिन्यै नमः
७०७ ॐ कालचक्रभ्रमाकारायै नमः
७०८ ॐ कालचक्रनिवासिन्यै नमः
७०९ ॐ काननायै नमः
७१० ॐ काननाधारायै नमः
७११ ॐ कार्व्यै नमः
७१२ ॐ कारुणिकामय्यै नमः
७१३ ॐ काम्पील्यवासिन्यै नमः
७१४ ॐ काष्ठायै नमः
७१५ ॐ कामपत्न्यै नमः
७१६ ॐ कामभुवे नमः
७१७ ॐ कादम्बरीपानरतायै नमः
७१८ ॐ कादम्बर्यै नमः
७१९ ॐ कलायै नमः
७२० ॐ कामवन्द्यायै नमः
७२१ ॐ कामेश्यै नमः

७२२ ॐ कामराजप्रपूजितायै नमः
७२३ ॐ कामराजेश्वरीविद्यायै नमः
७२४ ॐ कामकौतुकसुन्दर्यै नमः
७२५ ॐ काम्बोजजायै नमः
७२६ ॐ काञ्छिनदायै नमः
७२७ ॐ कांस्यायै नमः
७२८ ॐ काञ्चनकारिण्यै नमः
७२९ ॐ काञ्चनाद्रिसमाकारायै नमः
७३० ॐ काञ्चनाद्रिप्रदानदायै नमः
७३१ ॐ कामकीर्त्यै नमः
७३२ ॐ कामकेश्यै नमः
७३३ ॐ कारिकायै नमः
७३४ ॐ कान्तराश्रयायै नमः
७३५ ॐ कामभेद्यै नमः
७३६ ॐ कामार्तिनाशिन्यै नमः
७३७ ॐ कामभूमिकायै नमः
७३८ ॐ कालनिर्णाशिन्यै नमः
७३९ ॐ कामवनितायै नमः
७४० ॐ कामरूपिण्यै नमः
..... ॐ कायस्थायै नमः

७४१ ॐ कामसन्दीप्त्यै नमः
७४२ ॐ काव्यदायै नमः
७४३ ॐ कालसुन्दर्यै नमः
७४४ ॐ कामेश्यै नमः
७४५ ॐ कारणवरायै नमः
७४६ ॐ कामेशीपूजनोद्यतायै नमः
७४७ ॐ काञ्चीनूपुरभूषाढ्यायै नमः
७४८ ॐ कुङ्कुमाभरणान्वितायै नमः
७४९ ॐ कालचक्रायै नमः
७५० ॐ कालगत्यै नमः
७५१ ॐ कालचक्रमनोभवायै नमः
७५२ ॐ कुन्दमध्यायै नमः
७५३ ॐ कुन्दपुष्पायै नमः
७५४ ॐ कुन्दपुष्पप्रियायै नमः
७५५ ॐ कुजायै नमः
७५६ ॐ कुजमात्रे नमः
७५७ ॐ कुजाराध्यायै नमः
७५८ ॐ कुठारवरधारिण्यै नमः
७५९ ॐ कुञ्जरस्थायै नमः

७६० ॐ कुशरतायै नमः
७६१ ॐ कुशेशयविलोचनायै नमः
७६२ ॐ कुनट्यै नमः
७६३ ॐ कुरर्यै नमः
७६४ ॐ क्रुद्धायै नमः
७६५ ॐ कुरङ्ग्यै नमः
७६६ ॐ कुटजाश्रयायै नमः
७६७ ॐ कुम्भीनसविभूषायै नमः
७६८ ॐ कुम्भीनसवधोद्यतायै नमः
७६९ ॐ कुम्भकर्णमनोल्लासायै नमः
७७० ॐ कुलचूडामण्यै नमः
७७१ ॐ कुलायै नमः
७७२ ॐ कुलालगृहकन्यायै नमः
७७३ ॐ कुलचूडामणिप्रियायै नमः
७७४ ॐ कुलपूज्यायै नमः
७७५ ॐ कुलाराध्यायै नमः
७७६ ॐ कुलपूजापरायणायै नमः
७७७ ॐ कुलभूषायै नमः
७७८ ॐ कुक्ष्यै नमः
७७९ ॐ कुररीगणसेवितायै नमः
७८० ॐ कुलपुष्पायै नमः
७८१ ॐ कुलरतायै नमः
७८२ ॐ कुलपुष्पपरायणायै नमः
७८३ ॐ कुलवस्त्रायै नमः
७८४ ॐ कुलाराध्यायै नमः
७८५ ॐ कुलकुण्डसमप्रभायै नमः
७८६ ॐ कुलकुण्डसमोल्लासायै नमः
७८७ ॐ कुण्डपुष्पपरायणायै नमः
७८८ ॐ कुण्डपुष्पप्रसन्नास्यायै नमः
७८९ ॐ कुण्डगोलोद्भवात्मिकायै नमः
७९० ॐ कुण्डगोलोद्भवाधारायै नमः
७९१ ॐ कुण्डगोलमय्यै नमः
७९२ ॐ कुह्वै नमः
७९३ ॐ कुण्डगोलप्रियप्राणायै नमः
७९४ ॐ कुण्डगोलप्रपूजितायै नमः
७९५ ॐ कुण्डगोलमनोल्लासायै नमः
७९६ ॐ कुण्डगोलबलप्रदायै नमः
७९७ ॐ कुण्डदेवरतायै नमः

७९८ ॐ कुब्जायै नमः

७९९ ॐ कुलसिद्धिकरीपरायै नमः
८०० ॐ कुलकुण्डसमाकारायै नमः
८०१ ॐ कुलकुण्डसमानभुवे नमः
८०२ ॐ कुण्डसिद्ध्यै नमः
८०३ ॐ कुण्डऋद्ध्यै नमः
८०४ ॐ कुमारीपूजनोद्यतायै नमः
८०५ ॐ कुमारीपूजकप्राणायै नमः
८०६ ॐ कुमारीपूजकालयायै नमः
८०७ ॐ कुमार्यै नमः
८०८ ॐ कामसन्तुष्टायै नमः
८०९ ॐ कुमारीपूजनोत्सुकायै नमः

८१० ॐ कुमारीव्रतसन्तुष्टायै नमः
८११ ॐ कुमारीरूपधारिण्यै नमः
८१२ ॐ कुमारीभोजनप्रीतायै नमः
८१३ ॐ कुमार्यै नमः
८१४ ॐ कुमारदायै नमः
८१५ ॐ कुमारमात्रे नमः
८१६ ॐ कुलदायै नमः

८१७ ॐ कुलयोन्यै नमः

८१८ ॐ कुलेश्वर्यै नमः
८१९ ॐ कुललिङ्गायै नमः
८२० ॐ कुलानन्दायै नमः
८२१ ॐ कुलरम्यायै नमः
८२२ ॐ कुतर्कधृषे नमः
८२३ ॐ कुन्त्यै नमः
८२४ ॐ कुलकान्तायै नमः
८२५ ॐ कुलमार्गपरायणायै नमः
८२६ ॐ कुल्लायै नमः
८२७ ॐ कुरुकुल्लायै नमः
८२८ ॐ कुल्लुकायै नमः

८२९ ॐ कुलकामदायै नमः
८३० ॐ कुलिशाङ्ग्यै नमः
८३१ ॐ कुब्जिकायै नमः
८३२ ॐ कुब्जिकानन्दवर्द्धिन्यै नमः
८३३ ॐ कुलीनायै नमः
८३४ ॐ कुञ्जरगत्यै नमः
८३५ ॐ कुञ्जरेश्वरगामिन्यै नमः

८३६ ॐ कुलपाल्यै नमः

८३७ ॐ कुलवत्यै नमः
८३८ ॐ कुलदीपिकायै नमः
८३९ ॐ कुलयोगेश्वर्यै नमः
८४० ॐ कुण्डायै नमः
८४१ ॐ कुङ्कुमारुणविग्रहायै नमः
८४२ ॐ कुङ्कुमानन्दसन्तोषायै नमः
८४३ ॐ कुङ्कुमार्णववासिन्यै नमः
८४४ ॐ कुसुमायै नमः
८४५ ॐ कुसुमप्रीतायै नमः
८४६ ॐ कुलभुवे नमः
८४७ ॐ कुलसुन्दर्यै नमः

८४८ ॐ कुमुद्वत्यै नमः
८४९ ॐ कुमुदिन्यै नमः
८५० ॐ कुशलायै नमः
८५१ ॐ कुलटालयायै नमः
८५२ ॐ कुलटालयमध्यस्थायै नमः
८५३ ॐ कुलटासङ्गतोषितायै नमः
८५४ ॐ कुलटाभुवनोद्युक्तायै नमः

८५५ ॐ कुशावर्तायै नमः

८५६ ॐ कुलार्णवायै नमः
८५७ ॐ कुलार्णवाचाररतायै नमः
८५८ ॐ कुण्डल्यै नमः
८५९ ॐ कुण्डलाकृत्यै नमः
८६० ॐ कुमत्यै नमः
८६१ ॐ कुलश्रेष्ठायै नमः
८६२ ॐ कुलचक्रपरायणायै नमः
८६३ ॐ कूटस्थायै नमः
८६४ ॐ कूटदृष्ट्यै नमः
८६५ ॐ कुन्तलायै नमः
८६६ ॐ कुन्तलाकृत्यै नमः

८६७ ॐ कुशलाकृतिरूपायै नमः
८६८ ॐ कूर्चबीजधरायै नमः
८६९ ॐ क्षै नमः
८७० ॐ कुंकुंकुंकुंशब्दरतायै नमः
८७१ ॐ क्रुंक्रुंक्रुंक्रुंपरायणायै नमः
८७२ ॐ कुंकुंकुंशब्दनिलयायै नमः
८७३ ॐ कुक्कुरालयवासिन्यै नमः

८७४ ॐ कुक्कुरासङ्गसंयुक्तायै नमः
८७५ ॐ कुक्कुरानन्तविग्रहायै नमः
८७६ ॐ कूर्चारम्भायै नमः
८७७ ॐ कूर्चबीजायै नमः
८७८ ॐ कूर्चजापपरायणायै नमः
८७९ ॐ कुलिन्यै नमः
८८० ॐ कुलसंस्थानायै नमः
८८१ ॐ कूर्चकण्ठपरागत्यै नमः
८८२ ॐ कूर्चवीणाभालदेशायै नमः
८८३ ॐ कूर्चमस्तकभूषितायै नमः
८८४ ॐ कुलवृक्षगतायै नमः
८८५ ॐ कूर्मायै नमः
८८६ ॐ कूर्माचलनिवासिन्यै नमः
८८७ ॐ कुलविन्द्वे नमः
८८८ ॐ कुलशिवायै नमः
८८९ ॐ कुलशक्तिपरायणायै नमः
८९० ॐ कुलबिन्दुमणिप्रख्यायै नमः
८९१ ॐ कुंकुमद्रुमवासिन्यै नमः
८९२ ॐ कुचमर्दनसन्तुष्टायै नमः
८९३ ॐ कुचजापपरायणायै नमः
८९४ ॐ कुचस्पर्शनसन्तुष्टायै नमः
८९५ ॐ कुचालिङ्गनहर्षदायै नमः
८९६ ॐ कुगतिघ्नै नमः
८९७ ॐ कुबेरार्चायै नमः
८९८ ॐ कुचभुवे नमः
८९९ ॐ कुलनायिकायै नमः
९०० ॐ कुगायनायै नमः
९०१ ॐ कुचधरायै नमः
९०२ ॐ कुमात्रे नमः
९०३ ॐ कुन्ददन्त्यै नमः
९०४ ॐ कुगेयायै नमः
९०५ ॐ कुहराभासायै नमः
९०६ ॐ कुगेयाकुघ्नदारिकायै नमः
९०७ ॐ कीर्त्यै नमः
९०८ ॐ किरातिन्यै नमः
९०९ ॐ क्लिन्नायै नमः
९१० ॐ किन्नरायै नमः
९११ ॐ किन्नर्यै नमः

९१२ ॐ क्रियायै नमः
९१३ ॐ क्रीङ्कारायै नमः
९१४ ॐ क्रींजपासक्तायै नमः
९१५ ॐ क्रींहूंस्त्रींमन्त्ररूपिण्यै नमः
९१६ ॐ किर्मीरितदृशापाङ्ग्यै नमः
९१७ ॐ किशोर्यै नमः
९१८ ॐ किरीटिन्यै नमः
९१९ ॐ कीटभाषायै नमः
९२० ॐ कीटयोन्यै नमः
९२१ ॐ कीटमात्रे नमः
९२२ ॐ कीटदायै नमः
९२३ ॐ किंशुकायै नमः
९२४ ॐ कीरभाषायै नमः
९२५ ॐ क्रियासारायै नमः
९२६ ॐ क्रियावत्यै नमः
९२७ ॐ कींकींशब्दपरायै नमः
९२८ ॐ क्लांक्लींक्लूंक्लैंक्लौंमंत्ररूपिण्यै नमः
९२९ ॐ कांकींकूंकैंस्वरूपायै नमः
९३० ॐ कःफट्मन्त्रस्वरूपिण्यै नमः
९३१ ॐ केतकीभूषणानन्दायै नमः
९३२ ॐ केतकीभरणान्वितायै नमः
९३३ ॐ कैकदायै नमः
९३४ ॐ केशिन्यै नमः
९३५ ॐ केशीसूदनतत्परायै नमः
९३६ ॐ केशरूपायै नमः
९३७ ॐ केशमुक्तायै नमः
९३८ ॐ कैकेय्यै नमः
९३९ ॐ कौशिक्यै नमः
९४० ॐ कैरवायै नमः
९४१ ॐ कैरवाह्लादायै नमः
९४२ ॐ केशरायै नमः
९४३ ॐ केतुरूपिण्यै नमः
९४४ ॐ केशवाराध्यहृदयायै नमः
९४५ ॐ केशवासक्तमानसायै नमः
९४६ ॐ क्लैब्यविनाशिन्यै नमः
९४७ ॐ क्लैंचक्लैंबीजजपतोषितायै नमः
९४८ ॐ कौशल्यायै नमः
९४९ ॐ कोशलाक्ष्यै नमः

९५० ॐ कोशायै नमः

९५१ ॐ कोमलायै नमः
९५२ ॐ कोलापुरनिवासायै नमः
९५३ ॐ कोलासुरविनाशिन्यै नमः
९५४ ॐ कोटिरूपायै नमः
९५५ ॐ कोटिरतायै नमः
९५६ ॐ क्रोधिन्यै नमः
९५७ ॐ क्रोधरूपिण्यै नमः
९५८ ॐ केकायै नमः
९५९ ॐ कोकिलायै नमः
९६० ॐ कोट्यै नमः
९६१ ॐ कोटिमन्त्रपरायणायै नमः

९६२ ॐ कोट्यनन्तमन्त्रयुतायै नमः
९६३ ॐ केरूपायै नमः
९६४ ॐ केरलाश्रयायै नमः
९६५ ॐ केरलाचारनिपुणायै नमः
९६६ ॐ केरलेन्द्रगृहस्थितायै नमः
९६७ ॐ केदाराश्रमसंस्थायै नमः
९६८ ॐ केदारेश्वरपूजितायै नमः

९६९ ॐ क्रोधरूपायै नमः

९७० ॐ क्रोधपदायै नमः
९७१ ॐ क्रोधमात्रे नमः
९७२ ॐ कौशिक्यै नमः
९७३ ॐ कोदण्डधारिण्यै नमः
९७४ ॐ क्रौञ्चायै नमः
९७५ ॐ कौशल्यायै नमः
९७६ ॐ कौलमार्गगायै नमः
९७७ ॐ कौलिन्यै नमः
९७८ ॐ कौलिकाराध्यायै नमः
९७९ ॐ कौलिकागारवासिन्यै नमः
९८० ॐ कौतुक्यै नमः

९८१ ॐ कौमुद्यै नमः
९८२ ॐ कौलायै नमः
९८३ ॐ कौमार्यै नमः
९८४ ॐ कौरवार्चितायै नमः
९८५ ॐ कौण्डिन्यायै नमः
९८६ ॐ कौशिक्यै नमः
९८७ ॐ क्रोधज्वालाभासुररूपिण्यै नमः

९८८ ॐ कोटिकालानलज्वालायैनमः
९८९ ॐ कोटिमार्तण्डविग्रहायैनमः
९९० ॐ कृत्तिकायै नमः
९९१ ॐ कृष्णवर्णायै नमः
९९२ ॐ कृष्णायै नमः
९९३ ॐ कृत्यायै नमः
९९४ ॐ क्रियातुरायै नमः
९९५ ॐ कृशाङ्ग्यै नमः
९९६ ॐ कृतकृत्यायै नमः
९९७ ॐ क्रः फट् स्वाहास्वरूपिण्यैनमः
९९८ ॐ क्रौंक्रौंहूंफट्मंत्रवर्णायैनमः
९९९ ॐ क्रींह्रींहूंफट्नमस्स्वधायैनमः
१००० ॐ क्रींक्रींह्रींह्रींतथाहूंहूंफट्स्वाहामन्त्ररूपिण्यै नमः

इति.

श्रीः

श्रीगणेशाय नमः।

कर्पूरस्तोत्रम्।

कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दुवामाक्षियुक्तं
बीजं ते मातरेतत्रिपुरहरवधु त्रिःकृतं ये जपन्ति।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम्॥

१

ईशानः सेन्दुवामश्रवणपरिगतं बीजमन्यन्महेशि
द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित्।
जित्वा वाचामधीशं धनदमपि चिरं मोहयेदम्बुजाक्षी-
वृन्दं चन्द्रार्द्धचूडे प्रभवति स महाघोरशावावतंसे॥

२

ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो
बीजं ते द्वन्द्वमन्यद्विगलितचिकुरे कालिके ये जपन्ति।
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति
सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे त्र्यक्षरेति॥

३

ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः
सव्ये चाभीर्वरं च त्रिजगदघहरे दक्षिणे कालिके च ।
जप्त्वैतन्नाम ये वा तव मनुविभवं भावयन्त्येतदम्ब
तेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यम्बकस्य ॥

४

वर्गाद्यं वह्नियुक्तं विधुरतिललितं तत्त्रयं कूर्चयुग्मं
लज्जायुग्मं च पश्चात्स्मितमुखि तदधष्ठद्वयं योजयित्वा ।
मातर्ये त्वां जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥

५

प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं
त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ।
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुविम्बे
वाग्देवी देवि मुण्डस्रगतिशयलसत्कण्ठपीनस्तनाढ्ये ॥

६

गतासूनां बाहुप्रकरकृतकाञ्चीपरिलस-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम्।
श्मशानस्थां तल्पे शवहृदि महाकालसुरत-
प्रसक्तां त्वां ध्यायञ्जननि जडचेता अपि कविः॥
७

शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः
परं सङ्कीर्णायां प्रकटितचितायां हरवधूम्।
प्रविष्टां सन्तुष्टामुपरि सुरतेनातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः॥
८

वदामस्ते किंवा जननि वयमुच्चैर्जडधियो-
न धाता नापीशो हरिरपि न ते वेत्ति परमम्।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते
तदेतत्क्षन्तव्यं न खलु पशुरोषः समुचितः॥
९

समन्तादापीनस्तनजघनभृद्यौवनवती-
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥
१०

समा सुस्थीभूतां जपति विपरीतां यदि सदा
विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ।
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः
कराम्भोजे वश्या हरवधु महासिद्धिनिवहाः ॥
११

प्रसूते संसारं जननि भवती पालयति च
समस्तं क्षित्यादि प्रलयसमये संहरति च ।
अतस्त्वं धातापि त्रिभुवनपतिः श्रीपतिरपि
महेशोपि प्रायः सकलमपि किं स्तौमि भवतीम् ॥
१२

अनेके सेवन्ते भवदधिकगीर्वाणनिवहा-
न्विमूढास्ते मातः किमपि न हि जानन्ति परमम्।
समाराध्यामाद्यां हरिहरविरिञ्च्यादिविबुधैः
प्रपन्नोस्मि स्वैरं रतिरसमहानन्दनिरताम् ॥
१३

धरित्री कीलालं शुचिरपि समीरोपि गगनं
त्वमेका कल्याणी गिरिशरमणी कालि सकलम्।
स्तुतिः का ते मातस्तव करुणया मामगतिकं
प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥
१४

श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः
सहस्रं त्वर्काणां निजगलितवीर्यं हि कुसुमम्।
जपँस्त्वत्प्रत्येकं मनुमपि तव ध्याननिरतो-
महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥
१५

गृहे सम्मार्जन्याः परिगलितबीजं हि चिकुरं
समूलं मध्याह्ने वितरति चितायां कुजदिने ।
समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततं
गजारूढो याति क्षितिपरिवृढः सत्कविवरः ॥
१६

सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन्ध्यायञ्जपति यदि भक्तस्तव मनुम् ।
स गन्धर्वश्रेणीपतिरपि कवित्वामृतनदी-
नदीनः पर्यन्ते परमपदलीनः प्रभवति ॥
१७

त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
जनो यो ध्यायेत्त्वामपि जननि स स्यात्स्मरहरः ॥
१८

सलोमास्थि स्वैरं पललमपि मार्जारमसिते
परं चौष्ट्रं मेषं नरमहिषयोश्छागमपि वा ।
बलिं ते पूजायामपि वितरतां मर्त्यवसतां
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥
१९

वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणयुगलध्याननिरतः ।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं
जपेल्लक्षं सम्यक्स्मरहरसमानः क्षितितले ॥
२०

इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः
स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुतम् ।
निशार्द्धे वा पूजासमयमथवा यस्तु पठति
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥
२१

कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं
वशास्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ।
रिपुः कारागारं कलयति ततः केलिकलया
चिरञ्जीवन्मुक्तः स भवति हि भक्तः प्रतिजनुः ॥
२२

इति ते कथितं स्तोत्रं सर्वसिद्धिप्रदायकम् ।
एतज्ज्ञात्वा दक्षिणायास्तत्वं जानाति नान्यथा ॥
२३

इति श्रीवीरतन्त्रे महाकालविरचितं महाकाल्याः स्वरूपाख्यं स्तोत्रं सम्पूर्णम् ॥ ॥ ॥ ॥ ॥ ॥

अद्येह काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवेतित्रिप्रवरस्य कन्याराशेः पेशलवीरविक्रमयजमानस्य सकलविभूतिनैरुज्योदयमनोरथावाप्त्यादिकालिकापूजनकल्पोक्तफलावाप्तये श्रीस्वेष्टदेवतादक्षिणकालिकादेवीप्रीतये इमं छागबलिं वह्निदैवतं घातनेन समर्पयिष्ये ।

पाठ भूयसी दक्षिणा ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः .... देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वक श्रीस्वेष्टदेवता दक्षिणकाप्रीतये ब्राह्मणद्वारा क्रियमाणस्य एकावृत्ति कालिका पञ्चाङ्ग स्तोत्रपाठकर्मणा स्तथा नवावृत्त ककारादि कालिका सहस्रन. [illegible] त्र पाठकर्मणो नवावृत्त सप्तशती स्तोत्र पाठकर्मणः श्च साङ्गतासिद्ध्यर्थं तथा श्रीस्वेष्टदेवता दक्षिणकालिकाप्रीतये नानाविधोपचारैः कृतस्य पञ्चबलि सहित संपूजनादि कर्मणो न्यूनातिरिक्तपरिपूरणार्थं इमां भूयसीं दक्षिणां रजतं चन्द्रदैवताकं नाना नामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य पाठदक्षिणात्वेन भूयसी दक्षिणात्वेन च दातुमह मुत्सृजे ॥ ॥

कर्मपात्रनिर्माणम्–

कुशान्– ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ जलम्–ॐ शन्नो देवी रभिष्टयऽआपो भवन्तु पीतये॥ शं यो रभिस्रवन्तु नः॥ यवान्– ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः॥ तिलान्– – ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः॥ प्रत्नमद्भिः पृक्तः स्वधया पितृल्लोकान्प्रीणाहिनः स्वाहा॥ गन्धम्– ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम्॥ ईश्वरीं सर्वभूतानां नामिहोपहूये श्रियम्॥ पुष्पाणि– ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्॥ इष्णान्निषाणामुम्म इषाण सर्वलोकं म इषाण॥ पवित्रीकरणम्– ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा॥ यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः॥ ॐ पुण्डरीकाक्षः पुनातु॥

सूर्याय अर्घ्यम्

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥

अश्वत्थसेचनम्·

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय अश्वत्थाय नमोनमः ॥

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ ध्रुवासि ध्रुवोयं यजमानोऽस्मिन्नायतने प्रजया पशुभि र्भूयात् ॥ घृतेन द्यावा पृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्यच्छाया·

अलक्ष्मी र्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् ॥
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

ससुवर्ण घृतकांश्यपात्राय नमः ।

ससुवर्ण तिलपूर्ण ताम्रपात्राय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः………………………………………… अहं मम दुःस्वप्न दुष्टग्रह दुर्निमित्तादि सूचित सर्वोपद्रव शान्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये विशेषतो मृत्युञ्जयदेवताप्रीतये इदं अवलोकिताज्यं मृत्युञ्जयदेवताकं, कांस्यपात्रं विश्वकर्मदेवताकं,

सुवर्णं वह्निदेवताकं. तथा सर्वारिष्टशान्तये तिलान् सोमदेवताकान्, ताम्रपात्रं विश्वकर्मदेवताकं, सुवर्णं वह्निदेवताकं ……… गोत्राय ………………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना-

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥
यानि कानि च पापानि जन्मान्तरकृतानि च ।
तिलपात्रप्रदानेन मम पापं व्यपोहतु ॥

दानप्रतिष्ठा-

अद्य कृतैतत् अवलोकिताज्य कांस्यपात्रसुवर्णतिलताम्रपात्रसुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं …… गोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

कन्याराशिः	पेशलवीरविक्रमवर्मा.	चित्रा.
मीनराशिः	देवेन्द्रवीरविक्रमवर्मा.	रेवती.
कुंभराशिः	गुणसागरवीरविक्रमवर्मा.	धनेष्ठा
कन्याराशिः	पूर्णचन्द्रवीरविक्रमवर्मा.	हस्त.
मेषराशिः	………………	अश्विनी
मकरराशिः	………………	श्रवण
वृषराशिः	………………	कृत्तिका
वृष राशि:	— — — — — —	

सोपस्करामान्नाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम· श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वक श्रीपरमेश्वरप्रीतये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं, कांस्यपात्रसुवर्णयुतं घृतं मृत्युञ्जयदेवताकं, सर्वोपस्करसहितं आमान्नं प्रजापतिदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥
कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोनिष्क्रयीभूतरजतकांस्यपात्रसुवर्णघृतसर्वोपस्करामान्नदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूतरजतद्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा .... देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वक श्रीपरमेश्वरप्रीतये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं .... गोत्राय ....शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

ॐ शान्तिरस्तु, पुष्टिरस्तु, वृद्धिरस्तु, यच्छ्रेयस्तदस्तु,

यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु, द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु, अमृताभिषेकोस्तु।

ससुवर्णघृतकांस्यपात्राय नमः

काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥ ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात्। घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया॥ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम्। तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम दुःस्वप्नदुष्टग्रहदुर्निमित्तादि सूचित सर्वोपद्रव शान्ति पूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये विशेषतः श्रीमृत्युञ्जयदेवताप्रीतये इदं अवलोकिताज्यं मृत्युञ्जयदेवताकं, कांस्यपात्रं विश्वकर्मदेवताकं, सुवर्णं वह्निदेवताकं ....गोत्राय ....शर्मणे ब्राह्मणाय तुभ्यं संप्रददे।

प्रार्थना- कामधेनोः समुद्भूतं देवानामुत्तमं हविः।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम्॥

दानप्रतिष्ठा-

अद्यकृतैतत् अवलोकिनाज्यकांस्यपात्रसुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

सोपस्करामान्नाय नमः ।

कायेन वाचा मनसेन्द्रियैर्वा ।
बुद्ध्यात्मना वा प्रकृतिस्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥

संक्रान्तिव्रतम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा .... देवी अहं मम सकलपापक्षयपूर्वक श्रीसत्यनारायणदेवताप्रीतये सङ्क्रान्तिव्रतं, तदङ्गत्वेन दीपकलशगणेशपूजनपुरःसरं रमासहितसत्यनारायणपूजनं ब्राह्मणद्वारा करिष्ये; तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्योवन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥
अच्युताय नमः ।

रविवारव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा .... देवी अहं मम समस्तव्याधिपरिहारपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीसूर्यनारायणदेवताप्रीतये रविवारव्रतं; तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकसपरिवारसूर्यनारायणपूजनं ब्राह्मणद्वारा करिष्ये; तत्करिष्यमाण व्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

भौमवारव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा .... देवी अहं मम ऐहिकामुष्मिकऋणापाकरणपूर्वक विद्याधनधान्यादिसमृद्धये श्रीभौमदेवताप्रीतये भौमवासर व्रतं; तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकसशक्तिकभौमपूजनं ब्राह्मणद्वारा करिष्ये; तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

अष्टमीव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा …… …… ………………… देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा श्रीस्वेष्टदेवताप्रीतये अष्टमीव्रतं; तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं स्वेष्टदेवतापूजनं ब्राह्मणद्वारा करिष्ये; तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… …शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

त्रयोदशीव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा … ……………………… देवी अहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा श्रीसदाशिवदेताप्रीतये त्रयोदशीप्रदोषव्रतं; तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वक महेश्वरपूजनं ब्राह्मणद्वारा करिष्ये; तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… …शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

पूर्णिमाव्रतम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा … …… ……………… देवी अहं मम सर्वकामसमृद्धि-

द्वारा श्रीचन्द्रदेवताप्रीतये पूर्णिमाव्रतं; तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वक रोहिणीसहित चन्द्रदेवतापूजनं ब्राह्मणद्वारा करिष्ये; तत्करिष्यमाणव्रतपूजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय ....
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

यन्मया प्रातिनिध्येन भवतोद्य कृतं व्रतम् ।
तन्निष्क्रयेण भवते फलमस्य समर्पये ॥

एकादशी गोदानम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ....
........................देवी अहं मम आजन्मोपार्जिताशेषपापोपशमनपूर्वकं एकादशीव्रतनियमाद्यनाचरणजन्यप्रत्यवायपरिहारद्वारा श्रीपरमेश्वरप्रीतये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्य कृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं-

इदं रजतं चन्द्रदेवताकं ……… गोत्राय …………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

रविवारव्रतदक्षिणादानम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ……… ……………… देवी अहं मम समस्तव्याधिपरिहारपूर्वक दीर्घायुरारोग्यैश्वर्योदयादिसिद्धये श्रीसूर्यनारायणप्रीतये ब्राह्मणद्वारा कृतस्य रविवारव्रतस्य सपरिवारसूर्यनारायणपूजनस्य च यथोक्तफलावाप्तये इमां दक्षिणां रजतं चन्द्रदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

सन्ध्याभ्रंशे गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूतरजतद्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः ………… ……………………… अहं मम अज्ञानतः स्वकर्तृकनित्योपाश्य गायत्रीजपाकरणोत्तरकालिक नानाविधान्नभक्षणादिजन्यसकलदुरितदूरीकरणद्वारा सद्यो देहशुद्धये प्राजापत्याद्यनुकल्पित गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ……… गोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोनिष्क्रयीभूतरजतद्रव्यदानकर्मणः प्रतिष्ठा

र्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

अशुचिवस्त्रधारणपूर्वकान्नादिभक्षणे गोदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम अज्ञानतः एतद्देहकर्तृक परिहिताशुचिवस्त्रधारणोत्तरसन्ध्यावन्दनान्नादिभोजनजन्य समस्तपापक्षयपूर्वकेन देहशुद्धिद्वारा नित्यनैमित्तिककर्माधिकारसिद्धये प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयीभूतं इदं रजतं चन्द्रदेवताकं .... गोत्राय ... . शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्यकृतैतत् गोनिष्क्रयीभूतरजतद्रव्यदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रतिमासे हृदि सप्तशती स्तोत्र पाठ संकल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम. सकलारिष्टशान्ति पूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीपशुपतिनाथप्रीतये अद्यारभ्य मासपर्यन्तं प्रतिदिनं एकादशावृत्ति रुद्राध्यायपाठकर्म; तथा- सकलारिष्ट शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीगुह्येश्वरीप्रीतये. अद्यारभ्य मासपर्यन्तं प्रतिदिनं सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भविता मनुः पर्यन्तं एकावृत्त सप्तशतीस्तोत्रपाठकर्म च करिष्ये; तत्करिष्यमाणपाठकर्मकर्तुं नानानामगोत्रौनानानामशर्माणौ ब्राह्मणौ एभिर्गन्धाक्षतपुष्पादिभिर्वृणे. तत्करिष्यमाणपाठकर्मणः प्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदैवताकं नाना गोत्राभ्यां नाना नाम शर्मभ्यां ब्राह्मणाभ्यां यथाभागं विभज्य दातुं ममुत्सृजे. तत्सन्न मम ॥

महामारी पाठसंकल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः कन्याराशिः पेशलवीरविक्रमवर्मा अहं मम· भूतप्रेत पिशाच यक्ष राक्षस विनायक कुष्माण्ड शाकिनी डाकिनी ग्रहाद्यावेश महामारी त्रासोल्कापातादिजन्य सर्वबाधोपद्रव निरसन पूर्वकं महाकाली महालक्ष्मी महासरस्वती देवता प्रीतये ब्राह्मणद्वारा अद्यारभ्य यथाकालपर्यन्तं प्रतिदिनं वृत्ति मार्कण्डेयपुराणान्तर्गत सप्तशती स्तोत्र पाठकर्म करिष्ये· तत्करिष्यमाण पाठकर्मकर्तुं नानानामगोत्रान् नानानामशर्मणः ब्राह्मणान्· एभिश्चन्दनपुष्पाक्षतादिभि वृणे· ॥

रुद्रिपाठ संकल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ̈ .... देवी अहं मम· अनेकजन्मार्जितदुरितोपद्रवनिवृत्तिपूर्वकं ऐहिकपुत्रपौत्रादिसर्वैश्वर्यसमन्वित-विविधसुखप्राप्त्यनन्तरशिवलोकवासकामा श्रीसाम्बसदाशिवप्रीतये एकादशब्राह्मणद्वारा लघुरुद्राध्यायपाठकर्म करिष्ये; तत्पाठकर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतादिभिर्वृणे; तत्करिष्यमाणपाठकर्मणः प्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे· तत्सन्न मम· ॥

चण्डीपाठ संकल्पः—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ……
…………………… देवी अहं मम सर्वाऽशुभनिवृत्तिपूर्वक
दीर्घायुरारोग्यैश्वर्योदयाद्यभिवृद्धये श्रीगुह्यकालीप्रीतये
एकावृत्ति सप्तशती स्तोत्रपाठं करिष्ये; तत्पाठकर्मकर्तुं ……
…… गोत्रं ………… शर्माणं ब्राह्मणं एभिश्चन्दन
पुष्पाक्षतादिभि र्वृणे; तत्करिष्यमाण पाठकर्मणः प्रतिष्ठार्थं
इमां दक्षिणां रजतं चन्द्रदेवताकं …… गोत्राय
……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रायश्चित्त गोदानम्-

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूतरजतद्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम. करिष्यमाण ... . कर्मणि पूर्वकर्तव्यनियमानाचरणजन्यप्रत्यवायपरिहारपूर्वकं तत्करिष्यमाण .... कर्माधिकारसिद्धये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रति-

क्षार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु . ॐ अमृताभिषेकोऽस्तु ॥ ॥

पुण्याहवाचनम् · फलवस्त्रादिकं गृहीत्वा ·

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम करिष्यमाण .... कर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये; तदङ्गतया .... एभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवस्त्रोपायनादिभिः पुण्याहवाचनार्थं ब्राह्मणाः युष्मानहं वृणे। वृताः स्मः॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम .... कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥१॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम .... कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥ स्वस्ति-

नस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पति र्दधातु ॥२॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम .... कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु २ ॐ ऋध्यन्ताम् ३ ॐ सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृता अभूम ॥ दिवं पृथिव्या अध्यारुहामा विदाम देवान्स्वर्ज्योतिः ॥३॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम· .... कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृध्यन्ताम् २ ॐ ज्यैष्ठ्यञ्च मऽआधिपत्यञ्चमे मन्युश्च मे भामश्च मे मश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्चमे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम .... कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे कल्याणं भवन्तो ब्रुवन्तु २ ॐ कल्याणम् ३

ॐ यथेमां वाचं कल्याणी मावदानि जनेभ्यः॥ ब्रह्मराजन्याभ्याᳫं शूद्राय चार्याय च स्वाय चारणाय च ॥ प्रियो देवानान्दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यताम् ॥५॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम .... कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३ ॐ मनसः काममाकूतीं वाचः सत्यमशीय ॥ पशूनाᳫं रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥ ६ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम .... कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॐ द्यौः शान्तिरन्तरिक्षᳫं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वᳫं शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ॥७॥

विश्वानि देवसवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥
पुण्याहवाचनसमृद्धिरस्तु. ॥

अच्छिद्रविधिः

सफलदक्षिणां शालग्राम चरणोदकं तुलसीपत्रयुतं
अर्घपात्रे गृहीत्वा अच्छिद्रमन्त्रान् पठेत् ॥

व्रतानां व्रतराजेन्द्र व्रतानां व्रतमुत्तमम् ।
व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ॥
सर्वं भवतु मे च्छिद्रं यदि चेच्छन्ति ब्राह्मणाः ।
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ॥
सर्वं भवतु मेच्छिद्रं ब्राह्मणा भवतां गिरा ।
सर्वदेवमयो विप्रो न तद्वचनमन्यथा ॥
उपवासो व्रतं चैव स्नानं तीर्थं फलं तपः ।
विप्रैः संभावितं यच्च सम्पूर्णं भवतु व्रतम् ॥
अन्नव्यञ्जनपानेषु शय्यायां ताम्रभाजने ।
यच्च भुक्तमभुक्तं वा स्वप्नान्तरमथापि वा ॥
दन्तान्तरविलग्नं वा क्षम्यतां मधुसूदन ।
ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥
तेषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः ।
व्यासवाल्मीकिवचनात्पराशरवशिष्ठयोः ॥
गर्गगौतमधौम्यात्रिकश्यपाङ्गिरसां तथा ।
वचनान्नारदादीनां सम्पूर्णं भवतु व्रतम् ॥

अच्छिद्रं भक्षभोज्येषु पर्यङ्कःशयनेषु च ।
नियमेषु च सर्वेषु भवतिद्विजवाक्यतः ॥

कृतैतत् जन्माष्टमीनिराहारव्रतं विधिहीनं, श्रद्धाहीनं, द्रव्यहीनं, देशहीनं, कालहीनं, क्रियाहीनं यत्कृतं तत्सुकृतमस्तु यन्तकृतं तद्विष्णोः प्रसादाद्ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु ।

आचार्यः यजमानहस्तात्पात्रमादाय अस्तु परिपूर्णम् ।

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

अज्ञानतिमिरान्धस्य ज्ञानेनानेन केशव ।
प्रसीद सुमुखो भूत्वा ज्ञानदृष्टिप्रदो भव ॥

इत्यभिमन्त्र्य यजमानाय दद्यात् । यजमानश्च फलं दक्षिणां च आचार्याय दत्वा तुलसीपत्रयुतं जलं पिबेत् ॥

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥

अद्येह वत्सगोत्रः भार्गव च्यावन आप्नवान् और्वजामदग्न्ये
ति पञ्चप्रवरः .... अहं मम

गर्भिणीमृगीबधप्रत्यवायहरगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयीभूतरजतद्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ……………………………… वर्मा अहं मम सगर्भमृगीबधजनितप्रत्यवायपरिहारपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तये इदं गोप्रत्याम्नायीभूतं रौप्यं चन्द्रदेवताकं ……… गोत्राय …………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोप्रत्याम्नायीभूतरौप्यदानकर्मणः प्रतिष्ठा

र्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय ....
... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्न मम· ।

अद्येह वत्सगोत्रः भार्गव च्यावनाप्नवानौर्वजामदग्न्येतिपञ्च प्रवरः …………………… वर्मा अहं मम·

श्रीगणेशाय नमः

श्रीमद्भागवत पुस्तक दान विधिः

आसने उपविश्य, दीपं प्रज्वाल्य,

आचमनम् –

ॐ आत्मतत्वाय स्वाहा, ॐ विद्यातत्वाय स्वाहा, ॐ शिवतत्वाय स्वाहा. इत्याचम्य.

ॐ सर्वतत्वाय नमः इति करं प्रक्षालयेत्.

ततः शन्नो देवीरिति मन्त्रेण कर्मपात्र निर्माणम्. कृत्वा गात्र पवित्रीकरणम्.

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतो पि वा ।
यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥

प्रायश्चित्त गोदानम्

गोनिष्क्रयीभूत रजत द्रव्याय नमः

अद्येह काश्यप गोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः .... देवी अहं मम सकल जन्मोपार्जित समस्तपापोपशमन पूर्वक श्री पुराण पुरुषोत्तम नारायण प्रीतये करिष्यमाण श्रीमद्भागवत पुराण पुस्तक दान कर्मणि पूर्वकर्तव्य नियमानाचरण जन्य सकल प्रत्यवाय परिहार पूर्वक सद्यो देह शुद्ध्ये श्रीमद्भागवत पुस्तक दाना-

धिकार सिद्धये प्राजापत्य प्रत्याम्नायीभूतां गां रुद्रदेवताकां तन्निष्क्रयीभूतं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्नमम.

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्यकृतैतत्प्राजापत्य गोप्रत्याम्नायी भूत रजत दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्नमम.

भूतोत्सादनम्.

अक्षतादिकं गृहीत्वा

अपसर्पन्तु ये भूता ये भूता भूमिमाश्रिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

विष्णुप्रार्थना – पुष्पादिकं गृहीत्वा

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ॐ विष्णवे नमः

जलं गृहीत्वा आत्मशुद्धिं कुर्यात् –

देवि त्वं प्राकृतं चित्तं पापाक्रान्तमभून्मम ।
तन्निःसारय चित्तान्मे पापं फट् फट् च ते नमः ॥

देव प्रार्थना– पुष्पादिकं गृहीत्वा.

सूर्यः सोमो महाकालो महाभूतानि पञ्च च ।
एते शुभाशुभस्येहकर्मणो नव शाक्षिणः ॥

ॐ देवेभ्यो नमः ।

भैरव प्रार्थना–

तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्य मनुज्ञां दातुमर्हसि ॥

ॐ भैरवाय नमः

अर्घस्थापनम्

भूमौ चतुरस्रं मण्डलं विधाय मध्ये शंखं चक्रं लिखित्वा पूजयेत्.

ॐ शंखाय नमः ॐ चक्राय नमः
ॐ दशकलात्मने वह्नि मण्डलाय नमः ।
ॐ द्वादशकलात्मने अँ अर्कमण्डलाय नमः ।
ॐ षोडशकलात्मने सोम मण्डलाय नमः ।

इति संपूज्य

नमः इति जलेनापूर्य. पञ्चामृत गन्धाक्षत यवदूर्वा कुश फल शर्षपादिकं अर्घपात्रे निधाय·
अङ्कुशमुद्रया तीर्थान्यावाहयेत्

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धो कावेरि जलेस्मिन्सन्निधिं कुरु ॥

वँ· इति धेनुमुद्रया अमृतीकृत्य मत्स्यमुद्रया आच्छाद्य अर्घपात्रं स्पृष्ट्वा ॐ इति दशधा जपेत्·

पूजन प्रतिज्ञा संकल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः ……………… देवी अहं मम सकलजन्मोपार्जित सर्वपापोपशमपूर्वक श्रुतिस्मृतिपुराणोक्त गोसहस्रदान सम फलावाप्ति चतुर्दश विद्या वेदाङ्ग पारगत्व सिद्धिद्वारा पुरुषोत्तम नारायण प्रीतये श्रीमद्भागवतपुराण पुस्तकदानं करिष्ये· तदङ्गतया दीपकलश गणेश पूजन पूर्वकं पुराणाधिष्ठातृ सरस्वती, [illegible] पुरुषोत्तम नारायण, वेदव्यास गणेश, शुक परीक्षित्, सूत, शौनकादि देवता पूजनं, चतुर्दश विद्या पूजनं, सोपस्कर श्रीमद्भागवत पुस्तक पूजनं च करिष्ये.

दीप कलश गणेश पूजा

दीपप्रार्थना-

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुवाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नम ॥

दीपनारायणाय नमः

कलशप्रार्थना

वरुण त्वं महाभाग सर्वदेव प्रपूजित ।
विनते मम यज्ञेस्मिन् अविघ्नं कुरु सर्वदा ॥

वरुणाय नमः

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणेशाय नमः ।

सरस्वती पूजनम्

पुस्तको परिस्थापित सुवर्णा प्रतिमायां सरस्वतीध्यानं

सुरासुरैः शेवित पादपङ्कजा
करे विराजत्कमनीय पुस्तका ।
विरिञ्चि पत्नी कमलासनस्थिता
सरस्वती नृत्यतु वाचि मे सदा ॥

ध्यानं समर्पयामि सरस्वत्यै नमः ।

आवाहनम्—

अत्रागत्य जगद्वन्द्ये सर्वलोकैक पूजिते ।
मया कृतामिमां पूजां गृहाण जगदीश्वरी ॥

आवाहनं समर्पयामि सरस्वत्यै नमः । प्राणप्रतिष्ठा [illegible]

आसनम्—

अनेक रत्न संयुक्तं सुवर्णेन विराजितम् ।
मुक्ता मणयङ्कितं चारु आसनं प्रतिगृह्यताम् ॥

आसनं समर्पयामि सरस्वत्यै नमः ।

पाद्यम्-

गन्ध पुष्पाक्षतैर्युक्तं शुद्ध तोयेन संयुतम् ।
शुद्ध स्फटिक तुल्याङ्गि पाद्यन्ते प्रतिगृह्यताम् ॥

पाद्यं समर्पयामि सरस्वत्यै नमः ।

अर्घ्यम्

भक्ताभीष्टप्रदे देवि देवदेवादि वन्दिते ।
आधाराद्दि जगद्धात्रि ददाम्यर्घ्यं गृहाण मे ॥

अर्घ्यं समर्पयामि सरस्वत्यै नमः।

आचमनीयम्-

पूर्णचन्द्रसमानास्ये कोटिसूर्यसमप्रभे ।
भक्त्या समर्पितं तुभ्यं गृहाणाचमनीयकम् ॥

आचमनीयं समर्पयामि सरस्वत्यै नमः ।

मधुपर्कम् -

दधि क्षौद्रं घृतं शुद्धं कपिलायाः सुगन्धिकम् ।
सुस्वादु मधुरं वाणि मधुपर्कं गृहाण भो ॥

मधुपर्कं समर्पयामि सरस्वत्यै नमः। मधुपर्कस्नानानन्तरं दुग्धस्नानं समर्पयामि सरस्वत्यै नमः।

गंगाजल

पयःस्नानम्

कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयःस्नानार्थमर्पितम् ॥

पयस्नानं समर्पयामि सरस्वत्यै नमः ।
पयःस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि
सरस्वत्यै नमः ।

दधिस्नानम्

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देवि स्नानार्थं प्रतिगृह्यताम् ॥

दधिस्नानं समर्पयामि सरस्वत्यै नमः ।

दधिस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि सरस्वत्यैनमः

घृतस्नानम्-

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्

घृतस्नानं समर्पयामि सरस्वत्यै नमः

घृतस्नानानन्तरं शुद्धोदक स्नानं समर्पयामि सरस्वत्यै नमः

मधुस्नानम्

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

मधुस्नानं समर्पयामि सरस्वत्यै नमः

मधुस्नानानन्तरं शुद्धोदक स्नानं समर्पयामि सरस्वत्यैनमः

शर्करा स्नानम्-

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिणी दिव्या स्नानार्थं प्रतिगृह्यताम् ॥

शर्करा स्नानं समर्पयामि सरस्वत्यै नमः

शर्करा स्नानानन्तरं शुद्धोदक स्नानं समर्पयामि सरस्वत्यै नमः

पञ्चामृतस्नानम्

दधि क्षीर घृतोपेतं शर्करा मधु संयुतम् ।
पञ्चामृत स्नानमिदं स्वीकुरुष्व सुरेश्वरि ॥

पञ्चामृत स्नानं समर्पयामि सरस्वत्यै नमः ।

शुद्धोदकस्नानम्

सुवर्णकलशानीतै र्नानागन्ध सुवासितैः ॥
शुद्धोदकैः स्नानमिदं स्वीकुरुष्व सुरेश्वरि ॥

शुद्धोदक स्नानं समर्पयामि सरस्वत्यै नमः ।

-> वस्त्रम् — लुगा दिएवा

शुक्ल वस्त्रद्वयं देवि विमलं कुटिलालके ।
भक्त्या समर्पितं वाणि ब्रह्माणि प्रतिगृह्यताम् ॥

वस्त्रं समर्पयामि सरस्वत्यै नमः ।

चन्दनम्

चन्दनं मलयोद्भूतं कुंकुमागरु मिश्रितम् ।
अष्टगन्ध समायुक्तं मङ्गे भाले विलेपय॰ ॥

चन्दनं समर्पयामि सरस्वत्यै नमः ।

अक्षतान्

अक्षतान् हीरकनिभान् रक्तान्पीतान् यथारुचि ।
शोभार्थं सं प्रदास्यामि गृहाण सुमनोहरान् ॥
अक्षतान् समर्पयामि सरस्वत्यै नमः ।

तिलयवान्

विष्णुप्रिया धान्यराजा माङ्गल्याः सतिला यवाः ॥
तस्मादेषां प्रदानेन ममास्त्वविकलं फलम् ॥
तिलयवान् समर्पयामि सरस्वत्यै नमः ।

सिन्दूरम्

अधिकाधिकशोभायाः कारकं नागसंभवम् ।
अतिरागसमायुक्तं सिन्दूरं प्रतिगृह्यताम् ॥
सिन्दूरं समर्पयामि सरस्वत्यै नमः ।

पिष्टानकम्

पुष्पोद्भवं रक्तचूर्णं देवानां प्रीतिकारकम् ।
पिष्टानकं गृहाणेदं ब्रह्माणि प्रतिगृह्यताम् ॥
पिष्टानकं समर्पयामि सरस्वत्यै नमः

पुष्पम् — मालती चंपकजपा वकुलाशोकदाडिमीः ॥
यथाप्रीति शिताः पीताः पुष्पजाती गृहाण भो ॥
पुष्पाणि समर्पयामि सरस्वत्यै नमः ।

अङ्गपूजा –

व्रह्माण्यै नमः पादौ पूजयामि। व्रह्मण्यमूर्त्यै नमः गुल्फौ पूजयामि। जगत्स्वरूपायै नमः जंघे पूजयामि। जगदादये नमः जानुनी पूजयामि। चारुविलासिन्यै नम ऊरू पूजयामि। कमलभूतये नमः कटिं पूजयामि। जन्महीनायै नमः जघनं पूजयामि। गम्भीरनाभये नमः नाभिं पूजयामि। वारिपूज्यायै नमः उदरं पूजयामि। लोकमात्रे नम स्तनौ पूजयामि। विशालवक्षसे नमः वक्षः पूजयामि। सुविपश्चितायै नमः कण्ठं पूजयामि। स्कन्दपूज्यायै नमः स्कन्धौ पूजयामि। दीर्घसुवाहवे नमः वाहू पूजयामि। पुस्तकधारिण्यै नमः हनुं पूजयामि। श्रोत्रियसंभवायै नमः श्रोत्रे पूजयामि। वेदस्वरूपायै नमः वक्रं पूजयामि। सुनासायै नमः नासिकां पूजयामि। विम्बोष्ठ्यै नमः ओष्ठौ पूजयामि। कमलनेत्रायै नमः नेत्रे पूजयामि। तिलकधारिण्यै नमः भालं पूजयामि। चन्द्रमूर्तये नमः केशान् पूजयामि। सरस्वत्यै नमः शिरः पूजयामि। व्रह्मरूपिण्यै नमः सर्वाङ्गं पूजयामि।

द्रव्यं प्रक्षालन्ती

पदक्षीणा नमसकार

अथ लक्ष्मीनारायण पूजा.

ध्यानम्.

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं।
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्।
वन्दे विष्णुं भव भय हरणं सर्वलोकैकनाथम्॥
ध्यानं समर्पयामि लक्ष्मीनारायणाय नमः

आवाहनम्.

आगच्छागच्छ देवेश तेजोराशे जगत्पते।
क्रियमाणां मया पूजां गृहाण सुरसत्तम॥
आवाहनं समर्पयामि लक्ष्मीनारायणाय नमः

आसनम्.

प्राण प्रतीष्ठा

नानारत्न समायुक्तं कार्तस्वर विभूषितम्।
आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यताम्॥
आसनं समर्पयामि लक्ष्मीनारायणाय नमः

पाद्यम्.

यद्भक्तिलेश सम्पर्कात्परमानन्द सम्भवः।
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये॥
पाद्यं समर्पयामि लक्ष्मीनारायणाय नमः

अर्घ्यम्·

तापत्रयहरं दिव्यं परमानन्द लक्षणम् ।
तापत्रय विनिर्मुक्त तवार्घ्यं कल्पयाम्यहम् ॥
अर्घ्यं समर्पयामि लक्ष्मीनारायणाय नमः

आचमनीयम्

कर्पूर वासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मयादत्तं हि भक्तितः ॥
आचमानियं समर्पयामि लक्ष्मीनारायणाय नमः

मधुपर्कम्   गां गजर्ता

सर्वकालुष्य हीनाय परिपूर्ण सुखात्मने ।
मधुपर्कमिमं देव कल्पयामि प्रसीद मे ॥
मधुपर्कं समर्पयामि लक्ष्मीनारायणाय नमः
मधुपर्क प्राशनानन्तरं जलं समर्पयामि लक्ष्मीनारायणाय नमः
ॐ।। जली-

पयः

कामधेनु समुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥
पयः समर्पयामि लक्ष्मीनारायणाय नमः
पयः प्राशनानन्तरं जलं समर्पयामि लक्ष्मीनारायणाय नमः

दधि

पयसस्तु समुद्भूतं मधुराम्ल शशिप्रभम्।
दध्यानीतं मया देव स्नानार्थे प्रतिगृह्यताम्॥
दधि समर्पयामि लक्ष्मीनारायणाय नमः
दधि प्राशनानन्तरं जलं समर्पयामि लक्ष्मीनारायणाय नमः

घृतम्

नवनीत समुत्पन्नं सर्वसन्तोष कारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥
घृतं समर्पयामि लक्ष्मीनारायणाय नमः
घृत प्राशनानन्तरं जलं समर्पयामि लक्ष्मीनारायणाय नमः

मधु

तरु पुष्पसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥
मधु समर्पयामि लक्ष्मीनारायणाय नमः
मधु प्राशनानन्तरं जलं समर्पयामि लक्ष्मीनारायणाय नमः

शर्करा

इक्षुसार समुद्भूता शर्करा पुष्टिकारिका।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥

शर्करा समर्पयामि लक्ष्मीनारायणाय नमः
शर्करा प्राशनानन्तरं जलं समर्पयामि लक्ष्मीनारायणाय नमः

मिश्रित पञ्चामृतम्.

पञ्चामृतं मयानीतं पयोदधि घृतं मधु ।
शर्करा गुणसंयुक्तं स्नानार्थं प्रतिगृह्यताम् ॥
पञ्चामृतं समर्पयामि लक्ष्मीनारायणाय नमः
पञ्चामृत स्नानानन्तरं जलं समर्पयामि लक्ष्मीनारायणाय नमः

गङ्गाजलम्.

गङ्गा कृष्णा गौतमी च कावेरी च शतद्रुदाः।
ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम् ॥ 2
गङ्गाजलं समर्पयामि लक्ष्मीनारायणाय नमः

सुगन्धी द्रव्यम्.

गन्ध कर्पूर संयुक्तं कस्तुर्यादि सुवासितम् ॥
अङ्गोद्वर्त्तनकं देव गृहाण परमेश्वर ॥
सुगन्धी द्रव्यम् समर्पयामि लक्ष्मीनारायणाय नमः

वस्त्रम्.

कुङ्कुमादि समायुक्तं नाना गन्धित वासितम् ।
इदं वस्त्रं मया दत्तं श्री विष्णो प्रतिगृह्यताम् ॥
वस्त्रं समर्पयामि लक्ष्मीनारायणाय नमः

यगरि

उपवीतम्.

नवभिस्तंनुभि र्युक्तं त्रिगुणं देवतामयम् ।
उपवितं मया दत्तं गृहाण परमेश्वर ॥
उपवितं समर्पयामि लक्ष्मीनारायणाय नमः
भुषणार्थे पुष्पं समर्पयामि लक्ष्मीनारायणाय नमः

चन्दनम्.

श्रीखण्ड चन्दनं दिव्यं केशरादि समन्वितम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
चन्दनं समर्पयामि लक्ष्मीनारायणाय नमः

अक्षता.

अक्षतांश्च सुरश्रेष्ठ कुङ्कुमाक्ता न्सुशोभनाम् ।
मयानिवेदिता भक्त्या गृहाण परमेश्वर ॥
अक्षतान् समर्पयामि लक्ष्मीनारायणाय नमः

यवतिलान्.

विष्णुप्रिया धान्यराजा माङ्गल्याः सतिलायवाः ।
तस्मात्तेषां प्रदानेन ममास्त्व विकलं फलम् ॥
यवतिलान् समर्पयामि लक्ष्मीनारायणाय नमः

सिन्दूरम्.

उद्यदादित्य संकासं स्त्रीणां सीमन्त भूषणम् ।

वीरालङ्करणं देव सिन्दूरं प्रतिगृह्यताम् ॥
सीन्दूरं समर्पयामि लक्ष्मीनारायणाय नमः

पिष्टातकम्.

पुष्पोद्भवं रक्तचूर्णं देवानां प्रीतिकारकम् ।
पिष्टातकं गृहाणेदं शरणागत वत्सल ॥
पिष्टातकं समर्पयामि लक्ष्मीनारायणाय नमः

पुष्पाणि.

तुरीयवन सम्भूतं नानागुण मनोहरम् ।
अमन्दसौरभं पुष्पं गृह्यतामिद मुत्तमम् ॥
पुष्पाणि समर्पयामि लक्ष्मीनाहायणाय नमः

माल्यम्.

माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः ।
मया हृतानि पूजार्थं गृहाण पुरुषोत्तम ॥
माल्यम् समर्पयामिलक्ष्मीनारायणाय नमः
तुलसीपत्रं समर्पयामि लक्ष्मीनारायणाय नमः

अथाङ्गपूजा.

श्रीकृष्णाय नमः पादौ पूजयामि ॥ संकर्षणाय नमः गुल्फौ पूजयामि ।
कालात्मने नमः जानुनी पूजयामि ॥ विश्वकर्मणे नमः जंघे पूजयामि ॥

विश्वनेत्राय नमः कटिं पूजयामि । विश्वकर्त्रे नमः मेढ्रं पूजयामि ॥ पद्मनाभाय नमः नाभिं पूजयामि ॥ परमात्मने नमः हृदयं पूजयामि ॥ श्रीकण्ठाय नमः कण्ठं पूजयामि ॥ सर्वास्त्रधारिणे नमः बाहू पूजयामि । वाचस्पतये नमः मुखं पूजयामि ॥ केशवाय नमः ललाटं पूजयामि ॥ सर्वात्मने नमः शिरः पूजयामि ॥ लक्ष्मीनारायणाय नमः सर्वाङ्गं पूजयामि ॥

धूपम्·

वनस्पति रसोपेतो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥
धूपं आघ्रापयामि लक्ष्मीनारायणाय नमः

दीपम्·

सुप्रकाशो महान्दीप स्त्रैलोक्यतिमिरापहः ।
सवाह्याभ्यन्तरं ज्योतिर्दीपोयं प्रतिगृह्यताम् ॥
दीपं दर्शयामि लक्ष्मीनारायणाय नमः

नैवेद्यम्·

सत्पात्र शुद्धं सुहवि र्विविधानेक भक्षणम् ।
निवेदयामि देवेश सानुगाय गृहाण तत् ॥
नैवेद्यं समर्पयामि लक्ष्मीनारायणाय नमः

जलम्:

कर्पूर वासितं तोयं मन्दाकिन्या समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥
जलम् समर्पयामि लक्ष्मीनारायणाय नमः

करोद्वर्तनम्:

गन्ध कर्पूर संयुक्तं कस्तुर्यादि सुवासितम् ।
करोद्वर्तनकं देव गृहाण परमेश्वर: ॥
करोद्वर्तनं समर्पयामि लक्ष्मीनारायणाय नमः

ताम्बूलम्:

पूगीफल समायुक्तं सुधाखदिर संयुतम् ।
भक्त्यादत्तं मया देव ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं समर्पयामि लक्ष्मीनारायणाय नमः

नारिकेलफलम्:

फलानिमानि देवेश स्थापितानि पुरस्तव ।
तेन मे सफलावाप्ति र्भवेज्जन्मानि जन्मानि ॥
नारिकेलफलम् समर्पयामि लक्ष्मीनारायणाय नमः

उपायनद्रव्यम्:

हिरण्य गर्भ गर्भस्थ हेमबीजं विभावसो: ।

अनन्तपुण्य फलदमतः शान्तिं प्रयच्छ मे ॥
उपायनद्रव्यं समर्पयामि लक्ष्मीनारायणाय नमः

नीराजनम्

पञ्चवर्ति समायुक्तं घृतेन ज्वालितं मया ।
आरार्तिकं प्रदत्तेन तेन तुष्टः सदा भव ॥
नीराजनम् समर्पयामि लक्ष्मीनारायणाय नमः

कर्पूरनीराजनम्

कर्पूरगौसंयुक्तं कर्पूरं च प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥
कर्पूरनीराजनं समर्पयामि लक्ष्मीनारायणाय नमः

चामरम्

शशाङ्क करसंकाश हिम डिण्डीरपाण्डर ।
प्रोत्सारयाशु दुरितं चामराम्बर वल्लभ ॥
चामरं समर्पयामि लक्ष्मीनारायणाय नमः

व्यजनम्

व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखावहम् ।
अस्य प्रदानात् सकला मम सन्तु मनोरथाः ॥
व्यजनं समर्पयामि लक्ष्मीनारायणाय नमः

पुष्पाञ्जलि

या कुन्देन्दु तुषारहार धवला या शुभ्र वस्त्रावृता ।
या वीणा वरदण्ड मण्डितकरा या श्वेत पद्मासना ॥
या व्रह्माच्युत शंकर प्रभृतिभि र्देवैः सदा वन्दिता ।
सा मां पातु सरस्वती भगवती निःशेष जाड्यापहा ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं।
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यान गम्यम्।
वन्दे विष्णुं भवभय हरणं सर्वलोकैक नाथम्॥

पुष्पाञ्जलिं समर्पयामि सरस्वत्यैनमः लक्ष्मीनारायणाय नमः

प्रदक्षिणा.

यानि कानि च पापानि ब्रह्महत्यासमानि च।
तानि तानि प्रणश्यन्तु प्रदक्षिण पदेपदे॥

नमस्कारः

नमः सर्वहितार्थाय जगदाधार हेतवे। चन्दनाक्षत पुष्पं
साष्टाङ्गोयं प्रणामोस्तु प्रणयेन मया कृतः॥ गृहीत्वा

श्रीमद्भागवत पुस्तकायनमः व्यासाय नमः
गणेशाय नमः सूतपौराणिकाय नमः शुकदेवाय नमः
चतुर्दश विद्याभ्यो नमः

ब्राह्मणवरणम्. पुस्तक दानम्.

उत्तराङ्ग.पूजा.

दीपनाथाय नमः कलशायनमः गणेशाय नमः आवाहित देवताभ्योनमः

अर्घ भ्रामणम्·
भूमौ स्खलित पादानां भूमिरे वा वलम् वनम्।
त्वयि जाता पराधानां त्वमेव शरणं मम॥
अर्घपात्रं पराङ्मुखं कृत्वा· पराङ्मुखार्घ पात्राय नमः
तत् पात्रं उत्तानं कृत्वा· ॐ अछिद्रमस्तु इति जलं दद्यात्·
विसर्जनम्· चन्दनाक्षत पुष्पं गृहीत्वा
गच्छन्तु देवताः सर्वाः पूजामादाय पार्थिवम्।
इष्टकाम्य प्रसिद्ध्यर्थं पुन रागमना यवै॥
मन्त्रहीनं क्रियाहीनं विधिहीनं च यद्भवेत्।
तत्सर्वं क्षमतां देव प्रसीद परमेश्वर॥ गोदानम्·
सोपस्कर आमान्न दानम्· दक्षिणादानं भोजनदानञ्च
यस्यस्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥ ॐ अच्युताय नमः २
कायेन वाचा मनसेन्द्रियैर्वा।
बुद्ध्यात्मना वानुसृतः स्वभावात्॥
करोमि यद्यत्सकलं परस्मै।
नारायणायेति समर्पये तत्।

श्री।

पूर्वाङ्ग दिन कृत्या
नुक्रमणिका

शतचौडी संकल्प

आसनशुद्धि:॥

ॐ आसन मैत्रस्य मेरुपृष्ठ ऋषि: सुतलं छन्द: कूर्मो देवता आसनोपवशने विनियोग: मैत्र·

पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता
त्वंच धारय मां नित्यं पवित्रं कुरु चासनम्·॥
आधार शक्ति कमला सनाय नम:

भूतोपसारणम्॥

अपसर्पनु तेभूता ये भूता भूमि माश्रिता:
येभूता विघ्नकर्तार स्तेनश्यन्तु शिवाज्ञया॥
अपक्रामनु भूतानि पिशाचा· सर्वतो दिशम्·
सर्वेषा मविरोधेन सर्वकर्म समारभे॥ इति भूतानपसार्य

इश्वर प्रार्थना

शुक्लाम्बर धरं विष्णुं शशि वर्णं चतु र्भुजम्
प्रसन्न वदनं ध्याये सर्व विघ्नोपशान्तये॥
मङ्गलं भगवान्विष्णु र्मङ्गलं गरुड ध्वज:
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरि:॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजय:
येषामिन्दि वरश्यामो हृदयस्थो जनार्द्दन:॥
सुमुख: चैक दन्तश्च· कपिलो गज कर्णक:
लम्बोदरश्च विकटो विघ्न नाशो गणाधिप:॥ ० इत्यादि

कर्मपात्र निर्माणम् ॥
सन्नोदेवीरभिष्टय० गन्धद्वारा० अक्षन्नमी० श्रीश्चते० पवित्रेस्थ० इति
अपवित्रः पवित्रोवा. इत्यभिषिच्य ॥

प्रायश्चित्त गोदानम्

नमो गोभ्येति गाँ. तन्निष्क्रय द्रव्यं वा सम्पूज्य ततो ब्राह्मणं सम्पूज्य

कुशादिन्यादाय

पूर्व संकल्पमुच्चार्य······ मम समस्त पाप क्षय पूर्वक श्री मद्भग
वति गुह्यकालिका प्रसाद सिद्धि द्वारा अशेषतः क्षेमानन्द सम
न्वित दीर्घायुरारोग्यैश्वर्योदया वाप्तये विशेषतः नृपा[illegible]नुरोधेन
द्वीपान्तरीय महासमर कर्माङ्गभूत मित्र राष्ट्र सम्बन्धि यत्किञ्चित्
सहाय दान कर्मणि नि[illegible]युक्त अस्म द्राजकीय सैन्यानां सर्व
तो विजया वाप्ति पूर्वक सुखेन प्रत्यागमन. प्राप्त्यर्थं श्री मद्गुह्य
कालिका भगवती प्रीतये अद्यारम्य पञ्चम दिवस पर्यन्तं करि
ष्यमाणस्य शतचण्डी पाठ कर्मणः तत्पूर्वाङ्गोत्तराङ्ग कर्मणः संक
ल्पस्य अधिकारता सिद्धये प्राजापत्य प्रत्याम्नायीभूतां इमां
गाँ इत्यादि

प्रार्थना कपिले सर्व देवानां पूजनीयासि रोहिणि
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छमे ॥ इति
दान प्रतिष्ठा. अद्य कृतैतत् इत्यादि द्यौः शान्तिरिति
अभिषेकश्च.

× प्रतिज्ञा संकल्पः ×

मम काय वाङ् मनो जनितानां ज्ञाताना मज्ञातानाञ्च महापातको पपातकानां अत्यन्त निरसन पूर्वकं श्रीमद्भगवति गुह्यकालिका प्रसाद सिद्धि द्वारा अशेषतः क्षेमानन्द समन्वित दीर्घायु रारोग्यावाप्तये विशेषतः नृपानुरोधेन द्वीपान्तरीय महा समर कर्माङ्गभूत मित्र राष्ट्र सम्बन्धि यत्किञ्चित्सहाय दान कर्मणि नियुक्त अस्मद्राजकीय सैन्यानां सर्वतो विजयावाप्ति पूर्वक सुखेन प्रत्यागमनप्राप्त्यर्थं श्रीमद्गुह्यकालिका भगवती प्रीतये अद्यारभ्य पञ्चम दिवस पर्यन्तं ब्राह्मण द्वारा आद्यन्तयोः प्रत्यावृत्ति अष्टोत्तर शत संख्याक नवार्ण मन्त्रसंपुटित शत संख्याकावृत्ति सप्तशति स्तोत्र पाठ कर्म तत्पूर्वाङ्गोत्तराङ्ग तया दीप· कलश· गणेश ग्रह मातृका वास्तुमण्डल मण्डप देवता पूजनाभ्युदयिक श्राद्ध करण पूर्वकं सुवर्ण प्रतिमायां यथा मिलितो पचारैः श्रीभगवत्या आवाहन स्थापन पूजनादि कर्म स्वगृह्योक्तानुसारेणाग्नि स्थापनानन्तरं ग्रह वास्तु मण्डल मण्डप देवता आवरण देवता होम पूर्वकं दशावृत्ति सप्तसति स्तोत्रेण जपदशांश नवार्ण मन्त्रेणच हवन कर्म तद्दशांशतर्पण कर्म तद्दशांश मार्जन कर्मच करिष्ये ——— इति

दीप· कलश गणेश पुष्पाञ्जलिः

नमोस्त्वनन्ताय सहश्र मूर्तये सहश्रपादाक्षि शिरोरुवाह्वे,
सहश्रनाम्ने पुरुषाय शाश्वते सहश्र कोटी युग धारिणे नमः॥
वरुणः शवलो विष्णुः पुरुषो निम्नगाधिपः
पाश हस्तो महासत्वो नित्यं तस्मै नमो नमः॥
वक्रतुण्ड महाकाय कोटि सूर्य सम प्रभ
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा,॥

पुष्पाञ्जलिं समर्पयामि सपरिवाराय दीपनारायणाय वरुण कलशाय श्रीमन्म हाँ गणाधिपाय नमः इति पुष्पाञ्जलिं कृत्वा ४॥

अर्घ्य निवेदनम्·

त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहा भवत्पुनः ततो विश्वं व्यक्रामत्सा सनानशनेऽअभि इदमर्घ्यं निवेदयामि ······नम॥

ततो मण्डप प्रवेशं कूर्यात्,

वरण संकल्प ३ पत्रे तद्दशांश मार्जन कर्म कर्तुम् पर्यन्तं प्रतिज्ञावत्
X ततः वेदवृइर्यं.x एभिश्चन्दन पुष्पाक्षत पूगीफल धौतोत्तरीय स्वर्णमुद्रि
का जलपात्रासन भूषणादिभिः ..... गोत्रं ....
श्र्माणं व्राह्मणं आचार्यत्वेन ततः किञ्चिन्यून साम
ग्रिभिःनानानामगोत्रान्नानानाम शर्मणो व्राह्मणान्
गणपति व्रह्म सदस्य ऋत्विग्जापक द्वारपाल परि
चारकत्वेन च युष्मानहं वृणे, ———— इति.x

तत आचार्याय मधुपर्कं विधाय

तदनु तिलकं कृत्वा आचार्यं प्रार्थयेत्:
त्वं गुरु जगतां श्रेष्ठ त्वमेव गरुड ध्वज
अस्मिन्यज्ञे द्विजेन्द्राणां त्वामाचार्यं भजाम्यहं १॥
प्रेयः) अस्मिन् शत चण्डि पाठ कर्मणि आचार्य त्वेन त्वामहं वृणे
(वृतोस्मि)
(यथाविहितं कर्म कुरु) (यथाज्ञानं करवाणि)

गणपतिंवृत्वा प्रार्थयेत्
आवाहयाम्यहं देवं वरदं गणनायकम्
निर्विघ्नं क्रियतां यज्ञे कार्यसिद्धिं गणेश्वर॥

(प्रैषः)

अस्मिन् शतचण्डि पाठ कर्मणि गणपति त्वेन त्वामहं वृणे,
(वृतोस्मि) (यथाविहितं कर्मकुरु) (यथाज्ञानं करवाणि)

ब्रह्माणं वृत्वा प्रार्थयेत

यथाचतुर्मुखो ब्रह्मा सर्वधर्मभृतांवर
तथात्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम·।।

(प्रैष) अस्मिन् शत चण्डि पाठ कर्मणि ब्रह्मत्वेन त्वामहं वृणे,
(वृतोस्मि) (यथाविहितं कर्म कुरु) (यथाज्ञानं करवाणि·)

सदस्यं वृत्वा प्रार्थयेत्

भगवन् सर्व धर्मज्ञ सर्वलोक परो विभुः
विततेमम यज्ञेस्मिन् सदस्योभव सुव्रत·।।

”

ऋत्विजोवृत्वा प्रार्थयेत्

अस्य यागस्य निष्पत्तौ भवन्तो भ्यर्थिता मया
सुप्रशन्ना प्रकुर्वन्तु शान्तिकं विधि पूर्वकम्·।।

”

जापकान् वृत्वा प्रार्थयेत्

”

द्वारपालान् वृत्वा प्रार्थयेत्

”

परिचारको वृत्वा,

पुण्याह वाचनम्

अहं मम अस्मिन् शतचण्डि पाठ कर्मणि मण्डपे भो ब्राह्मणाः
पुण्याहं॰ भवन्तो ब्रुवन्तु — ३ ॐ पुण्याहं ३ पुनन्तुमा॰
स्वस्ति॰ भवन्तो ब्रुवन्तु — ३ ॐ स्वस्ति ३ स्वस्तिन इन्द्रः॰
ऋद्धिं॰ भवन्तो ब्रुवन्तु — ३ ॐ ऋध्यताम् ३ सत्रस्य॰
वृद्धिं॰ भवन्तो ब्रुवन्तु — ३ ॐ वृद्ध्यताम् ३ ज्येष्ठ्यश्चम॰
कल्याणं॰ भवन्तो ब्रुवन्तु — ३ ॐ कल्याणं ३ यथेमां वा॰
शान्तिं॰ भवन्तो ब्रुवन्तु — ३ ॐ शान्तिः ३ द्यौशान्ति॰
श्रियं॰ भवन्तो ब्रुवन्तु — ३ ॐ श्रीः ३ मनसः का॰

ज्येष्ठ्यश्चम आधिपत्यञ्चमे मन्युश्चमे भामश्चमे
मश्चमे म्भश्चमे जेमाच्चमे महिमाच्चमे वरिमाचमे
प्रथिमाचमे वर्षिमाचमे द्राघिमाचमे वृद्धञ्चमे
वृद्धिश्चमे यज्ञेन कल्पन्ताम् ———

इति पूर्वाङ्ग कर्म

पुष्पाञ्जलिः

कन्यापूजा

कुमार पूजा

पूर्ण पात्र दानम्

प्रणिता विमोक —— सुमित्रियान आप०
वर्हि होम —— देवा गातु विदो०
मेधा —— सदस्पति मद्भूतं०
वस्त्र होम —— एधोस्येधिषि०
चरु शेष होम —— अभ्यादधामि०

प्रतिमादान संकल्प

प्रार्थना

त्रैलोक्य मातर्देवित्वं सर्वभूत दयान्विते
दानेना नेन सुप्रीता प्रसन्ना वरदा भव· ॥

यान प्रतिष्ठा

यज्ञाङ्ग गोदान

१

भूमिदानं

दक्षिणा संकल्प

अभिशेषः प्रसादादिकं निवर्त्य

मण्डप दान संकल्प

प्रार्थना

त्रैलोक्य पूजिते देवि जगदानन्द कारिके
ममाभिष्ट फलं देहि मण्डपस्य प्रदानतः

दान प्रतिष्ठा

कायेतवाचा॰

१८८६ साल फाल्गुन
१६ गते पल्टन छिन्दु
छ्यार जाँदा श्रीगुरु
बरी माल्लागो
को २ बिबी
पढी

प्रतिमादानम् ·

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम काश्यपगोत्रायाः ...... देव्याः जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघुगुरु समस्त पाप निरसनपुरःसरं विष्णोः सायुज्य मुक्ति फलावाप्तये सप्ताहे श्रीमद्भागवतवाचनकर्मणि ताम्रघटोपरि स्थित ताम्रथाल्युपरि स्थापितां सुपूजितां लक्ष्मीनारायण सौवर्णी प्रतिमां विष्णुदेवताकां ...... गोत्राय ..... शर्मणे श्रीमद्भागवतवाचकाय शुकरूपाय ब्राह्मणाय तुभ्यं संप्रददे ·

प्रार्थना

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम ।
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा ·

अद्य कृतैतत् सुपूजित लक्ष्मीनारायण प्रतिमा दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ·

पुस्तकदानम् ·

श्रीमद्भागवत महापुराण पुस्तकाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम काश्यपगोत्रायाः .... देव्याः जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघुगुरु समस्त पाप

Nepal Sanskrit University, Balmaki Campus, Kathmandu

निरसन पुरःसरं विष्णोः सायुज्यमुक्ति फलावाप्तये सप्ताहैः श्रीमद्भागवत श्रवण कर्मणः साङ्गता सिद्धि पूर्वक श्रुति स्मृति पुराणोक्त गोसहस्र महादान समफलावाप्ति चतुर्दश विद्यावेदाङ्ग पारगत्व सिद्धि पूर्वक तापत्रय निवारण श्रीमद्भागवत महापुराणाक्षर समसंख्य वर्षावधि स्वर्गलोक निवासोत्तरं श्रीनारायण सायुज्यतावाप्तये सवितान खट्वोपरिस्थापितं छत्रोपानद् यष्टिका सौवर्णलेखनी राजतमसीपात्र सहितं सुवर्णसिंहासनोपरिस्थितं सुपूजित लक्ष्मीनारायण सरस्वती प्रतिमान्वितं सदोरक पुस्तक वन्धन पट्टवस्त्र सहितं रक्षा हेतुक काष्ठफलक द्वय घटितं श्रीमद्भागवत महापुराण पुस्तकं सरस्वती देवताकं ····· गोत्राय ···· शर्मणे ब्राह्मणाय वाचकाय तुभ्यं संप्रददे·

प्रार्थना·

सर्व विद्यारूपं ज्ञान करणं ललिताक्षरम्।
पुस्तकं संप्रयच्छामि प्रीता भवतु भारती ॥
सरस्वति जगन्मातः शब्द ब्रह्माधि दैवते।
अस्य प्रदानाद्वागीशा प्रसन्ना जन्म जन्मनि ॥

दानप्रतिष्ठा·

अद्य कृतैतत् सोपस्कर श्रीमद्भागवत महापुराण पुस्तक दान कर्मणः प्रतिष्ठार्थं इदं ~~सुव~~रजतं चन्द्रदेवताकं ····· गोत्राय ····· शर्मणे ब्राह्मणाय वाचकाय तुभ्यं संप्रददे· तत्सन्न मम·

दम्पतीपूजा·

पादप्रक्षालनम्.

आपद् घन ध्वान्त सहस्र भानव: समीहितार्थार्पण कामधेनव: ।
अपार संसार समुद्र सेतव: पुनन्तु मां ब्राह्मण पाद रेणव: ॥

आचमनं कारयित्वा तिलकं दद्यात्. पुष्पमाला. धूपं. दीपं. नैवेद्यम्.

दम्पति प्रार्थना.

नमो ब्रह्मण्य देवाय गोब्राह्मण हिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नम: ॥

द्विज दम्पतीभ्यां नम:

शय्या वस्त्र भूषण दानम्.

सोपस्कर शय्यायै नम:

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम काश्यपगोत्राया: ...... देव्या: जन्म जन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघु गुरु समस्त पाप निरसन पुर:सरं विष्णो: सायुज्य मुक्ति फलावाप्तये सप्ताह: श्रीमद्भागवत श्रवण कर्मण: यथोक्त फलावाप्तये परिधानीय वस्त्र भूषण सहितां गृह क्षेत्र निष्क्रय द्रव्ययुतां इमां सोपस्कर शय्यां विष्णु देवताकां ...... गोत्राय ...... शर्मणे सपत्नीकाय ब्राह्मणाय तुभ्यं सं प्रददे.

प्रार्थना

यथा न: कृष्ण शयनं केशवस्य शिवस्य च ।

शय्या ममाप्यशून्यास्तु तस्माज्जन्मनिजन्मनि ॥

दानप्रतिष्ठा

अद्य कृतैतत् सोपस्करण शय्या दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवतं ..... गोत्राय ..... शर्मणे सपत्नीकाय ब्राह्मणाय तुभ्यं संप्रददे । तत्सन्न मम ।

गोदानम् ।

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोभ्यो नमः ;

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ..... देवी अहं मम काश्यपगोत्रायाः ..... देव्याः जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघुगुरु समस्त पाप निरसनपूर्वकं विष्णोः सायुज्य मुक्ति फलावाप्तये सप्ताह श्रीमद्भागवत श्रवण कर्मणः साङ्गतासिद्ध्ये स्वर्णशृङ्गीं रौप्यखुरीं ताम्रपृष्ठीं कांस्योपदोहनां सुवर्णतिलकोपेतां मुक्तालाङ्गुलविभूषितां इमां गां रुद्रदैवतां ..... गोत्राय ..... शर्मणे ब्राह्मणाय वाचकाय तुभ्यं संप्रददे ।

प्रार्थना·

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मा तस्माच्छान्तिं प्रयच्छमे ॥

दानप्रतिष्ठा·

अद्य कृतैतत् सालङ्कार गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ···· गोत्राय ···· शर्मणे ब्राह्मणाय वाचकाय तुभ्यं सम्प्रददे तत्सन्न मम·

दक्षिणा सङ्कल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ···· देवी अहं मम काश्यपगोत्रायाः ···· देव्याः जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघुगुरु समस्त पाप निरसन पुरःसरं विष्णोः सायुज्य मुक्ति फलावाप्तये सप्ताहेः श्रीमद्भागवत श्रवण कर्मणः हवन कर्मणश्च प्रतिष्ठा साङ्गता सिद्धये इदं रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नानानामशर्मभ्यो वाचक उपवाचक गणेश जापक द्वारपाल परीक्षित परिचारकादिभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दक्षिणात्वेन दातुं जले समुत्सृजे·

पूर्णपात्र दानम्·

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ···· देवी अहं मम सप्ताहेः श्रीमद्भागवत श्रवण कर्माङ्गभूत हवन कर्मणः अपूर्ण पूर्णार्थं पूर्णपात्रं प्रजापति देवताकं ···· गोत्राय ····

शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

मेधा. वस्त्रहोम. शेषचरुहोम.

घृतच्छाया.

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥
ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया पशुभिर्भूयात्॥
घृतेन द्यावापृथिवी पूर्य्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥
अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम्।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय॥

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ...... देवी अहं मम सप्ताहे: श्रीमद्भागवतश्रवणकर्मणि ज्ञानाङ्गतया इदं स्वमुखावलोकितं आज्यं मृत्युञ्जयदेवताकं कांस्यपात्रं विश्वकर्म देवताकं सुवर्णं वह्नि देवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना.

कामधेनोः समुद्भूतं देवानामुत्तमं हविः।
आयुर्वृद्धिकरं दातु राज्यं पातु सदैव माम्॥

दानप्रतिष्ठा.

अद्य कृतैतत् स्वमुखावलोकिताज्य कांस्यपात्र सुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. तत्सन्न मम.

पञ्चान्तगोदानम्.

गोनिष्क्रयीभूत रजतखण्डाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ..... देवी अहं मम काश्यपगोत्रायाः ..... देव्या जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानुमोदित लघु गुरु समस्त पाप निरसन पूर्वकं विष्णोः सायुज्यमुक्ति फलावाप्तये सप्ताहे: श्रीमद्भागवत वाचन कर्मणः तदङ्गत्वेन हवन ब्राह्मणभोजनादिकर्मणश्च प्रतिष्ठार्थं न्यूनातिरिक्त परिपूरणार्थं इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे श्रीमद्भागवत वाचकाय ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना.

कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा.

अद्य कृतैतत् गोनिष्क्रयीभूत रजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय वाचकाय तुभ्यं संप्रददे. तत्सत् मम.

ब्राह्मणभोजन भूयसी.

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो।
अनन्त पुण्यफलद मतः शान्तिं प्रयच्छ मे॥

रजतद्रव्याय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ····· देवी अहं मम काश्यपगोत्रायाः ····· देव्याः जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानु मोदित लघुगुरु समस्त पाप निरसन पुरःसर विष्णोः सायुज्य मुक्ति फलावाप्तये सम्प्राद्देः श्रीमद्भागवत श्रवण कर्मणः साङ्गतासिद्ध्यै ब्राह्मण भोजनकर्म करिष्ये· तत्र क्रियमाण भोजनकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नाना नाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य भोजन दक्षिणात्वेन भूयसी दक्षिणात्वेन च दातुं जले समुत्सृजे·तत्सन्न मम·

अभिषेकः प्रसाद ·

मण्डपदानम्·

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ····· देवी अहं मम काश्यपगोत्रायाः ····· देव्याः जन्मजन्मान्तरीय कायिक वाचिक मानसिक सांसर्गिक कारितानु मोदित लघु गुरु समस्त पाप निरसन पुरःसर विष्णोः सायुज्य मुक्ति फलावाप्तये सम्प्रोद्देः श्रीमद्भागवतश्रवण कर्मणि तत्र देवता स्थापन पूजन हवनादि कर्मसंपन्नये विनिर्मितं ध्वजपताकादि मण्डितं सुशोभितं तत्तद्देवता प्रीतिमा सन्तापं सर्पीच्छदं इदं मण्डपं विश्वकर्म देवताकं ····· गोत्राय ····· शर्मणे श्रीमद्भागवत वाचकाय ब्राह्मणाय तुभ्यं संप्रददे·तत्सन्नमम।

प्रार्थना

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम ।
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा ·

अद्य कृतैतत् सप्ताहे: श्रीमद्भागवत वाचनाङ्ग· सपरिच्छद मण्डप दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे वाचकाय तुभ्यं संप्रददे· नतसन्न मम·

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युतायनमः
कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृत स्वभावात् ।
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेतत् ॥

श्री कृष्णार्पणमस्तु ·

ब्राह्मणवरणम् -

वरणद्रव्याय नमः अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति कल्याणाशिः पेशल वीरविक्रम वर्मा अहं मम सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्यादिप्राप्तये जन्मोत्सवकर्म करिष्ये, तत्पूर्वाङ्गत्वेन दीप कलश गणेशपूजनं, मातृकापूजनं, आभ्युदयिकगोदानं, ग्रहपूजनं, वास्तुपूजनं, षोडशारमगाड[illegible]पूजनं, तुलादेवताधिवासनपुरःसरं मार्कण्डेयाद्यष्ट चिरञ्जीविसंपूजनं, षष्ठिकादेवीसंपूजनं, तथा स्वगृह्योक्तप्रकारेण अग्निप्रज्वालनपूर्वक संपूजितदेवताहवनादिकर्म करिष्ये, तत्कर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् गन्धचन्दनपुष्पाक्षतधौतोत्तरीयमुद्रिकाजलपात्रासनादिभि र्युष्मानहं वृणे।

वृताः स्मः॥

पुण्याहवाचनम् -

फलवस्त्रादिकं गृहीत्वा अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [illegible]ऽहं मम करिष्यमाणजन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये। तदङ्गतया …………… गन्धचन्दनपुष्पाक्षतवस्त्रोपायनादिभिः पुण्याहवाचनार्थं ब्राह्मन् त्वामहं वृणे। वृताः स्मः॥

अद्येह काश्यप गोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
कन्याराशिः पेशलनवीरविक्रमवर्मा अहं मम जन्मोत्सवकर्म
णि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे पु
ण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुन
न्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा
भूतानि जातवेदः पुनीहि मा ॥ १ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्र
वरः कन्याराशिः पेशलनवीरविक्रमवर्मा अहं मम जन्मोत्सवकर्म
णि सर्वाभ्युदयप्राप्तये मम गृहे स्वस्ति भवन्तो
ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः
स्वस्तिनः पूषा विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरि
ष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ २ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवरः कन्याराशिः पेशलनवीरविक्रमवर्मा अहं मम जन्मोत्सवकर्म
णि सर्वाभ्युदयप्राप्तये भो ब्राह्मणा ममगृहे
ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋध्यताम् ३ ॐ सत्रस्य
ऋद्धिरस्य गन्मज्योतिरमृता अभूम ॥ दिवं पृथिव्या
अध्यारुहामाविदाम देवान्स्वर्ज्योतिः ॥ ३ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवरः पेशलनविक्रम वर्मा अहं मम जन्मोत्सवकर्म

णि सर्वाभ्युदयप्राप्तये भो ब्राह्मणा मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋद्ध्यताम् ३ ॐ ज्यैष्ठ्यञ्च म ऽआधिपत्यञ्च मे मन्युश्च मे भामश्च मे ऽमश्च मे ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [illegible] वर्मा अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे कल्याणं भवन्तो ब्रुवन्तु ३ ॐ कल्याणम् ३ ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्या ँ शूद्राय चार्याय च स्वाय चारणाय च ॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यताम् ॥ ५ ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः [illegible] वर्मा अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥ पशूना ँ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥ ६ ॥

अथेह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिप्रवरः विक्रमवर्मा मम जन्मोत्सवकर्म
णि सर्वाभ्युदयशान्त्य भोब्राह्मणाः मम गृहे शा
न्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॐ द्यौः शान्तिर
न्तरिक्षꣳ शान्तिः पृथिवी शान्ति रापः शान्ति रोषधयः
शान्तिः ॥ वनस्पतयः शान्ति विश्वेदेवाः शान्ति ब्रह्म
शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शा
न्तिरेधि ॥ ७ ॥

विश्वानि देवसवितर्दुरितानि परासुव ।
यद्भद्रं तन्न आसुव ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥
एयकारेवाचन् समृद्धिरस्तु ॥ ॥

प्रायश्चित्तगोदानम्-

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोनिष्क्रयीभूतरजतद्रव्याय नमः
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ब्राह्मणाय नमः । अथेह काश्यपगोत्रः का

श्यपावत्सारनैध्रुवेति त्रिप्रवरः [illegible] ऽङ्कम ·· शर्मा ··· अहं मम करिष्यमाणजन्मोत्सवकर्मणि पूर्वकर्मण्यनियमानाचरणजन्यप्रत्यवायपरिहारपूर्वकतत्करिष्यमाणकर्माधिकारसिद्ध्ये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदैवताकं काश्यपगोत्राय ·········
······ शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

प्रार्थना -

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा -

अघकृतैतत्-गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवताकं काश्यपगोत्राय ······
······ शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

ॐ शान्तिरस्तु पुष्टिरस्तु तुष्टिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु ॐ अमृताभिषेकोऽस्तु ॥ ॥

दीपप्रार्थना -

नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनारायणाय नमः ।

वरुणप्रार्थना -

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेऽस्मिन्न विघ्नं कुरु सर्वदा ॥

वरुणाय नमः ।

गणेशप्रार्थना -

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

ग्रहप्रार्थना -

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः ।

मातृप्रार्थना –

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥
मातृभ्यो नमः ।

वास्तुदेव नमस्तु[illegible]
[illegible]न्यादिसमृद्ध कुरु सर्वदा ।
वास्तो[illegible]

अग्निप्रार्थना –

अग्निं प्रज्वलितं वन्दे जातवेद हुताशनम्
सुवर्णवर्णममलं समृद्धं विश्वतो मुखम् ।
अग्नये नमः ।

मार्कण्डेयप्रार्थना –

चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान्वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ॥
अष्टचिरञ्जीविभ्यो नमः ।

षष्टिकाप्रार्थना –

जय देवि जगन्मातर्जगदानन्दकारिणि ।

प्रसीद मम कल्याणि नमस्ते षष्ठिदेवते ॥
षष्ठिकायै नमः ।

[illegible]ना-

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिन
एकतः सर्वसत्यानि तथानृतशतानि च
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिता ॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता
मां तोलयन्ती संसारादुद्धरस्व नमोस्तु ते ॥
योसौ वज्राधिपो देवः पुरुषः पञ्चविंशकः ।
स एषोधिष्ठितो देवि त्वयि तस्मान्नमो नमः ॥
तुलायै नमः ।

गोविन्दप्रार्थना-

नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक ।
त्वं हरे तारयस्वास्मानस्मात्संसारसागरात् ॥
गोविन्दाय नमः ।
ततो दक्षहस्ते सूर्यं वामहस्ते धर्मराजं गृही
तुलायां आरोहेत् ॥

तुलाधिष्ठात्रीदेवताप्रार्थना

[illegible]

पितामहेन [illegible]
[illegible] थं जगत्सर्वं सह स्थावरजङ्गमम् ।
र्वभूतात्मभूतस्थे नमस्ते सर्वधारिणि ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
नन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥
वित्रेण पुनीहि मा शुक्रेण देवदीद्यत् ।
ग्ने क्रत्वा क्रतूँ १ रनु ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनातु मा ॥
पवमानः सोऽ अद्य नः पवित्रेण विचर्षणिः ।
ः पोता स पुनातु मा ॥
भ्यां देवसवितः पवित्रेण सवेन च ।
पुनीहि विश्वतः ॥
वी पुनती देव्यागाद्यस्यामिमा बह्व्यस्त [illegible]
[illegible] । तया मदन्तः सधमादेषु वयं [illegible]
[illegible] रयीणाम् ॥

अथ दानानि ।

पूर्णपात्रदानम्–

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः

कन्याशाही: पेशालवीर विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सवदिवसे सकलारिष्टशान्तिपूर्वकदीर्घायुष्यप्राप्त्ये कृतस्य जन्मोत्सवकर्माङ्गभूतहवनकर्मणः अपूर्णपूर्णार्थं पूर्णपात्रं प्रजापतिदैवताकं काश्यपगोत्राय .... शर्मणे ब्राह्मणाय संप्रददे ॥

प्रणीता विमोकः ।

मेधा –

सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनि मेधा मयासिषं स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

वस्त्रहोमः –

एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयिधेहि समाववर्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं जगत् । वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥

व्रतहोम: —

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमीन्धेत्वा दीक्षितोअहं स्वाहा ॥

घृतच्छाया —

ससुवर्णघृतकांस्यपात्राय नमः
ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया
पशुभिर्भूयात् । घृतेन द्यावा पृथिवी पूर्येथामि
न्द्रस्य छदिसि विश्वजनस्य छाया ॥
अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थित
म् । तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ॥
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रि
प्रवरः कन्याराशिः पेद्रालवीर विक्रमवर्मा अहं मम वर्षवृद्धौ
जन्मोत्सवकर्मणि दीर्घायुरारोग्यैश्वर्याद्यवाप्तये
इदं अवलोकितं आज्यं मृत्युञ्जयदेवताकं कांस्य
पात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं काश्य
पगोत्राय शर्मणे ब्राह्मणाय तुभ्यं
संप्रददे ॥

प्रार्थना —

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दत्तं राज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा –

अद्यकृतैतत्- आज्य कांस्यपात्र सुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं काश्यपगोत्राय शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

पञ्चाङ्गगोदानम् –

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोनिष्क्रयरजतद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेशालवीरविक्रमवर्मा ... अहं मम वर्षवृद्धौ अस्योत्सवकर्मणि दीर्घायुरारोग्यैश्वर्याद्यवाप्त्यर्थं कृतस्य दीप कलश गणेश मातृका ग्रह गा मार्कण्डेयाष्टचिरञ्जीवि-तुलादेव.. पूजन हवन दान जपपाठादिकर्मणः साङ्गफलप्राप्त्यै न्यूनातिरिक्तपरिपूरणार्थं इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं काश्यपगोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना –

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्य कृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवताकं काश्यपगोत्राय . . . . शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

कन्यापूजा-

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां देवीं कन्यां तां पूजयाम्यहम् ॥

आवाहनं समर्पयामि कन्यायै नमः । पाद्यं समर्पयामि कन्यायै नमः । आचमनीयं समर्पयामि कन्यायै नमः । वस्त्रं समर्पयामि कन्यायै नमः । गन्धं समर्पयामि कन्यायै नमः । अक्षतान्समर्पयामि कन्यायै नमः । पुष्पं समर्पयामि कन्यायै नमः । नैवेद्यं समर्पयामि कन्यायै नमः । धूपं आघ्रापयामि कन्यायै नमः । दीपं दर्शयामि कन्यायै नमः । दक्षिणां समर्पयामि कन्यायै नमः ।

पुष्पाञ्जलिः –

जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।

पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते ॥
पुष्पाञ्जलिं समर्पयामि कन्यायै नमः ।

ब्राह्मणभोजनमूल्यम्–

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
हेमद्रव्याय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पेङ्गालवीरविक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सवकर्मणि सकलारिष्टशान्तिपूर्वकदीर्घायुष्यप्राप्तये कृतस्य दीप कलश गणेश मातृका ग्रह [illegible]- मार्कण्डेयाष्टचिरञ्जीवि- पूजन हवन दान जपपाठादिकर्मणो न्यूनातिरिक्तपरिपूरणार्थं तथा-करिष्यमाणब्राह्मणभोजनकर्मणः प्रतिष्ठार्थं च इदं रजतं चन्द्रदैवतकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे ॥

ततउत्तराङ्गपूजा ।

अभिषेकः –

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ स्वस्तिन ऽ इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ विश्वानि देवसवितर्दुरितानि परासुव। यद्भद्रन्तन्न आसुव ॥

शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु। यत्पापं रोगः शोको दुःखं दौर्घ्यं तत्प्रतिहतमस्तु। द्विपदस्य चतुष्पदस्य च शान्तिर्भवतु। अमृताभिषेकोऽस्तु ॥

आशीर्वादमन्त्राः –

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभेयो युवास्य यजमानस्य वीरोजाय

नाल्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो
न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्
॥ ॥ दीर्घायुस्त ऽ ओषधे खनिता यस्मै च त्वा
खनाम्यहम् । अथो त्वन्दीर्घायु र्भूत्वा शतवल्शा
विरोहतात् ॥ ॥ पुनस्त्वादित्या रुद्रा वसवः समि
न्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं त
न्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ ॥
मनसः काममाकूतिं वाचः सत्यमशीय । पशूना
ꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥ ॥

पोटलिकाबन्धनमन्त्रः—

मार्कण्डेय महाभाग आयुरारोग्यदायक ।
शुभदौ विघ्नहन्तारौ भानुविघ्नेश्वरावपि ॥
धारयामि भुजे दक्षे मम कल्याणहेतवे ।
भूयस्त्वं सदास्माकं कामनाश्च मनोरथाः ॥

रक्षाबन्धन मन्त्रः—

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वं प्रतिबध्नामि रक्षे माचल माचल ॥

तिलकमन्त्रः—

त्र्यायुषञ्जमदग्नेः लल्लाटे ॥ कश्यपस्य त्र्यायुष
म् ग्रीवायाम् ॥ यद्देवेषु त्र्यायुषं दक्षबाहुमूले ॥

तन्नो अस्तु स्वायुषम् हृदि ॥

प्रसादमन्त्रौ –

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते
। धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
अव्याधिना शरीरेण मनसा च निराधिना ।
सूर्यन्तार्थिना माशास्त्वं जीव शरदां शतम् ॥

दुग्धपानमन्त्रः –

सतिलं गुडसंमिश्रमञ्जल्यर्द्धमितं पयः ।
मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुः समृद्धये ॥ ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु
॥ न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात्
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत्
श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥

विष्णुपुष्पाञ्जलिः –

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

नारायणाय नमः ।

क्षेत्रपालबलिदानम् –

क्षेत्रपालाय भूत-प्रेत-पिशाच-राक्षस-शाकिनी-डाकिनी-वेतालादिपरिवारयुताय इमं बलिं समर्पयामि· भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य आयुष्कर्ता क्षेमकर्ता पुष्टिकर्ता पुष्टिद स्तुष्टिदो भव ॥

अहं मम जन्मो-
त्सवकर्मणि आकस्मिक दीपनिर्वाणजन्या शुभ-
फलनिवृत्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये-

(४१)

ब्राह्मणवरणम्· पुण्याहवाचनम्·

वरुणद्व्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीनराशिः देवेन्द्रवीर विक्रम वर्मा अहं मम· सकलारिष्ट
शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्त्यर्थे जन्मोत्सव कर्म करी
छौं· तत्पूर्वाङ्गत्वेन दीप कलश· गणेश पूजन मातृकापूजन
आभ्युदयिक गोदानं ग्रहपूजनं वास्तुपूजनं षोडशगणमण्ड
लदेवतापूजनं कुलदेवताभिवासनपूः सह मार्कण्डेयाद
ष्ट चिरञ्जीवि संपूजनं षष्ठीकादेवी संपूजनं तथा स्वगृह्यो
क्तप्रकारेण अग्निप्रज्वालनपूर्वक संपूजे को
कर्म करौंछौं

[illegible] प्रतिमादि प्रति [illegible] ~~[illegible]~~ [illegible] कामना [illegible]
[illegible] मनोरा [illegible] पुष्पा

~~[illegible]~~ [illegible] जुद्रका जलपात्रा सर्वा विधि पुष्पानं

वृणे· ॐ वृतास्मः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीनराशिः देवेन्द्रवीर विक्रम वर्मा अहं मम जन्मोत्सवक
र्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे पुण्याहं
भवन्तो ब्रुवन्तु २ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः

ब्राह्मणवरणम्· पुण्याहवाचनम्·

वरणद्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीनराशिः देवेन्द्रवीरविक्रम वर्मा अहं मम सकलारिष्ट
शान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्त्यर्थे जन्मोत्सव कर्म करी
छौं· तत्पूर्वाङ्गत्वेन दीप कलश गणेशपूजनं मातृकापूजनं
आभ्युदयिक गोदानं ग्रहपूजनं वास्तुपूजनं षोडशमण्ड
लदेवतापूजनं कुलदेवताधिवासनपुरःसरं मार्कण्डेयाद्य
ष्टचिरञ्जीवि संपूजनं षष्ठीकादेवी संपूजनं तथा स्वगृह्यो
क्तप्रकारेण अग्निप्रज्वालनपूर्वक संपूजितदेवता हवनादि
कर्म करीछौं· तथा करीष्यमाण जन्मोत्सव कर्मणि सर्वाभ्यु
दयप्राप्त्यै ब्राह्मणद्वारा पुण्याहं वाचयिष्ये· तत्कर्म कर्तुं नाना
नाम गोत्रान् नानानाम शर्मणो ब्राह्मणान् एभिश्चन्दन पुष्पा
क्षत धौतोत्तरीय मुद्रिका जलपात्रासनादिभि युष्मानहं
वृणे· ॐ वृताः स्मः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीनराशिः देवेन्द्रवीर विक्रम वर्मा अहं मम जन्मोत्सवक
र्मणि सर्वाभ्युदयप्राप्त्यै भो ब्राह्मणाः मम गृहे पुण्याहं
भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः

पुनन्तु मनसाधियः पुनन्तु विश्वाभूतानि जातवेदः पुनीहिमा॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्र वीर विक्रम वर्मा अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्ताक्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्र वीर विक्रम वर्मा अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋध्यास्म ३ ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम। दिवं पृथिव्या अध्यारुहामा विदाम देवान्स्वर्ज्योतिः॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्र वीर विक्रम वर्मा अहं मम जन्मोत्सवकर्मणि सर्वाभ्युदप्राप्तये भो ब्राह्मणाः मम गृहे वृद्धिं भव

न्तो ब्रुवन्तु २ ॐ वृद्धताम् २ ॐ ज्यैष्ठ्यञ्चमे ऽआधिप
त्यञ्चमे मन्युश्चमे भामश्चमे मश्चमे म्भश्चमे जेमाचमे
महिमा चमे वरिमाचमे प्रथिमाचमे वर्षिमाचमे द्राघिमा
चमे वृद्धञ्चमे वृद्धिश्चमे यज्ञेन कल्पन्ताम्॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीनराशिः देवेन्द्र वीर विक्रम वर्मा अहं मम जन्मोत्सवकर्म
णि सर्वाभ्युदय प्राप्तये भो ब्राह्मणाः मम गृहे कल्याणं भव
न्तो ब्रुवन्तु २ ॐ कल्याणम् २ ॐ यथेमां वाचङ्कल्याणी
मा वदानि जनेभ्यः ब्रह्मराजन्याभ्याᳪं शूद्राय चार्याय च
स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूया
समयं मे कामः समृध्यताम्॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीनराशिः देवेन्द्रवीर विक्रम वर्मा अहं मम जन्मोत्सव
कर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे श्री
रस्तु भवन्तो ब्रुवन्तु २ ॐ श्रीः २ ॐ मनसः का
मना कूतिं वाचः सत्यमशीय । पशूनाᳪं रूपमन्न
स्य रसो यशः श्रीः श्रयताम्॥

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः

गोत्र [illegible] देवेन्द्रवीरविक्रम वर्मा अहं मम जन्मोत्सव
कर्माणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मम गृहे
शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॐ द्यौः शान्ति
रन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषध
यः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्र
ह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा
शान्तिरेधि॥

विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न
आसुव॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव॥

पुण्याहवाचन समृद्धोस्तु·

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
ॐ अच्युताय नमः ३

प्रायश्चित्त गोदानम्.

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

गोनिष्क्रयीभूत रजत द्रव्याय नमः

नमो ब्रह्मण्य देवाय गो ब्राह्मण हिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

ब्राह्मणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम क्रियमाण जन्मोत्सव कर्मणि पूर्व कर्तव्य नियमाकरणजन्य प्रत्यवाय परिहार पूर्वक तत्क्रियमाण कर्माधिकार सिद्धये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं .....गोत्राय ......शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

प्रार्थना.

कपिले सर्व देवानां पूजनीयासि रोहिणि।
तीर्थ देवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

दान प्रतिष्ठा.

अद्य कृतैतत् गोनिष्क्रयीभूत रजत दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .....गोत्राय ......शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

ॐ शान्तिरस्तु · पुष्टिरस्तु · तुष्टिरस्तु · यच्छ्रेयस्तदस्तु ·
यत्पापं रोगः शोको दुःखं दौर्भाग्यं तत्प्रतिहतमस्तु ·
द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु · ॐ अमृता
भिषेकोस्तु ·

दीपप्रार्थना:

नमोस्त्वनन्ताय सहस्र मूर्तये
सहस्रपादाक्षि शिरोरु बाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युग धारिणे नमः॥
दीप नारायणाय नमः

वरुण प्रार्थना·

वरुणस्त्वं महाभाग सर्वदेव प्रपूजित।
वितने मम यज्ञेस्मिन विघ्नं कुरु सर्वदा॥
वरुणाय नमः

गणेश प्रार्थना.

वक्रतुण्ड महाकाय कोटी सूर्य समप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥
गणाधिपतये नमः

ग्रह प्रार्थना.

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमि सुतो बुधश्च।

गुरुश्च शुक्रः शनिराहु केतवः।
सर्वे ग्रहाः शान्तिकरा भवन्तु॥
नवग्रहेभ्यो नमः

मातृ प्रार्थना.

ब्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी।
वाराही घनघोर घर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथ रुद्रसहिता रक्षन्तु नो मातरः॥
मातृभ्यो नमः

वास्तु प्रार्थना.

वास्तुदेव नमस्तुभ्यं भूमिशय्यारत प्रभो।
मद्गृहं धनधान्यादि समृद्धं कुरु सर्वदा॥
वास्तोष्पतये नमः

अग्नि प्रार्थना.

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम्॥
अग्नये नमः

मार्कण्डेय प्रार्थना.

चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने।
रूपवान्वित्तवांश्चैव श्रिया युक्तश्च सर्वदा॥
अष्ट चिरञ्जीविभ्यो नमः

षष्ठीका प्रार्थना.

जयदेवी जगन्मातर्जगदानन्दकारिणि।
प्रसीद मम कल्याणि नमस्ते षष्ठि देवि ते॥
षष्ठीकायै नमः

तुला प्रार्थना.

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता।
साक्षी भूता जगद्धात्री निर्मिता विश्वयोनिना॥
एकतः सर्वसत्यानि तथानृतशतानि च।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिता॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता।
मां तोलयन्ती संसारादुद्धरस्व नमोस्तु ते॥
योसौ वत्राधिपो देवः पुरुषः पञ्चविंशकः।
स एकोधिष्ठितो देवि त्वयि तस्मान्नमो नमः॥
तुलायै नमः

गोविन्दप्रार्थना:

नमो नमस्ते गोविन्द तुलापुरुष संज्ञक।
त्वं हरे तारयस्वास्मानस्मात्संसार सागरात्॥
गोविन्दाय नमः

ततो मुक्ते दक्षहस्ते सर्पं वामहस्ते धर्मराजं गृहीत्वा तुलायां आरोहेत्।

तुलाधिष्ठात्री देवता प्रार्थना:

नमस्ते सर्वभूतानां साक्षिभूते सनातनी।
पितामहेन देवी त्वं निर्मिता परमेष्ठिना॥
त्वया धृतं जगत्सर्वं सहस्थावरजङ्गमम्।
सर्वभूतात्मभूतस्थे नमस्ते सर्वधारिणे॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥
पवित्रेण पुनीहि मा शुक्रेण देवदीद्यत्।
अग्ने क्रत्वा क्रतूँरनु॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा।
ब्रह्मतेन पुनातु मा॥

पवमानः सो ऽ श्रयानः पवित्रेण विचर्षणिः।
यः पोता स पुनातु मा॥
उभाभ्यां देवसवितः पवित्रेण सवेन च।
मां पुनीहि विश्वतः॥
वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो
वीतपृष्ठाः॥
तया मदन्तः सधमादेषु वयं स्याम पतयो
रयीणाम्॥

अथ दानानि।

पूर्णपात्रदानम्।

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीर विक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सव दिवसे सकलारिष्ट शान्ति पूर्वक दीर्घायुष्य प्राप्त्यर्थ कृतस्य जन्मोत्सव कर्माङ्ग भूत हवन कर्मणः अपूर्ण पूर्णार्थं पूर्णपात्रं प्रजापति दैवताकं ······ गोत्राय ···· शर्मणे ब्राह्मणाय संप्रददे।

प्रणीताविमोकः

ॐ सुमित्रिया न ऽ आप ऽ ओषधयः सन्तु ।
इति प्रणीताजलेनाभिषिच्य ।
ॐ दुर्मित्रिया तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः
इति प्रणीतापात्र ऐशान्यां न्युब्जी कुर्यात् ।

बर्हिर्होमः

ॐ देवा गातु विदो गातुं वित्वा गातुमित ।
मनसस्पत ऽ इमन्देव यज्ञᳫ स्वाहा वातेधा ॥

मेधा

सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिम्मेधा मयासिषᳫ स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रिय मश्नुताम् ।
मयि देवा दधतु श्रिय मुत्तमां तस्यै ते स्वाहा ॥

वस्त्र होम·

एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि।
समाववर्तति पृथिवी समुषाः समुसूर्यः समुविश्वमिदं जगत्।
वैश्वानर ज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा॥

चरुहोम·

अभ्यादधामि समिधमग्ने व्रतपते त्वयि।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा॥

घृतच्छाया·

सुवर्ण घृत काश्यपपात्राय नमः

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥

ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्यात्॥

घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥

अलक्ष्मीर्यच्च दौःस्थ्यं मे सर्वगात्रेष्ववस्थितम्।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः

प्रणीताविमोकः

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु·
इति प्रणीताजलेनाभिषिञ्च्य·
ॐ दुर्मित्रिया तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः
इति प्रणीतापात्रं ऐशान्यां न्युब्जी कुर्यात्·

बर्हिर्होमः

ॐ देवागातुविदो गातुं वित्वा गातुमित।
मनसस्पत ऽ इमन्देव यज्ञꣳ स्वाहा वातेधा॥

मेधा·

सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनिम्मेधा मया सिषꣳ स्वाहा॥
याम्मेधान्देवगणाः पितरश्चोपासते।
तया मा मद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियम श्नुताम्।
मयि देवा दधतु श्रिय मुत्तमां तस्यै ते स्वाहा॥

वसुहोम.

एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि।
समाववर्तति पृथिवी समुषाः समुसूर्यः समुविश्वमिदं जगत्।
वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा॥

चरुहोम.

अग्न्यादधामि समिधमग्ने व्रतपते त्वयि।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा॥

घृतच्छाया.

सुवर्णं घृत कांस्यपात्राय नमः

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥

ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्यात्॥

घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया॥

अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम्।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः

मीन राशिः देवेन्द्र वीर विक्रम वर्मा अहं मम वर्षवृद्धौ
जन्मोत्सव कर्मणि दीर्घायुरारोग्यैश्वर्योदयावाप्तये
इदं अवलोकिताज्य मृत्युञ्जय देवताकं कांश्यपात्रं
निष्कर्मे देवताकं सुवर्णं वह्नि देवताकं .....गोत्राय
.....शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

प्रार्थना:

कामधेनो समुद्भूतं देवाना मुत्तमं हवि:।
आयुर्वृद्धिकरं दानं एज्यं पातु सदैव माम्॥

दानप्रतिष्ठा.

अद्य कृतैतत् आज्य कांश्यपात्र सुवर्ण दानकर्मणः प्रति
ष्ठार्थं इदं रजत चन्द्र देवताकं .....गोत्राय .....शर्मणे
ब्राह्मणाय तुभ्यं सम्प्रददे.

पञ्चगोदानम्.

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

गोनिष्क्रय रजत द्रव्याय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
मीन राशिः देवेन्द्र वीर विक्रम वर्मा अहं मम वर्षवृद्धौ
जन्मोत्सव कर्मणि दीर्घायुरारोग्यैश्वर्योदयावाप्तये

कृतस्य दीप कलश गणेश मातृका गृह वास्तु मार्कण्डेया
षष्ठचिरञ्जिवि तुलादेवता पूजन हवन दान जप पाठा
दि कर्मणः साङ्गफलप्राप्तये न्यूनातिरिक्त परिपूर्णा
र्थं इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ......
गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना.

कपिले सर्वदेवानां पूजनीयासि रोहिणी ।
तीर्थ देवमयी यस्मा तस्मा च्छान्तिं प्रयच्छमे ॥

दानप्रतिष्ठा.

अद्य कृतैतत् गोनिष्क्रयीभूत रजत दानकर्मणः प्र
तिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय .....
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

कन्यापूजा.

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां देवीं कन्यां तां पूजयाम्यहम् ॥
आवाहनं समर्पयामि कन्यायै नमः
पाद्यं समर्पयामि कन्यायै नमः
आचमनीयं समर्पयामि कन्यायै नमः
वस्त्रं समर्पयामि कन्यायै नमः

गन्धं समर्पयामि कन्यायै नमः
अक्षतान्समर्पयामि कन्यायै नमः
पुष्पं समर्पयामि कन्यायै नमः
धूपं आघ्रापयामि कन्यायै नमः
दीपं दर्शयामि कन्यायै नमः
नैवेद्यं समर्पयामि कन्यायै नमः
दक्षिणां समर्पयामि कन्यायै नमः
जगत्पूज्ये जगद्वन्द्ये सर्वशक्ति स्वरूपिणी।
पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते ॥
पुष्पाञ्जलिं समर्पयामि कन्यायै नमः

ब्राह्मण भोजन भूयसी

~~अद्येह काश्यपगोत्रः~~
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदः मतः शान्तिं प्रयच्छ मे ॥
देयद्रव्याय नमः
अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः
सोमशर्मः देवेन्द्र वीर विक्रम वर्मा अहं मम वर्षवृद्धौ
अद्योत्सव कर्मणि सकलारिष्ट शान्तिपूर्वक दीर्घायु
ष्य प्राप्त्यै कृतस्य दीप कलश गणेश मातृका ग्रह

वास्तु मार्कण्डेयाद्यष्ट चिरञ्जीवी कुलदेवता पूजन हवन दान कर्मणो न्यूनातिरिक्त परिपूर्णार्थं तथा कोरिष्यमाण ब्राह्मण भोजन कर्मणः प्रतिष्ठार्थं च इदं रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुमहं समुत्सृजे.

ततः उत्तराङ्गः पूजा.

अभिषेकः

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥

द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥

स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्व

स्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु॥

विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रन्तन्न आसुव॥

शान्तिरस्तु॰ पुष्टिरस्तु॰ तुष्टिरस्तु॰ यच्छ्रेयस्तदस्तु॰ यत्पापं रोगः शोको दुःखं दौर्मनस्यं तत्प्रतिहतमस्तु॰ द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु॰ ॐ अमृताभिषेकोस्तु॰

आशीर्वाद मन्त्रः

ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठा सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्योन ओषधयः पच्यन्तां योगक्षेमो नः कल्पन्ताम्॥

दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम्। अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात्॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो

वसुनीथ्य यज्ञैः घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः॥

मनसः काममाकूतिं वाचः सत्यमशीय। पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयताम्॥

पोटलेका बन्धन मन्त्रः

मार्कण्डेय महाभाग आयुरारोग्य दायक।
शुभदो विघ्नहन्तारो भानुविघ्नेश्वरा वापि॥
धारयामि भुजे दक्षे मम कल्याण हेतवे।
परैश्वर्यं सदास्माकं कामनाश्च मनोरथाः॥

रक्षाबन्धन मन्त्रः

येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥

तिलक मन्त्रः

त्र्यायुषञ्जमदग्नेः ।	ललाटे·
कश्यपस्य त्र्यायुषम्· ।	ग्रीवायाम्·
यद्देवेषु त्र्यायुषम्· ।	दक्षबाहुमूले·
तन्नो अस्तु त्र्यायुषम्· ।	हृदि·

प्रसाद मन्त्रः

श्रीर्वर्चस्वमायुष्य मारोग्य माविधात्पवमानं मही
यते। धान्यं धनं पशुन्बहुपुत्रलाभं शतसम्वत्सरं
दीर्घमायुः॥

अव्याधिना शरीरेण मनसा च निराधिना।
पश्यन्नार्पिता माशास्त्वं जीव शरदं शतम्॥

दुग्धपान मन्त्रः

सतिलं गुड संमिश्रं मञ्जल्यर्द्धमितं पयः।
मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुः समृद्धये॥

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
ॐ अच्युताय नमः ३

कायेन वाचा मनसेन्द्रियैर्वा
बुध्यात्मनावा नुसृतस्वभावात्।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयेतत्॥

विष्णुपुष्पाञ्जलिः

शान्ताकार भुजङ्गशयनं पद्मनाभं सुरेशं
विश्वाधारं गगन सदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्त कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

नारायणाय नमः

स्वयम्वरकृत्य

दीप प्रार्थना

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥

वरुण प्रार्थना

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

ग्रह प्रार्थना

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

इन्द्राणी प्रार्थना

देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि ।
विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ॥

धान्यं देहि धनं देहि वसून्देहीन्दुभामिनि ।
यशो देहि सुखं देहि सर्वकार्यकरी भव ॥
त्वदाराधनतः सर्वमलभ्यं नैव भूतले ।
तस्मादैश्वर्यमादेहि शीघ्रमाशुधवल्लभे ॥

पुण्याहवाचनम्

देयद्रव्याय नमः ॥ अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम करिष्यमाणविवाहाङ्गभूतस्वयम्वरकर्मणि सर्वाभ्युदयप्राप्तये पुण्याहं वाचयितुं एभिः पूगीफलवस्त्रद्रव्यादिभिर्युष्मानहं वृणे ॥ वृताः स्मः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम करिष्यमाणविवाहाङ्गभूतस्वयम्वरकर्मणि मम गृहे भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् २ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम करिष्यमाण

विवाहाङ्गभूतस्वयम्वरकर्मणि मम गृहे भो ब्राह्मणाः
स्वस्ति भवन्तो ब्रुवन्तु३ ॐ स्वस्ति३ ॐ स्वस्ति
नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्प
तिर्दधातु ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रि
प्रवरा………………… देवी अहं मम करिष्यमाण
विवाहाङ्गभूतस्वयम्वरकर्मणि मम गृहे भो ब्राह्म
णाः ऋद्धिं भवन्तो ब्रुवन्तु३ ॐ ऋध्यताम्३ ॐ
सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृताऽअभूम ॥ दिवं पृ
थिव्या अध्यारुहामा विदाम देवान्स्वर्ज्योतिः ॥

अद्येह काश्यपगोत्रा काश्यपा वत्सारनैध्रुवेतित्रिप्र
वरा………………… देवी अहं मम करिष्यमाणविवाहा
ङ्गभूतस्वयम्वरकर्मणि मम गृहे भो ब्राह्मणाः वृद्धिं
भवन्तो ब्रुवन्तु३ ॐ वृध्यताम्३ ॐ ज्यैष्ठ्यं च मऽ
आधिपत्यं च मे मन्युश्च मे भामश्च मे मश्च मेम्भश्च मे जे
मा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा

च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा.................. देवी अहं मम करिष्यमाणविवाहाङ्गभूतस्वयम्वरकर्मणि मम गृहे भो ब्राह्मणाः कल्याणं भवन्तो ब्रुवन्तु३ ॐ कल्याणम्३ ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय च॥ प्रियो देवानान्दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यताम्॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा.................. देवी अहं मम करिष्यमाणविवाहाङ्गभूतस्वयम्वरकर्मणि मम गृहे भो ब्राह्मणाः श्रियं भवन्तो ब्रुवन्तु३ ॐ श्रीः३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय॥ पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम्॥

अथेह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा………… देवी अहं मम करिष्यमाणविवाहाङ्गभूतस्वयम्वरकर्मणि मम गृहे भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु३ ॐ शान्तिः३ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ।।

ॐ विश्वानि देवसवितर्दुरितानि परासुव ।
यद्भद्रं तन्नः आसुव ।।

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ।।

पुण्याहवाचनसमृद्धिरस्तु

कन्यावरौ दूर्वापुष्पमालां गृहीत्वा परस्परं परिधापयेताम् मङ्गलपाठः →

देवेन्द्राणि नमस्तुभ्यं महालक्ष्मी नमोऽस्तु ते । आपको: प्रीतियुक्ता [illegible] सदा भवेः
पाण्डवानां द्रुपदजा यथा सीता रामवृता । [illegible] देवी यथा [illegible]:
शन्तनोश्च यथा गङ्गा चन्द्रस्य रोहिणी यथा । [illegible] जानकी यथा
[illegible] गान्धारी सावित्री बृहस्पतेर्यथा । तथा भवेयं सततं [illegible]
सर्वे देवाश्च [illegible] । [illegible]

उत्तराङ्ग पूजां कृत्वा

दक्षिणा सङ्कल्पः —

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम करिष्यमाण विवाहाङ्गभूत स्वयम्वरकर्मणि कृतस्य दीपकलशगणेश पूजन पूर्वक शची पूजन कर्मणः साङ्गतासिद्ध्यर्थं इमां भूयसीं दक्षिणां रौप्यं चन्द्रदेवतं नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे तत्सन्न मम ॥

उत्तराङ्ग —

ॐ दीप नारायणाय नमः ॐ कलशावाहित देवताभ्यो नमः ॐ गणपतये नमः ॐ शच्यै नमः । अर्घ्य भामणम् भूमौ स्खलित पादानां भूमिरेवावलम्बनम् । त्वयि जातापराधानां त्वमेव शरणं मम ॥ ॐ अर्घपात्राय नमः । ॐ अच्छिद्रमस्तु ।

गच्छन्तु देवताः सर्वाः पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय वै ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
मन्त्र पूजां न जानामि क्षमस्व परमेश्वरि ॥

अभिषेकमन्त्राः

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥
स्वस्तिनः इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥
विश्वानि देवसवितर्दुरितानि परासुव ॥
यद्भद्रं तन्नः आसुव ॥

ॐ शान्तिरस्तु. पुष्टिरस्तु. वृद्धिरस्तु. यच्छ्रेयस्तदस्तु. यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्दूमोप्रतिहनमस्तु। द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु. अमृताभिषेकोस्तु॥

प्रसादमन्त्राः

ह्रीः ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राज
न्यः शूर इषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनु
र्वोढा नड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः
सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे
निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः
पच्यन्तां योगक्षेमो नः कल्पताम् ॥
दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यह
म् ॥ अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥
पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो
वसुनीथ यज्ञैः ॥ घृतेन त्वं तन्वं वर्धयस्व सत्याः
सन्तु यजमानस्य कामाः ॥
मनसः काममाकूतिं वाचः सत्यमशीय ॥ पशूना
ᳫं रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

श्रीर्वर्चस्यमायुष्यमारोग्यमाविधान्पवमानं महीयते ॥
धान्यं धनं पशून्बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
अव्याधिना शरीरेण मनसा च निराधिना ॥
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥

प्रतिज्ञासङ्कल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा.......... देवी अहं मम करिष्यमाण पटलाञ्छनकर्मणि यथामिलितोपचारैः दीपकलशगणेशपूजनपूर्वकं शचीपूजनमहं करिष्ये·

दक्षिणासङ्कल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा.......... देवी अहं मम पटलाञ्छनकर्मणि कृतस्य दीपकलशगणेशपूजनपूर्वक शचीपूजनकर्मणः साङ्गता सिद्ध्यै न्यूनातिरिक्तपरिहरणार्थञ्च इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे तत्सन्नमम·

इन्द्राणी पूजा —

सौवर्णीं इन्द्राणीप्रतिमां वह्निसंतप्तां कुर्यात् । ॐ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥ पञ्चगव्यैः स्नापयेत् । ॐ आपो हिष्ठामयोभुवस्तान ऊर्ज्जे दधातन ॥ महेरणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयते हनः । उशतीरिव मातरः ॥ तस्मा अरङ्ग मामवो यस्य क्षयाय जिन्वथ । आपो जनयथा चनः ॥ ततः कलशोपरि स्थाल्यां तण्डुलपुञ्जेषु प्रतिमां निधाय प्राणप्रतिष्ठां कुर्यात् । ॐ एतन्ते देवसवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिन्तेन मामव ॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु । विश्वेदेवास इहमादयन्तामोँ३ प्रतिष्ठ ॥ ॐ भूर्भुवः स्वः शचि इहागच्छेह तिष्ठ ध्यानम् । वृन्दारवीरसुरवृन्दकिरीटकोटीरोचिश्छटानिकरकल्पितपादपीठम् । देवि त्वदीयचरणं शरणं जनानां सेवामहे सकलमङ्गलवर्द्धनाय ॥ ध्यानं समर्पयामि ॐ शच्यै नमः । आसनं समर्पयामि ॐ शच्यै नमः । पाद्यं समर्पयामि ॐ शच्यै नमः । अर्घ्यं सम

र्पयामि ॐ शच्यै नमः। आचमनीयं समर्पया
मि ॐ शच्यै नमः। मधुपर्कं समर्पयामि ॐ शच्यै
नमः। पुनराचमनीयं समर्पयामि ॐ शच्यै नमः
पञ्चामृतस्नानं समर्पयामि ॐ शच्यै नमः। पञ्चा
मृतस्नानाङ्गं शुद्धोदकस्नानं समर्पयामि ॐ शच्यै
नमः। गङ्गाजलं समर्पयामि ॐ शच्यै नमः। वस्त्रं
समर्पयामि ॐ शच्यै नमः। चन्दनं समर्पयामि
ॐ शच्यै नमः। सिन्दूरं समर्पयामि ॐ शच्यै न
मः। पिष्टातकं समर्पयामि ॐ शच्यै नमः। ॐ अ
क्षतान् समर्पयामि ॐ शच्यै नमः। यवान् तिला
न् समर्पयामि ॐ शच्यै नमः। पुष्पाणि समर्प
यामि ॐ शच्यै नमः। माल्यं समर्पयामि ॐ श
च्यै नमः। सौभाग्यद्रव्यं समर्पयामि ॐ शच्यै न
मः। लाजान् समर्पयामि ॐ शच्यै नमः। अ
भ्रकं समर्पयामि ॐ शच्यै नमः॥ वनस्पतिरसो
दिव्यो गन्धाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवा
नां धूपोयं प्रतिगृह्यताम्॥ धूपं आघ्रापयामि
ॐ शच्यै नमः। सुप्रकाशो महान्दीपः सर्वतस्ति
मिरापहः। सबाह्याभ्यन्तरज्योतिर्दीपोयं प्रतिगृह्य

ताम्। दीपं दर्शयामि ॐ शच्ये नमः। अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्। भूतानां जीवनं चैव नैवेद्यं प्रतिगृह्यताम्॥ नैवेद्यं समर्पयामि ॐ शच्ये नमः। फलनैवेद्यं समर्पयामि ॐ शच्ये नमः। पानीयं समर्पयामि ॐ शच्ये नमः। करोद्वर्तनं समर्पयामि ॐ शच्ये नमः। ताम्बूलं समर्पयामि ॐ शच्ये नमः। सुगन्धिद्रव्यं समर्पयामि ॐ शच्ये नमः। इदं फलं मया देवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ सोष्णीषं नारिकेलफलं समर्पयामि ॐ शच्ये नमः। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥ दक्षिणां समर्पयामि ॐ शच्ये नमः। नीराजनं प्रयच्छामि तुभ्यं देवेन्द्रभामिनि। पञ्चवर्ति समायुक्तं त्रैलोक्यतिमिरापहम्॥ नीराजनं समर्पयामि ॐ शच्ये नमः।

ॐ देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि।
विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे॥
धान्यं देहि धनं देहि पशून्देहीन्द्रभामिनि।

यशो देहि सुखं देहि सर्वकार्यकरी भव ॥

पुष्पाञ्जलिं समर्प ॐ शच्यै नमः ।

इति इन्द्राणी पूजा

पूर्वाङ्गकृत्य

दीप प्रार्थना

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षि शिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः॥ दीपनारायणाय नमः

वरुण प्रार्थना

वरुण त्वं महाभाग सर्वदेवप्रपूजित।
वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा॥ वरुणाय नमः

गणेश प्रार्थना

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ गणेशाय नमः

ग्रह प्रार्थना

ब्रह्मा मुरारि स्त्रिपुरान्तकारी
भानुः शशी भूमिसुतोबुधश्च।
गुरुश्च शुक्रः शनिराहु केतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु॥ नवग्रहेभ्यो नमः

मातृका प्रार्थना

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी।

वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डागणनाथरुद्रसहिता रक्षन्तु नो मातरः॥
मातृभ्यो नमः॥

इन्द्राणी प्रार्थना

देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि।
विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे॥
धान्यं देहि धनं देहि वसुन्देहीन्द्रभामिनि।
यशो देहि सुखं देहि सर्वकार्यकरी भव॥
त्वदाराधनतः सर्वमलभ्यं नैव भूतले।
प८ [illegible] तस्मादैश्वर्यमादेहि शीघ्रमायुधवल्लभे॥ शच्यै नमः

मङ्गलपाठः

मङ्गलं भगवान् विष्णुर्मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः॥१॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥२॥
अविरलमदजलनिवहं भ्रमरकुलानीकसेवितकपोलम्।
अभिमतफलदातारं कामेशं गणपतिं वन्दे॥३॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥४॥

प्रायश्चित्तगोदानम्

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एवच।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः॥

गोनिष्क्रयरजतद्रव्याय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा…… ……देवी अहं मम करिष्यमाणविवाहकर्मणि शास्त्रोदितनियमानाचरणजन्यप्रत्यवायपरिहारपूर्वकसद्योदेहशुद्धिद्वारा विकारसिद्ध्ये प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयरजतद्रव्यं चन्द्रदैवतं काश्यपगोत्राय……… शर्मणे ब्राह्मणाय गोदानत्वेनतुभ्यंसंप्रददे तत्सन्नमम

कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छमे॥

अद्य कृतैतत्प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयरजतद्रव्यदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवतं काश्यपगोत्राय……… शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन संप्रददे

ॐ शान्तिरस्तु. ॐ पुष्टिरस्तु. ॐ वृद्धिरस्तु.
ॐ यच्छ्रेयस्तदस्तु. यत्पाप रोगः शोको दुःख
दारिद्र्यं तद्भूमौ प्रतिहतमस्तु. ॐ अमृताभिषेकोस्तु.

वरणम्

देयद्रव्यायनमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा …… …… देवी अहं मम करिष्यमाणविवाहकर्मणि निर्विघ्नतासिद्ध्ये दीपकलशगणेशपूजनं मातृकापूजन आभ्युदयिकश्राद्धकर्म पुण्याहवाचनादि तत्तत्कर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतधौतोत्तरीयजलपात्रासनसुवर्णमुद्रिकादिभिर्युष्मानहं वृणे. वृताः स्मः

दक्षिणासङ्कल्प

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे॥

रजतद्रव्याय नमः

अद्येह काश्यपगोत्रा कात्स्यपावत्सारनैध्रुवेति त्रिप्रवरा …… …… देवी अहं मम करिष्यमाणविवाहकर्मणि निर्विघ्नतासिद्ध्ये कृतस्य दीपकलशगणेशपूजनमातृकापूजनाभ्युदयिकपुण्याहवाचनादिपूर्वाङ्गकर्मणः साद्गुण्यफलसिद्ध्ये न्यूनातिरिक्तपूरणार्थञ्च इमां भूयसीं दक्षिणां रजतं चन्द्रदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुं समुत्सृजे तत्सन्नमम.

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
कन्याराशिः पेशलवी विक्रमवर्मा

पुण्याहवाचनम्

देपदुव्याय नमः वाग्दानवरणीकर्मणि

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः …… रामविक्रमवर्मदेवो अहं मम करिष्यमाणविवाहकर्मणि सर्वाभ्युदयप्राप्त्यै पुण्याहं वाचयितुं एभिः पूगीफलवस्त्रद्रव्यादिभिर्युष्मानहं वृणे। वृताः स्मः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा …… …… देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः॥ पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा …… …… देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाः विश्ववेदाः॥ स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

वरणम्

देयद्रव्यायनमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ·····
······ देवी अहं मम करिष्यमाणविवाहकर्मणि निर्विघ्नता
सिद्ध्ये दीपकलशगणेशपूजनं मातृकापूजन आभ्युदयिकश्रा
द्धकर्म पुण्याहवाचनादितत्तत्कर्मकर्तुं नानानामगोत्रान् नाना
नामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतधौतोत्तरीयजलपा
त्रासनसुवर्णमुद्रिकादिभिर्युष्मानहं वृणे· वृताः स्मः

दक्षिणासङ्कल्प

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे॥

रजतद्रव्याय नमः

अद्येह काश्यपगोत्रा कात्स्यपावत्सारनैध्रुवेति त्रिप्रवरा ·····
······ देवी अहं मम करिष्यमाणविवाहकर्मणि निर्विघ्न
तासिद्ध्ये कृतस्य दीपकलशगणेशपूजनमातृकापूजनाभ्यु
दयिकपुण्याहवाचनादिपूर्वाङ्गकर्मणः साद्गुण्यफलसिद्ध्ये
न्यूनातिरिक्तपूरणार्थञ्च इमां भूयसीं दक्षिणां रजतं चन्द्रदैवतं
नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुं समु
त्सृजे तत्सन्नमम·

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
कन्याराशिः पेशलवी विक्रमवर्मा

पुण्याहवाचनम्

देयद्रव्याय नमः वाग्दानवरणकर्मणि

अद्येह काश्यपगोत्राः काश्यपावत्सारनैध्रुवेति त्रिप्रवराः ...... रामविक्रमवर्मदेवी अहं मम करिष्यमाणविवाहकर्मणि सर्वाभ्युदयप्राप्त्ये पुण्याहं वाचयितुं एभिः पूगीफलवस्त्रद्रव्यादिभिर्युष्मानहं वृणे. वृताः स्मः

अद्येह काश्यपगोत्रां काश्यपावत्सारनैध्रुवेति त्रिप्रवरां ....देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः॥ पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ....देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्तिन ऽ३ न्द्रो वृद्धश्रवाः स्वस्तिनः पूषाः विश्ववेदाः॥ स्वस्तिनस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु॥

= करिष्यमाणवाग्दानवरणकर्मणि

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ....
........देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो
ब्राह्मणाः ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋध्यन्ताम् ३ ॐ सत्र
स्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम॥ दिवं पृथिव्या अध्या
रुहामा विदाम देवान्स्वर्ज्योतिः॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ....
........देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो
ब्राह्मणाः वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृध्यन्ताम् ३ ॐ ज्यैष्ठ्यं च
मऽ आधिपत्यं च मे मन्युश्च मे भामश्च मे मश्च मेम्भश्च मे जेमा
च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा
च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ....
........देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो
ब्राह्मणाः कल्याणं भवन्तो ब्रुवन्तु ३ ॐ कल्याणम् ३ ॐ य
थेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्याᳪ
शूद्राय चार्याय च स्वाय चारणाय च॥ प्रियो देवानां दक्षिणायै
दातुरिह भूयासमयं मे कामः समृध्यताम्॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ....
.... देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो ब्राह्मणाः श्रियं भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय॥ पशूनाᳬं रूपमन्नस्य रसो यशः श्रीः श्रयताम्॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ....
.... देवी अहं मम करिष्यमाणविवाहकर्मणि मम गृहे भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॐ द्यौः शान्तिरन्तरिक्षᳬं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वᳬं शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि॥

ॐ विश्वानिदेव सवितर्दुरितानिपरासुव॥ यद्भद्रं तन्नआसुव॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥

पुण्याहवाचनसमृद्धिरस्तु

दक्षिणा—

अद्येह काश्यपगोत्रः काश्यपावत्सार
नैध्रुवेति त्रिप्रवरः रामविक्रम वर्मा अहं
डमरुराज्यलक्ष्मीनाम्न्यः कन्यायाः काश्य
माणविवाहकर्मणि दीपकलशगणेशपूजन
पूर्वकं द्वारागतवरस्य धौतोत्तरीय स्वर्णाङ्गुली
यकादिद्रव्यैः वाग्दान-वरणकर्मणः सां
ङ्गतासिद्ध्यर्थं इमां दक्षिणां रजतं चन्द्रदे
वताकं नानानामगोत्रेभ्यो नानानामशर्म
भ्यो ब्राह्मणेभ्यो दातुं समुत्सृजे। तत्सन्नमम

क नाम हुदा कतिवा ८ प्र यन्ती
लगी दान गर्नु पर्ने संकल्प
लै बनु पर्ने

दीपप्रार्थना.

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥
दीपनारायणाय नमः

वरुण प्रार्थना.

वरुणत्वं महाभाग सर्वदेव प्रपूजित ।
विजने मम यज्ञेऽस्मिन्न विघ्नं कुरु सर्वदा ॥
वरुणाय नमः

गणेश प्रार्थना.

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ गणेशाय नमः

ग्रह प्रार्थना.

ब्रह्मा मुरारी त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनि राहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥
नवग्रहेभ्यो नमः

मातृ प्रार्थना:

ब्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोर घर्घर मुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथ रुद्र सहिता रक्षन्तु नो मातरः ॥
मातृभ्यो नमः

वास्तु प्रार्थना.

वास्तुदेव नमस्तेस्तु भूमिशय्यारत प्रभो ।
मद्गृहं धनधान्यादि समृद्धं कुरु सर्वदा ॥
वास्तोष्पतये नमः

अग्निप्रार्थना.

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम् ॥
अग्नये नमः

कुलदेवता प्रार्थना.

दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ।
सर्वलोक प्रणेत्रीं च प्रणमामि सदाम्बिकाम् ॥
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम् ।
विश्वेश्वरीं विश्ववन्द्यां चण्डिकां प्रणमाम्यहम् ॥
सर्वदेवमयीं देवीं सर्वदेवनमस्कृताम् ।
ब्रह्मेश विष्णुनमितां प्रणमामि सदा उमाम् ॥

विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थान निवासिनीम् ।
योगिनीं योगविद्यां च चण्डिकां प्रणमाम्यहम् ॥
ईशान मातरं देवी मीश्वरी मीश्वर प्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णव तारिणीम् ॥
दुर्गा सङ्कट हन्त्रीति दुर्गेति प्रथिता भुवि ।
सर्व बुद्ध्यापि देवीय मजयामि स्वरूपिणी ॥
पुष्पाञ्जलिं समर्पयामि चण्डिकायै नमः

कन्यापूजा ।

ॐ मन्त्राक्षर मयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गा त्मिकां देवीं कन्यां तां पूजयाम्यहम् ॥
आवाहनं समर्पयामि कन्यायै नमः । पाद्यं समर्पयामि कन्यायै नमः । आचमनीयं समर्पयामि कन्यायै नमः । वस्त्रं गन्धं अक्षतां पुष्पं नैवेद्यं धूपं दीपं दक्षिणां समर्पयामि कन्यायै नमः

जगत्पूज्ये जगद्वन्द्ये सर्वशक्ति स्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मात नमोऽस्तुते ॥ पुष्पाञ्जलिं समर्पयामि कन्यायै नमः

कुमार पूजा ।

आवाहनं समर्पयामि कुमाराय नमः । पाद्यं । आचमनीयं वस्त्रं गन्धं

अक्षतान् पुष्पं नैवेद्यं धूपं दीपं दक्षिणां समर्पयामि कुमारायनमः

पुष्पाञ्जलिं समर्पयामि कुमाराय नमः

पूर्णपात्रदानम् :

अद्य वत्सगोत्रः वत्स भार्गव च्यवन आप्नवान् और्व जामदग्न्येति पञ्चप्रवरः .... शर्मा .... वर्मा अहं मम श्रुति स्मृति पुराणोक्त फलावाप्ति पूर्वक स्वराष्ट्र सकल विघ्न विघात नित्य यशो लभ्य संपत्ति स्वसैन्यादि बलवृद्धि पूर्वक दूरदेश गत सैन्य संघातेय हर्षविजयोदय प्राप्ति द्वारा झटिति स्वपुर प्रत्यागमन कामनया श्रीमद्गुह्यकालीका प्रीतये शतावृत्ति सप्तशति स्तोत्र पाठ कर्मणि कृतस्य हवनकर्मणः अं पूर्ण पूर्णार्थं पूर्णपात्रं प्रजापति देवताकं ....गोत्राय .... शर्मणे ब्राह्मणे सम्प्रददे तत्सन्न मम

प्रणीता विमोकः

ॐ सुमित्रियानऽआपऽओषधयः सन्तु । इति प्रणीता जलेन यजमान शिरोऽभिषिच्य .

ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः ।

इति प्रणीता पात्रं ऐशान्यां न्युब्जी कुर्यात् .

बर्हि होमः

ॐ देवा गातु विदो गातुं वित्वा गातु मित।
मनसस्पत ऽइमन्देव यज्ञꣳ स्वाहा वातेधाः॥

मेधा

ॐ सदसस्पति मद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनिम्मेधा मयासिषꣳ स्वाहा॥
याम्मेधान्देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा॥

वसुहोमः

ॐ एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि।
समाववर्त्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं जगत्।
वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा॥

शेषवसुहोमः

ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा॥

घृतच्छाया।

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।

एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया पशुभि भूयात्।
घृतेन द्यावा पृथिवी पूर्येथां मिन्द्रस्य छदीरसि विश्वजनस्य
छाया ॥
अलक्ष्मी यच्च दौस्थ्यं मे सर्वगात्रेष्व वास्थितम्।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टीं च वर्द्धय ॥
स सुवर्ण घृतकांश्य पात्राय नमः
अद्येह वत्सगोत्रः वत्स भार्गव च्यवन आप्नवान् और्व जाम
दग्नेति पञ्च प्रवरः ...... एष्टो ...... वर्मा अहं मम श्रीगु
ह्यकालिका प्रीतये कृतैतत् शताहुते सप्तशती स्तोत्र
पाठकर्मणि इदं समुखावलोकितं आज्य मृत्युञ्जय देवता
क कांश्यपात्र विश्वकर्म देवताकं सुवर्ण वह्नि देवताकं ......
गोत्राय ...... शर्मणे ब्राह्मणाय संप्रददे ।

प्रार्थना ।

कामधेनोः समुद्भूतं देवाना मुत्तमं हविः।
आयु वृद्धि करं दानं राज्य पातु सदैव माम् ॥
आज्यं तेजः समुद्दिष्टं माज्यं पापहरं परम्।
आज्य सुराणा माहारः सर्वमाज्ये प्रतिष्ठितम् ॥
आज्यपात्र प्रदानेन शान्तिरस्तु सदा मम ॥

दानप्रतिष्ठा ।

अद्य कृतैतत् अवलोकिताज्य सुवर्ण कांस्यपात्र दान कर्मणः प्र
तिष्ठार्थं इदं रजतं चन्द्र देवताकं ···· गोत्राय ···· शर्मणे
ब्राह्मणाय सम्प्रददे · तत्सन्न मम·

प्रतिमादान ·

अद्येह वत्सगोत्रः वत्स भार्गव च्यावन आप्नवान और्व जामद
ग्नेति पञ्चप्रवरः ···· एन्द्रो ···· वर्मा अहं मम श्रुति
स्मृति पुराणोक्त फलावाप्ति पूर्वक स्वदेहे सकल विद्याविधान
नित्य यशो राज्य सम्पत्ति सन्तानादि बलबुद्धि पूर्वकं दूरदेश
गत सैन्य संघागम्य हर्षविजयोदय प्राप्तिद्वारा जितिसम्पदे
प्रयागमन कामनया श्रीमद्भगवती गुह्यकालीका प्रीतये
कृतस्य अष्टोत्तर संख्याक नवार्ण मन्त्र संपुटित शतचण्डी
सप्तशती स्तोत्र पाठकर्मणः सुपूजितां चण्डीदेव्याः सुवर्ण
प्रतिमां अग्निदेवताकां ···· गोत्राय ···· शर्मणे आचार्या
य संप्रददे ·

प्रार्थना ·

त्रैलोक्य मातर्देवि त्वं सर्वभूत दयान्विते ।
दानेनानेन सुप्रीता प्रसन्ना वरदा भव ॥

दानप्रतिष्ठा ·

अद्य कृतैतत् सुपूजितां चण्डीदेव्याः सुवर्ण प्रतिमा दानकर्मणः
प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ··· गोत्राय ··· शर्मणे

आचार्याय सम्प्रददे · तत्सन्न मम ·

पञ्चान्ना गोदानम् ·

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोप्रत्याम्नायी भूत ज्जत स्वेदेभ्यो नमः

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन आप्नवान् और्व जामदग्न्येति पञ्च प्रवरः ···· शर्मा ···· वर्मा अहं मम श्री गृह्यकालीका प्रीत्यर्थे कृतस्य इतः कृते सप्तशती स्तोत्र पाठ कर्मणः तत्र देवता स्थापन पूजन हवन कर्मणश्च प्रतिष्ठा साङ्गता सिद्ध्यर्थं इमां गां रुद्रदेवताकां तन्निष्क्रयीभूतं द्रव्यं चन्द्रदेवताकं ···· गोत्राय ···· शर्मणे आचार्याय संप्रददे ·

प्रार्थना ·

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥
यत् सायन भूता या विश्वस्यान्न प्रदायिनी ।
विश्वरूप धरे देवः प्रीयता ममया गवा ॥

दानप्रतिष्ठा ·

अद्य कृतैतत् गोदान कर्मणः प्रतिष्ठार्थं इदं द्रव्यं चन्द्रदेवताकं ···· गोत्राय ····· शर्मणे आचार्याय संप्रददे · नात्तना मम ·

भूमीदानम्.

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन आप्नवान् और्व जामदग्नेति पञ्च प्रवरः ····· शर्मा ····· वर्मा अहं मम श्रीगुह्यकालिकाप्रीतये कृतस्य शतावृत्ति सप्तशती स्तोत्र पाठ कर्मणः साङ्गता सिद्धिपरिपूर्णार्थं इमां भूमिं वराहदेवताकां तन्निष्क्रयीभूतं रजतं चन्द्र देवताकं ····· गोत्राय ····· शर्मणे ब्राह्मणाय सम्प्रददे.

प्रार्थना.

सर्वभूताश्रया भूमिर्वराहेण समुद्धृता।
अनन्तसस्यफलदा ह्यतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा.

अद्यकृतैतत् भूमिदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ····· गोत्राय ····· शर्मणे [illegible] सम्प्रददे.
तत्सन्न मम.

भूपाल दक्षिणा.

ॐ हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे ॥

स्मत द्रव्येभ्यो नमः

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन आप्नवान् और्व जामदग्नेति पञ्च प्रवरः ····· शर्मा ····· वर्मा अहं मम श्री

तथा कौषिमगण ब्राह्मण भोजन करण: प्रतिष्ठार्थं च.

सकालेका प्रीतये कृतस्य शतशान्ति सप्तशान्ति स्तोत्र पाठ कर्मणो न्यूनातिरिक्त परिहारार्थं रविकृत साद्गुण्यार्थं इमां भूयसी दक्षिणां उक्तं चन्द्र दैवतकं नाना नाम गोत्रेभ्यो नाना नाम शर्मभ्य आचार्य ब्रह्मा सदस्य गणेश होतृ विज्ञापक द्वारपाल पौराणिकेभ्य अन्येभ्यो द्विजेभ्य ~~[illegible]~~ श्च यथा भागं विभज्य दातुं जले समुत्सृजे· तत्सत् मम.

उत्तराङ्ग पूजा.

देवविसर्जनम्.

अभिषेक:

ॐ सर्वे समुद्रा: सरितस्तीर्थानि जलदा नदा: ।
आयान्तु यजमानस्य दुरितक्षयकारका: ॥
द्यौ: शान्ति रन्तरिक्ष ँ· शान्ति पृथिवी शान्ति राप: शान्ति रोषधय: शान्ति: । वनस्पतय: शान्ति र्विश्वेदेवा: शान्ति र्ब्रह्म शान्ति: सर्व ँ· शान्ति: शान्तिरेव शान्ति: सा मा शान्ति रेधि ॥ तच्चक्षु र्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरद: शतं जीवेम शरद: शत ँ· शृणुयाम शरद: शतं प्रब्रवाम शरद: शतमदीना: स्याम शरद: शतं भूयश्च शरद: शतात् ॥ स्वस्ति न ऽ इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमि: स्वस्ति नो बृहस्पति र्दधातु ॥ विश्वानि देव सवित र्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥ शान्ति रस्तु पुष्टिरस्तु तुष्टिरस्तु यच्छ्रेयस्तदस्तु ।

यत्पापं रोगः शोको दुःखं दौर्भाग्यं तत्प्रति हतमस्तु ।
द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु अमृताभिषेकोस्तु ॥

आशीर्वाद मन्त्राः

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर
इषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वा
नाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य
यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु
फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥
दीर्घायुत्व ऽ ओषधे खनिता यस्मै च त्वा खनाम्यहम् । अथो
त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ पुनस्त्वादित्या
रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन
त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ मनसः
काममाकूतिं वाचः सत्य मशीय । पशूना ँ रूपमन्नस्य रसो
यशः श्रीः श्रयताम् ॥

रक्षाबन्धनम्.

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

तिलक मन्त्राः

त्र्यायुषञ्जमदग्नेः ललाटे ॥ कश्यपस्य त्र्यायुषम् ग्रीवायाम् ॥
यद्देवेषु त्र्यायुषम् दक्षबाहुमूले ॥ तन्नो अस्तु त्र्यायुषम् हृदि ॥

प्रसाद मन्त्राः

श्रीर्वर्चस्यमायुष्यमारोग्यमाविधात् पवमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः ॥
अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥
भद्रमस्तु शिवं चास्तु महालक्ष्मी प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

मण्डपदानम् ।

अद्येह वत्सगोत्रः वत्स भार्गव च्यावन आप्नवान् और्व जामदग्नेति पञ्च प्रवरः ····शर्मा ·····वर्मा अहं मम श्रुति स्मृति पुराणोक्त फलावाप्ति पूर्वक स्वराष्ट्रे सकल विघ्न विध्वान निमित्त क्षयो एव सम्प्राप्ति स्वसैन्यादि बलवृद्धि पूर्वकं दुष्टदेशागत सैन्य संघारेण हर्षविजयोदय प्राप्तिकारणे शारदीये सम्पुटे प्रत्यक्ष गमन दामनया श्री भगवती गुह्यकालिका प्रीतये शताहुति सप्तशतीस्तोत्र पाठकर्मणि तत्तद्देवतानां स्थापन पूजन हवनादि कर्म संपत्त्यर्थं एतं ध्वजापताका मालिकां सुपूजित चण्डी देवी प्रतिमायुक्त सपरिच्छदं इदं मण्डपं देवताकं ····गोत्राय ·····शर्मणे आचार्याय सम्प्रददे ।

प्रार्थना ।

त्रैलोक्य पूजिते देवी जगदानन्द कारिके ।

मनोभीष्टं फलं देहि मण्डपस्य प्रदानतः॥

दानप्रतिष्ठा

अद्य कृतैतत् सर्पाच्छेद मण्डपदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय ..... शर्मणे आचार्याय संप्रददे.

तत्त्वत्रयम्.

अञ्जलीवध्वा.

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
ॐ अच्युताय नमः ३॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः॥

हस्ते जलं गृहीत्वा.

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृत स्वभावात्।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत्॥

प्रायश्चित्त गोदानम्.

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥
गो प्रत्याम्नायीभूत रजत खण्डेभ्यो नमः
ॐ नमो ब्रह्मण्यदेवाय गो ब्राह्मण हिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

ब्राह्मणाय नमः

ओमद्येह वत्सगोत्रः वत्स भार्गव च्यवन आप्नवान् और्व जामदग्न्येति पञ्च प्रवरः ..... शर्मा ..... वर्मा अहं मम श्रीगृह्य कालेच्छा प्रीति पूर्वक श्रुति स्मृति पुराणोक्त फलावाप्त्ये [illegible] क्रोधस्य यथा शक्ति सप्तशती स्तोत्र पाठ कर्मणि कर्तव्य नियमाना चरणजन्य प्रत्यवाय परिहार पूर्वकं सद्यो देह शुद्धिकरण तत्कर्माधिकार सिद्धये प्रायश्चित्त प्रत्याम्नायीभूतं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे आचार्याय संप्रददे .

प्रार्थना.

कपिले सर्व देवानां पूजनीयासि रोहिणि।
तीर्थदेव मयी यस्मा तस्मा च्छान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा.

अद्य कृतैतत् प्रायश्चित्त प्रत्याम्नायीभूत गोदान कर्मणः प्रति

साङ्गता सिद्ध्यर्थं इदं हिरण्यं चन्द्रदैवतं .... गोत्राय .... शर्मणे आचार्याय संप्रददे । न मम ।

ॐ शान्तिरस्तु । पुष्टिरस्तु । तुष्टिरस्तु । यच्छ्रेयस्तदस्तु । यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्सर्वं प्रतिहतमस्तु । अमृताभिषेकोऽस्तु ।

ब्राह्मण भोजन:

अद्येह वत्सगोत्रः वत्स भार्गव च्यवन आप्नवान् और्व जामदग्न्येति पञ्च प्रवरः .... शर्मा .... वर्मा अहं मम श्री गुह्यकालिका प्रीतये कृतस्य शाता शान्ते सप्त शति स्तोत्र पाठ कर्मणः साङ्गुण्यार्थं मिष्टान्नेन .... ब्राह्मण भोजन करिष्ये । तत्कालि विप्रकरण .... ब्राह्मण भोजन कर्मणि एभिश्चन्दन पुष्पाक्षतादिभिः .... ब्राह्मणान् वृणे । कृतस्य माण भोजन कर्मणः प्रतिष्ठार्थं इमां दक्षिणां हिरण्य चन्द्र दैवतं नाना नाम गोत्रेभ्यः नानानामशर्मभ्यः .... ब्राह्मणेभ्यो दातुं समुत्सृजे । न मम ।

कलशपात्र स्थापनम्·

कुशान्·

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥

जलम्·

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभि स्रवन्तु नः॥

यवान्·

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः॥

तिलान्·

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा॥

गन्धम्·

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

पुष्पाणि·

ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्म ऽइषाण सर्वलोकम्म ऽइषाण॥

पवित्री करणम्·

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥
ॐ पुण्डरीकाक्षः पुनातु। इति द्रव्याणि आत्मानं च सिञ्चेत्।

पञ्चगव्य प्राशन मन्त्रः
यत्तोगानि कृतं पापं देहे तिष्ठति मामके।
प्राशनात् पंचगव्यस्य दहत्वग्निरिवेन्धनम्॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीमद्भागवतपुस्तकदानविधिः ॥

आसने उपविश्य दीपं प्रज्वाल्य,

आचमनम् –

ॐ आत्मतत्वाय स्वाहा, ॐ विद्यातत्वाय स्वाहा॥
ॐ शिवतत्वाय स्वाहा, इत्याचम्य· ॐ सर्वतत्वाय नमः॥
इति करं प्रक्षालयेत्,

कर्मपात्रं कृत्वा

प्रायश्चित्तगोदानम्

गोनिष्क्रयीभूतरजतद्रव्याय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ………………… अहं मम सकलजन्मोपार्जितसमस्तपापोपशमनपूर्वक श्रीपुराणपुरुषोत्तमनारायणप्रीतये, करिष्यमाण श्रीमद्भागवत पुराणपुस्तक दान कर्मणि पूर्वकर्तव्य नियमानाचरण जन्य सकलप्रत्यवायपरिहार पूर्वक सद्यो देहशुद्धये श्रीमद्भागवतपुस्तकदानाधिकार सिद्धये प्राजापत्यप्रत्याम्नायीभूतां गां रुद्रदेवताकां तन्निष्क्रयीभूतं रजतं चन्द्रदेवताकं ……… गोत्राय……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्य कृतैतत्प्राजापत्य गोप्रत्याम्नीभूत रजतद्दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम

भूतोत्सादनम् ॥

अक्षतादिकं गृहीत्वा ॥

अपसर्पन्तु ये भूता ये भूता भूमिमाश्रिताः ॥
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥

विष्णुप्रार्थना ॥ पुष्पादिकं गृहीत्वा ॥

शुक्लांवरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ॐ विष्णवे नमः ॥

जलं गृहीत्वा आत्मशुद्धिं कुर्यात् ॥

देव त्वं प्राकृतं चित्तं पापाक्रान्तमभून्मम ॥
तन्निःसारय चित्तान्मे पापं फट् फट् च ते नमः ॥

देवप्रार्थना – पुष्पादिकं गृहीत्वा,

सूर्यः सोमो महाकालो महाभूतानि पञ्च च ॥
एते शुभाशुभस्येह कर्मणो नव शाक्षिणः ॥

ॐ देवेभ्यो नमः ॥

भैरवप्रार्थना ॥

तीक्ष्णदंष्ट्रमहाकाय कल्पान्तदहनोपम ॥
भैरवाय नमस्तुभ्य मनुज्ञां दातुमर्हसि ॥

ॐ भैरवाय नमः ॥

अर्घस्थापनम् ॥

भूमौ चतुरस्रं मण्डलं विधाय मध्ये शंखं चक्रं लिखित्वा पूजयेत् ॥

ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥
ॐ दशकलात्मने नमः ॥ ॐ वह्निमण्डलाय नमः ॥
ॐ द्वादशकलात्मने नमः ॥ ॐ अं अर्कमण्डलाय नमः ॥
ॐ षोडशकलात्मने नमः ॥ ॐ सोममण्डलाय नमः ॥

इति संपूज्य ॥

ॐ नमः इति जलेनापूर्य · पञ्चामृत गंगाजल गन्धाक्षत यवदूर्वा कुशफल शर्षपादिकं अर्घपात्रे निधाय ॥

अङ्कुशमुद्रया तीर्थान्यावाहयेत्

गङ्गे च यमुने चैव गोदावरि सरस्वति ॥
नर्मदे सिन्धो कावेरि जलेस्मिन्सन्निधिं कुरु ॥

वँ इति धेनुमुद्रया अमृतीकृत्य मत्स्यमुद्रया आच्छाद्य
अर्घपात्रं स्पृष्ट्वा
ॐ इति दशधा जपेत् ॥

पूजनप्रतिज्ञासंकल्पः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ……
…………… अहं मम सकलजन्मोपार्जित सर्वपापोपशमनपूर्वक श्रुतिस्मृतिपुराणोक्त गोसहस्रदानसमफलावाप्ति चतुर्दशविद्या वेदवेदाङ्गपारगत्वसिद्धिद्वारा श्रीपुरुषोत्तमनारायणप्रीतये श्रीमद्भागवतपुराणपुस्तकदानं करिष्ये · तदङ्गतया दीपकलश गणेश पूजन पूर्वकं पुराणाधिष्ठातृ सरस्वती पुरुषोत्तमनारायण वेदव्यास · गणेश शुक सूत चतुर्दशविद्यापूजनं श्रीमद्भागवतपुस्तकपूजनं करिष्ये ॥

दीपकलशगणेशपूजा ॥

दीपप्रार्थना ॥

नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षि शिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनारायणाय नमः ॥

कलशप्रार्थना ॥

वरुण त्वं महाभाग सर्वदेवप्रपूजित ॥
वितते मम यज्ञेस्मिन् अविघ्नं कुरु सर्वदा ॥

वरुणाय नमः ॥

गणेशप्रार्थना ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणेशाय नमः ॥

सरस्वतीपूजनम् ॥

पुस्तकोपरि स्थापित सुवर्णा प्रतिमायां सरस्वतीध्यानम् ॥

सुरासुरैः सेवितपादपङ्कजा
करे विराजत्कमनीयपुस्तका ॥
विरिञ्चिपत्नी कमलासनस्थिता
सरस्वती नृत्यतु वाचि मे सदा ॥

ध्यानं समर्पयामि सरस्वत्यै नमः ॥

आवाहनम् ॥

अत्रागत्य जगद्वन्द्ये सर्वलोकैकपूजिते ॥
मया कृतामिमां पूजां गृहाण जगदीश्वरि ॥

आवाहनं समर्पयामि सरस्वत्यै नमः ॥

प्राणप्रतिष्ठा ॥

एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ॥
तेन यज्ञमवतेन यज्ञपतिं तेन मामव ॥
मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो
त्वरिष्टं यज्ञꣳ समिमन्दधातु ॥
विश्वेदेवासऽइहमादयन्तामों प्रतिष्ठ ॥

आसनम् ॥

अनेकरत्नसंयुक्तं सुवर्णेन विराजितम् ॥
मुक्तामण्यङ्कितं चारु आसनं प्रतिगृह्यताम् ॥

आसनं समर्पयामि सरस्वत्यै नमः

पाद्यम् ॥

गन्धपुष्पाक्षतैर्युक्तं शुद्धतोयेन संयुतम् ॥
शुद्धस्फटिकतुल्याङ्गि पाद्यन्ते प्रतिगृह्यताम् ॥

पाद्यंसमर्पयामि सरस्वत्यै नमः ॥

अर्घ्यम् ॥

भक्ताभीष्टप्रदे देवि देवदेवादिवन्दिते ॥
आधाराद्दि जगद्धात्रि ददाम्यर्घ्यं गृहाण मे ॥

अर्घ्यं समर्पयामि सरस्वत्यै नम

आचमनीयम् ॥

पूर्णचन्द्रसमानास्ये कोटिसूर्यसमप्रभे ॥
भक्त्या समर्पितं तुभ्यं गृहाणाचमनीयकम् ॥

आचमनीयं समर्पयामि सरस्वत्यै नमः ॥

मधुपर्कम् ॥

दधि क्षोद्रं घृतं शुद्धं कपिलाया: सुगन्धिकम्॥
सुस्वादु मधुरं वाणि मधुपर्कं गृहाण भो॥
मधुपर्कं समर्पयामि सरस्वत्यै नमः॥
मधुपर्कस्नानानन्तरं शुद्धोदकं समर्पयामि सरस्वत्यै नमः॥
गंगाजलम्॥
गङ्गा कृष्णा गोतमी च कावेरी च शतद्रुदा:॥
ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम्॥
गंगाजलम्समर्पयामि सरस्वत्यै नमः॥
पयः स्नानम्॥
कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्॥
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥
पयःस्नानं समर्पयामि सरस्वत्यै नमः॥
पयःस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि सरस्वत्यै नमः॥
दधिस्नानम्
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्॥
दध्यानीतं मया देवि स्नानार्थं प्रतिगृह्यताम्॥
दधिस्नानं समर्पयामि सरस्वत्यै नमः॥
दधिस्नानानन्तरं शुद्धोदकं समर्पयामि सरस्वत्यै नमः॥

घृतस्नानम् ॥

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ॥
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥

घृतस्नानं समर्पयामि सरस्वत्यै नमः ॥

घृतस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि सरस्वत्यै नमः ॥

मधुस्नानम् ॥

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

मधुस्नानं समर्पयामि सरस्वत्यै नमः ॥

मधुस्नानानन्तरं शुद्धोदकं समर्पयामि सरस्वत्यै नमः ॥

शर्करास्नानम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ॥
मलापहारिणी दिव्या स्नानार्थं प्रतिगृह्यताम् ॥

शर्करास्नानंसमर्पयामि सरस्वत्यै नमः ॥

शर्करास्नानानन्तरं शुद्धोदकस्नानं समर्पयामिसरस्वत्यैनमः।

पञ्चामृतस्नानम् ॥

दधिक्षीरघृतोपेतं शर्करामधुसंयुतम् ॥
पञ्चामृतस्नानमिदं स्वीकुरुष्व सुरेश्वरि ॥

पञ्चामृतस्नानं समर्पयामि सरस्वत्यै नमः ॥

शुद्धोदकस्नानम्

सुवर्णकलशानीतैर्नानागन्धसुवासितैः ॥
शुद्धोदकैः स्नानमिदं स्वीकुरुष्व सुरेश्वरि ॥

शुद्धोदकस्नानं समर्पयामि सरस्वत्यै नमः ॥

सुगन्धिद्रव्यम्॥

गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम्॥
अङ्गोद्वर्तनकं देवि गृह्यतां जगदीश्वरी ॥

सुगन्धिद्रव्यं समर्पयामि सरस्वत्यै नमः॥

वस्त्रम् ॥

शुक्लवस्त्रद्वयं देवि विमलं कुटिलालके ॥
भक्त्या समर्पितं वाणि ब्रह्माणि प्रतिगृह्यताम्॥

वस्त्रंसमर्पयामि सरस्वत्यै नमः ॥

चन्दनम् ॥

चन्दनं मलयोद्भूतं कुंकुमागुरुमिश्रितम् ॥
अष्टगन्धसमायुक्तमङ्गे भाले विलेपय ॥

चन्दनं समर्पयामि सरस्वत्यै नमः

अक्षतान् ॥

अक्षतान् हीरकनिभान् रक्तान्पीतान् यथारुचि।
शोभार्थं संप्रदास्यामि गृहाण सुमनोहरान्॥
अक्षतान्समर्पयामि सरस्वत्यै नमः॥

तिलयवान्॥

विष्णुप्रिया धान्यराजा माङ्गल्याः सतिला यवाः॥
तस्मादेषां प्रदानेन ममास्त्वविकलं फलम्॥
तिलयवान्समर्पयामि सरस्वत्यै नमः॥

सिन्दूरम्॥

अधिकाधिकशोभायाः कारकं नागसंभवम्॥
अतिरागसमायुक्तं सिन्दूरं प्रतिगृह्यताम्॥
सिन्दूरं समर्पयामि सरस्वत्यै नमः॥

पिष्टातकं॥

पुष्पोद्भवं रक्तचूर्णं देवानां प्रीतिकारकम्॥
पिष्टातकं गृहाणेदं वस्त्राणि प्रतिगृह्यताम्॥
पिष्टातकं समर्पयामि सरस्वत्यै नमः॥

पुष्पम्॥

मालतीचंपकजपावकुलाशोकदाडिमीः॥
यथा प्रीतिः शिवाः प्रीताः पुष्पजातिर्गृहाण भो॥
पुष्पाणि समर्पयामि सरस्वत्यै नमः॥

पुष्पमालाः ॥

माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः ॥
मया हृतानि पूजार्थं गृहाण जगदीश्वरी ॥

मालां समर्पयामि सरस्वत्यै नमः॥

अथ अङ्गपूजा ॥

ॐ ब्रह्माण्यै नमः ॥ पादौ पूजयामि ॥
ॐ ब्रह्मणयमूर्त्यै नमः॥ गुल्फौ पूजयामि ॥
ॐ जगत्स्वरूपायै नमः॥ जंघे पूजयामि ॥
ॐ जगदादये नम :॥ जानुनी पूजयामि ॥
ॐ चारुविलासिन्यै नमः॥ ऊरू पूजयामि ॥
ॐ कमलभूतये नमः ॥ कटिं पूजयामि ॥
ॐ जन्महीनायै नमः ॥ जघनं पूजयामि ॥
ॐ गम्भीरनाभये नमः॥ नाभिं पूजयामि ॥
ॐ वारिपूज्यायै नमः ॥ उदरं पूजयामि ॥
ॐ लोकमात्रे नमः ॥ स्तनौ पूजयामि ॥
ॐ विशालवक्षसे नमः॥ वक्षः पूजयामि ॥
ॐ सुविपश्चितायै नमः ॥ कण्ठं पूजयामि ॥
ॐ स्कन्दपूज्यायै नमः ॥ स्कन्धौ पूजयामि ॥

ॐ दीर्घसुवाहवे नमः ॥ वाहू पूजयामि ॥
ॐ पुस्तकधारिण्यै नमः ॥ हस्तं पूजयामि ॥
ॐ श्रोत्रियसंभवायै नमः ॥ श्रोत्रे पूजयामि ॥
ॐ वेदस्वरूपायै नमः ॥ वक्त्रं पूजयामि ॥
ॐ सुनासायै नमः ॥ नासिकां पूजयामि ॥
ॐ विम्बोष्ठ्यै नमः ॥ औष्ठौ पूजयामि ॥
ॐ कमलनेत्रायै नमः ॥ नेत्रे पूजयामि ॥
ॐ तिलकधारिण्यै नमः ॥ भालं पूजयामि ॥
ॐ चन्द्रमूर्तये नमः ॥ केशान् पूजयामि ॥
ॐ सरस्वत्यै नमः ॥ शिरः पूजयामि ॥
ॐ ब्रह्मरूपिण्यै नमः ॥ सर्वाङ्गं पूजयामि ॥

धूपम् ॥

वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः ॥
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥

धूपं समर्पयामि सरस्वत्यै नमः ॥

दीपम् ॥

सुप्रकाशो महान्दीपस्त्रैलोक्यतिमिरापहः ॥
सवाह्याभ्यन्तरं ज्योतिर्दीपोयं प्रतिगृह्यताम् ॥

दीपं समर्पयामि सरस्वत्यै नमः ॥

नैवेद्यम् ॥

सत्पात्रशुद्धं सुहविर्विविधानेकभक्षणम् ॥
निवेदयामि देवेशि सानुयाय गृहाण तत् ॥

नैवेद्यं समर्पयामि सरस्वत्यै नमः॥

जलम् ॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ॥
आचम्यतां जगन्मात मया दत्तं हि भक्तितः ॥

जलं समर्पयामि सरस्वत्यै नमः ॥

करोद्वर्तनम् ॥

गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम् ॥
करोद्वर्त्तनकं देवि गृहाण परमेश्वरि ॥

करोद्वर्तनं समर्पयामि सरस्वत्यै नमः ॥

ताम्बूलम् ॥

पूगीफलसमायुक्तं सुधाखदिरसंयुतम् ॥
भक्त्या दत्तं मया देवि ताम्बूलं प्रतिगृह्यताम् ॥

ताम्बूलं समर्पयामि सरस्वत्यै नमः ॥

नारिकेलफलम् ॥ द्रव्यम् ॥

फलानीमानि देवेशि स्थापितानि पुरस्तव ॥
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
नारिकेलफलसहितउपायनद्रव्यं समर्पयामिसरस्वत्यै नमः।

नीराजनम् ॥

पञ्चवर्तिसमायुक्तं घृतेन ज्वलितं मया ॥
आरार्तिकं प्रदत्तेन तेन तुष्टा सदा भव ॥
नीराजनं समर्पयामि सरस्वत्यै नमः ॥

कर्पूरनीराजनम् ॥

कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥
आरार्तिक्यमहं कुर्वे पश्य मे वरदा भव ॥
कर्पूरनीराजनं समर्पयामि सरस्वत्यै नमः ॥

चामरम् ॥

शशाङ्ककरसंकाश हेमडिण्डिरपाण्डुर ॥
प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥
चामरं समर्पयामि सरस्वत्यै नमः ॥

व्यजनम् ॥

व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखावहम् ॥
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥
व्यजनंसमर्पयामि सरस्वत्यै नमः ॥

पुष्पाञ्जलिः ॥

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ॥
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥

पुष्पाञ्जलिं समर्पयामि सरस्वत्यै नमः ॥

प्रदक्षिणा ॥

यानि कानि च पापानि ब्रह्महत्यासमानि च ॥
तानि तानि प्रणश्यन्तु प्रदक्षिणापदे पदे ॥

प्रदक्षिणा समर्पयामि सरस्वत्यै नमः ॥

नमस्कारः ॥

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ॥
विश्ववन्द्ये विशालाक्षि विद्यां देहि नमोस्तु ते ॥

नमस्कारं समर्पयामि सरस्वत्यै नमः ॥

अथ लक्ष्मीनारायणपूजा ॥

ध्यानम् ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

ध्यानं समर्पयामि लक्ष्मीनारायणाय नमः ॥

आवाहनम् ॥

आगच्छागच्छ देवेश तेजोराशे जगत्पते ॥
क्रियमाणां मया पूजां गृहाण सुरसत्तम ॥

आवाहनं समर्पयामि लक्ष्मीनारायणाय नमः ॥

प्राणप्रतिष्ठा ॥

एतन्ते देव सवितर्यज्ञं प्राहुर्वृहस्पतये ब्रह्मणे ॥
तेन यज्ञमवतेन यज्ञपतिं तेन मामव ॥
मनो जूतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं
यज्ञर्ठं समिमन्दधातु ॥ विश्वेदेवास इह मादयन्तामों प्रतिष्ठ ॥

आसनम् ॥

नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ॥
आसनं देव देवेश प्रीत्यर्थं प्रतिगृह्यताम् ॥

आसनं समर्पयामि लक्ष्मीनारायणाय नमः ॥

पाद्यम्॥

यद्भक्तिलेशसंपर्कात्परमानन्दसंभव ॥
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पते ॥

पाद्यं समर्पयामि लक्ष्मीनारायणाय नमः ॥

अर्घ्यम्॥

तापत्रयहरं दिव्यं परमानन्दलक्षणम् ॥
तापत्रयविनिर्मुक्त तवार्घ्यं कल्पयाम्यहम्॥

अर्घ्यं समर्पयामि लक्ष्मीनारायणाय नमः॥

आचमनीयम्॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ॥
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

आचमनीयं समर्पयामि लक्ष्मीनारायणाय नमः ॥

मधुपर्कम् ॥

सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ॥
मधुपर्कमिदं देव कल्पयामि प्रसीद मे ॥

मधुपर्कं समर्पयामि लक्ष्मीनारायणाय नमः ॥

मधुपर्कप्राशनानन्तरं जलं समर्पयामि लक्ष्मीनारायणायनमः॥

पयःस्नानम्॥

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ॥
पावनं यज्ञहेतुश्च पयःस्नानार्थमर्पितम् ॥

पयःस्नानं समर्पयामि लक्ष्मीनारायणाय नमः॥
पयःस्नानानन्तरं जलं समर्पयामि लक्ष्मीनारायणायनमः॥
दधिस्नानम् ॥
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्॥
दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्॥
दधिस्नानं समर्पयामि लक्ष्मीनारायणाय नमः॥
दधिस्नानानन्तरं जलं समर्पयामि लक्ष्मीनारायणायनमः॥
घृतस्नानम्॥
नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ॥
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥
घृतस्नानं समर्पयामि लक्षीनारायणाय नमः॥
घृतस्नानानन्तरं जलं समर्पयामि लक्ष्मीनारायणायनमः॥
मधुस्नानम् ॥
तरूपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥
मधुस्नानं समर्पयामि लक्ष्मीनारायणाय नमः॥
मधुस्नानानन्तरं जलं समर्पयामिलक्ष्मीनारायणायनमः॥
शर्करास्नानम्॥
इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ॥
मलापहारिणी दिव्या स्नानार्थं प्रतिगृह्यताम् ॥

शर्करास्नानं समर्पयामि लक्ष्मीनारायणाय नमः ॥
शर्करास्नानानन्तरं जलं समर्पयामि लक्ष्मीनारायणायनमः॥
मिश्रितपञ्चामृतम् ॥

पञ्चामृतं मयानीतं पयो दधि घृतं मधु ॥
शर्करागुणसंयुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

पञ्चामृतस्नानं समर्पयामिलक्ष्मीनारायणाय नमः ॥
पञ्चामृतस्नानानन्तरं जलं समर्पयामि लक्ष्मीनारायणायनमः॥
गङ्गाजलम्॥

गङ्गा कृष्णा गौतमी च कावेरी च शतद्रुदाः॥
ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम् ॥

गङ्गाजलं समर्पयामि लक्ष्मीनारायणाय नमः॥
सुगन्धिद्रव्यम्॥

गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम् ॥
अङ्गोद्वर्तनकं देव गृहाण परमेश्वर ॥

सुगन्धीद्रव्यं समर्पयामि लक्ष्मीनारायणाय नमः॥
वस्त्रम् ॥

कुङ्कुमादिसमायुक्तं नानागन्धिनवासितम्॥
इदं वस्त्रं मया दत्तं श्रीविष्णो प्रतिगृह्यताम्॥

वस्त्रं समर्पयामि लक्ष्मीनारायणायनमः॥

यज्ञोपवीतम् ॥

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥
उपवीतं मया दत्तं गृहाण परमेश्वर ॥
यज्ञोपवीतं समर्पयामि लक्ष्मीनारायणाय नमः ॥

भूषणानि ॥

किरीटकुण्डलादीनि काञ्चीवलययुग्मकम् ॥
कौस्तुभं वनमालां च भूषणानि भजस्व भो ॥
भूषणानि समर्पयामि लक्ष्मीनारायणाय नमः ॥

चन्दनम् ॥

श्रीखण्डचन्दनं दिव्यं केशरादिसमन्वितम् ॥
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
चन्दनं समर्पयामि लक्ष्मीनारायणाय नमः ॥

अक्षताः ॥

अक्षतांश्च सुरश्रेष्ठ कुंकुमाक्तान्सुशोभनान् ॥
मया निवेदितान्भक्त्या गृहाण परमेश्वर ॥
अक्षतान्समर्पयामि लक्ष्मीनारायणाय नमः ॥

यवतिलान् ॥

विष्णुप्रिया धान्यराजा माङ्गल्याः सतिलायवाः ॥
तस्मात्तेषां प्रदानेन ममास्त्वविकलं फलम् ॥
यवतिलान्समर्पयामि लक्ष्मीनारायणाय नमः ॥

सिन्दूरम् ॥

उद्यदादित्यसंकाशं स्त्रीणां सीमन्तभूषणम् ॥
वीरालङ्करणं देव सिन्दूरं प्रतिगृह्यताम् ॥

सिन्दूरं समर्पयामि लक्ष्मीनारायणाय नमः ॥

पिष्टातकम् ॥

पुष्पोद्भवं रक्तचूर्णं देवानां प्रीतिकारकम् ॥
पिष्टातकं गृहाणेदं शरणागतवत्सल ॥

पिष्टातकं समर्पयामि लक्ष्मीनारायणाय नमः ॥

पुष्पाणि ॥

तुरीयवनसंभूतं नानागुणमनोहरम् ॥
अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥

पुष्पाणिसमर्पयामि लक्ष्मीनारायणाय नमः ॥

माल्यम् ॥

माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः ॥
मया हृतानि पूजार्थं गृहाण पुरुषोत्तम ॥

माल्यं समर्पयानि लक्ष्मीनारायणाय नमः ॥

तुलसीपत्रंसमर्पयामि लक्ष्मीनारायणाय नमः ॥

श्रीकृष्णाय नमः पादौ पूजयामि ॐसङ्कर्षणाय नमः गुल्फौ पूजयामि ॥ ॐकालात्मने नमः जानुनी पूजयामि॥ ॐ विश्वकर्मणे नमः जङ्घे पूजयामि॥ ॐ विश्वनेत्राय नमः कटिं पूजयामि॥ ॐ विश्वकर्त्रे नमः मेढ्रं पूजयामि॥ ॐपद्मनाभाय नमः नाभिं पूजयामि॥ ॐ परमात्मने नमः हृदयं पूजयामि॥ ॐ श्रीकण्ठाय नमः कण्ठं पूजयामि ॥ॐ सर्वास्त्रधारिणे नमः बाहू पूजयामि ॥ॐ वाचस्पतये नमः मुखं पूजयामि॥ ॐ केशवाय नमः ललाटं पूजयामि ॥ॐ सर्वात्मनेनमः शिरः पूजयामि ॥ ॐलक्ष्मीनारायणाय नमः सर्वाङ्गं पूजयामि॥

धूपम्॥

वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः॥
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

धूपं समर्पयामि लक्ष्मीनारायणाय नमः ॥

दीपम्॥

सुप्रकाशो महान्दीपस्त्रैलोक्यतिमिरापहः॥
सबाह्याभ्यन्तरं ज्योतिर्दीपोयं प्रतिगृह्यताम्॥

दीपं समर्पयामि लक्ष्मीनारायणाय नमः॥

नैवेद्यम् ॥

सत्पात्रशुद्धं सुहविर्विविधानेकभक्षणम् ॥
निवेदयामि देवेश सानुगाय गृहाण तत् ॥
नैवेद्यं समर्पयामि लक्ष्मीनारायणाय नमः ॥
जलम् ॥
कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ॥
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥
जलं समर्पयामि लक्ष्मीनारायणाय नमः ॥
करोद्वर्तनम् ॥
गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम् ॥
करोद्वर्तनकं देव गृहाण परमेश्वर ॥
करोद्वर्तनं समर्पयामि लक्ष्मीनारायणाय नमः ॥
ताम्बूलम् ॥
पूगीफलसमायुक्तं सुधाखदिरसंयुतम् ॥
भक्त्या दत्तं मया देव ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं समर्पयामि लक्ष्मीनारायणाय नमः ॥
नारिकेलफलम् ॥
फलानीमानि देवेश स्थापितानि पुरस्तव ॥
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

नारिकेलसहितउपायनद्रव्यं समर्पयामि लक्ष्मीनारायणाय नमः

नीराजनम् ॥

पञ्चवर्तिसमायुक्तं घृतेन ज्वलितं मया ॥
आरार्तिकं प्रदत्तेन तेन तुष्टः सदा भव ॥

नीराजनं समर्पयामि लक्ष्मीनारायणाय नमः ॥

कर्पूरनीराजनम् ॥

कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥

कर्पूरनीराजनं समर्पयामि लक्ष्मीनारायणाय नमः ॥

चामरम् ॥

शशाङ्ककरसंकाश हेमडिण्डीरपाण्डुर ॥
प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥

चामरं समर्पयामि लक्ष्मीनारायणाय नमः ॥

व्यजनम् ॥

व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखावहम् ॥
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥

व्यजनं समर्पयामि लक्ष्मीनारायणाय नमः ॥

पुष्पाञ्जलिः ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

पुष्पाञ्जलिं समर्पयामि लक्ष्मीनारायणाय नमः ॥

प्रदक्षिणा ॥

यानि कानि च पापानि ब्रह्महत्यासमानि च ॥
तानि तानि प्रणश्यन्तु प्रदक्षिणप्रदे पदे ॥

प्रदक्षिणां समर्पयामि लक्ष्मीनारायणाय नमः ॥

नमस्कारः ॥

नमः सर्वहितार्थाय जगदाधारहेतवे ॥
साष्टाङ्गोयं प्रणामोस्तु प्रणयेन मया कृतः॥

नमस्कारं समर्पयामि लक्ष्मीनारायणाय नमः ॥

चन्दनाक्षतपुष्पाणि गृहीत्वा ॥

श्रीमद्भागवतपुस्तकाय नमः ॥ व्यासाय नमः ॥
गणेशाय नमः ॥ सूतपौराणिकाय नमः ॥
शुकदेवाय नमः ॥ चतुर्दशविद्याभ्यो नमः ॥

ब्राह्मणवरणम् ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेति त्रिप्रवरा मेषराशिः ………… देवी अहं मम सकलजन्मोपार्जित समस्तपापोपशमनपूर्वक श्रीपुराणपुरुषोत्तमनारायणप्रीतये करिष्यमाण श्रीमद्भागवतपुराणपुस्तकदानकर्मणि ………… गोत्रं ………… शर्माणं ब्राह्मणं एभिश्चन्दनपुष्पाक्षतधौतोत्तरीयकेयूराङ्गदमुद्रिकाजलपात्रासनादिभिर्वाचकत्वेन त्वामहं वृणे वृतोस्मि ॥

पुस्तकदानम् ॥

श्रीमद्भागवतपुस्तकाय नमः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेति त्रिप्रवरा मेषराशि ………… देवी अहं मम सकलजन्मोपार्जित सर्वपापोपशमन श्रुतिस्मृतिपुराणोक्त गोसहस्रदानसमफलावाप्ति चतुर्दशविद्यावेदाङ्गपारगत्वसिद्धिपूर्वक· आध्यात्मिक, आधिदैविक, आधिभौतिक तापत्रयनिवारण श्रीमद्भागवतपुराणाक्षरसमसंख्यवर्षावधिस्वर्गलोकनिवासोत्तर श्रीराजराजेश्वरपदप्राप्तिद्वारा श्रीपरमेश्वरपुरुषोत्तमनारायणप्रीतये सवितानखट्विकोपरि स्थापितं छत्र-

चामरव्यंजनं यष्टिका सौवर्णलेखनी राजतमसीपात्रसहितं सुवर्णसिंहासनोपरिस्थित सुपूजित लक्ष्मीनारायण सरस्वती प्रतिमायुतं सदोरक पुस्तकवन्धन पट्टवस्त्रसमेतं रक्षाहेतुक काष्ठफलकद्वयघटितं श्रीमद्भागवत पुराणपुस्तकं सरस्वतीदेवताकं ………… गोत्राय ………… शर्मणे ब्राह्मणाय वाचकाय तुभ्यं संप्रददे तत्सन्न मम ॥

प्रार्थना ॥

सर्वविद्याश्रया यज्ञाः करणं मिलिताक्षरम् ॥
पुस्तकस्य प्रदानेन प्रीणातु मम भारती ॥
सरस्वति जगन्मातः शब्दब्रह्माधिदेवते ॥
अस्याः प्रदानाद्वागीशा प्रसन्ना जन्मजन्मनि ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत्सुपूजित लक्ष्मीनारायण सरस्वती प्रतिमा सुवर्णसिंहासनलेखनी मसीपात्रादि सोपस्कर श्रीमद्भागवत पुराण पुस्तकदानकर्मणः प्रतिष्ठासाङ्गतासिद्ध्ये इदं सुवर्णं वह्निदेवताकं ………… गोत्राय ………… शर्मणे ब्राह्मण तुभ्यं संप्रददे तत्सन्न मम ॥

उत्तराङ्गपूजा ॥

दीपनाथाय नमः ॥ कलशाय नमः ॥ गणेशाय नमः ॥

आवाहितदेवताभ्यो नमः ॥

अर्घ्यभ्रामणम् ॥

भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥
त्वयि यातापराधानां त्वमेव शरणं मम ॥

अर्घपात्रं पराङ्मुखं कृत्वा ॥

पराङ्मुखार्घपात्राय नमः ॥ तत्पात्रं उत्तानं कृत्वा ॥

ॐ अच्छिद्रमस्तु इति जलं दद्यात् ॥

विसर्जनम् ॥

चन्दनाक्षतपुष्पं गृहीत्वा ॥

गच्छन्तु देवताः सर्वाः पूजामादाय पार्थिवीम् ॥
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय वै ॥
मन्त्रहीनं कृयाहीनं विधिहीनं च यद्भवेत् ॥
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

गोदानम् ॥

गोभ्यो नमः ॥

अद्येह - काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः ·········· देवी अहं मम सकलजन्मोपार्जितसर्वपापोपशमनपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा श्रीपुरुषोत्तमनारायणप्रीतये कृतस्य सोपस्कर सुपूर्जित श्रीमद्भागवतमहापुराणपुस्तकदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये इमां

सालङ्कारां गां रुद्रदेवताकां ………… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

प्रार्थना ॥

कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत्सालंकार गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

सोपस्कर आमान्नदानम् ॥

सर्वोपस्करआमान्नाय नमः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः ……… देवी अहं मम समस्तपापक्षयपूर्वकश्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा श्रीपुराणपुरुषोत्तमनारायणप्रीतये कृतस्य सोपस्कर श्रीमद्भागवत महापुराणदानकर्मणः प्रतिष्ठार्थं इदं दध्याज्यसूपशाक मिष्टान्नादि वस्तुयुत सोपस्करामान्नं प्रजापतिदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

प्रार्थना ॥ अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ॥
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत्सोपस्करामान्नदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

भूयसीदक्षिणादानम् ॥

देयद्रव्याय नमः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः .... देवी अहं मम सकलजन्मोपार्जितसर्व पापोपशमनपूर्वक श्रुतिस्मृतिपुराणोक्त फलावाप्तिद्वारा श्री पुरुषोत्तमनारायणप्रीतये कृतस्य दीपकलशगणेशपुस्तकाधिष्ठातृदेवतानां संपूजनपूर्वक सोपस्करश्रीमद्भागवत महापुराणदानकर्मणः प्रतिष्ठासांगतासिद्ध्ये इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे ॥

अञ्जलिं वध्वा ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः ३ ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुध्यात्मना वा नुसृतः स्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ॥
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

(६५)

BULL DOG EXERCISE BOOK No. 4

गुह्यकाली पूजा

Subject..................................

Name..

Class..............................

Roll No.................................

Year........................

श्रीगणेशाय नमः ॥ गुह्यकालीपूजाविधिः ॥

आसने उपविश्य · आचमनम् ·
ॐ आत्मतत्त्वाय स्वाहा · ॐ विद्यातत्त्वाय स्वाहा ·
ॐ शिवतत्त्वाय स्वाहा ॥
हस्तप्रक्षालनम् · ॐ सर्वतत्त्वाय नमः ॥
आसनशोधनम् · गन्धाक्षतपुष्पाणि गृहीत्वा ·
ॐ ह्रीँ आधारशक्तये कँ कमलासनाय नमः ॥
आसनं धृत्वा पठेत् ·
ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥
प्रायश्चित्त गोदानम्
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥
गोप्रत्याम्नायरजतद्रव्याय नमः ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥
ब्राह्मणाय नमः ॥
अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा
मेषराशिः ······················· देवी अहं मम ·

श्रीगुह्यकाल्युपरि सपादलक्षकमलपुष्पार्पणकर्मोद्यापनकर्मणि पूर्वकर्तव्यनियमानाचरणजन्यप्रत्यवायपरिहारपूर्वकं सद्यो देहशुद्धिद्वारा तत्कर्माधिकारसिद्धये इदं गोप्रत्याम्नायीभूतं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तत्सन्नमम·

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोप्रत्याम्नायीभूत रजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे · तत्सन्न मम·

ॐ शान्तिरस्तु· पुष्टिरस्तु· वृद्धिरस्तु· यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्धूमौ प्रतिहतमस्तु· द्विपदेभ्यः चतुष्पदेभ्यश्च शान्तिर्भवतु· अमृताभिषेकोस्तु·

विष्णुप्रार्थना- शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ॐ विष्णवे नमः ॥

हस्ते जलं गृहीत्वा· आत्मशुद्धिं कुर्यात्·

ॐ देव त्वं प्राकृतं चित्तं पापाक्रान्तमभूत्मम· ।
तन्निःसारय चित्तान्मे पापं फट् फट् च ते नमः ॥

देवप्रार्थना- हस्ते गन्धपुष्पादीन्गृहीत्वा·

सूर्यः सोमो यमः कालो महाभूतानि पञ्च च ।
एते शुभाशुभस्येह कर्मणो नव साक्षिणः ॥

भैरवप्रार्थना-

तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपमः ।
भैरवाय नमस्तुभ्यं ममाज्ञां दातुमर्हसि ॥

अर्घस्थापनम्·

भूमौ चन्दनेन चतुरस्रं विलिख्य·
तन्मध्ये शंखचक्रादिकं लिखित्वा·
ॐ शङ्खाय नमः· ॐ चक्राय नमः इति संपूज्य·
फट् इति त्रिपदिकां प्रक्षाल्य· शंखचक्रोपरि संस्थाप्य·
ॐ वह्निमण्डलाय दशकलात्मने नमः इति त्रिपदिकां संपूज्य·
तदुपरि अर्घं संस्थाप्य· ॐ अर्कमण्डलाय द्वादशकलात्मने नमः· इति अर्घं संपूज्य· ॐ नमः इति जलेनापूर्य·
चन्दना-ऽक्षत-यव-सर्षप-दूर्वा-कुश-विल्वपत्र-फल-पञ्चामृतादिकं समर्प्य· ॐ सोममण्डलाय षोडशक-

लात्मने नमः इति जलं संपूज्य· अङ्कुशमुद्रया तीर्थान्या वाहयेत् ·

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेस्मिन् सन्निधिं कुरु ॥

ततो धेनुमुद्रया अमृतीकृत्य · मत्स्यमुद्रयाच्छाद्य ·
ॐ इति दशधा जपेत्
पात्रान्तर गृहीतन त ज्जलेन ·

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

इति पूजासामग्रीं आत्मानं च सिञ्चेत् · नात त

पूजासंकल्पः-

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा सपरिवारा मेषराशिः .... देवी अहं मम· अनेक जन्मार्जित दुरितोपद्रवनिवृत्तिपूर्वकं ऐहिकपुत्रपौत्रादि सर्वैश्वर्यसमन्वित विविधसुखप्राप्त्यनन्तरं उत्तमलोकप्राप्तिकामनया श्रीगुह्यकालीप्रीतये श्रीगुह्यकाल्युपरिकृत सपादलक्षकमलपुष्पार्पण कर्मणो यथोक्तफलावाप्तये तदुद्यापनाङ्गत्वेन ध्वजपताकारोपण पूर्वकं श्रीगुह्यकालीसंपूजनं पञ्चसुवर्णकमलपुष्पार्पणञ्च करिष्ये ·॥

ध्यानम्

नवसुन्दरशोभाढ्यमुखाम्बुजविराजिता ।
भुजैर्युताष्टादशभिस्तनदस्त्रोपशोभितैः ॥
खड्गाङ्कुशौ रत्नमालां त्रिशूलं परशुं तथा ।
वाणान्पाशुपतान्पञ्च गदां मुष्टिं च कर्तृकाम् ॥
दक्षिणे वामतश्चर्म पाशं खट्वाङ्गमेव च ।
भुशुण्डीं चक्रधनुषी घण्टामुन्मादवंशिकाम् ॥
कपालं क्रमतश्चेति बिभ्रतीं घोररूपिणीम् ।
गुह्यकालीं सर्वदेवोपासितां प्रभजेन्सदा ॥
दैत्यद्रोहप्रयुक्तप्रलयघनघटाघोरसंरोषरोष
व्यक्तव्यात्ताननान्तप्रचलहुतवहज्वालजालापजिह्वा ।
वेगावेसोद्भवातोद्धतधराणिधरालोकनोन्कम्पितान्तः
सिद्धश्रेणीकृतातिस्तुतिनुतिरवताद्दूदा गुह्यकाली ॥

ध्यानं समर्पयामि श्रीगुह्यकाल्यै नमः ।

आसनम्

अस्मिन्वरासने देवि सुखासीनेऽक्षरात्मिके ।
प्रतिष्ठिता भवेः सा त्वं प्रसीद परमेश्वरि ॥

आसनं समर्पयामि गुह्यकाल्यै नमः ।

पाद्यम्.

पाद्यं गृहाण देवेशि सर्वदुःखापहारकम् ।
त्रायस्व वरदे देवि नमस्ते शङ्करप्रिये ॥

पाद्यं समर्पयामि गुह्यकाल्यै नमः ।

अर्घ्यम्

दूर्वाक्षतसमायुक्तं विल्वपत्रसमन्वितम् ।
शोभनं शङ्खपात्रस्थं गृहाणार्घ्यं नमोस्तुते ॥

अर्घ्यं समर्पयामि गुह्यकाल्यै नमः ।

आचमनीयम्.

मन्दाकिन्याश्च यद्वारि सर्वपापहरं शुभम् ।
गृहाणाचमनीयं त्वं देवि भक्त्याहृतं मया ॥

आचमनीयं समर्पयामि गुह्यकाल्यै नमः ।

मधुपर्कः

मधुपर्कं महादेवि ब्रह्माद्यैः परिकल्पितम् ।
मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥

मधुपर्कं समर्पयामि गुह्यकाल्यै नमः ।

शुद्धोदकस्नानम्.

मन्दाकिनी गौतमी च यमुना च सरस्वतीं ।
ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम् ॥

शुद्धोदकस्नानं समर्पयामि गुह्यकाल्यै नमः ।

अथ पृथक् पञ्चामृतस्नानम् –

पयः स्नानम्

देवाद्यैर्वन्दिता धेनुः सर्वपापप्रणाशिनी ।
तत्क्षीरस्नापिता देवी नित्यं मे वरदा भव ॥

पयःस्नानं समर्पयामि गुह्यकाल्यै नमः ।

पयःस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि गुह्यकाल्यै नमः

दधिस्नानम्·

कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम् ।
तत्सर्वं विलयं यातु दधिस्नानेन मे शिवे ॥

दधिस्नानं समर्पयामि गुह्यकाल्यै नमः ।

दधिस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि गुह्यकाल्यै नमः ।

घृतस्नानम्·

रसानामुत्तमं त्वाज्यं देवतानां सदा प्रियम् ।
तेन त्वं स्नापिता देवि निधिकान्तिप्रदा भव ॥

घृतस्नानं समर्पयामि गुह्यकाल्यै नमः ।

घृतस्नानाऽनन्तरं शुद्धोदकस्नानं समर्पयामि गुह्यकाल्यैनमः ।

मधुस्नानम्·

यस्य धारणमात्रेण तृप्तिं यान्ति पितामहाः ।
मधुना स्नापिता देवी निधिकान्तिप्रदा भव ॥

मधुस्नानं समर्पयामि गुह्यकाल्यै नमः ।

मधुस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि गुह्यकाल्यै नमः

शर्करास्नानम्.

यमलोकभयत्रस्तः शरणं त्वां गतः शिवे ।
खण्डस्नानेन देवेशि मां कुरुस्व सुखान्वितम् ॥

शर्करास्नानं समर्पयामि गुह्यकाल्यै नमः ।

शर्करास्नानानन्तरं शुद्धोदकस्नानं समर्पयामि गुह्यकाल्यै नमः ।

मिश्रितपञ्चामृतस्नानम्.

पयो दधि घृतं चैव मधु शर्करया युतम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥

मिश्रितपञ्चामृतस्नानं समर्पयामि गुह्यकाल्यै नमः ।

पञ्चामृतस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि गुह्यकाल्यै नमः ।

गङ्गाजलम्.

गङ्गा सरस्वती रेवा पयोष्णी नर्मदाजलैः ।
स्नपितासि मया देवि तथा शान्तिं कुरुस्व मे ॥

गङ्गाजलं समर्पयामि गुह्यकाल्यै नमः ।

सुगन्धितैलम् ·

स्नेहं स्नेहेन मे गृह्ण लोकमातर्जगन्मये ।
ग्राह्यं सुगन्धसंयुक्तं देवेशि प्रतिगृह्यताम् ॥
सुगन्धितैलं समर्पयामि गुह्यकाल्यै नमः ।

श्वेत रक्तादिवस्त्रम् ·

वहुतन्तुसमायुक्तं पट्टसूत्रादिनिर्मितम् ।
वासः शुक्लं तथा रक्तं गृहाण वरवर्णिनि ॥
वस्त्रं समर्पयामि गुह्यकाल्यै नमः ।

भूषणम् ·

वज्रमाणिक्यवैदूर्यमुक्ताविद्रुममण्डितम् ।
पुष्पराजसमायुक्तं भूषणं प्रतिगृह्यताम् ॥
भूषणं समर्पयामि गुह्यकाल्यै नमः ।

सौभाग्यद्रव्यम्

हरिद्रां कुंकुमं चैव सिन्दूरं कज्जलान्वितम् ।
सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरि ॥
सौभाग्यद्रव्यं समर्पयामि गुह्यकाल्यै नमः ।

चन्दनम् ·

श्रीखण्डचन्दनं दिव्यं कुंकुमेन समन्वितम् ।
विलेपनं महाकालि प्रीत्यर्थं प्रतिगृह्यताम् ॥

चन्दनं समर्पयामि गुह्यकाल्यै नमः ।

रक्तचन्दनम् ·

गन्धकर्पूरसंयुक्तं रक्तचन्दनमुत्तमम् ।
विलेपनं मयानीतं प्रीत्यर्थं प्रतिगृह्यताम् ॥

रक्तचन्दनं समर्पयामि गुह्यकाल्यै नमः ।

अक्षताः

रञ्जिताः कुंकुमौघेन अक्षताश्चातिशोभनाः ।
ममैषां देवि दानेन प्रसन्ना भव चण्डिके ॥

अक्षतान् समर्पयामि गुह्यकाल्यै नमः ।

तिलयवाः

विष्णुप्रिया धान्यराजा माङ्गल्याः सतिला यवाः ।
तेषां प्रदानमात्रेण ह्यायुर्वृद्धिकराः सदा ॥

तिलयवान् समर्पयामि गुह्यकाल्यै नमः ।

सिन्दूरम्

उद्यदादित्यसंकाशं स्त्रीणां सीमन्तभूषणम् ।
वीरालङ्करणं देवि सिन्दूरं प्रतिगृह्यताम् ॥

सिन्दूरं समर्पयामि गुह्यकाल्यै नमः ।

पिष्टानकम् ·

पुष्पोद्भवं रक्तचूर्णं देवानां प्रीतिदायकम् · ।

पिष्टातकं गृहाणेदं शरणागतवत्सले ॥
पिष्टातकं समर्पयामि गुह्यकाल्यै नमः ।

पुष्पाणि·

तुरीयवन सम्भूतं नानागुणमनोहरम् ।
अनन्त सौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥
सेवन्तिकावकुलचम्पकपाटलाब्जैः
पुन्नागजातिकरवीररसालपुष्पैः ॥
विल्वप्रवालतुलसीदलमालतीभि
स्त्वां पूजयामि परमेश्वरि मे प्रसीद ॥
पुष्पाणि समर्पयामि गुह्यकाल्यै नमः ।

माल्यम्·

माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः ।
मयाहृतानि पूजार्थं गृहाण परमेश्वरि ॥
माल्यानि समर्पयामि गुह्यकाल्यै नमः ।

विल्वपत्राणि·

अमृतोद्भवं श्रीवृक्षं तव प्रीतिकरं सदा ।
विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥
विल्वपत्राणि समर्पयामि गुह्यकाल्यै नमः ।

कमलपुष्पम्

इदं पवित्रं परमं रहस्यं
यशस्करं स्वस्तिकरं शिवं च ॥
कह्लारपुष्पं दुरितौघनाशनं
गौरीशपादाम्बुजभक्तिवर्द्धनम् ॥

कमलपुष्पाणि समर्पयामि गुह्यकाल्यै नमः ।

सुवर्णकमलपुष्पार्पणसङ्कल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा· मेषराशिः ……………… देवी अहं मम· अनेकजन्मार्जितदुरितोपद्रवनिवृत्तिपूर्वकं ऐहिकपुत्रपौत्रादिसर्वैश्वर्य समन्वित विविधसुखप्राप्त्यनन्तरं उत्तमलोकनिवासकामनया श्रीगुह्यकाल्युपरि कृत लक्षकमलपुष्पार्पणकर्मणो यथोक्तफलावाप्तये श्रीगुह्यकालीप्रीतये इदं सुवर्णनिर्मितकमलपुष्पपञ्चकं समर्पयिष्ये· ।

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणता स्म ताम् ॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥

सुवर्णकमलपुष्पाणि समर्पयामि गुह्यकाल्यै नमः ।

अङ्गपूजा-

ॐ चञ्चलायै नम. पादौ पूजयामि ।
ॐ आषाढायै नमः जङ्घे पूजयामि ।
ॐ पार्वत्यै नमः जानुनी पूजयामि ।
ॐ जगद्धात्र्यै नमः ऊरू पूजयामि ।
ॐ कमलवासिन्यै नमः कटिं पूजयामि ।
ॐ शान्तिरूपिण्यै नमः नाभिं पूजयामि ।
ॐ मन्मथायै नमः स्तनौ पूजयामि ।
ॐ एकनाभ्यै नमः हृदयं पूजयामि ।
ॐ काल्यै नमः कण्ठं पूजयामि ।
ॐ शिवायै नमः मुखं पूजयामि ।
ॐ भवान्यै नमः नेत्रे पूजयामि ।
ॐ रुद्राण्यै नमः कर्णौ पूजयामि ।
ॐ महादेव्यै नमः ललाटं पूजयामि ।
ॐ मङ्गलदात्र्यै नमः शिरः पूजयामि ।
ॐ गुह्यकाल्यै नमः सर्वाङ्गं पूजयामि ।

ततो ध्वजापताकारोपणम्।

देवि ध्वज नमस्तेस्तु पताके त्वां नमाम्यहम् ।
अनया पूजया नित्यं मङ्गहे मङ्गलं कुरु ॥

शतनामादिपूजा।

पायसनैवेद्यम्·

सत्पात्रसिद्धं सुहविः पायसं क्षीरपाचितम् ।
निवेदयामि देवेशि सानुगायै जुषाण तत् ॥
पायसनैवेद्यं समर्पयामि गुह्यकाल्यै नमः ।

धूपम्

वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥
धूपं आघ्रापयामि गुह्यकाल्यै नमः ।

दीपम्·

सुप्रकाशो महान्दीपः सर्वतस्तिमिरापहः ।
सबाह्याभ्यन्तरं ज्योतिर्दीपो यं प्रतिगृह्यताम् ॥
दीपं दर्शयामि गुह्यकाल्यै नमः ।

नैवेद्यम्·

घृतपक्कं हविष्यान्नं नानारूपविनिर्मितम् ।
भक्त्या निवेदितं देवि गृहाण जगदम्बिके ॥
नैवेद्यं समर्पयामि गुह्यकाल्यै नमः ।

फलनैवेद्यम्·

फलमूलानि चान्यानि ग्राम्यारण्यानि यानि च ।
नानाविधानि दिव्यानि गृहाण देवि मयार्पितम् ॥
फलनैवेद्यं समर्पयामि· गुह्यकाल्यै नमः ।

आचमनीयम्·

जलं च शीतलं स्वच्छं सुगन्धं सुमनोहरम् ।
मया निवेदितं भक्त्या पानीयं प्रतिगृह्यताम् ॥

आचमनीयं समर्पयामि गुह्यकाल्यै नमः ।

करोद्वर्तनम्.

मृगनाभिसुसंयुक्तं शर्करादिसमन्वितम् ।
करोद्वर्तनकं देवि गृहाण जगदम्बिके ॥

करोद्वर्तनं समर्पयामि गुह्यकाल्यै नमः ।

ताम्बूलम्

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ताम्बूलं समर्पयामि गुह्यकाल्यै नमः ।

सद्व्यनारीकेलफलम्.

इदं फलं मयादेवि स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

सद्व्यनारिकेलफलं समर्पयामि गुह्यकाल्यैनमः

यथाशक्तिजपं कृत्वा निवेदयेत्.

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥

नारिकेलार्घदानम्

अर्घ्यं हस्तद्वयेदत्तं चन्दनोसीरवासितम् ।
यवदूर्वानारिकेलपुष्परत्नान्वितं मुदा ॥
वरदात्वं वरं देहि वांछितं वांछितार्थदा ।
अनेन सफलार्घ्येण फलदा भव मे सदा ॥

नारिकेलार्घ्यं समर्पयामि गुह्यकाल्यै नमः

लक्षवर्तिसंकल्पः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः ……………… देवी अहं मम अनेकजन्मोपार्जित दुरितोपशमनपूर्वकं ऐहिकपुत्रपोत्रादि विविधसुखसंपत्तिप्राप्त्यनन्तरं उत्तम लोकवासकामनया श्रीगुह्यकाली प्रीतये त्रिसूत्र निर्मिताभिः(सपाद)लक्षसंख्याकाभि र्वर्तिकाभि नीराजनं करिष्ये। ।

नीराजनं गृहाणाम्ब बहुदीपविराजितम् ।
लक्षदीपप्रदानेन मम सन्तु मनोरथाः ॥

लक्षदीपै नीराजयामि गुह्यकाल्यै नमः ।

पञ्चवर्तिनीराजनम्

पञ्चवर्तिसमायुक्तं वह्निना दीपितं मया ।
सबाह्याभ्यन्तरं ज्योतिरारार्ति प्रतिगृह्यताम् ॥

पञ्चवर्तिनीराजनं समर्पयामि गुह्यकाल्यै नमः ।

कर्पूरदीपम्

कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदा भव ॥

कर्पूरदीपं समर्पयामि गुह्यकाल्यै नमः ।

चामरम्

शशाङ्ककरसंकाश हिमडिण्डिर पाण्डर ।
प्रोत्सारयाशु दुरितं चामरामर वल्लभ ॥

चामरान्दोलनं समर्पयामि गुह्यकाल्यै नमः ।

व्यजनम्

व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखावहम् ।
अस्य प्रदानात् सकला मम सन्तु मनोरथाः ॥

व्यजनं समर्पयामि गुह्यकाल्यै नमः ।

आदर्शम्

दर्शनेन त्वमादर्श नूनं मङ्गलदायक ।
सौर्य सौभाग्य सत्कीर्ते निर्मलज्ञानदो भव ॥

आदर्शं दर्शयामि गुह्यकाल्यै नमः ।

पुष्पाञ्जलिः

जयन्ति मङ्गला काली भद्रकाली कपालिनी ।
दुर्गाक्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते ॥

जयदेवि जगन्मातर्जयदेव प्रमोदिनि ।
जय दुर्गे प्रपन्नार्तिपरित्राणपरायणे ॥
प्रणमामि महामायां संसारार्णवनाशिनीम् ।
शान्तिं पुष्टिं च मे देहि सततं प्रणमाम्यहम् ॥

पुष्पाञ्जलिं समर्पयामि गुह्यकाल्यै नमः ।

प्रदक्षिणाः

पदेपदे या परिपूजकेभ्यः
सद्योश्वमेधादि फलं ददाति ।
तां सर्वपापक्षय हेतुभूतां
प्रदक्षिणां ते परितः करोमि ॥

प्रदक्षिणां समर्पयामि गुह्यकाल्यै नमः ।

प्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥
अज्ञानाद्विस्मृते भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥

प्रार्थनां समर्पयामि गुह्यकाल्यै नमः ।

नमस्कारः

महाकालि नमस्तेस्तु नमस्त्रैलोक्यनायिके ।

शिवकान्ते नमस्तेस्तु त्राहि मां परमेश्वरि ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै सततं प्रणताः स्म ताम् ॥
नमस्कारं समर्पयामि गुह्यकाल्यै नमः ।
ततः उत्तराङ्ग पूजा·
अर्घ्यप्रामणाम्
भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं मम ॥
अर्घपात्रं पराङ्मुखं कृत्वा
पराङ्मुखार्घपात्राय नमः ।
अर्घपात्रं उत्तानीकृत्य · ॐ अच्छिद्रमस्तु · इति
जलं दद्यात् । ब्राह्मणभोजन भूयसी·
अञ्जलिं बध्वा . पुष्पसहितं नैवेद्यभागं गृहीत्वा देवीभक्तेभ्यो दद्यात्. देवी भक्तेभ्यो नमः .
यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु·
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ।
हस्ते जलं गृहीत्वा.
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतस्वभावात्·
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥

देव्या दक्षिणभागे भैरवं
ॐ भैरवाय नमः इति मन्त्रेण पाद्यादिभिः संपूज्य प्रार्थयेत्

करकलितकपालः कुण्डली दण्डपाणि-
स्तरुणतिमिरनीलव्यालयज्ञोपवीती ।
क्रतुसमयसपर्याविघ्नविच्छेदहेतु-
र्जयति बटुकनाथः सिद्धिदः साधकानाम् ॥

ॐ भैरवाय नमः ।

दशमहाविद्या पूजा—

ॐ काल्यै नमः १ ॐ तारायै नमः २
ॐ षोडश्यै नमः ३ ॐ भुवनेश्वर्यै नमः ४
ॐ छिन्नमस्तायै नमः ५ ॐ त्रिपुरसुन्दर्यै नमः ६
ॐ धूमावत्यै नमः ७ ॐ बगलामुख्यै नमः ८
ॐ मातङ्ग्यै नमः ९ ॐ कमलायै नमः १०

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते ॥

ॐ दशमहाविद्याभ्यो नमः ।

प्रथमदिनकृत्यम्·

कर्ता जलाशयं गत्वा दक्षिणाभिमुख एकवस्त्रधरः वामहस्तस्य अनामिकया "अप नः शोशुचदघम्·" इति दक्षिणतो जलं नीत्वा कुशतिलजलान्यादाय·

स्नानसंकल्पः-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः वर्मा अहं मम· काश्यपगोत्राया इन्द्र दिव्येश्वरीप्रेताया पाषाणोपरि तिलतोयाञ्जलिदानार्थं पिण्डदानार्थं च स्नानं करिष्ये· इति संकल्प्य· अपसव्यं कृत्वा दक्षिणाभिमुखस्तूष्णीं निमज्जेत्·

पुनर्द्विवासा भूत्वा आचम्य·

कुशोपरिस्थापितपाषाणोपरि· अपसव्येनैव· अद्येह काश्यपगोत्रे इन्द्र दिव्येश्वरी प्रेते कुशोपरिस्थापितपाषाणोपरि· प्रथमदिनसम्बन्धी एष एकः तिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम्· इति संकल्पं कृत्वा· एकमञ्जलिं दत्वा· सव्यं कृत्वा पूर्वाभिमुखः नित्यस्नानं विधाय गायत्रीं मनसा स्मृत्वा धौतवस्त्रं परिधाय·आ

ऊदेशं गच्छेत्॥

दीपं प्रज्वाल्य। आचम्य अपसव्यं कृत्वा। ~~[illegible]~~। दक्षिणाभिमुखः पातितवामजानुः वेदिकायां दक्षिणाग्रान् कुशान् आस्तीर्य।

प्रतिज्ञासंकल्पः—

अद्येह काश्यपगोत्राया द्प्र दिव्येश्वरीप्रेतायाः रौरवनाम नरकोत्तारनाय मूर्द्धावयवसंभूत्यै प्रथमदिननिमित्तकं पिण्डदानमहं करिष्ये।

अवनेजनसंकल्पः—

अद्येह काश्यपगोत्रे द्प्र दीव्येश्वरीप्रेते प्रथमदिनसंवन्धिपिण्डस्थाने इदं अवनेजनं ते मया दीयते तवोपतिष्ठताम्। इतिमन्त्रेण आस्तृतकुशोपरि पितृतीर्थेन अवनेजनं दद्यात्।

ततः कुशतिलजलसहितं पिण्डं आदाय।

अद्येह काश्यपगोत्रे द्प्र दिव्येश्वरीप्रेते रौरवनाम नरकोत्तारनाय प्रथमदिनसम्बन्धी एष शिरःपूरकपिण्डस्ते मया दीयते तवोपतिष्ठताम् इति अवनेजनस्थाने पिण्डं दद्यात्।

प्रत्यवनेजनसंकल्पः

अद्येह काश्यपगोत्रे इप्र दीव्येश्वरी प्रेते इदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ॥

ततः पिण्डोपरि उशीरचन्दन उर्णासूत्र भृङ्गरा ज[illegible] पूगीफल पुष्पाक्षत धूपदीपनैवेद्यैः पिण्डं संपूज्य· कुशतिलजलान्यादाय संकल्पः-

अद्येह काश्यपगोत्रे इप्र दीव्येश्वरीप्रेते एतानि पिण्डस्थोशीरचन्दन उर्णासूत्र भृङ्गराजपत्र पूगीफल गन्धपुष्पाक्षत धूप दीप नैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम्· इति उत्सृजेत्·

कुशतिलजलान्यादाय· संकल्पः—

अद्येह काश्यपगोत्रे इप्र दीव्येश्वरी प्रेते एष सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम्· इति पिण्डोपरि एकं अञ्जलिं दद्यात्·

ततः सतिलतोयपूर्णपुटपात्रमादाय·

अद्येह काश्यपगोत्रे इप्र दीव्येश्वरीप्रेते इदं सतिलतोयपूर्णपुटपात्रं ते मया दीयते तवोपतिष्ठताम्· तोयपूर्णपुटपात्रं पिण्डे उत्सृजेत्

ततः मृकाष्ठिकयोः नीरं क्षीरं च आदाय·
अद्येह काश्यपगोत्रे इप्र दीव्येश्वरी प्रेते इमे
त्रिकाष्ठिकास्थिते नीरक्षीरयुतपुटपात्रे ते मया
दीयेते तवोपतिष्ठेताम्· इति उत्सृज्य·

श्मसानानल दग्धासि परित्यक्तासि बान्धवैः।
इदं नीरं इदं क्षीरं अत्र स्नाहि इदं पिब ॥

इति पठेत्·

ततः सतिल सुशीतल जलपूर्णघटं अग्रे कृत्वा·
अद्येह काश्यपगोत्रे इप्र दीव्येश्वरि प्रेत एष
सतिलसुशीतलजलोपेता घटस्ते मया दीयते
तवोपतिष्ठताम्· इति उत्सृज्य· अञ्जलिं बध्वा·

सुशीतलजलोपेतः सर्वोपस्करसंयुतः।
एष घटो मया दत्तः प्रेतार्थे उपतिष्ठताम् ॥

ततः सव्येन· अञ्जलिं बध्वा·

अनादिनिधनो देवः शंखचक्रगदाधरः।
अक्षय्यः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव ॥

इति पठेत्· ॥

ततो लोहदक्षिणां कुशतिलजलसहितां आदाय· संकल्पः—

अद्येह काश्यपगोत्राया इप्र दीव्येश्वरी प्रेतायाः कृतेनत् शिरःपूरकप्रथमपिण्डदानप्रतिष्ठार्थं इदं लोहं पलपरिमितं यमदैवताकं दक्षिणात्वेन समुत्सृजे·

ततः पिप्पलादिवृक्षे अधश्छिद्रं जलपूर्णघटं धारयेत्· संकल्पः–

अद्येह काश्यपगोत्रायाः इप्र दीव्येश्वरी प्रेतायाः पापशान्ति अध्वश्रम विनाशार्थं इदं आकाशाधिकरणक जलं ते मया दीयते तवोपतिष्ठताम्·

काकबलिदानम्·

काकोसि यम दूतोसि गृहाण बलिमुत्तमम् ।
यमद्वारे महाघोरे त्वमाप्यायीतुमर्हसि· ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
दक्षिणां दिशमाश्रित्य प्रेतान्नं बलिमाहर ॥

इति पठेत्· ॥

द्वितीयदिनसंवन्धि स्नानसंकल्पः-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
वर्मा अहं मम काश्यपगोत्रायाः इप्र
दीव्येश्वरीप्रेताया द्वितीयदिनसम्बन्धीपाषाणोप
रि तिलतोयाञ्जलिदानार्थं अवयवपूरकपिण्डदाना
र्थं च स्नानं करिष्ये. इति संकल्प्य. अपसव्येन
दक्षिणाभिमुखः तुष्णीं स्नायात्.
पुनः द्विवासा भूत्वा आचम्य.
कुशोपरिस्थापित पाषाणोपरि अपसव्येनैव.
अद्येह काश्यपगोत्रे इप्र दीव्येश्वरीप्रेते कुशोप-
रिस्थापित पाषाणोपरि द्वितीयदिनसंवन्धी इमौ
द्वौ सतिलतोयाञ्जलिं ते मया दीयेते तवोपतिष्ठताम्
इति मन्त्रेण अञ्जलिद्वयं दत्वा.
सव्यं कृत्वा पूर्वाभिमुखः नित्यस्नानं विधाय.
गायत्रीं मनसा स्मृत्वा धौतवस्त्रं परिधाय श्राद्ध
देशं गच्छेत्.

द्वितीय दीने

अथ प्रयोगः

दीपं प्रज्वाल्य कुशहस्तः सोत्तरीय आचम्य.
अपसव्यं कृत्वा दक्षिणाभिमुख पातितवामजानुः
वेदिकायां दक्षिणाग्रान् कुशानास्तीर्य.
प्रतिज्ञा संकल्पः
अद्येह काश्यपगोत्राया इप्र दीव्येश्वरीप्रेताया
जातिपुष्करा नाम नरकोत्तारणाय कर्ण अक्षि ना
सिकावयव संभूत्यै द्वितीयदिननिमित्तकं पिण्ड
दानमहं करिष्ये. पुनः कुशतिल जलान्यादाय.
अद्येह काश्यपगोत्रे इप्र दीव्येश्वरीप्रेते द्विती
यदिनसंवन्धि द्वीतीयपिण्डस्थाने इदं अवनेज
नं ते मया दीयते तवोपतिष्ठताम्.
इति अवनेजनं दद्यात्.
पिण्डदानसंकल्पः
अद्येह काश्यपगोत्रे इप्र दीव्येश्वरी प्रेते जाति
पुष्करनाम नरकोद्धारणाय कर्ण अक्षि नासिका
वयवसंभूत्यै एष द्वितीयदिनसंवन्धी द्वितीय
पिण्डस्ते मया दीयते तवोपतिष्ठताम्.
इति अवनेजनस्थाने पिण्डं दद्यात्.

प्रत्यवनेजनसंकल्पः-

अद्येह काश्यपगोत्रे रुद्र दीव्येश्वरी प्रेते द्वितीय
दिनसंवन्धि द्वितीयपिण्ड इदं प्रत्यवनेजनं ते म
या दीयते तवोपतिष्ठताम्।

इति पिण्डोपरि प्रत्यवनेजनं दद्यात्।

ततः प्रेतमुद्दिश्य पिण्डोपरि उशीर चन्दन उर्णा
सूत्र भृङ्गराजपत्र पूगीफल गन्धपुष्पाक्षत धूप
दीपनैवेद्यैः पिण्डं संपूज्य।

कुशतिलजलान्यादाय।

अद्येह काश्यपगोत्रे रुद्र दीव्येश्वरीप्रेते एता
नि पिण्डस्थोशीर चन्दन उर्णासूत्र भृङ्गराजपत्र
पूगीफल गन्धपुष्पाक्षत धूप दीपनैवेद्यानि ते म
या दीयन्ते तवोपतिष्ठताम्। इति उत्सृजेत्।

अञ्जलिदानम्।

अद्येह काश्यपगोत्रे रुद्र दीव्येश्वरी प्रेते इमौ
द्वौ सतिलतोयाञ्जली ते मया दीयेते तवोपतिष्ठे
ताम्।

ततः सतिलतोयपूर्णपुटपात्रद्वयं संपाद्य-

अद्येह काश्यपगोत्रे रुद्र दीव्येश्वरीप्रेते इमे

सतिलतोयपूर्णपुटपात्रे ते मया दीयेते नवोप
तिष्ठेताम्· इत्युक्त्वा पिण्डसमीपे दद्यात्
ततः तृकाष्ठिकयो नीरं क्षीरं च आदाय·
अद्येह काश्यपगोत्रे दृप्र दीव्येश्वरी प्रेते इमे
त्रिकाष्ठिकास्थित नीरक्षीरयुतपुटपात्रे ते मया
दीयेते नवोपनिष्ठेताम्· इति उत्सृज्य ·॥

श्मशानानलदग्धासि परित्यक्तासि बान्धवैः
इदं नीरं इदं क्षीरं अत्र स्नाहि इदं पिव ॥

इति पठेत्·
ततः सतिलसुशीतलजलपूर्णघटं अग्रे कृत्वा·
कुशतिलजलान्यादाय·
अद्येह काश्यपगोत्रे दृप्र दीव्येश्वरीप्रेते एष
सतिलसुशीतलजलोपेतो घटस्ते मया दीयते
नवोपनिष्ठताम्· इति उत्सृज्य ·अञ्जलिं वध्वा·

सुशीतलजलोपेतः सर्वोपस्करसंयुतः।
एष घटो मया दत्तः प्रेतायै उपतिष्ठताम् ·॥

ततः सव्येन·

अनादिनिधनो देवः शंखचक्रगदाधरः।
अक्षय्यः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥

दक्षिणा संकल्प.

अद्येह काश्यप गोत्राया इन्द्रादेव्यन्ब्वरी प्रेतायाः द्वितीय
दिने ~~अवयवपूरक~~ आशौचपूरक नाम नकोनाग एप कर्णाक्षिनासिकावयव
संभूत्यै द्वितीयदिन पिण्डदानकर्मणः प्रतिष्ठार्थं इदं लोहं यमदेवताकं
दक्षिणात्वेन समुत्सृजे. जलं क्षिपेत्.

पिप्पलादि वृक्षे घटे जलं दत्वा
कुशतिलजला न्यादाय.

आकाशेनु निरालम्बे वायुभूतो निराश्रयः।
एष घटो मया दत्तः प्रेतायै ऽपतिष्ठताम् ॥

इति उत्सृजेत्.

काक वलि दानम्.

काकोसि यमदूतोसि गृहाण वलि मुत्तमम्।
यमद्वारे महाघोरे त्वमाप्यायितु मर्हसि ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च।
दक्षिणां दिशमाश्रित्य प्रेतानां वलिमाहर ॥

इति पठेत्.

तृतीयदिन सम्बन्धी स्नान संकल्प .

अद्येह: काश्यपगोत्र: काश्यपावत्सार नैध्रुवेति त्रिप्रवर:
..... वर्मा अहं मम काश्यपगोत्राया: इत्यादिदेव्या:
प्रेताया तृतीयदिन सम्बन्धी पाषाणोपरि तिलतोया
ञ्जलि दानार्थं गलाङ्घ्रि भुज वक्षोऽवयव पूरक पिण्डदाना
र्थं च स्नानं करिष्ये . इति संकल्प . अपसव्येन .
दक्षिणाभिमुख: तूष्णीं स्नायात् .
पुन: द्विवासा भूत्वा आचम्य
कुशोपरि स्थापित पाषाणोपरि अपसव्येनैव
अद्येह काश्यपगोत्रे इत्यादिदेव्या: प्रेते कुशोपरि
स्थापित पाषाणोपरि तृतीयदिन संबन्धी इमे ह्यप:
सतिलतोयाञ्जलि नमया दीयते तवोपतिष्ठताम् .
इति मन्त्रेण अञ्जलित्रय दत्वा .
एव कृत्वा पूर्वाभिमुख: नित्यस्नानं विधाय
गायत्री मनसा स्मृत्वा धौतवस्त्रे परिधाय
आर्द्रदेहो गच्छेत् .

तृतीय दिने

प्रतिज्ञा संकल्पः-

अद्येह काश्यपगोत्राया इप्र दिव्येश्वरी प्रेताया तृतीय दिने हाहाकार नाम नरकोत्तारणाय गलांस भुज वक्षोवयव संभूत्ये तृतीयपिण्डदानमहं करिष्ये.

वेदिकायां कुशास्तरणं विधाय.

अवनेजन संकल्पः-

अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते तृतीयदिनसंबन्धि पिण्डस्थाने इदं अवनेजनं ते मया दीयते नवोपतिष्ठताम्.

पिण्डदान संकल्पः-

अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते हाहाकार नाम नरकोद्धारणाय गलांस भुज वक्षोवयव पूरक तृतीय पिण्डस्ते मया दीयते नवोपतिष्ठताम्.

प्रत्यवनेजन संकल्पः

अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते इदं पिण्डप्रत्यवनेजनं ते मया दीयते नवोपतिष्ठताम्.

ततः प्रेतमुद्दिश्य पिण्डे उसीर चन्दन उर्णासूत्र
भृङ्गिराज पूगीफल गन्धपुष्पाक्षत धूपदीप नैवे
द्यानि समर्प्य.

संकल्पः-

अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते एता
नि पिण्डस्थोशीर चन्दन उर्णासूत्र भृङ्गिराजपत्र
पुष्पाक्षत धूपदीप नैवेद्यानि ते मया दीयन्ते त
वोपतिष्ठन्ताम् . इति उत्सृजेत्.

अञ्जलि संकल्पः

अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते तृतीय
पिण्डे इमे त्रयः सतिलतोयाञ्जलयस्ते मया दी
यन्ते तवोपतिष्ठन्ताम्.

पुटपात्र संकल्पः-

अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते तृती
यपिण्डे एतानि त्रीणि सतिलतोयपूर्ण पुटपात्रा
णि ते मया दीयन्ते तवोपतिष्ठन्ताम्.

ततः त्रिकाष्ठिकयोः नीरं क्षीरं च संपाद्य.

संकल्पः-

अद्येह काश्यपगोत्रे इप्र दिव्येश्वरी प्रेते इमे

त्रिकाष्ठिका स्थित नीर क्षीरयुतपुटपात्रे ते मया दी
यन्ते तबोपतिष्ठन्ताम्. इति उत्सृज्य. अंजलिं बध्वा.

श्मशानानल दग्धासि परित्यक्तासि बान्धवैः ।
इदं नीरं इदं क्षीरं अत्र स्नाहि इदं पिब. ॥

इति पठेत्

जलघट संकल्पः

अद्येह काश्यपगोत्रे रम दिव्येश्वरी प्रेते तृतीय
पिंडे एष सतिल सुशीतलजलोपेतो घट स्ते मया
दीयते तबोपतिष्ठताम्. इति उत्सृज्य.

अञ्जलिं बध्वा

सुशीतल जलोपेतः सर्वोपस्कर संयुतः ।
एष घटो मया दत्तः प्रेतायै उपतिष्ठताम् ॥

इति पठेत्. सव्येन.

अनादिनिधनो देवः शंखचक्रगदाधरः ।
अक्षय्यः पुण्डरीकाक्षः प्रेत मोक्षप्रदो भव. ॥

दक्षिणा संकल्पः-

अद्येह काश्यपगोत्राया रम दिव्येश्वरी प्रेतायाः
तृतीय दिने हाहाकारनाम नरको तारणाय गतांशा भु
दकं काश्यपगोत्राणां पितामहप्रपितामह वृद्धप्रपितामहानां
~~प्रेतस्य~~ धीरविक्रम ~~[illegible]~~ विक्रम ~~[illegible]~~ विक्रम [illegible] शर्मणां व
सुरुद्रादित्यस्वरूपाणां । अर्घपात्रोदकैः सह संयोजयिष्ये ।
इत्युक्त्वा प्रेतार्घपात्रस्थजलं भागत्रयं कृत्वा । एकैकभागं
वक्ष्यमाणमन्त्रैः संयोजयेत् । जलविभागकरणमन्त्रः—
ये समानाः समनसः पितरो यमराज्ये ॥ तेषां लोकः स्वधा नमो
यज्ञो देवेषु कल्पताम् । ॥ ये समानाः समनसो जीवाजीवेषु मामकाः
तेषाꣳ श्रीर्मयि कल्पतामस्मिंल्लोके शतꣳ समाः ॥ इति विभजेत् ।

ततः सव्यं कृत्वा आचम्य· अपसव्यं कृत्वा·

पुष्पसहितं प्रेतार्घपात्रं वामहस्तेनादाय· पितामहार्घपात्रं दक्षिणहस्तेनादाय·

ॐ ये समानाः समनसो जीवा जीवेषु मामकाः ।। तेषाꣳ श्रीर्मयि कल्पतां मस्मिल्लोके शतꣳ समाः ।।

संसृजतु त्वा पृथिवी वायुरग्निः प्रजापतिः ।। संसृजध्वं च पूर्वेभिस्तिस्रभिः पितृभिः सह· ।। संगच्छध्वं संवदध्वं संवो मनांसि जानताम् ।। देवा भागं यथा पूर्वे संजाताना मुपासते ।। समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्· ।। समानं मन्त्रमभिमन्त्रयेव ।। समानेन वो हविषा जुहोमि ।। समानी व आहूतिः समाना हृदयानि वः ।। समानवस्तु वो मनो यथा वः सुसहासति· ।।

इति मन्त्रान् पठित्वा प्रेतार्घपात्रस्थ तृतीयभागजलं पितामहार्घपात्रजले मेलयेत्·

पुनः प्रेतार्घपात्रजल तृतीयापरभागं पुष्पसहित वामहस्तेनादाय· प्रपितामहार्घपात्रं दक्षिणहस्तेनादाय·

पूर्वोक्तान् मन्त्रान् पठित्वा मेलयेत्·

पुनः प्रेतार्घपात्रजलतृतीयापरभागजलं वामहस्तेनादाय· वृद्धप्रपितामहार्घपात्रं दक्षिणहस्तेनादाय पूर्ववत् मेलयेत्·

एवं अर्घपात्रत्रयं मेलयित्वा· कुशतिलजलान्यादाय·
अद्येह काश्यपगोत्र ~~धर्मले~~ वीरविक्रम प्रेत काश्यप गोत्रैः
पितामहप्रपितामह वृद्धप्रपितामहैः ~~सेतु~~ [illegible] वीरविक्रम [illegible]
प्रा४ ~~धर्म~~ विक्रम ~~[illegible]~~ विक्रम प्रपितामहैः वसुरुद्रादित्यस्वरूपैः
सह सायुज्यं गच्छ· इति उत्सृजेत्·
पितामहार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं गृहीत्वा
ॐ नमो नारायणाय· इति मन्त्रेण अन्नपात्रोपरि धृत्वा·
वामहस्तार्घपात्रं दक्षिणकरेण पिधाय·
ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पा
र्थवीर्या ॥ हिरण्यवर्णा यज्ञियास्तान आपःशिवा सꣳस्यो
ना सुहवा भवन्तु· इति अभिमन्त्र्य
कुशतिलजलान्यादाय
अद्येह काश्यपगोत्र ~~धर्मले~~ शिरविक्रम प्रेतस्य सपिण्डी
करणनिमित्तकश्राद्धे काश्यपगोत्र पितामह ~~सेतुबहा~~ [illegible]
कमलक्षान वसुस्वरूप एष तेऽर्घः स्वधा· इति अर्घं दद्यात्·
पवित्रपुष्पसहितं अर्घपात्रं अग्रे स्थापयेत्·
प्रपितामहार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं गृहीत्वा·
ॐ नमो नारायणाय इति मन्त्रेण अन्नपात्रोपरि धृत्वा·
वामहस्तार्घपात्रं दक्षिणकरेण पिधाय·

ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थवीर्याः ॥ हिरण्यवर्णा यज्ञिया स्तान आपः शिवाः स६ स्योना सुहवा भवन्तु· ॥ इति अभिमन्त्र्य·
कुशतिलजलान्यादाय·

✓ अद्येह काश्यपगोत्रस्य ~~[illegible]~~ धीरविक्रम प्रेतस्य
करणनिमित्तकश्राद्धे काश्यपगोत्र ~~सुरेन्द्र~~ धीरविक्रमवर्मन् रुद्रस्वरूपे एष तेऽर्घः स्वधा· इति अर्घं दद्यात्·
पवित्रपुष्पसहितं अर्घपात्रं अग्रे स्थापयेत्·
पृछ प्रपितामहार्घपात्रं वामहस्ते कृत्वा· सपुष्पं पवित्रं धृत्वा·
ॐ नमो नारायणाय· इति मन्त्रेण अन्नपात्रोपरि धृत्वा·
वामहस्तार्घपात्रं दक्षिणकरेण पिधाय·
ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थवीर्या ॥ हिरण्यवर्णा यज्ञिया स्तान आपः शिवा स६ स्योना सुहवा भवन्तु ॥ इति अभिमन्त्र्य·
कुशतिलजलान्यादाय

अद्येह काश्यपगोत्रस्य ~~[illegible]~~ धीरविक्रम प्रेतस्य
सपिण्डीकरण निमित्तक श्राद्धे काश्यपगोत्र ~~सुरेन्द्र~~ धीरविक्रमवर्मन् आदित्यस्वरूप एष तेऽर्घः स्वधा· इति अर्घं दद्यात्
ततः पवित्रपुष्पसहितं प्रेतार्घपात्रं आसनवामभागे स्थापयेत्·

तदुपरि कुशान् दद्यात्·
वृद्धप्रपितामहार्घपात्रस्थ जलादिकं प्रपितामहार्घपा
त्रे कृत्वा· तत्सर्वं पितामहार्घपात्रे कृत्वा· पितामहार्घ
पात्रं प्रपितामहार्घपात्रोपरि स्थापयित्वा· तद्द्वयं वृद्धप्र
पितामहार्घपात्रोपरि धृत्वा· पात्रत्रयं एकदैव पि
तामहासनवामभागे पितामहादिभ्यः स्थानमसि·
इति न्युब्जं कृत्वा· तदुपरि कुशत्रयं दद्यात्· ततः
क्रमेण प्रेतमारभ्य गन्धादिभिः सर्वान् संपूज्य ॥
ततः कुशादीन्यादाय· अद्येह काश्यपगोत्र ~~प्रेत~~ वीर
विक्रम प्रेत सपिण्डीकरणनिमित्तकश्राद्धे एतानि ग
न्धपुष्पाक्षतधूपदीपवासांसि ते मया दीयन्ते तवोप
तिष्ठन्ताम् इति प्रेताय गन्धादिकं समुत्सृजेत् । पुन
र्गन्धादिकं आदाय· अद्येह काश्यपगोत्रस्य प्रेतस्य
वीरविक्रम प्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे काश्य
पगोत्राः पितामह प्रपितामह वृद्धप्रपितामहाः ~~प्रेतस्य~~
पेटल वीरविक्रम ~~पुत्रक~~ वीरविक्रम ~~पुत्र~~ वीरविक्रम वर्माणो
वसुरुद्रादित्यरूपाः एतानि गन्धपुष्पाक्षतधूपदीपवासां
सि युष्मभ्यं स्वधा ॥ इति पितामहादिभ्यो गन्धादिकं
समुत्सृजेत् ॥ ततः प्रेतासनस्य चतुर्दिक्षु ततः कोणं म

ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थवीर्याः ॥ हिरण्यवर्णा यज्ञिया स्तान आपः शिवाः सꣳ स्योना सुहवा भवन्तु ॥ इति अभिमन्त्र्य ·

कुशतिलजलान्यादाय ·

✓ अद्येह काश्यपगोत्रस्य ~~[illegible]~~ वीर विक्रम प्रेतस्य करणनिमित्तकश्राद्धे काश्यपगोत्र ~~[illegible]~~ वीर विक्रम वर्मन् रुद्रस्वरूप एष तेऽर्घः स्वधा · इति अर्घं दद्यात् ·

पवित्रपुष्पसहितं अर्घपात्रं अग्रे स्थापयेत् ·

प्रपितामहार्घपात्रं वामहस्ते कृत्वा · सपुष्पं पवित्रं धृत्वा · ॐ नमो नारायणाय · इति मन्त्रेण अन्नपात्रोपरि धृत्वा · वामहस्तार्घपात्रं दक्षिणकरेण पिधाय ·

ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थवीर्या ॥ हिरण्यवर्णा यज्ञिया स्तान आपः शिवा सꣳ स्योना सुहवा भवन्तु ॥ इति अभिमन्त्र्य ·

कुशतिलजलान्यादाय

अद्येह काश्यपगोत्रस्य ~~[illegible]~~ वीर विक्रम प्रेतस्य सपिण्डीकरण निमित्तक श्राद्धे काश्यपगोत्र ~~[illegible]~~ वीर विक्रम वर्मन् आदित्यस्वरूप एष तेऽर्घः स्वधा · इति अर्घं दद्यात्

ततः पवित्रपुष्पसहितं प्रेतार्घपात्रं आसनवामभागे स्थापयेत् ·

तदुपरि कुशान् दद्यात्॰
वृद्धप्रपितामहार्घपात्रं स्थ जलादिकं प्रपितामहार्घपा
त्रे कृत्वा॰ तत्सर्वं पितामहार्घपात्रे कृत्वा॰ पितामहार्घ
पात्रं प्रपितामहार्घपात्रोपरि स्थापयित्वा॰ तद्द्वयं वृद्धप्र
पितामहार्घपात्रोपरि धृत्वा॰ पात्रत्रयं एकदैव पि
तामहासन वामभागे पितामहादिभ्यः स्थानमसि॰
इति न्युब्जं कृत्वा॰ तदुपरि कुशत्रयं दद्यात्॰ ततः
क्रमेण प्रेत मारभ्य गन्धादिभिः सर्वान् संपूज्य ॥
ततः कुशादीन्यादाय॰ अद्येह काश्यपगोत्र ~~[illegible]~~ वीर
विक्रम प्रेत सपिण्डीकरणनिमित्तकश्राद्धे एतानि ग
न्धपुष्पाक्षतधूपदीपवासांसि ते मया दीयन्ते तवोप
तिष्ठन्ताम् इति प्रेताय गन्धादिकं मुत्सृजेत्। पुन
र्गन्धादिकमादाय॰ अद्येह काश्यपगोत्रस्य [illegible]
वीरविक्रम प्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे काश्यप
गोत्राः पितामह प्रपितामह वृद्धप्रपितामहाः ~~[illegible]~~
[illegible] वीरविक्रम ~~[illegible]~~ वीरविक्रम ~~[illegible]~~ वीरविक्रम वर्माणो
वसुरुद्रादित्यस्वरूपा एतानि गन्धपुष्पाक्षतधूपदीपवासां
सि युष्मभ्यं स्वधा ॥ इति पितामहादिभ्यो गन्धादिक
मुत्सृजेत् ॥ ततः प्रेतासनस्य चतुर्दिशं चतुः कोणं म

रण्डलं विधाय । अपरं पितामहादित्रिके मण्डलं कुर्यात् ॥
ततः सव्यं कृत्वा प्राङ्मुख उपवीती पातितदक्षिणजानुः ।
पुटकादेः सव्येन मन्त्रं कृत्वा पुटकादि जले ॐ अग्नये क
व्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय ॐ सोमाय
पितृमते स्वाहा इदं सोमाय पितृमते । इति आहुतिद्वयं
जुहुयात् । अपसव्यं कृत्वा अवशिष्टं अन्नं पितामहादिपात्रे
किञ्चिद्दद्यात् ॥ ततः क्रमेण प्रत्येकं सोपस्करणं मन्त्रमुपनी
य पृथक् पृथक् पुटकस्थितं सतिलजलं चोपनीय प्रेतपा
त्रादिस्थितान्नेषु मधु दद्यात् ॥ पृथिवी ते पात्रं द्यौरपिधानं
ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ इदं विष्णु
र्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥
इति पठित्वा अपहता असुरा रक्षांसि वेदिषदः इति
पठित्वा अन्नोपरि प्रचुरतिलान् प्रक्षिप्य कुशादीन्आ
दाय अद्येह काश्यपगोत्राय ~~प्रेताय~~ वीरविक्रम प्रेताय
सपिण्डीकरणश्राद्धे इदमन्नं सोपस्करणं ते मया दीय
ते तवोपतिष्ठताम् । इति प्रेताय अन्नं उत्सृजेत् । ततः पि
तामहान्नपात्रं सव्यहस्ताभ्यां द्वाभ्यां हस्ताभ्यां आ
लभ्य ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अ
मृते अमृतं जुहोमि स्वाहा । इदं विष्णुर्विचक्रमे त्रेधा नि

दधेणदम् । समूढमस्यपाꣳसुरे । पठित्वा ॥ इदमन्नम्. इमा आपः, इद माज्यम्, इदं हविरिति पुन रन्ने. एतानि उपकरणानि क्रमेण अन्न जल घृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य, ॐ अपहता असुरा रक्षाꣳसि वेदिषद । इति अन्नोपरि तिलान् प्रक्षिप्य मोटकादिकमादाय - ॐ अद्येह काश्यपगोत्रस्य ~~[illegible]~~ वीरविक्रम प्रेतस्य सपिण्डीकरणकनिमित्तकश्राद्धे काश्यपगोत्राय पितामहाय ~~[illegible]~~ वीरविक्रम वर्मणे वसुस्वरूपाय. एतत्ते अन्नं सोपकरणं स्वधा ॥ इति पितामहाय अन्न मुत्सृजेत् ॥ ततः प्रपितामहान्नपात्रं मालभ्य ॐ पृथिवी ते पात्रं द्यौ रपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा. ॐ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम्. समूढमस्य पाꣳसुरे. इति पठित्वा. इदमन्नम्. इमा आपः, इद माज्यम्. इदं हवि रिति पुन रन्ने, एतानि उपकरणानि क्रमेण अन्नजल घृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य ॐ अपहता असुरा रक्षाꣳसि वेदिषदः, इति अन्नोपरि तिलान् प्रक्षिप्य. मोटकादीनादाय. अद्येह काश्यपगोत्रस्य ~~[illegible]~~ वीरविक्रम प्रेतस्य सपिण्डीकरण निमित्तक श्राद्धे काश्यपगोत्राय प्रपितामहाय ~~[illegible]~~ वीरविक्रम वर्मणे प्रद्युम्नस्वरूपाय एतत्ते अन्नं सोपकरणं स्वधा । इति प्रप

जेत् । ततो वृद्धप्रपितामहान्नपात्रमालभ्य· ॐ पृथिवीते पा
त्रं द्यौरपिधानं ब्राह्मणस्यमुखे अमृते अमृतं जुहोमि स्वाहा·
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्· समूढमस्य पांसु
रे· इति पठित्वा अपहता असुरा रक्षांसि वेदिषदः ॥ इति
अन्नोपरि तिलान् प्रक्षिप्य· मोटकादीन्यादाय· अद्येह
काश्यपगोत्रस्य [illegible] वीरविक्रमप्रेतस्य सपिण्डीकरण
निमित्तकश्राद्धे काश्यपगोत्राय वृद्धप्रपितामहाय ~~कुलेन्दु~~
कुलद वीरविक्रमवर्मणे, आदित्यस्वरूपाय एतत्ते अन्नं स्वधा·
इति वृद्धप्रपितामहाय अन्नं उत्सृजेत् । ततः सव्येन मधुवा
तेति ऋचम्· ॐ मधु ॐ मधु· ॐ मधु· इति च जप
त्वा· अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्, तत्सर्वं क्षम्य
तां देव प्रसीद पुरुषोत्तम ॥ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेक
चक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत्·
ततः पितामहान्नपात्रसन्निधौ· आस्तृत दक्षिणाग्रकुश
मयायां भूमौ विकिरासनं दद्यात् । अपसव्येनैव मोट
कमादाय· असंस्कृतप्रमीतानां त्यागिनां कुलयोषि
ताम्· उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्· इति
मोटकस्थमासनं आस्तृतकुशोपरि उत्सृजेत् ॥ ततः
सतिल[illegible]मन्नं मादाय जलेन आप्लाव्य· मोटकं चा

दाता । अग्निदग्धाश्च येजीवा ये, प्यदग्धाः कुलेमम । भूमौ
दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ इति आस्तृतकुशोप
रि दत्तं विकिरेत् ॥ ततः सव्यं कृत्वा आचम्य हरिं स्मरेत्
अपसव्यं कृत्वा. प्रेतपिण्डदानार्थं एकां, पितामहादिक
पिण्डदानार्थं अपरां रेखामितां. चतुरङ्गुलोच्छ्रितां मेकतोद
क्षिणाग्रकां पिण्डिकां निर्माय. प्रेतपिण्डिकायां रेखाकरणोल्मु
कभ्रमणं विनैवच्छिन्नमूलकुशानास्तीर्य, पितामहादिपिंड
कामध्ये वामेन पाणिना दर्भपिञ्जुलीं गृहीत्वा दक्षिणह
स्ते कृत्वा. तन्मूलेन सव्योपगृहीत दक्षिणपाणिना अपहता
असुरा रक्षांसि वेदिषदः । इति मन्त्रेण दक्षिणाग्रां रेखां प्राद
शप्रमाणां सकृदुल्लिख्य. दर्भपिञ्जुलीं नैरृत्यां क्षिपेत् ॥
रेखोपरि ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया च
रन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदात्यस्मात् .
इति मन्त्रेण अङ्गारं भ्रामयित्वा. दक्षिणस्यां क्षिपेत् ॥ ततो रे
खायां छिन्नमूलकुशास्तरणात् ॥ ततः सव्येन आचम्य. ॥
अपसव्यं कृत्वा. पुटकद्वये गन्धपुष्पतिलजलानि कृत्वा ए
कं पुटकं वामहस्ते कृत्वा. कुशादिकमादाय. अद्येह काश्यप
गोत्र तेशानवीरविक्रम प्रेत सपिण्डीकरणक आद्यपिण्ड
स्थाने इद मवनेजनन्ते मयादीयते तवोपतिष्ठताम्. इति पृ

वपिण्डिकायां अवनेजनं दद्यात् । अपरं पुरुषं वाम्हणं मोक्षकाय. मो
टकादीन्यादाय अद्येह काश्यपगोत्रस्य [illegible] वीरविक्रमप्रेतस्य
सपिण्डीकरणनिमित्तक श्राद्ध पिण्डस्थाने काश्यपगोत्र पि
तामह [illegible] वीरविक्रमवर्मन् वसुस्वरूप, अत्रावने निक्ष्व
ते स्वधा. इति द्वितीयपिण्डिकायां पितामहाय अवनेजनं दद्या
त् । पुनर्मोटकादीन्यादाय, अद्येह काश्यपगोत्रस्य [illegible]वी
रविक्रमप्रेतस्य सपिण्डीकरणनिमित्तक श्राद्धपिण्डस्थाने काश्य
पगोत्र प्रपितामह [illegible] वीरविक्रमवर्मन् रुद्रस्वरूप अत्राव
ने निक्ष्व ते स्वधा ॥ इति प्रपितामहाय अवनेजनं दद्यात् ॥
पुनर्मोटकादिकमादाय अद्येह काश्यपगोत्रस्य [illegible] वीर
विक्रमप्रेतस्य सपिण्डीकरणनिमित्तक श्राद्धपिण्डस्थाने
काश्यपगोत्र [illegible] वीरविक्रमवर्मन् आदित्यस्वरूप अत्राव
ने निक्ष्व ते स्वधा । इति वृद्धप्रपितामहाय अवनेजनं दद्यात् ॥
ततः कपित्थप्रमाणान् चतुरः पिण्डान्निर्माय प्रथमपिण्डं कुश
तिलसहितमादाय. अद्येह काश्यपगोत्र [illegible] वीरविक्रमप्रे
त सपिण्डीकरणश्राद्ध एष पिण्डस्ते मया दीयते तवोपति
ष्ठताम्. इति पूर्वपिण्डिकायां कुशोपरि प्रेतपिण्डं दद्यात् ॥
ततो मोटकादीनि पिण्डं चादाय अद्येह काश्यपगोत्रस्य पैतृ
[illegible] वीरविक्रमप्रेतस्य. सपिण्डीकरणनिमित्तक श्राद्ध का

श्यपगोत्र पितामह ~~हेडम्बाण~~ वीरविक्रमशर्मन् वसुस्वरूप एष
ते पिण्डः स्वधा ।। इति पश्चिमपिण्डिकायां प्रथमावनेजन
स्थाने पितामहायपिण्डं दद्यात् ।। पुनः मोटकादिकं पिण्डं
चादाय । अद्येह काश्यपगोत्रस्य ~~पेकम~~ वीरविक्रमस्य सहा प्रपि
ण्डीकरणनिमित्तकं भातु काश्यपगोत्र प्रपितामह ~~हुलोक~~ वीर
विक्रमवर्मन् रुद्रस्वरूप एष ते पिण्डः स्वधा । इति द्वितीया
वनेजनस्थाने प्रपितामहाय पिण्डं दद्यात् ।। पुनः मोटका
दीनि पिण्डं च आदाय अद्येह काश्यपगोत्रस्य ~~बकुल~~ वीरविक्र
म प्रेतस्य सपिण्डीकरणनिमित्तकं भातु काश्यपगोत्र वृद्धपि
तामह ~~मुरेन्दु~~ वीरविक्रमवर्मन् आदित्यस्वरूप एष ते पिण्डः
स्वधा ।। तृतीयावनेजनस्थाने वृद्धप्रपितामहाय पिण्डं दद्यात् ।।
ततः पितामहादिपिण्डोपरि कुशमूलेन लेपभागभुज
स्तृप्यन्तु । इति करं प्रोक्ष्य ।। सव्यं कृत्वा आचम्य हरिं
स्मरेत् ।। अपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा मन्त्र
पाठं विना प्रेतं भास्वरमूर्तिं चिन्तयेत् ।। ततः सव्येन पु
ष्पादीन्यादाय पितामहादीनुद्दिश्य - ॐ अत्र पितरो
मादयध्वं यथाभागमावृषायध्वं इति उत्तराभिमुखो
भूत्वा पठेत् ।। श्यामं निषण्ण भास्वरमूर्तिं पितामहादिकं ध्या
यन् ।। आचम्य सव्यं कृत्वा दक्षिणावर्तेन दक्षिणाभिमुखो भूत्वा

ॐ अमीमदन्त पितरो यथाभागमावृषायिषत, इति मन्त्रेण पुष्पादिकं पिण्डेषु निःक्षिपेत् ॥ ततः प्रेतावनेजनपात्रं वामहस्ते कृत्वा कुशादीन्यादाय अद्येह काश्यपगोत्र ~~पेत्रेन्~~ वीरविक्रमप्रेत सपिण्डीकरणश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् इति प्रेताय प्रत्यवनेजनं दद्यात्। ततः पितामहाय प्रत्यवनेजनपात्रं वामहस्ते कृत्वा मोटकमादाय- अद्येह काश्यपगोत्रस्य ~~पेत्रेन्~~ वीरविक्रमप्रेतस्य सपिण्डीकरणश्राद्धपिण्डे काश्यपगोत्र पितामह ~~सिंहसुमन~~ वीरविक्रमवर्मन् वसुस्वरूप इदं प्रत्यवनेजनं ते स्वधा। इति पितामहाय प्रत्यवनेजनं दद्यात्, पुन मोटकमादाय- अद्येह काश्यपगोत्रस्य ~~पेत्रेन्~~ वीरविक्रमप्रेतस्य सपिण्डीकरणश्राद्धपिण्डे काश्यपगोत्र प्रपितामह ~~हुताश~~ वीरविक्रमवर्मन् रुद्रस्वरूप इदं प्रत्यवनेजनं ते स्वधा- इति प्रपितामहाय प्रत्यवनेजनं दद्यात्। पुन मोटकमादाय- अद्येह काश्यपगोत्रस्य ~~पेत्रेन्~~ वीरविक्रमप्रेतस्य सपिण्डीकरणश्राद्धपिण्डे काश्यपगोत्र वृद्धप्रपितामह ~~सुरेन्द्र~~ वीरविक्रमवर्मन् आदित्यस्वरूप इदं प्रत्यवनेजनं ते स्वधा। इति वृद्धप्रपितामहाय प्रत्यवनेजनं दद्यात् ॥ ततो निवीं विस्रंस्य सव्यं कृत्वा आचम्य। अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणे

नादाय मन्त्रपाठं विना प्रेतैतत्ते वासः, इति उभाभ्यां पा
णिभ्यां सूत्रं धारयेत्। पुनः सूत्र मादाय - ॐ नमो वः
पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो
जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोरा
य नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो
वो गृहान्नः पितरो देष्मैतद्वः पितरो वासः॥ इति
मन्त्रं पठित्वा प्रत्येकं पिण्डोपरि सूत्रं धारयेत्॥ ततः
प्रत्येकं क्रमेण गन्धादिभिः सर्वान् पिण्डान् सम्पूज्य
कुशादिकमादाय अद्येह काश्यपगोत्र ~~[illegible]~~ वीर
विक्रम प्रेत सापिण्डीकरणाङ्ग आर्द्रपिण्डे स्थाने सू
त्र गन्ध पुष्पाक्षत धूप दीपेक्षणादि नैवेद्यानि तेमया
दीयन्ते तवोपतिष्ठन्ताम्। इति प्रेताय गन्धादिक मु
त्सृजेत्। ~~सोत्र~~कादिकमादाय - अद्येह काश्यप
गोत्रस्य ~~[illegible]~~ वीरविक्रमप्रेतस्य सापिण्डीकरणा
ङ्ग आर्द्रपिण्डे काश्यपगोत्राः पितामह प्रपितामह वृ
द्धप्रपितामहाः ~~[illegible]~~ वीरविक्रम ~~[illegible]~~ वीरविक्र
म ~~[illegible]~~ वीरविक्रम वर्माणः, वसुरुद्रादित्य स्वरू
पाः अमी सूत्र गन्ध पुष्पाक्षत धूपदीपेक्षणादि नैवेद्या
नि युष्मभ्यं स्वधा. इति पितामहादिभ्यो गन्धादि

कमुत्सृजेत् ॥ तत्तिलपिण्डसमीपे तत्तिलपिण्डशेषान्नं विकिरेत् ॥ ततः सव्येन ॐ शिवा आपः सन्तु इति जलम् । ॐ सौमनस्यमस्तु । इति पुष्पम् । ॐ अक्षतं चारिष्टमस्तु । इति तण्डुलान् विश्वेदेवान्नपात्रसन्निधौ क्षिपेत् ॥ ततोऽपसव्यं कृत्वा - शिवा आपः सन्तु इति जलम् - सौमनस्यमस्तु । इति पुष्पम् । अक्षतं चारिष्टमस्तु इति तण्डुलान् । प्रेतान्नपात्रोपरि क्षिपेत् ॥ कुशादिकमादाय अद्येह काश्यपगोत्रस्य ~~प्रेतस्य~~ वीरविक्रमप्रेतस्य । सपिण्डीकरणश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम् । इति अक्षय्योदकं दत्वा । सव्यं कृत्वा अघोरः प्रेतोऽस्तु इति दक्षिणां दिशं पश्यन् पिण्डोपरि पूर्वाग्रां अन्नधारां दद्यात् ॥ ततोऽपसव्येन सपवित्रान्कुशान् पिण्डोपरि धृत्वा मन्त्रपाठं विना गडुकादिस्थजलादिना इदमूर्जो वो मधुदीयते तेनोपतिष्ठताम् इति सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ॥ दक्षिणादानं विसर्जनञ्चान्ते सहैव भवति ॥

ततः पिण्डे सूत्रादिकमुपनीय - अद्येह काश्यपगोत्रस्य ~~प्रेतस्य~~ वीरविक्रमप्रेतस्य पितुः पितामहादिपितृभिः सह संयोजयिष्ये । इति उक्त्वा सुवर्णरजतकु

शान् कृत्वा तृणेनादाया। ॐ ये समानाः समनसः पितरो य
मराज्ये तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥
ये समानाः समनसो जीवा जीवेषु मामकाः॥ तेषाँ
श्रीर्मयि कल्पतामस्मिँल्लोके शतं समाः। इति मन्त्रा
द्वयं पठित्वा प्रेतपिण्डं त्रिधा विभजेत्। प्रतिविभागं पूर्वो
क्तमन्त्रद्वयं पठेत्॥ ततः प्रथमपिण्डभागमादाय॥ ॐ
ये समानाः समनसः पितरो यमराज्ये। तेषाँल्लोकः स्व
धा नमो यज्ञो देवेषु कल्पताम्॥ ये समानाः समनसो जी
वा जीवा जीवेषु मामकाः॥ तेषां श्रीर्मयि कल्पतामस्मिँ
ल्लोके शतं समाः॥ सं सृजतु त्वा पृथिवी वायुरग्निः प्रजाप
तिः॥ संसृजत्वं च पूर्वेभिस्तिसृभिः पितृभिः सह॥ संग
च्छध्वं संवदध्वं सं वो मनांसि जानताम्॥ देवा भागं यथा पूर्वे सं
जानाना उपासते॥ समानो मन्त्रः समितिः समानी समानं म
नः सहचित्तमेषां समानं मन्त्रमभिमन्त्रये वः समानेन वो ह
विषा जुहोमि॥ समानी व आकूतिः समाना हृदयानि वः॥ स
मानवःस्तुवो मनो यथा वः सुसहासति॥ मधु वाता ऋतायते
मधु क्षरन्ति सिन्धवः॥ माध्वीर्नः सन्त्वोषधीः॥ इति च केचित्
इति मन्त्रान् पठित्वा — अद्येह काश्यपगोत्र पे[illegible]नवीरविक्रम
प्रेत काश्यपगोत्रेण स्वपित्रा [illegible]णवीरविक्रमवर्मणा सम्

स्वरूपेण सह संसृजस्वेति वदन् पितामहपिण्डे संयोज्य दधि म
धुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ एवं द्वितीयपिण्डभागमा
दाय - ये समानाः समनसः पितरो यमराज्ये । तेषां लोकः स्व
धा नमो यज्ञो देवेषु कल्पताम् ॥ ये समानाः समनसो जीवा
जीवेषु मामकाः । तेषां ॐ श्रीर्मयि कल्पतामस्मिंल्लोके शत
ꣳ समाः ॥ संसृजतु त्वा पृथिवी वायुरग्निः प्रजापतिः । संसृजध्वं
च पूर्वेभिस्तिसृभिः पितृभिः सह । संगच्छध्वं संवदध्वं सं वो मनां
सि जानताम् ॥ देवा भागं यथा पूर्वे संजानाना उपासते ॥ समा
नो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषां समान
मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि । समानीव
✓ आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः
सुसहासति ॥ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वी
र्नःसन्त्वोषधिः ॥ इति मन्त्रान् पठित्वा ॥ अद्येह काश्यपगोत्र
[illegible] [illegible]
~~नेपाल~~ वीरविक्रम प्रेत काश्यपगोत्रेण स्वपितामहेन ~~[illegible]~~कवीर
विक्रमवर्मशर्मणा स्वरूपेण सह संसृजस्व इति वदन् प्रपितामहपि
ण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ एवं
तृतीयपिण्डभाग मादाय - ये समानाः समनसः पितरो यमराज्ये ।
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ ये समानाः समन
सो जीवा जीवेषु मामकाः । तेषां ॐ श्रीर्मयि कल्पतामस्मिंल्लोके

ग्नत्रिं स्वमाः ॥ संसृजन्तु त्वा पृथिवी वायुरग्निः प्रजापतिः। संसृजाम्यहं च पूर्वेभि स्त्रिसृभिः पितृभिः सह ॥ संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ॥ देवा भागं यथा पूर्वे संजानाना उपासते । समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषां समानमन्त्र मभिमन्त्रये वः समानेन वो हविषा जुहोमि । समानीव आकूतिः समाना हृदयानि वः समानमस्तु वो मनो यथा वः सुसहासति । मधुवाताऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ इति मन्त्रान् पठित्वा । अद्येह काश्यपगोत्र ~~प्रेमलाल~~ वीरविक्रम [illegible]शेन काश्यपगोत्रेण स्वप्रपितामहेन सुरेन्द्रवीरविक्रम वर्मणा आदित्यस्वरूपेण सह संसृजस्व । इति वदन् स्वप्रपितामहपिण्डे संयोज्य । दधि मधुसर्पिर्भि श्रीकृत्य वर्तुलं कुर्यात् ॥ ततः पिण्डमेलनानन्तरं, स्वजातोऽनुगतः प्रेतः पितृभाग मवाप्नुयात् । शुभं भवतु श्रेष्ठाणां आयतां चिरजीविनः ॥ इति मन्त्रं पठेत् ॥ ततः पितृपूर्वकं पितामहानुद्दिश्य गन्धपुष्पाक्षत धूप दीप नैवेद्यादिभिः पिण्डत्रय मर्चयेत् ॥ ~~श्रोदका~~ दी मादाय - अद्येह काश्यपगोत्रस्य अस्मत्पितुः ~~प्रेमलाल~~वीरविक्रम वर्मणः सपिण्डीकरणाङ्गपिण्डे काश्यपगोत्राः पितामहप्रपितामह वृद्धप्रपितामहाः, ~~रुद्रसुरे~~तापवीरविक्रम दुर्लभ

[illegible]

वीरविक्रम ~~सुरेन्द्र~~वीरविक्रम वर्मणः, वसुरुद्रादित्यस्वरूपास्तानि गन्धपुष्पाक्षतधूपदीपनैवेद्यानि वः स्वधा, इति गन्धादिक मुत्सृजेत्. ॥ ततः पितामहादिब्राह्मणेषु क्रमेण. प्रत्येकं – ॐ शिवा आपः सन्तु इति जलम्. ॐ सौमनस्यमस्तु. इति पुष्पम्. ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान्. दद्यात् ॥ ततः सव्यं कृत्वा. कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वाशिरस्यभिषिञ्चेत् – ॐ अस्मत्कुले दीर्घमायुरस्तु. ॐ शान्तिरस्तु ॐ पुष्टिरस्तु – ॐ वृद्धिरस्तु. ॐ यच्छ्रेयस्तदस्तु. ॐ यत्पापं प्रतिहतमस्तु इति भूमौ. ॐ द्विपदे चतुष्पदेभ्यः शान्तिरस्तु. ॥

ततोऽपसव्यं कृत्वा. मोटकादीन्यादाय – अद्येह काश्यपगोत्रस्य अस्मत्पितुः [illegible] ~~[illegible]~~वीरविक्रमवर्मणः सपिण्डीकरणनिमित्तक श्राद्धे काश्यपगोत्रस्य अस्मत्पितामहस्य [illegible] ~~[illegible]~~वीरविक्रमवर्मणो वसुस्वरूपस्य दत्तैतदन्नपानादिक मक्षय्यमस्तु. इति पितामहाय. अक्षय्योदकं दत्वा. पुनर्मोटकादीन्यादाय – अद्येह काश्यपगोत्रस्य अस्मत्पितुः [illegible] ~~[illegible]~~वीरविक्रमवर्मणः सपिण्डीकरणनिमित्तकश्राद्धे काश्यपगोत्रस्य अस्मत्प्रपितामहस्य [illegible] ~~[illegible]~~वीरविक्रमवर्मणः, रुद्रस्वरूपस्य दत्तैतदन्नपानादिक मक्षय्यमस्तु. इति प्रपितामहाय अक्षय्योदकं दत्वा.

पुनर्मोटकादीन्यादाय – अद्येह काश्यपगोत्रस्य. अस्मत्पितुः

देवेन्द्र
~~श्रीमान्~~ वीरविक्रमवर्मणः सपिण्डीकरणानिमित्तकश्राद्धे काश्य
२०७८
पगोत्रस्य अस्मद्वृद्धप्रपितामहस्य ~~गुणेन्द्र~~ वीरविक्रमवर्मण आ
दित्यस्वरूपस्य दत्तैतदन्नपानादिकं साक्षय्यमस्तु · इति वृद्धप्र
पितामहाय · अक्षय्योदकं दत्वा । सव्यं कृत्वा - कृतांजलिर्द
क्षिणां दिशमवलोकयन् - ॐ अघोराः पितरः सन्तु - इति पि
तामहादिपिण्डत्रयोपरि पूर्वाग्रां जलधारां दद्यात् . ततः सव्येने
व प्राङ्मुख आशिषः प्रार्थयेत् - ॐ गोत्रं नो वर्द्धताम् · ॐ दाता
रो नोऽभिवर्द्धन्ताम् . ॐ वेदाः सन्ततिरेव च · ॐ श्रद्धा च नो माव्यग
मत् . ॐ बहुदेयं च नोऽस्तु · ॐ अन्नं च नो बहु भवेत् . ॐ अति
थींश्च लभेमहि · ॐ याचितारश्च नः सन्तु · ॐ मा याचिष्म चक
श्चन · एताः सत्या आशिषः सन्तु इति ॥ ततः श्राद्धकर्ता
तिलकं कुर्यात् - यं कामं कामयते सोऽस्मै कामः समृध्यता
म् ॥ अपसव्यं कृत्वा - पिण्डोपरि सपवित्रान् कुशान् -
आस्तीर्य - जलादिसहितं पुटकं वा सहस्तेन कृत्वा - ॐ ऊर्ज्जं वहन्ति
रमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधास्थ तर्पयत मे पितॄन् ॥
इति मन्त्रेण सपवित्रकुशोपरि · दक्षिणाग्रां पयोधारां दद्यात् ॥
ततो नम्रीभूय पिण्डान् आघ्राय · उत्थापयेत् - । पिण्डाधारकुशा
न् · उल्मुकं च वह्नौ क्षिपेत् ॥ स्रुवेन पिण्डिकायां शंखं चक्रं च
लिखेत् ॥ · ॐ शंखाय नमः, ॐ चक्राय नमः, ॐ शंखचक्राभ्यां न

मः। इति पंचे गन्धादिभिश्च शंखचक्रपूजां विधाय ॥ अपसव्यं कृत्वा - तूष्णीमेव पिण्डान् निरिक्ष्य कोपरि निधाय पूजयेत्. एभिर्मन्त्रैः, सव्येन - ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः॥ वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः। हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च। मासंसंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ विश्वेदेवार्घपात्रं संचाल्य ॥ अपसव्येन पित्रर्घपात्रं संचाल्य पितामहाद्यर्घपात्राणि उत्तानीकृत्य - दक्षिणां दद्यात् - सव्येन कुशयवजलं दक्षिणाद्रव्याणि आदाय - अद्येह काश्यपगोत्रो अस्मत्पितुः येशल्लवीरविक्रमवर्मणः सपिण्डीकरणनिमित्तकानां काश्यपगोत्राणां पितामहप्रपितामहानां वृद्धप्रपितामहानां तै द्रोणवीरविक्रम दुल्लकवीरविक्रम सुरेन्द्रवीरविक्रम वर्मणां वसुरुद्रादित्यस्वरूपाणां मातृसंबन्धिनां कालकामविश्वेषां देवानां कृतैतत्कर्मप्रतिष्ठार्थं इदं हिरण्यं अग्निदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे - इति विश्वेदेवमातृदक्षिणां दद्यात् ॥ पुनः कुशतिलजलं दक्षिणाद्रव्याणि आदाय - अद्येह काश्यपगोत्रस्य अस्मत्पितुः येशल्लवीरविक्रमवर्मणः कृतैतत् - सपिण्डीकरणकर्मप्रतिष्ठार्थं इदं रजतं चन्द्रदैवतं यथानामगो

गाय यथानामशर्म्मणे ब्राह्मणाय दक्षिणान्दातु मह मुत्सृजेत् - इति पितृ श्राद्ध दक्षिणान्दत्वा पुनः कुशतिल जलं दक्षिणां द्रव्यमादाय - अद्येह काश्यपगोत्रस्य अस्मत्पितुः पेशलवीरविक्रम वर्म्मणः सपिण्डीकरण निमित्तक कृतैतत् काश्यपगोत्राणां पितामहप्रपितामह वृद्धप्रपितामहानां रुद्रप्रतापवीरविक्रम [illegible]वीरविक्रम सुरेन्द्रवीरविक्रम वर्म्मणां वसुरुद्रादित्यस्वरूपाणां श्राद्धप्रतिष्ठार्थं इदं रजतं चन्द्रदैवतकं नानानाम गोत्रेभ्यो नानानामशर्म्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दक्षिणान्दातु मह मुत्सृजेत्। इति पितामहादिदक्षिणां दद्यात्।

ततः सव्येनैव ॐ कालकामविश्वेदेवाः प्रीयन्तां इति विश्वेदेव विसर्ज्जनं कृत्वा॥ अपसव्येन स्वस्तीति पितृ विसर्ज्जनं कृत्वा॥ ॐ वाजे वाजे वत वाजिनो धनेषु विप्रा अमृता ऋतज्ञाः॥ अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ इति पितामहादीन् विसर्ज्जयेत्. ततः सव्येन - ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः, ३ इति त्रिः पठेत्। अपसव्येन दीपाच्छादनं विधाय - सव्येन हस्तौ पादौ प्रक्षाल्य आचमनं कुर्य्यात्॥ ततः प्रमादात्कुर्वतां कर्म्म प्रच्यवेताध्वरेषु च॥

स्मरणादेवतद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ इति पठित्वा ॥
स्वतःफलकामो विष्णुस्मरणम् कुर्यात् । आत्मीयवस्तूनि
ब्राह्मणाय दद्यात् ॥ :- निराजन् जलें प्रतिपादयेत्

दक्षिणा संकल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
अहं मम काश्यपगोत्रस्य
देवेन्द्र
पितुः ~~त्रिभुवन~~वीरविक्रम वर्मणः सपिण्डीकरणनिमित्तका
नां काश्यपगोत्राणां पितामह प्रपितामह वृद्धप्रपितामहानां
पद्म ऐश्वर्य उपेन्द्र
~~पृथ्वी~~वीरविक्रम ~~त्रैलोक्य~~वीरविक्रम ~~सुरेन्द्र~~वीरविक्रमव
र्मणां वसुरुद्रादित्यस्वरूपाणां आद्यपिण्डदानकर्मणः क्रि
यमाणे ब्राह्मण वटुक भोजनकर्मणश्च प्रतिष्ठार्थं
इदं रजतं चन्द्रदैवतं नानानामगोत्रेभ्यो नानानामशर्म
भ्यो ब्राह्मणेभ्यो दातुं अहं समुत्सृजे,

उपनयन तात्रवधि ~~[illegible]~~ संस्कारा। ५९

श्रीगणेशाय नमः ॥ ॥ उपनयनेन सह चूडाकरणे· उपनयनदिना·पूर्वदिने कृतनित्यक्रियः पित्रादिः संस्कार्यवटुना सहितः कर्मस्थानमागत्य आचम्य. प्राणानायम्य. कर्मपात्रं कृत्वा कुशादिकमादाय.

प्रतिज्ञा संकल्पः-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः,
.... अहं मम.

काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवेतित्रिप्रवरस्य मिथुनए- गेन वीरविक्रमकुमारस्य वीजगर्भसमुद्भवैनोनिवर्हणा[illegible] वलायुर्वर्चोऽभिवृद्धिद्वारा परमेश्वरप्रीत्यर्थं चूडाकरणाख्यं कर्म; द्विजत्वसिद्ध्या वेदाध्ययनाधिकारार्थं उपनयनं, ब्रह्मवर्चससंपादनपूर्वकं श्रौतस्मार्तक्रियानुष्ठानाधिकारसिद्धये वेदारम्भं, गृहस्थाद्याश्रमान्तरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनं, तत्र ग्रहानुकूल्यसिद्ध्यर्थं ग्रहयज्ञं च करिष्ये, तदङ्गभूत पुण्याहवाचनं, मातृकापूजनं, आभ्युदयिकश्राद्धं च करिष्ये· ॥

इति संकल्प्य तानि क्रमेण कुर्यात्.

आचारात् तद्दिनपूर्वरात्रे चूडाधिवासनम्. ॥
तत्र गोदानं पुण्याहवाचनं च कृत्वा.
कुशादिकमादाय.
प्रतिज्ञा संकल्पः—
अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
मिथुनराशि क्षत्रराज वीरविक्रमवर्माअहं मम.
[redacted]
करिष्यमाणचूडाकरणकर्माङ्गभूत
केशाधिवासनं करिष्ये. ॥
पीनवस्त्रखण्डत्रये गौरसर्षप दध्यक्षत दूर्वा गोरोचन
कुंकुम हरिद्रा यव चन्दन कुश गोमयं प्रक्षिप्य.
पोटलिका पूजनम्. ।
प्रथम पोटलिकायाम्. ॥
ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो
वेन आवः॥ सबुध्न्या उपमा अस्य विष्ठा सतश्च
योनिमसतश्च विवः॥ ॐ ब्रह्मणे नमः॥
द्वितीयपोटलिकायाम्.
ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूर

ऽसि विष्णोर्ध्रुवोऽसि ॥ वैष्णवमसि विष्णवे त्वा. ॥
ॐ विष्णवे नमः ॥

तृतीय पोटलिकायाम्.

ॐ नमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ॐ शिवाय नमः ॥

तत एकां पोटलिकां गृहीत्वा वटुशिरसो दक्षिणभागस्थितेषु बध्नीयात्. ॥
पश्चिमभागस्थितेषु केशेषु द्वितीयां बध्नीयात्. ॥
उत्तर भागस्थितेषु केशेषु तृतीयां बध्नीयात्. ॥
ततः पीतोष्णीषेण शिरोवेष्टनं कुर्यात्. ॥

दक्षिणासंकल्पः—

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः मिथुनराशि छत्र राज वीरविक्रमवर्मा अहं मम केशाधिवासनकर्मणः प्रतिष्ठार्थं भूयसीं दक्षिणां रजतं चन्द्रदैवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे.

इति केशाधिवासनविधिः ॥

कर्णवेधार्थं गोपूजनम् । देवादीनां [redacted] पूजनंच ।

अथ अपरदिने स्नातः कृतनित्यक्रियः पिता चन्दनाक्षत-पुष्प-पूगीफल-वस्त्रद्रव्याण्यादाय कुशादीन् गृहीत्वा

वरण संकल्पः-

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवेतित्रिप्रवरस्य मिथुनराशि छत्रराज वीरविक्रमनाम्नः कुमारस्य चूडाकरणोपनयन वेदारम्भ समावर्तनेषु ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये; तत्कर्मकर्तुं अमुकगोत्रौ .... शर्माणौ ब्राह्मणौ आचार्यब्रह्मत्वेनाहं वृणे ॥

इति आचार्यब्रह्माणौ वृत्वा तद्द्वारा ग्रहयज्ञं समापयेत् ॥

तत पक्वान्नादिना त्रीन् ब्राह्मणान् भोजयेत् ॥

भोजनसङ्कल्पः

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः मिथुनराशि छत्रराज वीरविक्रमवर्मा अहं मम.

चूडाक-

रणार्थं त्रीन्ब्राह्मणान् भोजयिष्ये. । [illegible]

इति संकल्प्य नान्दीश्राद्धभोक्तृव्यतिरिक्तान् त्रीन् ब्रह्मणान् भोजयेत्. ॥

वहिः शालायां वालुकामृत्तिकादिना हस्तमात्रं चतुरस्रं चतुरङ्गुलोन्नतं प्रागुदक्प्रवणं स्थण्डिलं रचयेत्. ततोऽङ्गुष्ठकनिष्ठाभ्यां गृहीतैस्त्रिभिर्दर्भैः स्थण्डिलोपरितः पांसून्-पूर्वतस्त्रिः अपसार्य दर्भान् ऐशान्यां क्षिपेत्. ॥

गोमयोदकेनोपलिप्य.

स्रुवेण स्फ्येन कुशमूलेन वा प्रादेशदीर्घाः स्थण्डिलप्रमाणा वा प्रागग्रा उदक्संस्थाः तिस्रो रेखाः उल्लिख्य.

अनामिकाङ्गुष्ठाभ्यां प्रतिरेखं यथोल्लेखं पांसून् उद्धृत्य ऐशान्यां क्षिपेत्. ॥

न्युब्जपाणिना उदकेन स्थण्डिलमभिषिच्य.

कांस्यपात्रनिहितं तेनैव पिहितं अग्निं स्थण्डिलादाग्नेयभागे निधाय क्रव्यादांशं निर्ऋतिदिशि क्षिपेत् ॥

स्थण्डिले स्वाभिमुखमग्निं स्थापयेत् ॥

अर्घ्यानयनपात्रे साक्षतमुदकं क्षिपेत्. ॥

ततोऽग्नेः पश्चिमतो भर्तुरुत्तरतः स्नापितं कुमारमहते वाससी परिधाप्य. अङ्के निधाय माता उपविशति. ॥

ततो यजमानोऽग्नेर्दक्षिणादिशि यज्ञीयदारुनिर्मितपीठासने प्रागग्रान् षड्दर्भान् आस्तीर्य स्वयमुदङ्मुख आसीनः कर्मतत्त्वज्ञं अग्नेरुत्तरस्थितं प्राङ्मुखमासीनं.

अभावे पञ्चाशत्कुशनिर्मितं ब्रह्माणं चन्दनादिभिः संपूज्य. कुशादिकमादाय.

संकल्पः—

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मिजनरा शिक्षत्राज वीरविक्रमवर्मा अहं मम

[redacted]

चूडाकरणं करिष्ये तदङ्गहोमकर्मणि …… गोत्र ………… शर्मन् त्वं मे ब्रह्मा भव ॥

भवानि इति प्रतिवचनम् ॥

प्रदक्षिणाक्रमेणागत्य आसने उपविशेत् ॥

ततो यजमानो वितस्तिमात्रीं भुवं विहाय. अग्नेर्वायव्ये उत्तरे च प्रागग्रैः कुशैरासनद्वयं कल्पयित्वा प्रणीतापात्रं दक्षहस्तेन वामहस्ते पूर्वाग्रं निधाय

दक्षहस्तोद्धृतपात्रस्थोदकेन आत्माभिमुखं पूरयित्वा. वायव्यासने निधाय दक्षहस्ताऽनामिकया आलभ्य उत्तरासने निदध्यात्. ॥

ततो बर्हिषो मुष्टिमादाय.

प्रथमभागेन आग्नेयादीशानान्तमुत्तराग्रम्. ॥

द्वितीयभागेन ब्रह्मणोऽग्निपर्यन्तं पूर्वाग्रम्. ॥

तृतीयभागेन नैर्ऋत्या वायव्यान्तमुत्तराग्रम् ॥

चतुर्थभागेन अग्नितः प्रणीतापर्यन्तं पूर्वाग्रं परिस्तरणं कुर्यात्. ॥

अथ पात्रासादनम् ॥

अग्नेरुत्तरतो द्व्यङ्गुलविप्रकर्षेण प्राक्संस्थं उदक्संस्थं वा आसादयेत् ॥

तद्यथा—

पवित्रच्छेदनार्थं दृढं कुशपत्रत्रयम् ॥
पवित्रे साग्रेऽनन्तर्गर्भे द्वे ॥
प्रोक्षणीपात्रम् ॥
आज्यस्थाली ॥
संमार्जनकुशाः त्रयः साग्रा ॥
उपयमनकुशा स्त्रयोदश ॥
प्रादेशमात्राः पालाश्यः समिध स्तिस्र ॥
स्रुवः
गव्यं आज्यम् ॥
पूर्णपात्रम् ॥
शीतोदकम् ॥
उष्णोदकम् ॥
नवनीत पिण्डम् ॥
घृत पिण्डम् ॥
दधिपिण्डम् ॥
त्रिस्थान श्वेत शल्लकीकण्टकम् ॥
प्रादेशमितानि साग्राणि त्रीणि कुशपत्राणि पृथक् बद्धानि ॥

नवस्ताम्रपरिष्कृत आयसः क्षुरः ॥
वृषगोमयपिण्डम् ॥
आचारात् सुवर्णपात्रभगिन्यौ ॥
नापितः ॥

तत आसादिते कुशपत्रे गृहीत्वा अग्रतः प्रादेशमात्रं संमाय.
तयोरुपरि आसादितकुशत्रयं तिर्यक् निधाय॥
पवित्रमूलेन पवित्रे प्रदक्षिणमावेष्ट्य.
त्रयाणां मूलाग्राणि; द्वयोर्मूलानि च दक्षहस्तेन.
पवित्रे वामहस्तेन परिगृह्य.
छित्वा.
द्वयो मूलं त्रीणि च उत्तरतः क्षिपेत्.
प्रोक्षणीपात्रं प्रणीताया उत्तरतो निधाय.
प्रणीतोदकं सपवित्रहस्तेन त्रिर्निक्षिप्य.
उदगग्रपवित्रे व्यस्तहस्ताङ्गुष्ठाऽनामिकाभ्यामादाय.
ताभ्यां प्रादेशमात्रं तज्जलमूर्ध्वमुत्क्षिप्य.

पवित्रे प्रोक्षण्यां निधाय·
प्रोक्षणीं दक्षहस्तेन वामहस्ते निधाय·
तदुदकं दक्षहस्तानामिकाङ्गुष्ठाभ्यां त्रिः ऊर्ध्वं क्षिप्त्वा·
प्रणीतोदकेन अभिषिच्य·
आसादितानि न्युब्जानि उत्तानानि कृत्वा·
प्रोक्षण्युदकेन आज्यस्थाल्यादीनि एकैकशः त्रिः प्रोक्ष्य·
असञ्चरे प्रणीताऽग्न्यो र्मध्ये निदध्यात्·॥
तत आज्यस्थालीं अग्नेः पश्चान्निधाय·
तत्र आसादितं आज्यं आत्माभिमुखं प्रक्षिप्य·
ततो ब्रह्मा-
आज्यस्थालीं उत्तरतः अग्नौ आरोप्य·
ज्वलदुल्मुकं आज्यस्योपरि समन्तादीशानीमारभ्य प्रदक्षिणं भ्रामयित्वाऽग्नौ प्रक्षिप्य,
उदकं स्पृष्ट्वा इतरथा हस्तमावर्तयेत्·॥
ततो यजमानो दक्षहस्तेन स्रुवमादाय·
पूर्वाग्रमधोबिलमग्नौ तापयित्वा·

वामे पार्श्वे उत्तानबिलं निधाय.
दक्षिणहस्तधृतमध्यानां सम्मार्जनकुशानां अग्रे मूलतो
ऽग्रपर्यन्तं.
मूलेऽग्रतो मूलपर्यन्तं संमृज्य
सम्मार्जनकुशानुत्तरतो निरस्य.
प्रणीतोदकेन न्युब्जपाणिनाऽभ्युक्ष्य.
पूर्ववत्पुनः प्रतप्य
उदकं स्पृष्ट्वा. दक्षिणतः स्वसमीपे निदध्यात्.
तत आज्यमुत्थाप्य अग्नेरुत्तरतः प्रोक्षणीपात्रस्य
पश्चाद्भागे स्थापयित्वा. अग्नेः पश्चादानीय पवित्राभ्यां
किञ्चिदाज्यं प्रादेशमात्रमूर्ध्वं क्षिपेत्. ॥
आज्यमवलोक्य सत्यपद्रव्ये तन्निरस्य.
प्रोक्षणीश्च पूर्ववदुत्पूय
ततः पवित्राभ्यां आज्यं उत्पूय पवित्रे प्रोक्षण्यां
निदध्यात्. ॥

ततो मङ्गलनामानमग्निं पूजयेत्. ॥
उपयमनकुशान् दक्षिणपाणिना वामपाणौ निधाय.
पूर्वासादिताः तिस्रः समिध आदाय.
अग्नौ प्रागग्राः प्रक्षिप्य.
दक्षिणचुलुकगृहीतेन सपवित्रेणाऽशेषप्रोक्षणायुदकेन
ईशानादि उदक्पर्यन्तं अग्निं परिषिच्य.
हस्तमितरथावर्त्य.
पवित्रे प्रणीतासु निदध्यात्. ॥
ततो यजमानः संस्रवधारणाय पात्रं अग्निप्रणीतापात्रयो र्मध्ये निधाय.
ब्रह्मणा कुशेन दक्षबाहावन्वारब्धः
पातितदक्षिणजानुः सोपयमनकुशं वामहस्तं हृदये निधाय.
उत्तानेन हस्तेन शङ्खमुद्रया मध्यमूलयो र्मध्ये धृतेन स्रुवेण आज्येन जुहुयात्. ॥
ॐ प्रजापतय इति प्रजापति ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आघाराज्यहोमे विनियोगः ॥
ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ इति मनसा.

अग्नेरुत्तरभागे प्राञ्चमृजुं दीर्घं सन्ततधारं पूर्वाघारमृ· त्यागान्ते किञ्चिदुद्धृतमवशेष्य;अवशिष्टं संस्रवपात्रे प्रक्षिपेत्·

सर्वत्रत्यागान्ते द्रव्यप्रक्षेपः ॥

ॐ इन्द्रायेति प्रजापति ऋषिः त्रिष्टुप्छन्दोऽग्निर्देवता आघाराज्य होमे विनियोगः ॥

ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम·॥इत्याघारौ॥

समिद्धतमेऽग्नौ·

ॐ अग्नय इति प्रजापति ऋषिःत्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे बिनियोगः ॥

ॐ अग्नये स्वाहा इदमग्नये न मम·॥

ॐ सोमायेति प्रजापति ऋषिः त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः ॥

ॐ सोमाय स्वाहा इदं सोमाय नमम· ॥

एतावाज्यभागौ·॥

ॐ भूर्भुवः स्वरित्यादीनां प्रजापति ऋषि गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता आज्यहोमे विनियोगः ॥

ॐ भूः स्वाहा इदमग्नये न मम॰ ॥
ॐ भुवः स्वाहा इदं वायवे न मम॰ ॥
ॐ स्वः स्वाहा इदं सूर्याय न मम ॥
एता महाव्याहृतयः ॥
ॐ त्वन्नो अग्न इति वामदेव ऋषिः त्रिष्टुप्छन्दोऽ
ग्नीवरुणौ देवते आज्यहोमे विनियोगः ॥
ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवया
सिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वे
षाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा इदं अग्निवरुणाभ्यां
न मम॰ ॥
ॐ सत्वन्नो अग्न इति वामदेव ऋषिः त्रिष्टुप्छन्दोऽ
ग्नीवरुणौ देवते आज्यहोमे विनियोगः ॥
ॐ सत्वन्नो अग्ने वमो भवोतीनेदिष्ठो अस्या उषसो
व्युष्टौ ॥ अवयक्ष्वनो वरुणꣳ रराणो वीहि मृडीकꣳ
सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम॰ ॥
ॐ अयाश्चाग्न इति वामदेव ऋषिः त्रिष्टुप्छन्दोऽग्नि
र्देवता आज्यहोमे विनियोगः ॥
ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽ

असि ॥ अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये न मम ॥

ॐ येते शतमिति वामदेव ऋषिः त्रिष्टुप्छन्दो वरुण सवितृविष्णुविश्वेदेवमरुत्स्वर्का देवता आज्यहोमे विनियोगः ॥

ॐ येते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम.

ॐ उदुत्तममिति शुनःशेफ ऋषिः त्रिष्टुप्छन्दो वरुणो देवता आज्यहोमे विनियोगः ॥

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय ॥ अथा वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणाय न मम. ॥

इति सर्वप्रायश्चित्तम्. ॥

ॐ प्रजापतय इति प्रजापति ऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥

ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ इति मनसा स्मृत्वा. ॥ इति प्राजापत्यम् ॥

ॐ अग्नये स्विष्टकृत इति प्रजापति ऋषिः गायत्री छन्दोग्निर्देवता स्विष्टकृद्धोमे विनियोगः ॥

ॐ अग्नये स्विष्टकृते स्वाहा· इदं अग्नये स्विष्टकृते न मम ·॥

इति स्विष्टकृतं जुहुयात् ·

ततः संस्रवं प्राश्य आचम्य पवित्राभ्यां मुखं मार्जयित्वा पवित्रे अग्नौ प्रक्षिपेत्· ॥

पूर्णपात्रदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः, मिथुनराशिः, छत्रराजवीरविक्रमवर्मा, अहं मम [redacted] । [redacted] य चूडाकरणाङ्गहोमकर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्मप्रतिष्ठार्थमिदं तण्डुलपूर्णपात्रं प्रजापतिदेवताकं ······ गोत्राय ········· शर्मणे ब्रह्मणे संप्रददे·॥

ब्रह्मा च प्रतिगृह्य ॐ स्वस्ति· इति ब्रूयात्·॥

ततो यजमानः ॐ सुमित्रिया दुर्मित्रिया इति मन्त्र

द्वयस्य प्रजापति ऋषिर्यजुरापो देवता प्रणीता विमोके विनियोगः ॥

ॐ सुमित्रिया न ऽआपऽ ओषधयः सन्तु ॥

इति मन्त्रेण प्रणीता जलेन शिरोऽभिषिञ्च्य ॥

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः ॥

इति मन्त्रेण प्रणीतापात्रं सावशिष्टजलं ऐशान्यां न्युब्जी कुर्यात्

ततः आस्तृतं बर्हि रास्तरणक्रमेण उत्थाप्य.

ॐ देवागातु इत्यस्य मनस्पति ऋषि र्विराट् छन्दो वातो देवता बर्हिर्होमे विनियोगः ॥

ॐ देवागातु विदो गातुं वित्वा गातु मित ॥

मनसस्पत इमन्देव यज्ञꣳ स्वाहा वातेधाः ॥ इदं प्रजापतये न मम ॥

इति हस्तेन जुहुयात् ॥

अथ लग्नाधिष्ट शान्ति गोदानम् (विनायकशान्त्यर्थं गोदानम्.)

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मिथुनराशिः छत्र राज वीरविक्रमवर्मा अहं मम.

चूडाकरणलग्नादशुभस्थानस्थितानां ग्रहाणां शुभैकादशस्थानावस्थितिजन्यशुभफलावाप्तये इमां गां रुद्रदेवताकां तत्प्रत्याम्नायीभूतं रजतं चन्द्रदेवताकं ....गोत्राय ....शर्मणे दैवज्ञाय ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

ततः शीतजले उष्णजलम्.

ॐ उष्णेन वाय इति मन्त्रस्य परमेष्ठि ऋषिः प्रतिष्ठा छन्दोऽदितिर्देवता उदकासेके विनियोगः ॥

ॐ उष्णेन वाय उदकेनेह्यदिते केशान् वप ॥

इति मन्त्रेण आसिञ्चेत्.

ततो मिश्रितासु अप्सु नवनीत-दधि-घृतान्यतमं पिण्डं तूष्णीं प्रक्षिपेत् ॥

अनेनैवोदकेन उन्दनम् ॥

मिश्रितादुदकात् किञ्चिदुदकं चुलुकेनादाय तेनोदकेन दक्षिणकर्णसमीपवर्तिनं सकेशं शिरःप्रदेशम्

ॐ सवित्रेति मन्त्रस्य प्रजापति ऋषिः गायत्री छन्दः आपो देवता क्लेदने विनियोगः ॥

ॐ सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय बलाय वर्चसे ॥

इति मन्त्रान्ते आर्द्रं कुर्यात् ॥

ततः त्रिश्वेतशल्लकीकण्टकेन पूर्वरात्राधिवासित केशेषु तूष्णीं किञ्चित् पृथक् कुर्यात्

पृथक् कृतेषु पूर्वोपकल्पितकुशपत्रेभ्यः त्रीणि कुशपत्राण्यादाय केशमूलाभिमुखाग्राणि कृत्वा

ॐ ओषधे इति मन्त्रस्य प्रजापति ऋषिः यजुस्तरूणस्वधितिर्देवता कुशान्तर्धाने विनियोगः ॥

ॐ ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥

इति मन्त्रेण अन्तर्दध्यात् ॥

केशान्तर्हितानि कुशपत्राणि वामहस्तेन धृत्वा. दक्षिणहस्तेन क्षुरग्रहणम्.

ॐ शिवोनामेति प्रजापति ऋषिः यजुः क्षुरो देवता क्षुरग्रहणे विनियोगः ॥

ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीः ॥ इति मन्त्रेण क्षुरमादाय. ।

ॐ निवर्तयामीति प्रजापति ऋषिः यजुः क्षुरो देवता क्षुरकेशसंयोगे विनियोगः ॥

ॐ निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥

इति मन्त्रेण सकेशकुशपत्रेषु संयोजयेत् ॥

ततः सकेशकुशपत्रच्छेदनम्.

ॐ येनावपदिति मन्त्रस्य आलम्बायन ऋषिः पङ्क्तिश्छन्दः सविता देवता सकेशकुशपत्रच्छेदने विनियोगः

ॐ येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्मणो वपतेदमस्यायुष्यं जरदष्टिर्यथा सत् ॥

इति मन्त्रेण छित्वा अग्नेरुत्तरतो भगिन्या धृयमाणे सुवर्ण पात्रस्थापित वृषगोमयपिण्डे प्रक्षिपेत् ॥१॥

पुनः दक्षिणस्थकेशं तूष्णीमार्द्रं कृत्वा.
शल्लकिकण्टकेन केशान्पृथक् कृत्वा.
तन्मध्ये त्रीणि कुशपत्राणि पूर्ववदन्तर्धाय.
सकेशकुशपत्रेषु तूष्णीं क्षुरं संयोज्य.
सकेशानिकुशपत्राणि छित्वा गोमयपिण्डे क्षिपेत्.
॥२॥
पुनः तूष्णीं दक्षिणभागस्थकेशमार्द्रं कृत्वा.
शल्लकिकण्टकेन केशान् पृथक् कृत्वा.
तन्मध्ये त्रीणि कुशपत्राणि पूर्वबदन्तर्धाय.
सकेशकुशपत्रेषु तूष्णीं क्षुरं संयोज्य.
सकेशकुशपत्रच्छेदनंच कृत्वा गोमयपिण्डे
प्रक्षिपेत् ॥३॥
ततः पश्चिमभागस्थकेशेषु.
ॐ सवित्रेति मन्त्रस्य प्रजापति ऋषिः गायत्री छन्द
आपोदेवता क्लेदने विनियोगः ॥
ॐ सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनून्दीर्घा
युत्वाय वलाय वर्चसे ॥ इति मन्त्रान्ते आर्द्रं कुर्यात्.
ततः त्रिश्वेतशल्लकिकण्टकेन तूष्णीं केशपृथक्कर
णम्.

पूर्वोपकल्पितानि त्रीणि कुशपत्राण्यादाय ·
केशमूलाभिमुखाग्राणि कृत्वा ·
ॐ ओषधे इति मन्त्रस्य प्रजापति ऋषिः यजुस्तृ
णस्वधितिर्देवता कुशान्तर्धाने विनियोगः ॥
ॐ ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥
इति मन्त्रेण अन्तर्दध्यात् · ॥
केशान्तर्हितानि कुशपत्राणि वामहस्तेन धृत्वा ·
दक्षहस्तेन क्षुरग्रहणम् ·
ॐ शिवो नामेति प्रजापति ऋषिः यजुः क्षुरो देवता
क्षुरग्रहणे विनियोगः ॥
ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु
मा माहिꣳसीः ॥
इति मन्त्रेण क्षुरमादाय ·
ॐ निवर्तयामीति प्रजापति ऋषिः यजु क्षुरो देव-
ता क्षुरकेशसंयोगे विनियोगः ॥
ॐ निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पो
षाय सुप्रजास्त्वाय सुवीर्याय · ॥
इति मन्त्रेण सकेश कुशपत्रेषु क्षुरं संयोजयेत् · ॥

ॐ त्र्यायुषमिति मन्त्रस्य नारायण ऋषिरुष्णिक् छन्द आशीर्देवता सकेशकुशपत्रच्छेदने विनियोगः ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥

इति मन्त्रेण सकेशकुशपत्राणि छित्वा · प्रथमवार स्थापिते वृषगोमयपिण्डे प्रक्षिपेत् ॥१॥

पुनः पश्चिमभागस्थकेशं तूष्णीमार्द्रं कृत्वा · शल्लकीकण्टकेन तूष्णीं केशान् पृथक् कृत्वा · त्रीणि कुशपत्राणि तूष्णीमन्तर्धाय · सकेशकुशपत्रेषु तूष्णीं क्षुरं संयोज्य · सकेशानि कुशपत्राणि तूष्णीं छित्वा · वृषगोमयपिण्डे प्रक्षिपेत् · ॥२॥

पुनः पश्चिमभागस्थकेशं · तूष्णीमार्द्रं कृत्वा · शल्लकीकण्टकेन तूष्णीं केशान् पृथक् कृत्वा · त्रीणि कुशपत्राणि तूष्णीमन्तर्धाय क्षुरग्रहणपूर्वकं सकेशकुशपत्रे तूष्णीं क्षुरं संयोज्य · सकेशकुशपत्रच्छेदनं · कृत्वा वृषगोमयपिण्डे प्रक्षिपेत् ॥३॥

तत उत्तरभागस्थकेशेषु

ॐ सवित्रेति मन्त्रस्य प्रजापति ऋषिः गायत्री छन्द आपो देवता क्लेदने विनियोगः ॥

ॐ सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय बलाय वर्चसे ॥ इति मन्त्रेण आर्द्रं कुर्यात्·

ततः त्रिश्वेतशल्लकिकण्टकेन तूष्णीं केश पृथक्करणम्·

पूर्वोपकल्पितानि त्रीणि कुशपत्राण्यादाय·

केशमूलाभिमुखाग्राणि कृत्वा·

ॐ ओषधे इति मन्त्रस्य प्रजापति ऋषिः यजुस्तरुणा स्वधिति देवता कुशान्तर्धाने विनियोगः ॥

ॐ ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥

इति मन्त्रेण अन्तर्दध्यात्·

केशान्तर्हितानि कुशपत्राणि वामहस्तेन धृत्वा·

दक्षहस्तेन क्षुरग्रहणम्·

ॐ शिवो नामेति प्रजापति ऋषिः यजुः क्षुरो देवता क्षुरग्रहणे विनियोगः ॥

ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा माहिꣳसीः ॥ इति मन्त्रेण क्षुरमादाय·

ॐ निवर्तयामी प्रजापति ऋषिः यजुः क्षुरो देवता
क्षुरकेशसंयोगे विनियोगः ॥
ॐ निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पो
षाय सुप्रजास्त्वाय सुवीर्याय ॥
इति मन्त्रेण सकेशकुशपत्रेषु क्षुरं संयोजयेत्·
ॐ येन भूरिश्चरेति मन्त्रस्य वामदेव ऋषिः यजुः क्षु
रो देवता सकेशकुशपत्रच्छेदने विनियोगः ॥
ॐ येन भूरिश्चरादिवं ज्योक् च पश्चाद्धि सूर्यम् ॥
तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लो
क्याय स्वस्तये ॥
इति मन्त्रेण सकेशानि कुशपत्राणि छित्वा पू-
र्वोपकल्पिते वृषगोमय पिण्डे प्रक्षिपेत् ॥१॥
पुनः उत्तरभागस्थकेशं तुष्णीं आर्द्रं कृत्वा·
शल्लकिकण्टकेन तुष्णीं केशान्पृथक् कुर्यात्·
त्रीणि कुशपत्राणि पूर्ववदन्तर्धाय·
क्षुरं गृहीत्वा· सकेशकुशपत्रेषु क्षुरं संयोज्य·
सकेशकुशपत्राणि छित्वा· गोमयपिण्डे क्षिपेत्
॥२॥

पुनः उत्तरभागस्थकेशं तूष्णीमार्द्रं कृत्वा·
शल्लकिकण्टकेन केशान् तूष्णीं पृथक् कुर्यात्·
त्रीणि कुशपत्राणि पूर्ववदन्तर्धाय·
क्षुरं गृहीत्वा सकेशकुशपत्रेषु क्षुरं संयोज्य·
तूष्णीं छित्वा वृषगोमयपिण्डे प्रक्षिपेत् ॥३॥

ततः समन्ताद्दक्षिणकर्णादारभ्य दक्षिणकर्ण
पर्यन्तं क्षुरभ्रामणम्·
ॐ यत्क्षुरेणेति मन्त्रस्य वामदेवऋषिः यजुः क्षु-
रो देवता क्षुरभ्रामणे विनियोगः ॥
ॐ यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वा वपति
केशान् छिन्धि शिरो मास्यायुः प्रमोषीः ॥
इति सकृद्भ्रामयित्वा·
द्विः तूष्णीं भ्रामयेत् ।
ततो भिन्निनाभिरद्भिः शिर आर्द्रं कृत्वा·
नापिताय क्षुरदानम्·
ॐ अक्षरावन्निति मन्त्रस्य वामदेवऋषिः यजुः क्षु
रो देवता क्षुरदाने विनियोगः ॥
ॐ अक्षरावन् परिवप॥ इति मन्त्रेण दद्यात् ॥

= वाजसनेयानाकां इति लौगाक्षिवचनात्

ततो नापितः प्राङ्मुखस्य उदङ्मुखस्य वा कुमारस्य एकां शिखां स्थापयित्वा उदक्संस्थं केशवपनं कुर्यात् ॥

आचारान्माता पूर्वस्थापितवृषगोमयपिण्डं दधिभक्तसमन्वितं कृत्वा.

नापितेनोप्तान्केशान्पीनवस्त्रेणाच्छाद्य गोमयपिण्डे निदध्यात्.

सरित्तीरे गोष्ठे वा निदध्यात्.

आचार्याय गोदानम्.

ॐ नमो गोभ्यः श्रीमतीभ्य सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः, त्रिभुवनसिंहः;छत्रज वीरविक्रमवर्मा; अहं मम चूडाकरणकर्मणः प्रतिष्ठार्थं इमां गां रुद्रदैवताकां …… गोत्राय …… शर्मणे आचार्याय तुभ्यमहं संप्रददे ।

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्य कृतैतत् गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ······ गोत्राय ······· शर्मणे ब्राह्मणाय तुभ्यं संप्रददे । ।

तत आचार्य उत्थाय फलपुष्पसमन्वितस्रुवस्थघृतेन पूर्णाहुतिं कुर्यात् ।

ॐ मूर्द्धानमित्यस्य भरद्वाज ऋषिः त्रिष्टुप्छन्दोग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥

ॐ मूर्द्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कवि ꣳ संम्राजमतिथिञ्जनानामासन्नापात्रं जनयन्त देवाः स्वाहा ॥

भूयसीदक्षिणासङ्कल्पः–

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः मिथुनाग्निछत्रराज वीरविक्रमवर्मा अहं मम कृतस्य चूडाकरणकर्मणः साङ्गुण्यार्थं इमां भूयसी दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दक्षिणात्वेन दातुं समुत्सृजे ॥

ततो वेदीशानभागात् भस्म गृहीत्वा·
तिलककरणम्·
ॐ त्र्यायुषमन्त्रस्य नारायणऋषिरुष्णिक्छन्दः आशीर्देवता भस्मना तिलककरणे विनियोगः ॥
ॐ त्र्यायुषञ्जमदग्नेः इति ललाटे ॥
ॐ कश्यपस्य त्र्यायुषम्· इति ग्रीवायाम् ॥
ॐ यद्देवेषु त्र्यायुषम्· इति दक्षबाहुमूले ॥
ॐ तन्नोऽअस्तु त्र्यायुषम्· इति हृदि· ॥

ततो ब्राह्मणान् दक्षिणा भोजनादिभिः सन्तोष्य सुहृद्युतः स्वयमपि भुञ्जीत· ॥ ॥

॥इति पारस्करगृह्यानुसारिचूडाकरणविधिः॥

कर्णवेधः

प्रतिज्ञा संकल्पः–

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्याराशिः पूर्णचन्द्रवीरविक्रम वर्मा अहं मम. बीजगर्भसमुद्भवैनो निवर्हणपूर्वक पुष्ट्यायुःश्रीवृद्धि द्वारा श्रीपरमेश्वरप्रीतये कर्णवेधाख्यं कर्म करिष्ये .

ततो दीपकलश गणेशदेवानां पुष्पाञ्जलिः ।

सर्वारिष्टगोदानम्.

गोप्रत्याम्नायरजतद्रव्याय नमः ।

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मिथुन[illegible]राशिः धनराज वीरविक्रमवर्मा अहं मम कर्णवेधलग्नात् यत्र कुत्र स्थान स्थित दुष्टग्रहैः सूचित सकलारिष्टशान्तिपूर्वक शुभस्थानस्थितानां ग्रहाणां शुभाधिक्यफलप्राप्तये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे. ॥

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् गोनिष्क्रयीभूत रजत दान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ....
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ।

ततः शुभे लग्ने मङ्गलपाठ वाद्यघोष पुरस्सरं मौक्तिकः सुवर्णसूच्या अष्टाङ्गुल्या द्विगुणसूत्र संलग्नया पुरुषस्य पूर्वं दक्षिणकर्णं अभिमन्त्र्य वेधयेत् ॥

तत्र मन्त्रः-

भद्रं कर्णेभिरिति प्रजापति ऋषिः त्रिष्टुप्छन्दो लिङ्गोक्ता देवता दक्षिणकर्णाभिमन्त्रणे विनियोगः ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

ततो वामकर्णाभिमन्त्रणम्·

वक्ष्यन्ती वेदेति प्रजापति ऋषिः त्रिष्टुप्छन्दो लिङ्गोक्ता देवता वामकर्णाभिमन्त्रणे विनियोगः ॥ ॐ वक्ष्यन्ती वेदा गनी गन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना । योषेव शिङ्क्ते विनताधि धन्वंन्या इयꣳ समने पारयन्ती ॥

ततः कर्णौ अलक्तकरसेन अङ्कयित्वा विध्येत्·

तदेव लग्नं सुदिनं तदेव
ताराबलं चन्द्रबलं तदेव ॥
विद्याबलं दैवबलं तदेव
लक्ष्मीपते तेङ्घ्रियुगं स्मरामि· ॥

ॐ शुभमुहूर्तमस्तु· ॥

दक्षिणा संकल्पः–

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मिथुन राशिः छत्रराज ीरविक्रमनर्मा अहं मम· वीजगर्भसमुद्भवैनो निवर्हण पूर्वक पुष्ट्यायुः श्रीवृद्धि

द्वारा श्रीपरमेश्वरप्रीतये कर्णवेधकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतं चन्द्रदेवताकं …… गोत्राय …………शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

इति संक्षिप्तकर्णवेधः ।

दीपप्रार्थना-

नमो स्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुवाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनारायणाय नमः ।

गणेश प्रार्थना-

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

कलश प्रार्थना-

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥

कलशस्थवरुणाय नमः ।

रथारोहणम् · हस्त्यारोहणम्

इत्युक्ते नेन रथं यानि प्रभाति अक्षौन्यकावभिनोरथं योध्वानी-
ना ताग्रमनु सञ्चरन्तो दूरेहेति रिन्दुपावा न्यत त्रिस्ते नोनव
पश्चपः पारयन्तु ।

हस्त्यारोहणम्

इन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा संपारय·

एतेनैवाश्वारोहणं व्याख्यानम्

प्रायश्चित्त गोदानम्·

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोभ्यो नमः । गोनिष्क्रय रजत द्रव्याय नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मण हिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीर विक्रम वर्मा अहं मम काश्यपगोत्रस्य अस्मत्पितुः पेशलवीर विक्रम वर्मणो वसुस्वरूपस्य अद्य कर्तव्य वार्षिक श्राद्ध श्राद्धदिवस पूर्वदिन कर्तव्य नियमानाचरणजन्य सकल प्रत्यवाय परिहार पूर्वकं सद्यो देहशुद्धि द्वारा श्राद्धकर्माधिकार सिद्धये इमां गां रुद्रदेवताकां तत्प्रत्याम्नायीभूतं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे·

प्रार्थना·

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा·

अद्य कृतैतत् प्रायश्चित्त प्रत्याम्नायीभूत गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं

सम्प्रददे· तत्सन्नमम:।

ॐ शान्तिरस्तु· ॐ पुष्टिरस्तु· ॐ वृद्धिरस्तु· ॐ यच्छ्रेयस्तदस्तु·
यत्पापं रोगःशोको दुःखं दारिद्र्यं तन्मे प्रतिहतमस्तु·
ॐ अमृताभिशेकोस्तु·

वार्षिक श्राद्ध

कर्ता प्राङ्गणे दीपं प्रज्वाल्य· आचम्य· अपसव्यं कृत्वा· ताम्बूलादिकं विप्रकरे दत्वा· दक्षिणाभिमुखः पितृ ब्राह्मण वामजानुं स्पृष्ट्वा निमन्त्रयेत्·

ॐ अद्येह काश्यपगोत्रस्य अस्मात्पितुः पेशलवीरविक्रम वर्मणः वसुस्वरूपस्य अद्य कर्तव्य वार्षिक श्राद्धे अनेन ताम्बूल गन्ध पुष्पादिना त्वं मया निमन्त्रितः ॐ निमन्त्रितोस्मी इति प्रतिवचनम्·

अञ्जलिं बध्वा·

अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥
सर्वायास विनिर्मुक्तैः कामक्रोध विवर्जितैः ।
भवितव्यं भवद्भिर्नो द्यतने श्राद्धकर्मणि ॥

भवितव्यं इति प्रतिवचनम्·

ततो ब्राह्मणचरणौ प्रक्षालयेत्·

ॐ नमोस्त्वनन्ताय सहस्र मूर्तये सहस्रपादाक्षि शिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः ॥
यत्फला कपिलादाने कार्तिक्यां जेष्ठपुष्करे ।
तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥

मोटकमादाय·

अद्येह काश्यपगोत्रः अस्मत्पितः पेशलवीरविक्रमवर्मन् वसुस्वरूप अत्र श्राद्धे एष पाद्यार्घ ते स्वधा·

ततः सव्येन आचम्य. गृहं प्रवेशयेत्. अपसव्येन.

ॐ आगता यूयम्. ॐ सुस्वागता वयम्.

इदमासनं आस्यताम्. ॐ आस्ये इति प्रतिवचनम्.

ब्राह्मणं उदङ्मुखं उपवेशयेत्.

ॐ कर्मपात्रमहं करिष्ये. ॐ कुरुष्व इति प्रतिवचनम्.

भूमौ शङ्खचक्रं लिखित्वा. तदुपरि आसनं. आसनोपरि पात्रम्.
तदुपरि पवित्रं क्षिपेत्.

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण
पवित्रेण सूर्यस्य रश्मिभिः।

ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये शंयो रभिस्रवन्तु नः इति जलम्.

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितृन् लोकान् प्रीणाहि नः स्वाहा इति तिलानि.

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवेत्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि. इति यवानि.

ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीम्. ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्. इति चन्दनम्.

ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत. अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी: इति अक्षतान्.

ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूप मश्विनौ व्यात्तम्· इष्णन्निषाण मुम्मइषाण सर्वलोकम्म ऽ इषाण· इति पुष्पम्·

ॐ यद्देवा देवहेडनं देवासश्च कृमावयम्।
अग्निर्मा तस्मा देनसो विश्वान्मुञ्चत्व ꣳ·हसः॥
यदि दिवा यदि नक्तमेनाꣳसि च कृमा वयम्।
वायुर्मा तस्मा देनसो विश्वान्मुञ्चत्व ꣳ·हसः॥
यदि जाग्र द्यदि स्वप्न एनाꣳसि च कृमा वयम्।
सूर्यो मा तस्मा देनसो विश्वा न्मुञ्चत्व ꣳ·हसः॥

इति कर्मपात्रं कर्तव्यम्· ततो सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय·

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपिवा।
यस्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु· इत्युक्त्वा श्राद्धदेशे द्रव्याणि आत्मानञ्च सिंचेत्·

पाठ सङ्कल्प·　　　कुशादिकमादाय·

ॐ अद्येह काश्यपगोत्रस्य अस्मत्पितुः पेशल वीर विक्रम वर्मणो वसुस्वरूपस्य अद्य कर्तव्य वार्षिक श्राद्धे अक्षय स्वर्गवास कामनया गयाश्रोकर्ण मध्यायस्य पाठं करिष्ये· तत्पाठकर्तुं ..... गोत्र .... शर्म ब्राह्मणम् एभिश्चन्दन पुष्प ध्वज पुगीफलवासोभिर्वृणे.

तत्कुशादिकमादाय.

ॐ अद्येह काश्यपगोत्रस्य अस्मत्पितुः पेशलवीर विक्रम वर्मणः
वसुस्वरूपस्य अद्य कर्तव्य वार्षिकश्राद्धे मेमिर्द्रवै रहं करिष्ये.
इति प्रतिज्ञां कुर्यात्.   ततः अञ्जलिं बध्वा पठेत्.

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ ३॥
सप्त व्याधा दशार्णेषु मृगा कालञ्जरे गिरौ ।
चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेद पारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
ताभ्यां चैव नमस्कृत्य ततः श्राद्धं समारभेत् ॥

ततो अपसव्येन दिग्बन्धनं कुर्यात् . तिलसहितमोदकमादाय पूर्वादिक्रमेण तिलान् विकिरेत् .

ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् . अपहता असुरा रक्षांसि वेदिषदः . इति पूर्वे .

तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः अपहता असुरा रक्षांसि वेदिषदः . इति दक्षिणे .

प्रतीचीमाज्यपास्तद्वत् . अपहता असुरा रक्षांसि वेदिषदः . इति पश्चिमे .

उदीचीमपि सोमपाः अपहता असुरा रक्षांसि वेदिषदः इति उत्तरे .

ऊर्ध्वतस्त्वर्यमा रक्षेत् . अपहता असुरा रक्षांसि वेदिषदः इति ऊर्ध्वे .

कव्यवाडनलोऽप्यधः अपहता असुरा रक्षांसि वेदिषदः . इति अधः

ततः सर्वतः तिलान् क्षिपेत् .

रक्षोभूतपिशाचेभ्यः स्तथैवासुरदोषजः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥

अथ नीवीबन्धनम् .

निहन्मि सर्वं यदमेध्यवद्भवेत् । हताश्च सर्वे सुरदानवा मया ।
रक्षांसि यक्षाः सपिशाचगुह्यका । हता मया यातुधानाश्च सर्वे ॥

कुशत्रयसहितान् तिलान् दक्षिणस्यां क्षिपेत्.

प्रयान्तु दूरत: सर्वे दैत्या दानवास्तथा।
सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशान्तिलान्॥

तत: सव्येन विष्णुस्मरणम्. अपसव्येन आसनम्. मोटकमादाय.

ॐ अद्येह काश्यपगोत्रस्य अस्मत्पितु: पेशलवीर विक्रम वर्मणो वसुस्वरूपस्य इदमासनं ते स्वधा. इति मोटकरूपं आसनं दद्यात्.

तत: हस्तार्घपात्रमहं करिष्ये. ॐ कुरुष्व इत्यनुज्ञात: सन्. एकं पुटकं वामहस्ते कृत्वा.

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व: प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभि: इति पूर्वाग्रं पवित्रं धारयेत्.

ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये. शंयो रभिस्त्रवन्तु न: इति जलम्.

ॐ तिलोसि सोमदेवत्यो गोसवो देवनिर्मित: प्रत्नमद्भि: पृक्त: स्वधया पितॄन् लोकान्प्रीणाहि न: स्वाहा. इति तिलान्.

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्. इष्णन्निषाण अमुम्म इषाण सर्वलोकम्म इषाण. इति पुष्पम्.

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्. ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्. इति गन्धम्.

ॐ हस्तार्घपात्रं सम्पन्नम्. ॐ सुसम्पन्नम्.

ॐ हस्तार्घपात्रं उत्थापयामि. ॐ उत्थापय.

हस्तार्घपात्रं वामहस्ते कृत्वा. ॐ नमो नारायणाय.
इति मन्त्रेण पुष्पसहितं पवित्रं उत्तराग्रं विप्रकरे धृत्वा
वामकरस्थ हस्तार्घपात्रमुखं दक्षिणकरेण पिधाय.

ॐ यादिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थिवीर्याः हिरण्यवर्णा यज्ञिया स्तान आपः शिवाः सह स्योना सुहवा भवन्तु. इति मन्त्रेण अर्घपात्रस्थ जलमभिमन्त्र्य मोटकमादाय

ॐ अद्येह काश्यपगोत्र अस्मत्पितः पेसलवीर विक्रम वर्मन् वसुस्वरूप अद्यकर्तव्य वार्षिकश्राद्धे एष हस्तार्घस्ते स्वधा.
इति ब्राह्मणकरे अर्घं दद्यात्. ॐ अर्घ्यं प्रत्यर्घमस्तु.
तदर्घपात्रं भूमौ धृत्वा. सव्यं कृत्वा तज्जलेन.

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्. पश्येम शरदः शतम् जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्. इति चक्षुस्पर्शः

अपसव्यं कृत्वा. ब्राह्मणस्य पार्श्वे ॐ पित्रे स्थानमसि. इति न्युब्जं कुर्यात्. तदुपरि कुशत्रयं दद्यात्.

ततः ॐ अर्चयिष्ये. इति पृष्ट्वा. ॐ अर्चय. इत्युक्ते.
जलचन्दन पुष्पाक्षत ताम्बूल यज्ञोपवीत वस्त्रादिभिः ब्राह्मणं सम्पूजयेत्.

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः

स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम्.

वटुक ब्राह्मणे तिलकं कुर्यात्.

धूपदीपौ च कारयेत्. मोटकमादाय.

ॐ अद्येह काश्यपगोत्रः अस्मात्पितः पेशल वीर विक्रम वर्मन् वसुस्वरूप ~~[illegible]~~ वार्षिक श्राद्धे एतानि अर्चनानि अत्र गन्ध पुष्पाक्षत धूप दीप ताम्बूल यज्ञोपवीत दूर्वा वासांसि ते स्वधा.

अर्चनविधेः सर्वं परिपूर्णमस्तु. इति जलं दद्यात्.

ॐ अस्तु परिपूर्णम्. ततो वामावर्तेन त्रिकोण मण्डलं विधाय. सव्येन. आचम्य. अपसव्येन. भूस्वामी.

तिल घृत मधु जल युतं अन्नं मोटकं चादाय.

ॐ इदमन्नं सजलं एतत्स्वामीपितृभ्यो नमः इति भूमौ क्षिपेत्.

अथ अन्न सङ्कल्पः सोपस्करं तिल जल युतं अन्नं उपनीय मधुनाभिघार्य अधोमुखाभ्यां ब्राह्मणाभ्यां पाणिभ्यां अन्नपात्रमालभ्य.

ॐ पृथिवि ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा. ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्. समूढ मस्यपां सुरे स्वाहा. इति पठित्वा. विप्रदक्षिणाङ्गुष्ठं गृहीत्वा.

ॐ इदमन्नम्. ॐ इमा आपः ॐ इदं आज्यम्. ॐ इदं हविः

ॐ एतान्युपकरणानि. इति तिलान् विकीर्य.

ॐ अपहता असुरा रक्षांऽसि वेदिषदः इति पठित्वा. मोटकमादाय. वामहस्ताङ्गुष्ठाङ्गुलीभिः क्रमेण अन्नं अपस्य पृष्ट्वा.

ॐ अद्येह काश्यपगोत्राय अस्मत्पित्रे पेशलवीर विक्रम वर्मणे वसुस्वरूपाय अन्न श्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेष्यमाणं अक्षयतृप्ते दत्तो ते स्वधा. इति ब्राह्मण समीपे उत्सृजेत्.

ॐ अन्न सङ्कल्प सिद्धिरस्तु. भवान् प्राशयतु. इति ब्राह्मणकरे अपोशानं दद्यात्.

सव्येन श्राद्धकर्ता कुशोपरि विशन् पठेत्.

ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः मधुद्यौरस्तु नः पिता मधुमान्नो वनस्पति र्मधुमाँ अस्तु सूर्यः माध्वी र्गावो भवन्तु नः ॐ मधु ॐ मधु ॐ मधु.

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।
तत्सर्वम च्छिद्रमस्तु भास्करस्य प्रशादतः ॥
नमस्तुभ्यं विरूपाक्ष नमस्तेने कचक्षुसे ।
नमः पिनाक हस्ताय वज्र हस्ताय वै नमः ॥

ततः कर्मपात्र सन्निधौ गत्वा. आसन दक्षिणाग्रकुशत्रयायां

भूमौ विकराशनम्. अपसव्येन. मोटकमादाय.

असंस्कृत प्रमीतानां त्यागिनां कुलयोषिताम्।
उच्छिष्ट भागधेयानां दर्भेषु विकरासनम् ॥ इति विकरासनम्.

मधु घृत तिल युत मन्न मादाय जलेनाप्लाव्य. मोटकमादाय.

अग्निदग्धाश्च ये जीवा येप्यदग्धा कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परां गतिम् ॥

इति आसनोपरि विकरं दद्यात्. ततः कुशान् परित्यज्य हस्तौ पादौ प्रक्षाल्य. सव्येन द्विराचम्य. गायत्रीं जपेत्.

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधुनक्त मुतोषसो मधुमत्पार्थिवꣳ रजः मधुद्यौ रस्तु नः पिता मधुमान्नो वनस्पति र्मधुमाँ अस्तु सूर्यः माध्वी र्गावो भवन्तु नः ॐ मधु ॐ मधु. ॐ मधु. इति पठेत्.

अपसव्येन. ॐ जल गण्डूष मिदन्ते. इति ब्राह्मणाय प्रत्यपोशनं दद्यात्. अञ्जलिं बध्वा ब्राह्मणं पृच्छेत्.

ॐ स्वदितम्. ॐ सुस्वदितम्. ॐ तृप्ताः स्थः ॐ तृप्ताः स्मः शेषमन्नं किं क्रियताम्: इष्टैः सह भुज्यताम्. ॐ पिण्डदान महं करिष्ये. ॐ कुरुष्व.

ततः पिण्डदानार्थं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय. तदुपरि

ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति.

परा पुरो निपुरो ये भरन्त्यग्निष्टाँ लोकान् प्रणुदात्यस्मात्.

इति अङ्गारं भ्रामयित्वा दक्षिणदिशि क्षिपेत्.

ततः पिण्डिकामध्ये वामेन पाणिना रेखां कृत्वा उत्तरदिशि क्षिपेत्.

ॐ अपहता असुरा रक्षांसि वेदिषदः. इति मन्त्रेण.

ततो जलेन पिण्डिका सेचनम्. तदनु छिन्नमूलकुशान् पिण्डिकायां दद्यात्. ततः सव्येन.

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।

नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिः पठेत्.

अपसव्यं कृत्वा. मोटकमादाय.

ॐ अद्येह काश्यपगोत्र अस्मत्पितः पेशलवीर विक्रमवर्मन् वसुस्वरूप अद्य कर्तव्य वार्षिकश्राद्धे अत्रावनेजने निक्ष्व ते स्वधा. इति कुशोपरि दद्यात्.

ततः पिण्डं मोटकं चादाय.

ॐ अद्येह काश्यपगोत्र अस्मत्पितः पेशलवीर विक्रमवर्मन् वसुस्वरूप वार्षिक ~~अत्र~~ श्राद्धे एष पिण्डः अमृतस्वरूपः अक्षयतृप्तिहेतवे ते स्वधा. इति अवनेजनोपरि दद्यात्.

तत आसनकुशमूलेन करं प्रोक्ष्य. सव्यं कृत्वा. द्विराचम्य. हरिं स्मरेत्. तत सव्येनैव पुष्पादीन्यादाय उत्थाय पितर मुद्दिश्य.

ॐ अत्र पितरो मादयध्वं यथा भागमा वृषायध्वम्:

इत्युक्त्वा उत्तराभिमुखो भूत्वा श्वासं नियम्य भास्कर मूर्तिं ध्यायन्. तत्रैव अपसव्यं कृत्वा दक्षिणावर्त्तेन दक्षिणाभिमुखो भूत्वा.

ॐ मीमदन्त पितरो यथाभागमा वृषायिषत.

इति मन्त्रेण पुष्पादीनि पिण्डोपरि क्षिपेत्.

तत्र प्रत्यवनेजनपात्रं वामहस्ते कृत्वा. मोटकमादाय.
ॐ अद्येह काश्यपगोत्र अस्मत्पितः पेशलवीर विक्रम वर्मन् वसुस्वरूप इदं पिण्डप्रत्यवनेजनं ते स्वधा. इति पिण्डोपरि दद्यात्.

ततो निवीं विस्रंस्य. सव्यंकृत्वा. आचम्य. हरिं स्मरेत्.
अपसव्यं कृत्वा. वामेन पाणिनात्तसूत्रं दक्षिणेनादाय.

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो देष्मैतद्वः पितरो वासः इति पिण्डोपरि सूत्रं दद्यात्.

ततः पिण्डं गन्धादिभिः पूजयेत्.
पाद्यम्. पञ्चामृतम्. शुद्धोदकम्. वस्त्रम्. यज्ञोपवीतम्. गन्धम्. पुष्पाणि. अक्षतान्. यवान्. तिलान्. धूपम्. दीपम्. नैवेद्यम्. ताम्बूलम्. पुगीफलम्. द्रव्यम्. समर्पयामि ॐ पितृभ्यो नमः.

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः

स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम्.

इति मन्त्रेण पिंड संपूज्य. मोटक मादाय.

ॐ अद्येह काश्यपगोत्र अस्मान्पितः पेशलवीर विक्रमवर्मन् वसु स्वरूप कौशिक अत्र अत्र एतानि पिण्डार्चनानि अत्र सूत्र गन्ध पुष्पाक्षत यज्ञोपवीत धूपदीपनैवेद्य ताम्बूल पूगीफल द्रव्य वासांसि ते स्वधा. इति उत्सृजेत्.

ततो विप्रकरे ॐ शिवा आपः सन्तु. इति जलम्. ॐ सौमनस्यमस्तु. इति पुष्पम्. ॐ अक्षतं चारिष्टमस्तु. इति तण्डुलान्.

सव्येन अंजलीं बध्वा. पूर्वाभिमुखः पठेत्.

ॐ अपां मध्ये स्थिता देवा सर्वमप्सु प्रतिष्ठितम् ।
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥१॥
लक्ष्मी र्वसतु पुष्पेषु लक्ष्मी र्वसति पुष्करे ।
लक्ष्मी र्वसति गोष्ठेषु सौमनस्यं ददातु मे ॥
अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टि धृति स्तथा ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

ततः कर्मपात्रोदकं कुशै र्गृहीत्वा प्रतिमन्त्रं स्वशिरसि सिञ्चेत्.

ॐ अस्मत्कुले दीर्घमायुरस्तु. ॐ शान्तिरस्तु. ॐ पुष्टिरस्तु. ॐ वृद्धिरस्तु. ॐ यच्छ्रेयस्तदस्तु. ॐ यत्पापं तत्प्रतिहतमस्तु. इति मन्त्रैः. ॐ द्विपदेभ्यः चतुष्पदेभ्यः शान्ति र्भवतु.

अपसव्यं कृत्वा· पिण्डशेषान्नं पिण्डसमीपे विकिरेत्·

वामहस्ते गडुजलं धृत्वा· मोदकमादाय·

ॐ अद्येह काश्यपगोत्रस्य अस्मत्पितुः पेशल वीर विक्रम वर्मणः वसुस्वरूपस्य अत्र पार्वणं श्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु· इति पिण्डोपरि दद्यात्·

सव्येन कृताञ्जलि दक्षिणां दिशं पश्यन्

ॐ अघोरः पितरस्तु· इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्·

ततः प्राङ्मुखो भूत्वा अंजलिं बध्वा आशिषः प्रार्थयेत्·

ॐ गोत्रन्नो वर्द्धताम्· ॐ वर्द्धताम्·
ॐ दातारो नोऽभिवर्द्धन्ताम्· ॐ वर्द्धन्ताम्·
ॐ वेदाः सन्ततिरेव च· ॐ सन्तु·
ॐ अन्नं च नो बहु भवेत्· ॐ भवतु·
ॐ श्रद्धा च नो माव्यगमत्· ॐ मागात्·
ॐ बहुदेयं च नो स्तु· ॐ अस्तु·
ॐ अतिथींश्च लभेमहि· ॐ लभध्वम्·
ॐ याचितारश्च नः सन्तु· ॐ सन्तु·
ॐ मायाचिष्मकंचन· ॐ मायाचिष्मः
ॐ एताः सत्याः आशिषः सन्तु· ॐ सन्तु·

ततः श्राद्धकर्ता ब्राह्मण हस्तेन तिलकं कुर्यात्·

ॐ यं कामं कामयते सोऽस्मै कामः समृद्ध्यताम्·

ततः अपसव्येन सपवित्र कुशान् युक्पात्रात्समादाय पिण्डोपरि निक्षिपेत्.

ॐ स्वधां वाचयिष्ये. ॐ वाच्यताम्. ततो रिक्ताञ्जलिना.
ॐ अद्येह काश्यपगोत्राय अस्मत्पित्रे पेङ्गलवीर विक्रम वर्मणे वसुस्वरूपाय स्वधोच्यताम्. ॐ अस्तु स्वधा.

ततः पय आदि सहितं पुटकं वामहस्ते कृत्वा.
ॐ ऊर्जं वहन्ती रमृतं घृतं पयः कीलालं परिस्रुतम्. स्वधास्थ तर्पयत मे पितॄन्.

इति सपवित्र कुशोपरि दक्षिणाग्रां पयोधारां दद्यात्.
ततः पिण्डः सम्पन्नः इति ब्राह्मणं पृच्छेत्. ॐ सुसंपन्नः इत्युक्ते. ॐ पिण्डमुत्थापयामि. ॐ उत्थापयस्व. इत्यनुज्ञात नम्रोभूय पिण्डमाघ्राय उत्थापयेत्. पिण्डधार कुशान् उल्मुकं च वह्नौ क्षिपेत्. ततः सव्येन पिण्डिकायां शङ्खं चक्रं लिखित्वा.

ॐ शङ्खाय नमः ॐ चक्राय नमः इति यवैः शङ्ख चक्र पूजां विधाय.. अपसव्यं कृत्वा पिण्डमादाय उत्थाय.

ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः।
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥

इति पिण्डं पिण्डिकोपरि निधाय. सव्येन. पूजयेत्.

ॐ वसन्ताय नमस्तुभ्यं गीष्माय च नमो नमः।
वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः॥

हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।
मास सम्वत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥

कर्पूर वर्तिकां प्रज्वाल्य· अपसव्येन· पितृर्घपात्रं उत्तानीकृत्य· सव्येन· दक्षिणा संकल्प· रजत द्रव्याय नमः

ॐ अद्येह काश्यपगोत्रस्य अस्मत्पितुः पेशलवीर विक्रमवर्मणः वसुस्वरूपस्य कृतैतत् वार्षिकश्राद्ध पिण्डदान कर्मणः प्रतिष्ठा साङ्गतासिद्ध्यर्थं· तथा गयोगाकर्ण महात्म्यपाठ कर्मणश्च प्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदैवतां नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथा दक्षिणान्वेन भूयसी दक्षिणान्वेन च दातुं समुत्सृजे· तत्सन्न मम·

ततो अपसव्येन ॐ अभिरम्यताम्: ॐ अभिरम्य·
इत्युक्ते सति· ब्राह्मणं गृहीत्वा· उत्थाप्य वारिधारया वेष्टयेत्·

ॐ आमा वाजस्य प्रसवो जगम्या देमे द्यावा पृथिवी विश्वरूपे.
आमागन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात्.
सव्येन.

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच।
नमः स्वहायै स्वधायै नित्यमेव नमो नमः॥
ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच।
नमः स्वहायै स्वधायै नित्यमेव नमो नमः॥
ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच।
नमः स्वहायै स्वधायै नित्यमेव नमो नमः॥

अपसव्येन. दीपाच्छादनं. विधाय.

सव्येन. हस्तौ पादौ प्रक्षाल्य. आचम्य. अञ्जलिं बध्वा.

ॐ यत्कृतम् तदस्तु कृतमस्तु. यन्नकृतं तद्विष्णोः प्रसादाद्ब्राह्मण वचनात्सर्वं परिपूर्णमस्तु. ॐ अस्तु परिपूर्णम्.

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च।
प्रयच्छन्तु तथा राज्यं पितरः श्राद्ध तर्पिताः॥

ततो अञ्जलिं बध्वा

ॐ यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ अच्युताय नमः ॐ अच्युताय नमः ॐ अच्युताय नमः
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

शय्यादानम्

सव्येन· आचम्य· पूर्वाभिमुखो भूत्वा· गन्धाक्षत पुष्पाण्यादाय· सोपस्करण शय्यायै नमः इति मन्त्रेण शय्यां सर्वतः संपूज्य·

प्रतिमयोः लक्ष्मी नारायणौ पूजयेत्·

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णो स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा· विष्णवे नमः

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्· इष्णन्निषाण मुम्म इषाण सर्वलोकं म इषाण· लक्ष्म्यै नमः

इति पूजां विधाय·   पुष्पाञ्जलिः

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं ।
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम् ।
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

लक्ष्मी नारायणाभ्यां नमः

कुशतिलजलान्यादाय शय्यां स्पृशेत्·

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्र वीर विक्रम वर्मा अहं मम काश्यपगोत्रस्य अस्मत्पितुः पेशल वीर विक्रम वर्मणः वसुस्वरूपस्य सकलपापक्षय पूर्वक यमपथाधिकरणक घर्म शीतादि बाधा याम्यपुरुषप्रहार घोरातपादि निरसन उच्चावच अति विषम पथ भूमि दुर्गमार्ग

सन्तारण सकलनरकयातनानिवृत्ति पूर्वकं अनेक कल्पान्त पर्यन्तं पुरन्दरादि लोकावाप्ति पुरःसरं सार्वदिक चिरकालावधि सौभाग्य वैधव्यादि सर्वगुणोपेत भृत्य मित्र जन पुत्र गृहाभवा वियोगानुत्तम सुखावाप्ति पूर्वकं त्रिंशत्कोटि वर्ष पर्यन्तं दिव्य ध्वज पताका छत्र चामर व्यजनादि युत विमानाधिकरणक स्वर्गलोक महितत्वोत्तर कालं वैकुण्ठ लोकावाप्तये. घृतकुम्भ जलधर ताम्बूल कुंकुमागरु कर्पूरादि सुगन्ध चन्दन दीपिका पादुकोपानच्छत्र चामरासन सौवर्ण राजत ताम्रादि नानाविध धातु निर्मित विविध भाजन काचादि निर्मित भाजन रत्नादि खचित सुवर्णादि भूषण विविध भक्ष्य भोज्यादर्श पट्ट कौशेय क्षौम और्ण कार्पाशादि परिधानीय वस्त्र वाहनाद्युपेतां नानाविध काष्ठशैलेयादि निर्मित खट्विका पीठादि युतां इत्यादि समन्वितां गृह दासदासी भूमौ यान निष्क्रय युतां सम्पूजित लक्ष्मी नारायण प्रतिमान्वितां इमां सोपस्करण शय्यां विष्णुदेवताकां ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

प्रार्थना.

यस्मादशून्य शयनं केशवस्य शिवस्य च ।
शय्या अस्याप्यशून्यास्तु तथा जन्मनि जन्मनि ॥

दानप्रतिष्ठा.

अद्य कृतैतत् सोपस्करण शय्या दान कर्मणः प्रतिष्ठार्थं इदं

सुवर्णं वन्हि देवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. नतसन्न मम.

पूजाभाजनादि दानम्.

पूजनोपयोगि पात्रेभ्यो नमः पुस्तकाय नमः ब्राह्मणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीनराशिः देवेन्द्र वीर विक्रम वर्मा अहं मम काश्यपगोत्रस्य अस्मत्पितुः पेशलवीर विक्रम वर्मणः वसुस्वरूपस्य समस्तपापक्षय पूर्वकं अक्षय स्वर्गवास कामनया इमानि रजतादि नानाविध पूजनोपयोगि भाजनानि विश्वकर्म दैवतानि पुस्तकं सरस्वति देवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय सम्प्रददे.

प्रार्थना.

रजतादीनि भाण्डानि पात्राणि विविधानि च।
ब्राह्मणाय प्रदास्यामि भास्करः प्रीयतां मम ॥

दान प्रतिष्ठा.

अद्य कृतैतत् पूजनोपयोगी भाजनादि दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. नतसन्न मम.

ब्राह्मणभोजन.

देयद्रव्याय नमः रजतखण्डाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः मीन

एहो देवेन्द्रवीर विक्रम वर्मा अहं मम काश्यपगोत्रस्य अस्म
त्पितुः पेह्लवीर विक्रम वर्मणः वसुस्वरूपस्य अक्षयतृप्ति
पूर्वक अक्षयस्वर्गवास कामनया षष्ठ्युत्तरत्रिशतान् ब्राह्मणान्
गन्धपुष्पाक्षतादिभिः वरण पूर्वकं मिष्टान्नेन भोज
यिष्ये. तत्करिष्यमाण भोजन कर्मणः प्रतिष्ठार्थं इदं रजतं
चन्द्रदेवताकं नानानाम गोत्रेभ्यः नानानाम शर्मभ्यः ब्राह्म
णेभ्यः यथाभागं विभज्य दातुं जले समुत्सृजे . तत्सन्न मम.

तर्पणम्

सव्येन· आचम्य· पूर्वाभिमुखो भूत्वा· कुशतिलजलान्यादाय·

ॐ अद्येह काश्यपगोत्रस्य अस्मत्पितुः पद्मवीर विक्रम वर्मणो वसुस्वरूपस्य वार्षिक श्राद्धाङ्ग तया श्रीपरमेश्वर प्रीत्यर्थे ब्रह्मादि देवर्षि दिव्यपितृ स्वपितृणां च तर्पणमहं करिष्ये·

ततः प्राङ्मुखः पवित्रपाणिः देवतीर्थेन सकुशोदकेन तर्पणं कुर्यात्·

ब्रह्मादि देवतानाम् आवाहनम्·

ॐ विश्वेदेवाः स आगत शृणुता म इमं हवम् एदं बर्हि निषीदत· विश्वेदेवाः शृणुते मइमं हवन्मे ये अन्तरिक्षे य उपद्यविष्ठ ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम्·

ॐ ब्रह्मादिदेवाः इहागच्छन्तु इहतिष्ठन्तु गृह्णन्तु एताञ्जलाञ्जलीन्·

ॐ ब्रह्मा तृप्यताम्· ॐ विष्णुस्तृप्यताम्· ॐ रुद्रस्तृप्यताम्· ॐ प्रजापतिस्तृप्यताम्· ॐ देवास्तृप्यन्ताम्· ॐ छन्दांसिस्तृप्यन्ताम्· ॐ वेदास्तृप्यन्ताम्· ॐ छन्दांसिस्तृप्यन्ताम्· ॐ पुराणाचार्या स्तृप्यन्ताम्· ॐ गन्धर्वास्तृप्यन्ताम्· ॐ इतराचार्यास्तृप्यन्ताम्· ॐ सम्वत्सरः सावयवस्तृप्यन्ताम्· ॐ देव्यस्तृप्यन्ताम्· ॐ अप्सरस स्तृप्यन्ताम्· ॐ देवानुगास्तृप्यन्ताम्· ॐ नागास्तृप्यन्ताम्· ॐ सागरा स्तृप्यन्ताम्· ॐ पर्वतास्तृप्यन्ताम्· ॐ सरितस्तृप्यन्ताम्· ॐ मनुष्या स्तृप्यन्ताम्· ॐ यक्षास्तृप्यन्ताम्· ॐ रक्षांसि तृप्यन्ताम्· ॐ पिशाचा

स्तृप्यन्ताम्. ॐ सुपर्णास्तृप्यन्ताम् ॐ भूतानि तृप्यन्ताम्: ॐ पशव
स्तृप्यन्ताम्: ॐ वनस्पतयस्तृप्यन्ताम्. ॐ ओषधयस्तृप्यन्ताम्.
ॐ भूतग्रामश्चतुर्विधस्तृप्यन्ताम्. ॐ अत्रिस्तृप्यताम्. ॐ अङ्गिरा
स्तृप्यताम्. ॐ पुलस्त्यस्तृप्यताम्. ॐ पुलहस्तृप्यताम्. ॐ क्रतु
स्तृप्यताम्. ॐ प्रचेतास्तृप्यताम्. ॐ वशिष्ठस्तृप्यताम्. ॐ भृगु
स्तृप्यताम्. ॐ नारदस्तृप्यताम्.

ततः कण्ठे सूत्रं कृत्वा उदङ्मुखः कायतीर्थेन मनुष्यान् तर्पयेत्.
सनकादीनां आवाहनम्.

ॐ सनकादयः सप्तमनुष्याः इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु
एताञ्जलान् जलीन्.

ॐ सनकस्तृप्यताम् २. ॐ सनन्दनस्तृप्यताम् २. ॐ सनातन
स्तृप्यताम् २. ॐ कापिलस्तृप्यताम् २ ॐ आसुरिस्तृप्यताम् २.
ॐ वोढुस्तृप्यताम् २. ॐ पञ्चशिखस्तृप्यताम् २.

अपसव्येन दक्षिणाभिमुखः पातितवामजानुः मोटककुशतिल
जलाञ्जलित्रयेण खड्गपात्रेण पितृतीर्थेन तर्पयेत्.

दिव्यपितॄणां आवाहनम्.

ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि उशन्नुशत
आवह पितॄन् हविषे अत्तवे. आयान्तु नः पितरः सोम्यासो
ग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन् यज्ञे स्वधया मदन्तो
धिब्रुवन्तु ते वन्त्वस्मान्.

कव्यवाडनलादयो दिव्यपितरः इहागच्छन्तु इहतिष्ठन्तु गृह्णन्तु एतान् जलान् जलीन्.

ॐ कव्यवाडनलस्तृप्यताम् ३. ॐ सोमस्तृप्यताम् ३. ॐ यमस्तृप्यताम् ३. ॐ अर्यमास्तृप्यताम् ३. ॐ अग्निस्वातास्तृपन्ताम् ३. ॐ सोमपास्तृप्यन्ताम् ३. ॐ बर्हिषदः पितरस्तृप्यन्ताम् ३.

ॐ यमाय नमः ३. ॐ धर्मराजाय नमः ३. ॐ मृत्यवे नमः ३. ॐ अन्तकाय नमः ३. ॐ वैवस्वताय नमः ३. ॐ कालाय नमः ३. ॐ सर्वभूतक्षयाय नमः ३. ॐ औदुम्बराय नमः ३. ॐ दध्नाय नमः ३. ॐ नीलाय नमः ३. ॐ परमेष्ठिने नमः ३. ॐ वृकोदराय नमः ३. ॐ चित्राय नमः ३ ॐ चित्रगुप्ताय नमः ३.

ततः स्व पितृणां आवाहनम्.

आगच्छन्तु मे पितरः गृह्णन्तु इमान् जलान् जलीन्.

ॐ उदीरता मवर उत्परास उन्मध्यमाः पितरः सोम्यासः असुं यई युरवृका ऋतज्ञा स्तेनो वन्तु पितरो हवेषु.

ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेशलवीर विक्रम वर्मा [redacted] वसुस्वरूप स्तृप्यताम्. इदं जलं सतिलं तस्मै स्वधा नमः

ॐ अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः तेषां वयं सुमतौ यज्ञियाना मपि भद्रे सौ मनसे स्याम.

ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेशलवीर विक्रम वर्मा

[redacted] वसुस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

ॐ आयन्तु नः पितरः सोम्यासो ग्निष्वात्ताः पथिभि र्देवयानैः अस्मिन् यज्ञे स्वधया मदन्तो ऽधिब्रुवन्तु तेव न्त्वस्मान्.

ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेशलवीर विक्रम वर्मा [redacted] वसुस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः तृप्यध्वम्· तृप्यध्वम्· तृप्यध्वम्:

ॐ ऊर्जं वहन्ती रमृतं घृतं पयः कीलालं परिस्रुतम् स्वधास्थ तर्पयत मे पितॄन्.

ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः ऐन्द्रप्रतापवीर विक्रम वर्मा [redacted] सपत्नीकः रुद्रस्वरूप स्तृप्यताम्. इदं जलं सतिलं तस्मै स्वधा नमः

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम्:

ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः ऐन्द्रप्रतापवीर विक्रम वर्मा [redacted] सपत्नीकः रुद्रस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

ॐ येचेह पितरो येचने ह्यांश्च विद्मयां उच्चन प्रविद्म त्वं वेत्थ यति ते जातवेदः स्वधाभि यज्ञं सुकृतं जुषस्व.

ॐ अद्येह काश्यपगोत्रः अस्मात्पितामहः ऐंद्रप्रतापवीर विक्रम वर्मा सपत्निकः रुद्रस्वरूपस्तृप्यताम्. इदं जलं सतिलं तस्मै स्वधा नमः तृप्यध्वम्. तृप्यध्वम्: तृप्यध्वम्.

ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः

ॐ अद्येह काश्यपगोत्रः अस्मात्प्रपितामहः दुलक वीर विक्रम वर्मा सपत्निकः आदित्यस्वरूपस्तृप्यताम्. इदं जलं सतिलं तस्मै स्वधा नमः

ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवं. रजः मधुद्यौरस्तु नः पिता.

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपीतामहः दुलक वीर विक्रम वर्मा सपत्लिकः आदित्यस्वरूपास्तृप्यताम्. इदं जलं सतिलं तस्मै स्वधा नमः

ॐ मधुमान्नो वनस्पति र्मधुमाँ अस्तुसूर्यः. माध्वी र्गावो भवन्तु नः

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपीतामहः दुलक वीर विक्रम वर्मा सपत्निकः आदित्य स्वरूपस्तृप्यताम्. इदं जलं सतिलं तस्मै स्वधा नमः तृप्यध्वम्: तृप्यध्वम्: तृप्यध्वम्:

ॐ नमोवः पितरो रसाय नमोवः पितरः शोषाय नमोवः पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय

नमोवः पितरो मन्यवे नमोवः पितरः पितरो नमोवो गृहान्नः
पितरो दत्तसतोवः पितरो देष्मैतद्वः पितरो वासः

ॐ अद्येह गोत्रः अस्मन्मातामहः वर्मा
सपत्निकः वसुस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

ॐ अद्येह गोत्रः अस्मन्मातामहः वर्मा
सपत्निकः वसुस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

ॐ अद्येह गोत्रः अस्मन्मातामहः वर्मा
सपत्निकः वसुस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

तृप्यध्वम्· तृप्यध्वम्· तृप्यध्वम्·

ॐ अद्येह गोत्रः अस्मत्प्रमातामहः वर्मा
सपत्निकः रुद्रस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

ॐ अद्येह गोत्रः अस्मत्प्रमातामहः वर्मा
सपत्निकः रुद्रस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

ॐ अद्येह गोत्रः अस्मत्प्रमातामहः वर्मा
सपत्निकः रुद्रस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

तृप्यध्वम्· तृप्यध्वम्· तृप्यध्वम्·

ॐ अद्येह गोत्रः अस्मद्वृद्धप्रमातामहः वर्मा
सपत्निकः आदित्यस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै स्वधा नमः

ॐ अद्येह गोत्रः अस्मद्वृद्धप्रमातामहः
वर्मा सपत्निकः आदित्यस्वरूपस्तृप्यताम्· इदं जलं सतिलं तस्मै

स्वधा नमः

ॐ अद्येह गोत्र अस्मद्वृद्धप्रमातामहः
वर्मा सपत्निकः आदित्यस्वरूपस्तृप्यताम्· इदं जल सतिलं तस्मै
स्वधा नमः तृप्यध्वम्· तृप्यध्वम्· तृप्यध्वम्·

आब्रह्म स्तम्ब पर्यन्तं देवर्षि पितृ मानवाः।
तृप्यन्तु पितरः सर्वे मातृ माता महादयः॥
मातृवंशे मृता येच पितृवंशे तथैव च।
गुरुश्वसुर बन्धूनां ये चान्ये बान्धवा मृताः॥
ते तृप्ति मखिला यान्तु येस्म तोयाभिकाङ्क्षिणः।
ये बान्धवा बान्धवा ये येन्य जन्मनि बान्धवाः॥
ते सर्वे तृप्तिमायान्तु मद्दत्ते नाम्बुनाखिलाः।
देवासुरा स्तथा यक्षा नागा गन्धर्व राक्षसाः॥
पिशाचाः गुह्यकाः सिद्धाः कुष्माण्डा स्तरवः खगाः।
जलेचरा भूमिचरा वाय्वा धाराश्च जन्तवः॥
ते तृप्ति मखिला यान्तु मद्दत्ते नाम्बुनाखिलाः।
तेषामाप्या यनायैत दीयते सलिलं मया॥
अतीत कुलकोटीनां सप्त द्वीप निवासिनाम्।
आब्रह्म भुवनां लोकां इदमस्तु तिलोदकम्॥
यत्र कचन संस्थानां क्षुत्तृषोप हतात्मनाम्।
इदमक्षय्य मेवास्तु मया दत्तं तिलोदकम्॥

अथ वस्त्र निष्पीडनम्:

ये के चास्मत् कुले जाता अपुत्रा गोत्रिणो मृता ।
ते पिवन्तु मया दत्तं वस्त्र निष्पीडनोदकम् ॥

ततः सव्यं कृत्वा· आचम्य· पूर्वाभिमुखो भूत्वा षट्कोणं विलिख्य ब्रह्मादीन्पूजयेत्.

ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ता द्विसीमतः सुरुचो वेन आवः सुबुध्न्या उपमा अस्यविष्ठाः शतश्चयोनिमशतश्च विवः ॐ ब्रह्मणे नमः.

ॐ इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम् समूढ मस्यपांसुरे स्वाहा· ॐ विष्णवे नमः

ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः बाहुभ्या मुतते नमः ॐ रुद्राय नमः

ॐ भूर्भुवः स्वः तत्सवितु र्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्· ॐ सवित्रे नमः

ॐ मित्रस्य चर्षणी धृतोवो देवस्य सानसि द्युम्नं चित्र श्रवस्तमम्· ॐ मित्राय नमः

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद· ॐ वरुणाय नमः

सूर्याय अर्घ दानम्.

ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
जगत्सवित्रे शुचये साक्षिणे कर्मदायिने॥
ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते।
अनुकंपय मां भक्त्या गृहाणार्घ्यं दिवाकर॥

उपस्थानम्.

अद्दश्रमस्य केतवो विरश्मयो जनाँ अनु भ्राजन्तो अग्नयो यथा उपयाम गृहीतोऽसि सूर्यायत्वा भ्राजायैषते योनिः सूर्यायत्वा भ्राजाय सूर्य भ्राजिष्ठ भ्राजिष्ठ स्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम्. हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथि र्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्.

ततः पूर्वादि क्रमेण.

ॐ प्राच्यै दिशे नमः इन्द्राय नमः
ॐ आग्नेय्यै दिशे नमः अग्नये नमः
ॐ दक्षिणायै दिशे नमः यमाय नमः
ॐ नैरृत्यै दिशे नमः निरृतये नमः
ॐ प्रतीच्यै दिशे नमः वरुणाय नमः
ॐ वायव्यै दिशे नमः वायवे नमः
ॐ उदीच्यै दिशे नमः कुबेराय नमः
ॐ ऐशान्यै दिशे नमः इशानाय नमः

ॐ ऊर्ध्वायै दिशे नमः ब्रह्मणे नमः
ॐ अधो दिशे नमः अनन्ताय नमः।

ततः उपविश्य नमेत्.

ॐ ब्रह्मणे नमः ॐ अग्नये नमः ॐ पृथिव्यै नमः ॐ ओष
धिभ्यो नमः ॐ वाचे नमः ॐ वाचस्पतये नमः ॐ विष्णवे
नमः ॐ महद्भ्यो नमः ॐ अद्भ्यो नमः ॐ अपांपतये नमः
ॐ वरुणाय नमः

ततः मुख संमार्जनम्.

ॐ संवर्चसा पयसा सन्तनूभिरगन्महि मनसा सँ शिवेन
त्वष्टा सुदत्रो विदधातु रायो नुमार्ष्टु तन्वो यद्वि लिष्टम्.

ततः चक्षुस्पर्शः

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं
जीवेम शरदः शतँ शृणुयाम शरदः शतं प्रब्रवाम शरदः
शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्.

ततः तर्पणं जलं विलोडयेत्.

ॐ देवागातु विदोगातुं वित्वागातु मित मनसस्पत इमन्देव
यज्ञँ. स्वाहा वातेधाः

जलं गृहीत्वा.

अनेन कर्मणा जनार्दनः प्रीयताम्.

दक्षिणा संकल्प.

देयद्रव्याय नमः   स्वर्णखण्डाय नमः.

अद्येह काश्यपगोत्र काश्यपावत्सार नैध्रुवेति त्रिप्रवरः नाम राशिः देवेन्द्र वीर विक्रम वर्मा अहं मम काश्यपगोत्रस्य अस्मत्पितुः नेपाल वीर विक्रम वर्मणो वत्सरस्वरूपस्य वार्षिक श्राद्ध दिवसे कृतस्य वार्षिक श्राद्ध शय्यादान ब्राह्मण भोजन तर्पणादि कर्मणो न्यूनातिरिक्त परिपूर्णार्थं इदं रजतं चन्द्र देवताकं नानानाम शर्मभ्यो ब्राह्मणेभ्यो यथा भागं विभज्य दातुं जले समुत्सृजे.

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ३.
कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा नुसृते स्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयेतत् ॥

श्री ५ बडा महारानी बाट गरि बक्सने गोदान

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ गोभ्यो नमः
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ब्राह्मणाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ……
[illegible] …… देवी अहं मम

·अस्मत्कुलस्य शुभफलावाप्तये· आत्मनः शरीरशुद्ध्यर्थं च इमां गां रुद्रदैवताकां …… गोत्राय …… शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे·

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

अद्य कृतैतत् गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवताकं …… गोत्राय …… शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे· तत्सन्न मम·

ॐ शान्तिरस्तु· ॐ पुष्टिरस्तु· ॐ तुष्टिरस्तु· ॐ यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःस्वप्नं दौर्भाग्यं तन्नूमो प्रतिहतमस्तु· ॐ अमृताभिषेकोऽस्तु·

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नमः

कायेन वाचा मनसेन्द्रियैर्वा । बुद्ध्यात्मना वा नुसृतस्वभावात् ॥
करोमि यद्यत्सकलं परस्मै । नारायणायेति समर्पयेतत् ॥

श्री यमुना बडा महारानीको हा: बाट गरीबकने गोदान

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ गोभ्यो नमः
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥ ब्राह्मणाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ..... णी ..... देवी अहं मम काश्यपगोत्रस्य अस्मद्भर्तृ पेशलवीरविक्रमवर्मणो वसुस्वरूपस्य सकलपापक्षयद्वारा अक्षयस्वर्गकामनया· अस्मत्कुलस्य शुभफलावाप्तये· आत्मनः शरीरशुद्ध्यर्थं च इमां गां रुद्रदेवताकां ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे·

कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

अद्य कृतैतत् गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे· तत्सन्न मम·

ॐ शान्तिरस्तु· ॐ पुष्टिरस्तु· ॐ तुष्टिरस्तु· ॐ यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्सर्वं प्रतिहतमस्तु· ॐ अमृताभिषेकोस्तु·

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ अच्युताय नमः ३

कायेन वाचा मनसेन्द्रियैर्वा। बुद्ध्यात्मना वा प्रकृतिस्वभावात्॥
करोमि यद्यत्सकलं परस्मै। नारायणायेति समर्पये तत्॥

श्री ५ मुमा रानी साहेबहरू-बाट गरिबक्सने गोदान

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ गोनिष्क्रयजातद्रव्याय नमः
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ब्राह्मणाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ...... राशि ...... देवी अहं मम काश्यपगोत्रस्य अस्मद्भर्तृ पेइगल बीर विक्रम वर्मणो वसुस्वरूपस्य सकल पापक्षयद्वारा अक्षयस्वर्गवासकामनया अस्मत्कुलस्य शुभफलप्राप्तये आत्मनः शरीरशुद्ध्यर्थं च इमं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे

कपिले सर्वदेवानां पूजनीयासि रोहिणी ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

अद्य कृतैतत् गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. न मम.

ॐ शान्तिरस्तु · ॐ पुष्टिरस्तु · ॐ तुष्टिरस्तु · ॐ यच्छ्रेयस्तदस्तु · यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्सर्वं प्रतिहतमस्तु · ॐ अमृताभिषेकोऽस्तु ·

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नमः ३
कायेन वाचा मनसेन्द्रियैर्वा । बुद्ध्यात्मना वा प्रकृते स्वभावात् ॥
करोमि यद्यत्सकलं परस्मै । नारायणायेति समर्पयेतत् ॥

श्री ५ अधिराजकुमार ध्रु- बाट गरि वपाले गोदान

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ गोनिष्क्रय जलद्रव्यम्
नमो ब्रह्मण्य देवाय गो ब्राह्मण हिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥ ब्राह्मणाय नमः

अद्येह काश्यपगोत्रः काश्यपावत्सार नैध्रुवेति त्रिप्रवरः ..... एषि ..... वर्मा अहं मम काश्यपगोत्रस्य अस्मत्पितुः पेशाचकी निक्रम वर्मणो वसुन्धरास्य सकलपाप क्षय द्वारा अक्षय स्वर्गवास कामनया. अस्मत्कुलस्य शुभफलावाप्तये. आत्मनः शरीरशुद्ध्यर्थं च इमं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

कपिले सर्वदेवानां पूजनीयासि रोहिणि।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छमे॥

अद्य कृतैतत् गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ..... गोत्राय ..... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. तत्सन्मम.

ॐ शान्तिरस्तु. ॐ पुष्टिरस्तु. ॐ वृद्धिरस्तु. ॐ यच्छ्रेयस्तदस्तु. यत्पाप रोगः शोको दुःखं दौर्भाग्यं तत्सर्वं प्रतिहतमस्तु. ॐ अमृताभिषेकोऽस्तु.

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥ ॐ अच्युताय नमः ३
कायेन वाचा मनसेन्द्रियैर्वा। बुद्ध्यात्मना वा प्रकृति स्वभावात्॥
करोमि यद्यत्सकलं परस्मै। नारायणायेति समर्पयेतत्॥

श्री ५ महाराजको ६६ वर्ष गते वर्षने गोदान

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ गोनिष्क्रयरजतद्रव्याय नमः
नमो ब्रह्मण्य देवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ब्राह्मणाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा ....
शर्मा .... देवी अहं मम

अस्मत्कुलस्य सम्मुन्नफलावाप्तये. आत्मनः शरीरशुद्ध्यर्थं च
इमं गोनिष्क्रयीभूतं रजतं चन्द्रदैवतकं ..... गोत्राय ....
शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे.

कपिले सर्वदेवानां पूजनीयासि रोहिणी ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

अद्य कृतैतत् गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदैवतकं ....
गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे. तत्सन्न मम.

ॐ शान्तिरस्तु. ॐ पुष्टिरस्तु. ॐ वृद्धिरस्तु. ॐ यच्छ्रेयस्तदस्तु. यत्पाप रोगः शोको दुःस्वप्नस्तैद् तत्सौ प्रतिहतमस्तु. ॐ अमृताभिषेकोऽस्तु.

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नमः ३

कायेन वाचा मनसेन्द्रियैर्वा । बुद्ध्यात्मना वा नुसृतस्वभावात् ॥
करोमि यद्यत्सकलं परस्मै । नारायणायेति समर्पये तत् ॥

Swan

६१

विवाहान्तर्गत प्रस्थानादि विधिः

(वा यात्रादि विधि

32 Pages.

अथ प्रस्थाने कर्तव्यः

दीप प्रार्थना-

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटियुगधारिणे नमः ॥ ॥
दीपनाथाय नमः ॥

वरुण प्रार्थना-

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते ममयज्ञेस्मिन्नाविघ्नं कुरु सर्वदा ॥
वरुणाय नमः ॥

गणेश प्रार्थना-

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
गणेशाय नमः ॥

मातृका प्रार्थना-

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥

टीका पहिराइ सगुन ज्यूनार गराउने

मङ्गलं भगवान् विष्णुर्मङ्गलं गरुडध्वजः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामीन्दीवरश्यामो हृदयस्थो जनार्दनः ॥
अभिरलमदजलनिवहं भ्रमरकुलानेकसेवितकपोलं
अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥
तदेव लग्नं सुदिनं तदेव
ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव
लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

फुल अक्षता केसर दन्योरा ले पूजा गरि ऊपरकु

प्रदक्षिणा गरि रथ चढि बक्सिने

जन्ती प्रक्रिया.

भित्रको भार कलश्मा ल्याइ ३ पटक प्रदक्षणा गरि यज्ञमा सवारि चलाउने

तहा मचमा दुलहा दुलहि राज भयेपछि दिदि बहिनीहरुले झारि लीइ ३ पटक प्रदक्षणा गर्ने ....

दुलहा दुलहि लाइ टीका पहिराइ आरती स्याउली गर्ने ....

दिदि बहिनी हरुलाइ टीका लगाइ दक्षणा बक्सिने ....

दिदि बहिनी हरुले बाटो छेकने ....

ज्यूतिकोठामा सवारी हुने ....

प्रवेशः

दीपप्रार्थना -

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटियुगधारिणे नमः ॥

दीपनाथाय नमः ॥

वरुणप्रार्थना -

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥

वरुणाय नमः ॥

गणेश प्रार्थना -

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणेशाय नमः ॥

मातृका प्रार्थना -

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी ऐन्द्री च वज्रायुधा

चामुण्डा गणनाथ रुद्रसहिता रक्षन्तु नो मातरः
मातृकाभ्यो नमः ॥
चुलो जोरि वसी जीवमातृका घ्युको धारा बनाउने

वसुधारा –

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्र
धारम् देवस्त्वा सविता पुनातु वसोः पवित्रेण शत
धारेण सुप्वा कामधुक्षः ना ॐ सवितु वरेण्य
स्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ॥ याम
स्य कण्वो अदुहत्प्रपीना ॐ सहस्रधारां पयसां
महीं गां कण्वो हैनां ददर्श साहास्मै सहस्रधाराः
सर्वान् कामान्दुदुहे तथैवैत यजमानाय सहस्रधाराः
सर्वान् कामान् दुदुहे ॥ ॥
ॐ द्यौः शान्तिः रन्तरिक्ष ँ शान्तिः पृथिवी शान्ति
रापः शान्ति रोषधयः शान्तिः, वनस्पतयः शान्ति र्वि
श्वेदेवाः शान्ति र्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव
शान्तिः सा मा शान्ति रेधि ॥ ॥

दुलहा दुलहीलाई टीका र सगुन ज्यूनार ग
राउने

माथीसवारीहुदा वत्तिसमेत लैजाने ....
ढोकामा धानमाथीवाल्नेको ७ वटा वत्ति डुल्न
हीवाट गोडाले निभाउदै माथी सवारीहुने ..
धर्मगाठो फुकाउने - - - . . . .

पाथीभर्ने

पाथीभरेको रुपैञा लगी ढुकुटीमा राख्ने

मुखहेर्ने

ढोगभेटगर्ने

शिलापूजा

दीप प्रार्थना -

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥
दीपनाथाय नमः ॥

वरुण प्रार्थना -

वरुणत्वं महाभाग सर्वदेव प्रपूजितः ।
वितते मम यज्ञेस्मिन् नविघ्नंकुरु सर्वदा ॥
वरुणाय नमः ॥

गणेश प्रार्थना -

वक्रतुण्ड महाकायकोटिसूर्य समप्रभः ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
गणेशाय नमः ॥

ब्रह्मा प्रार्थना-

ॐ त्वमेकं शरण्यं त्वमेकं वरेण्यम्
त्वमेकं जगत्कारणं विश्ववन्द्यम् ।
त्वमेकं जगत्कर्तृ पातृ प्रहर्तृ
त्वमेकं परं निश्चलं निर्विकल्पम् ॥

ब्रह्मणे नमः ॥

विष्णु प्रार्थना-

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

विष्णवे नमः ॥

महेश्वर प्रार्थना –

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणम्
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ॥
वन्दे सूर्य शशाङ्क वह्निनयनं वन्दे मुकुन्द प्रियम्
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवंशङ्करम् ।

महेश्वराय नमः ॥

दक्षिणा संकल्पः -

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः मीन राशिः देवेन्द्रवीरविक्रम वर्मा अहं मम शिलापूजनकर्मणि दीप कलश गणेश संपूजन पुरःसरं शिलायां ब्रह्म विष्णु महेश्वर पूजनकर्मणः साङ्गता सिद्धये इमां दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं ज़त्ने समुत्सृजे; तत्सन्नमम

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा

ग्रहदानम्

देवद्रव्याय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः कन्या राशिः पैशालवीरविक्रम वर्मा अहं मम. वर्षवृद्धौ जन्मोत्सवकर्मणि जन्मलग्नात् २ वर्षलग्नात् १२ गोचरात् १ स्थानस्थितेन चन्द्रग्रहेण सूचित सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये चन्द्रग्रहप्रीतये तण्डुलान्नं प्रजापतिदेवताकं. दधि सर्वदेवताकं. वंशपात्रं विश्वकर्मदेवताकं. शंखं समुद्रदेवताकं. श्रीखण्डं गन्धर्वदेवताकं. कर्पूरं गन्धर्वदेवताकं. श्वेतवस्त्रं बृहस्पतिदेवताकं. राजतचन्द्रबिंबं चन्द्रदेवताकं मौक्तिकं समुद्रदेवताकं. तथा-

जन्मलग्नात् ११ वर्षलग्नात् ६ गोचरात् ६ स्थानस्थितेन भौमग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयाप्तये भौमग्रहप्रीतये गोधूमान्नं प्रजापतिदेवताकं. मसूरान्नं प्रजापतिदेवताकं. गुडं अब्देवताकं. ताम्रं सूर्यदेवताकं. रक्तचन्दनं वनस्पतिदेवताकं. रक्तवस्त्रं बृहस्पतिदेवताकं. रक्तवृषभं

रुद्रदेवताकं· सुवर्णं वह्निदेवताकं· प्रवालं समुद्रदेवताकं· तथा-

जन्मलग्नात् १२ वर्षलग्नात् ८ गोचरात् ८ स्थानस्थितेन बुधग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये बुधग्रहप्रीतये· मुद्गान्नं प्रजापतिदेवताकं· घृतं मृत्युञ्जयदेवताकं· कांश्यपात्रं विश्वकर्मदेवताकं· हस्तिदन्तं विष्णुदेवताकं· नीलवस्त्रं बृहस्पतिदेवताकं· सुवर्णं वह्निदेवताकं· पञ्चरत्नं समुद्रदेवताकं· तथा-

जन्मलग्नात् ७ वर्षलग्नात् १२ गोचरत् १२ स्थानस्थितेन शनिग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये शनिग्रहप्रीतये· तिलान् सोमदेवताकान्· तैलं भैरवदेवताकं· माषान्नं प्रजापतिदेवताकं· कुलत्थान्नं प्रजापतिदेवताकं· लोहं यमदेवताकं· नीलवस्त्रं बृहस्पतिदेवताकं· सुवर्णं वह्निदेवताकं· महिषीं यमदेवताकं· नीलमणिं समुद्रदेवताकं· तथा-

जन्मलग्नात् १२ वर्षलग्नात् ७ गोचरात् ७ स्थानस्थितेन राहुग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये राहुग्रहप्रीतये· तिलान् सोमदेवता

कान्. तैलं भैरवदेवताकं. माषान्नं प्रजापतिदेवताकं. लोहं यमदेवताकं. कृष्णावस्त्रं बृहस्पतिदेलताकं. सुवर्णं वन्हिदेवताकं. कृष्णमेषं वायुदेवताकं. गोमेदरत्नं समुद्रदेवताकं. तथा-

जन्मलग्नात् ६ वर्षलग्नात् १ गोचरात् १ स्थानस्थितेन केतुग्रहेण सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये केतुग्रहप्रीतये तिलान् सोमदेवताकान्. माषान्नं प्रजापतिदेवताकं. तैलं भैरवदेवताकं. लवणं समुद्रदेवताकं. खड्गं भैरवदेवताकं. धूम्रवस्त्रं बृहस्पतिदेवताकं. सुवर्णं वन्हिदेवताकं. अजं वन्हिदेवताकं. वैदूर्यमणिं समुद्रदेवताकं. तथा-

योगिनीदशायां भ्रामरीमध्ये उल्कायोगिन्या सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये उल्कायोगिनीप्रीतये. ताम्रपात्रं विश्वकर्मदेवताकं. घृतं मृत्युञ्जयदेवताकं. मधुयक्षदेवताकं. शर्करां सोमदेवताकां. पट्टवस्त्रं बृहस्पतिदेवताकं. सवत्सां सालंकारां गां रुद्रदेवताकां. तथा-

वर्षलग्नात् ७ स्थानस्थितया मुन्थया सूचितसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये मुन्थाप्रीतये ताम्रपात्रं विश्वकर्मदेवताकं. घृतं मृत्युञ्जयदेवताकं. मधुयक्षदेव

ताकं· शर्करां सोमदेवताकं· पट्टवस्त्रं बृहस्पतिदेवता
कं· नानानाम गोत्रेभ्यो
नानानाम शर्मभ्यो ब्राह्मणेभ्यो दातुं जले समु
त्सृजे, तत्सन्न मम·

प्रार्थना –

इमं देवा असपत्नँ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय मह
जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै
विश एष वोमी राजा सोमोस्माकं ब्राह्मणानाँ राजा ॥
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाँरेताँसि
जिन्वति ॥

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सँ सृजेथाम
यञ्च । अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च
सीदत ॥

शन्नोदेवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः
कयानश्चित्र आभुवदूतीः सदा वृधः सखा । कया शचिष्ठया वृता
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुखाद्भिरजायथाः
अम्बे अम्बिके म्बालिके नमानयति कश्चन । ससस्त्यश्वकः सु

भद्रिकां काम्पीलवासिनीम् ॥

दानप्रतिष्ठा-

अद्यह्नेतितत्- चन्द्र·भौम·बुध·शनि·राहु·केतु·उल्का·मृत्यु-प्रीतये तत्तद्द्रव्यदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं जले समुत्सृजे. तत्सन्न मम·

जपपाठादिसंकल्पः -

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः कन्याराशिः पेशलवीरविक्रम वर्मा अहं मम वर्षवृद्धौ जन्मोत्सवकर्मणि अशुभस्थानस्थित ग्रहयोगिनीजनितसकलारिष्टशान्तिपूर्वक शुभस्थानावस्थितिजन्यशुभफलप्राप्तये चन्द्रग्रहप्रीतये एकादशसहस्रसंख्याक चन्द्रवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति चन्द्रस्तोत्रपाठकर्म, तथा- भौमग्रहप्रीतये दशसहस्रसंख्याक भौमवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति भौमस्तोत्रपाठकर्म, तथा- बुधग्रहप्रीतये अष्टसहस्रसंख्याक बुधवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति बुधस्तोत्रपाठकर्म, तथा- शनिग्रहप्रीतये त्रयोविंशतिसहस्रसंख्याक शनिवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति शनिस्तोत्रपाठकर्म, तथा- राहुग्रहप्रीतये अष्टादशसहस्रसंख्याक राहुवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति राहुस्तोत्रपाठकर्म· तथा- केतुग्रहप्रीतये सप्तसहस्रसंख्याक केतुवैदिकमन्त्रजपकर्म· अशीत्यधिकशतावृत्ति केतुस्तोत्रपाठकर्म; तथा- उल्कायोगिनी-प्रीतये सप्तविंशतिसहस्रसंख्याक उल्कावैदिकमन्त्रजपकर्म· अशी

त्याधिकशतावृत्ति उल्कास्तोत्रपाठकर्म; तथा - मुन्थायोगिनीप्रीतये सप्तविंशतिसहस्रसंख्याक मुन्था वैदिकमन्त्रजपकर्म. अष्टोत्त्याधिकशतावृत्ति मुन्थास्तोत्र पाठकर्म; तथा - अकालमृत्युनिवारणार्थं मृत्युञ्जयदेवताप्रीतये अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं दशब्राह्मणद्वारा कोटिसंख्याक मृत्युञ्जयतान्त्रिकमन्त्रजपकर्म. तथा - आयुरारोग्यवृद्ध्ये सदाशिवदेवताप्रीतये अद्यारभ्य आगामिजन्मोत्सवदिवस पर्यन्तं प्रतिदिनं शतसंख्याक पार्थिवलिङ्ग पूजनपूर्वकं एकसहस्रसंख्याक मृत्युञ्जय वैदिकमन्त्र जपकर्म. एकावृत्ति मृत्युञ्जयस्तोत्रपाठकर्म; तथा - नवग्रहप्रीतये नवग्रहपूजनपूर्वकं अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्रतिदिनं शतसंख्याक नवग्रहतान्त्रिकमन्त्रजपकर्म, तथा - सर्वारिष्टशान्तिद्वारा अल्पमृत्युनिवारणपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीमृत्युञ्जयदेवताप्रीतये अद्यारभ्य आगामि जन्मोत्सवदिवसपर्यन्तं प्रतिशुक्लपक्षभौमां शतावृत्ति मृत्युञ्जयस्तोत्रपाठकर्म; तथा - सर्वसुखावाप्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीभद्रकालीदेवताप्रीताप्रीतये, तन्मन्दिरे अद्यारभ्य आगामिजन्मोत्सवदिवसपर्यन्तं प्र

तिदिनं शोरणागतेति मन्त्रेण एकावृत्ति सप्तशति स्तोत्र संपुटितकर्म· तथा- अशुभस्थानस्थित ग्रहयोगिनीजनित सकलारिष्टशान्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीमहाकाल देवताप्रीतये· तन्मन्दिरे अद्यारभ्य आगामि जन्मोत्सव दिवसपर्यन्तं प्रतिदिनं एकसहस्रसंख्याक वैदिक मन्त्र जपकर्म, तथा-

एतत्स्थूलदेहाधिकरणक नानाविध व्याधिप्रशमनपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये काशिस्थ विश्वेश्वर देवताप्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवसपर्यन्तं प्रतिदिनं एकावृत्ति रुद्राध्याय पाठकर्म· विश्वेश्वर संपूजन कर्म· च· तथा- विविध विभूतिनैकज्योदयपूर्वकं अल्पमृत्यु निवारणार्थं श्रीअल्पमृत्युहरेश्वर देवताप्रीतये अद्यारभ्य आगामि जन्मोत्सव दिवसपर्यन्ते प्रतिदिनं श्रीअल्पमृत्युहरेश्वर संपूजन दधिचिपिटान्न समर्पण पुरःसरं एकावृत्ति रुद्राध्याय पाठकर्म· तथा- आयुरारोग्याभिसिद्ध्यर्थं वैद्यनाथ देवताप्रीतये ब्राह्मणानीत गङ्गाजलेनाभिषेकपूर्वकं रुद्राध्याय पाठकर्म· संपूजन कर्म च· तथा-

सकलारिष्टशान्तये अद्यारभ्य आगामि जन्मोत्सवदिवसपर्यन्तं प्रतिदिनं अश्वत्थवृक्षोपरि जलार्पणकर्म· तथा-

मृत्युञ्जयदेवताप्रीतये एकावृत्तिमृत्युञ्जयस्तोत्रपाठकर्म· गणे
शदेवताप्रीतये एकावृत्तिगणेशसहस्रस्तोत्रपाठकर्म· सूर्यदे
वताप्रीतये एकावृत्तिआदित्यहृदयस्तोत्रपाठकर्म· विष्णुदेव
ताप्रीतये एकावृत्तिविष्णुसहस्रनामस्तोत्रपाठकर्म· शिवदेव
ताप्रीतये एकावृत्तिशान्तिकाध्यायपाठकर्म· पुरुषसूक्तपाठ
कर्म च, तथा- सकलसंपत्समृद्धिद्वारा सकलकामनासि
द्धये अद्यारभ्यआगामिजन्मोत्सवदिवसपर्यन्तं श्रीस्वेष्टदेवता
प्रीतये पञ्चाङ्गपाठ संपूजनकर्म· च· तथा- साम्बसदाशि
वदेवताप्रीतये· अद्यारभ्य आगामि जन्मोत्सवदिवसपर्यन्तं प्रति
दिनं एकावृत्तिशतरुद्रीमन्त्रपाठेनाभिषेककर्म· तथा-
श्रीसाम्बसदाशिवदेवताप्रसाददीर्घायुरारोग्यानन्दा
दिशुभफलावाप्तये ब्राह्मणद्वारा अविच्छिन्नजलधारया श
तरुद्रियमन्त्रै लघुरुद्राध्याय पाठकर्म· तथा- महाकाली-
महालक्ष्मी- महासरस्वती- देवताप्रसादात्. भूत·प्रेत·पिशाचा
दिजनित विघ्नबाधाभयनिवृत्तिपूर्वकदीर्घायुरारोग्यैश्वर्याद
द्यावाप्तये नवब्राह्मणद्वारा नवावृत्ति सप्तशती स्तोत्रपाठकर्म
करिष्ये, करिष्यमाण तत्तज्जपपाठादि कर्मणः साङ्गतासि

अद्ये इदं रजतं चन्द्रदैवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं अहं समुत्सृजे तत्सन्न मम.

जलपूर्णघटदानम् ·

१ काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा · अमुकीदेवी अहं
मम · ब्रह्माण्डदानजन्यफलप्राप्तिपूर्वक श्रीराधिकासहितपु
रुषोत्तमनारायणप्रीतये · इदं जलपूर्णघटं वरुणदेवता
कं यथानामगोत्राय यथानाम शर्मणे ब्राह्मणाय दास्ये ०
प्रार्थना · जलपूर्णघटो दत्तो ब्रह्मविष्णुशिवात्मकः · अस्यप्र
दानात्सकला मम सन्तु मनोरथाः अद्यकृतैतत् · जलपूर्णघ
दानकर्मणः प्रतिष्ठासांगतासिद्ध्यर्थं इदं रजतं चन्द्रदेवताकं यथ
नामगोत्राय यथानाम शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ०

घृतपूर्णघटदानम् ·

२ काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा · अमुकीदेवी
अहंमम · सूर्यलोकप्राप्तिपूर्वक श्रीराधिकासहितपुरुषोत्तमनारायण
प्रीतये इदं घृतपूर्णकलशं वरुणदेवताकं यथानामगोत्राय यथानाम
शर्मणे ब्राह्मणाय ददास्ये ० प्रार्थना · घृतपूर्णघटो दत्तो ब्रह्मविष्णुशि
वात्मकः · अस्यप्रदानात्सकला मम सन्तु मनोरथाः · अद्यकृतैतत् ·
घृतपूर्णघटदानकर्मणः साङ्गुण्यसिद्ध्यर्थे इदं रजतं चन्द्रदेवता
कं यथानाम शर्मणे ब्राह्मणाय दास्ये ०

४ गोदानम् ·

काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा · अमुकीदेवी
अहं मम · श्रीराधिकासहितपुरुषोत्तमप्रसादतः सकलपाप
नाशनपूर्वकं ब्रह्मलोकावाप्तये उमां गां रुद्रदेवताकां नन्दि

ष्क्रयीभूतंरजतंचन्द्रदेवताकंयथानामशर्मणेब्राह्मणायदास्ये
प्रार्थना· यज्ञसाधनभूतायाविश्वस्याघप्रणाशिनी· विश्वरू
पधरोदेवः प्रीयतामनयागिरा· अद्यकृतैतत्· गोनिष्क्रयीभू
तरजतदानकर्मणः प्रतिष्ठार्थंइदंरजतंचन्द्रदेकंयथाना

1 ब्राह्मणभोजनसंकल्पः

काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा· अमुकीदेवी
अहंमम· श्रीराधिकासहितपुरुषोत्तमनारायणप्रीतये· सि
द्धान्नेन त्रयस्त्रिंशसंख्याकब्राह्मणान्· भोजनकर्मकरि
ष्ये· करिष्यमाणभोजनकर्मणः प्रतिष्ठासांगतासिद्ध्य
र्थंरजतंचन्द्रदेवताकं नानानामगोत्रेभ्योनानाप्रव
रेभ्योब्राह्मणेभ्योवरणपूर्वकदक्षिणांदातुमुत्सृजे॰

2 तिलदानसंकल्पः

काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ......
....देवी अहंमम. श्रीराधिकासहितपुरुषोत्तमनारायण
णप्रीतिद्वारा सकलपापक्षयपूर्वक तिलसमसहस्र
वर्षपर्यन्त स्वर्गलोकवासकामनया· तिलान् सोम
देवताकान्· यथानाम गोत्राय शर्मणे ब्राह्मणाय
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ॥
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

वस्त्रहोमः ॥

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ॥
समाववर्ति पृथिवी समुषाः समुसूर्यः समुविश्वमिदं जगत् ॥
वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नावै भूः स्वाहा ॥

चरुहोमः॥

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ॥
व्रतञ्च श्रद्धां चोपैमीन्धेत्वादीक्षितो अहम् ॥ स्वाहा ॥

घृतच्छाया ॥

ससुवर्णघृतकांश्यपात्राय नमः ॥

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया ॥

अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितिः ॥
तत्सर्वं शमयाज्यत्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

अद्येह काश्यपगोत्राः काश्यपावत्सार नैध्रुवेति त्रिप्रवरा[redacted]ण शिः .... देवी अहं मम [redacted] दीर्घायुरारोग्यावाप्तये इदं अवलोकिताज्यं मृत्युञ्जयदेवताकं कांश्यपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना ॥

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ॥
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत् आज्यकांश्यपात्रसुवर्णदानकर्मणः प्रतिष्ठार्थं

इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे
ब्राह्मणाय तुभ्यं संप्रददे ॥

यज्ञान्तगोदानम् ॥

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥

गोनिष्क्रयरजतद्रव्याय नमः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरा [redacted] राशिः देवी
अहं मम [redacted] दीर्घायुरारोग्यैश्वर्योद
याद्यवाप्तये कृतस्य दीपकलश गणेश मातृका ग्रह वास्तु [redacted]
[redacted] तुलादेवता पूजनहवनदान [redacted] आदि कर्म
णः साङ्गफलप्राप्तये न्यूनातिरिक्त परिपूर्णार्थं इदं गोनिष्क्र
यीभूतं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे
ब्राह्मणाय तुभ्यं संप्रददे ॥

प्रार्थना ॥

कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयीयस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रति

ष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे
ब्राह्मणाय तुभ्यं संप्रददे ॥

कन्या

ॐ मन्त्राक्षर ।रूपधारिणीम्
नवदुर्गात्मि पूजयाम्यहम् ॥
आवाहनं सम :॥ पाद्यं समर्पयामि क
न्यायै नमः । र्पयामि कन्यायै नमः॥
वस्त्रं समर्पय ॥गन्धं समर्पयामि कन्या
यै नमः॥ अ न्यायै नमः ॥पुष्पं समर्प
यामि कन्यायै र्पयामि कन्यायै नमः ॥
धूपं आघ्रापय दीपं दर्शयामि कन्यायै नमः
दक्षिणां समर्प :॥

जगत्पूज्ये ज स्वरूपिणि ॥
पूजां गृहाण तर्नमोस्तु ते ॥
पुष्पाञ्जलिं । नमः॥

ब्राह्मणभोजनभूयसी ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे ॥

देयद्रव्याय नमः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा [redacted] राशिः
.... देवी अहं मम वर्ष [redacted] सकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये कृतस्य दीप कलश गणेश मातृका ग्रह वास्तु [redacted] रजतादि तुलादेवतापूजन हवनदान [redacted] देकर्मणः न्यूनातिरिक्तपरिपूर्णार्थं तथा श्रीपरमेश्वरप्रीतये [redacted] रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो होमदक्षिणात्वेन भोजनदक्षिणात्वेन भूयसीदक्षिणात्वेन च यथाभागं विभज्य दातुं समुत्सृजे ॥ तत्सन्न मम ॥

अभिषेकः ॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः
शान्तिः ॥वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः
सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥पश्येम शरदः शतञ्जी
वेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतं भूयश्च शरदः श
तात् ॥ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥विश्वा
नि देवसवितर्दुरितानि परासुव ॥यद्भद्रन्तन्न आसुव ॥
शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु ॥ यत्पापं रोगः
शोको दुखं दारिद्र्यं तत्प्रतिहतमस्तु ॥ द्विपदेभ्यश्चतुष्पदेभ्यः
शान्तिर्भवतु अमृताभिषेकोस्तु ॥

आशिर्वादमन्त्राः॥

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामेनः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमोनः कल्पताम्॥ दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम्॥ अथोत्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ पुनस्त्वा दित्या रुद्रावसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ जज्ञैः॥ घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः॥ मनसः काममाकूतिं वाचः सत्यमशीय॥ पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

रक्षावन्धनमन्त्रः॥

येन वद्धो वली राजा दानवेन्द्रो महावलः॥
तेन त्वां प्रतिवध्नामि रक्षे मा चल मा चल ॥

तिलकमन्त्रः॥

त्र्यायुषञ्जमदग्नेः ललाटे ॥ कश्यपस्य त्र्यायुषम्
ग्रीवायाम् ॥ यद्देवेषु त्र्यायुषम् दक्षवाहुमूले ॥
तन्नोऽअस्तु त्र्यायुषम् हृदि ॥

प्रसादमन्त्रौ

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ॥
धान्यं धनं पशून्बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः
अव्याधिना शरीरेण मनसा च निराधिना ॥
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥

ततो मण्डपदानम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा: [illegible] राशिः ……… देवी अहं मम [illegible] श्रुतिस्मृत्तिपुराणोक्तफलावाप्तिद्वारा एतत्स्थूलशरीरोत्पन्नत्रिधातुवैषम्यजनितसमस्तरोगादिसकलारिष्टशान्तिपूर्वकदीर्घायुरारोग्यैश्वर्योदयावाप्तये कृतरजतादितुलादानकर्मणि तत्तद्देवतास्थापनपूजनहवनादिकर्मसंपत्तये विनिर्मितमिदं ध्वजपताकादिमण्डितं सुपूजिततत्तद्देवप्रतिमासनाथं सपरिच्छदं मण्डपं विश्वकर्मदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय आचार्याय तुभ्यं संप्रददे ॥

प्रार्थना ॥

नमोनमस्ते गोविन्द पुराणपुरुषोत्तम
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत् रजतादितुलादानाङ्गसपरिच्छदमण्डपदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय आचार्याय दानप्रतिष्ठात्वेन तुभ्यं संप्रददे ॥

सतिसंभवे. सालंकारगोदानम्.

अंजलिं वध्वा.

यंस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु.
न्यूनं संपूर्णतां याति सद्यो वन्देत मच्युतम्।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च.
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः.

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा
प्रकृतिस्वभावात. करोमि यद्यत्सकलं पर:
स्मै नारायणायेति समर्पयामि.

अच्युतायनमः ३

श्रीगणेशाय नमः॥ ॥

अथ सुवर्णतुलापुरुषमहादानप्रयोगः-

प्रायश्चित्तगोदान

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

सवत्सायै गवे नमः ।

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम श्रीपरमेश्वरप्रीतिपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तये करिष्यमाणसुवर्णतुलापुरुषमहादानकर्मणि पूर्वकर्तव्यनियमानाचरणजन्यप्रत्यवायपरिहारपूर्वकं सद्यो देहशुद्धिद्वारा तत्कर्माधिकारसिद्धये प्रायश्चित्तप्रत्याम्नायीभूतां सालङ्कारां सवत्सां इमां गां रुद्रदेवताकां .... गोत्राय .... शर्मणे आचार्याय तुभ्यं संप्रददे. तत्सन्न मम. ॥

प्रार्थना-

Nepal Sanskrit University, Balmeeki Campous, Kathmandu

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् प्रायश्चित्तप्रत्याम्नायीभूतसालङ्कारसवत्सगोदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… शर्मणे आचार्याय तुभ्यं संप्रददे· तन्मन्न मम ।
ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्भूमौ प्रतिहतमस्तु अमृताभिषेको स्तु ॥

प्रतिज्ञासङ्कल्पः—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ……… ……… देवी अहं मम सकलपापक्षयानन्तर प्रतिलोकपालपदेषु· एकैकमन्वन्तरपर्यन्तं निवासोत्तरार्कवर्णकिङ्किणीजालमालिविमानाधिरोहणपूर्वकं अप्सरोगणसंसेव्यमाना

त्मकर्तृकविष्णुलोकगमनोत्तरं कल्पकोटिशतावच्छिन्नसमयपर्यन्तं विष्णुपुरनिवासोत्तरमेहलौकिकाखिलभूपालमौलिमणिरञ्जितपादपीठ श्रद्धान्वितयज्ञसहस्रयाजित्व प्रदीप्तप्रतापजितमहीपलोकराजराजत्वभवनपुरःसरं श्रीपरमेश्वरप्रीतये सुवर्णतुलापुरुषमहादानकर्म करिष्ये. ॥

स्वस्तिवाचनम् ।

ततो दीपकलशगणेशपूजा ॥

दीपपुष्पाञ्जलिः-

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनाथाय नमः ।

कलशपुष्पाञ्जलिः-

ॐ देवदानवसंवाधे मथ्यमाने महोदधौ ।
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवा सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भवः ॥
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥

वरुणकलशाय नमः ॥

गणेशपुष्पाञ्जलिः—

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभः ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

सिद्धिबुद्धिसहितगणाधिपतये नमः ।

मण्डपप्रवेशः—

अथ शङ्खघण्टावादन- मङ्गलमन्त्रपठनपूर्वकं दीपकलशगणेशान्धृत्वा मण्डपं त्रिः प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविशेत् ॥

अथ मातृकापूजन-नान्दीश्राद्ध-ग्रहवास्तुमंडपदेवतापूजन-ध्वजपताकोच्छ्रयण-षोडशारचक्रदेवतापूजन-तुलादेवतापूजनाधिवासनपुरःसरं सुवर्णाधिवासनं तथा स्वगृह्योक्तप्रकारेण अग्निप्रज्वालनपूर्वकं पूजितदेवानां हवनादिकर्म च ब्राह्मणद्वारा कारयेत ॥

अञ्जलिं वध्वा.

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ।
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां समे विष्णुः प्रसीदतु ॥

उत्तरदिने

तुलादिवसे कृतनित्यक्रियः कर्ता मण्डपदेशमागत्य देवान्संपूज्य प्रार्थयेत् ॥

दीपप्रार्थना-

नमो स्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनाथाय नमः ।

कलशप्रार्थना-

देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥

सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

वरुणकलशाय नमः ।

गणेशप्रार्थना–

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणाधिपतये नमः ।

मातृप्रार्थना–

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥

मातृभ्यो नमः ।

ग्रहप्रार्थना–

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः ।

वास्तुप्रार्थना-

वास्तुदेव नमस्तेस्तु भूमिशय्यारत प्रभो ।
मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा ॥

वास्तोष्पतये नमः ।

अग्निप्रार्थना-

अग्निं प्रज्वलितं वन्दे जातवेदं हुतासनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम्भ ॥

अग्नये नमः ।

इन्द्रप्रार्थना-

एह्येहि सर्वामरसिद्धसाध्यै
रभिष्टुतो वज्रधरामरेश ।
संवीज्यमानोप्सरसां गणेन
रक्षाध्वरं नो भगवन् नमस्ते ॥

इन्द्राय नमः ।

अग्निप्रार्थना-

एह्येहि सर्वामरहव्यवाह
मुनिप्रवीरैरभितोऽभिजुष्टः ।
तेजोवतां लोकगणेन सार्द्धं
ममाध्वरं पाहि कवे नमस्ते ॥

अग्नये नमः ॥

यमप्रार्थना–

एह्येहि वैवस्वत धर्मराज
सर्वामरैरर्चित धर्ममूर्त्ते ।
शुभाऽशुभानन्द शुचामधीश
शिवाय नः पाहि मखं नमस्ते ॥

यमाय नमः ॥

निर्ऋति प्रार्थना–

एह्येहि रक्षोगणनायकस्त्वं
विशालवेताल पिशाचसङ्घैः ।
ममाध्वरं पाहि पिशाचनाथ
लोकेश्वरस्त्वं भगवन् नमस्ते ॥

निर्ऋतये नमः ॥

वरुणप्रार्थना–

एह्येहि यादोगणवारिधीनां
गणेन पर्जन्य सहाप्सरोभिः ॥
विद्याधरेन्द्रामरगीयमानः
पाहि त्वमस्मान् भगवन् नमस्ते ॥

वरुणाय नमः ॥

वायुप्रार्थना–

एह्येहि यज्ञे मम रक्षणाय
मृगाधिरूढः सह सिद्धसंघैः ।
प्राणाधिपः कालकवेः सहाय
गृहाण पूजां भगवन् नमस्ते ॥

वायवे नमः ॥

कुबेरप्रार्थना–

एह्येहि यज्ञेश्वर यज्ञरक्षां
विधत्स्व नक्षत्रगणेन सार्धं ।
सर्वौषधीभिः पितृभिः सहैव
गृहाण पूजां भगवन् नमस्ते ॥

कुबेराय नमः ॥

ईशानप्रार्थना–

एह्येहि यज्ञेश्वर न स्त्रिशूल
कपालखट्वाङ्गधरेण सार्धम् ।
लोकेश यज्ञेश्वर यज्ञसिद्ध्यै
गृहाण पूजां भगवन् नमस्ते ॥

ईशानाय नमः ॥

अनन्तप्रार्थना–

एह्येहि पातालधरामरेन्द्र
नागाङ्गनाकिन्नरगीयमानः ।
यक्षोरगेन्द्रामरलोकसंघैः
रनन्त रक्षाध्वरमस्मदीयम् ॥

अनन्ताय नमः ॥

ब्रह्मप्रार्थना–

एह्येहि सर्वाधिपते सुरेन्द्र
लोकेन सार्द्धं पितृदेवताभिः ।
सर्वस्य धातास्यमितप्रभावो
विशाध्वरं नः सततं शिवाय ॥

ब्रह्मणे नमः ॥

ततः ऋत्विजः संपातकलशोदकेन यजमानं पौराणवैदिकमन्त्रैः अभिषिंचेयुः–

तत्रमन्त्राः–

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा॥
कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मति।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः।
आदित्यश्चन्द्रमा भौमो बुधो जीवसितार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः॥
ऋषयो मनवो गावो देवमातर एव च।
देवपत्न्यो दुमा नागा दैत्याश्चाप्सरसां गणाः॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।
ओषधानि च रत्नानि कालस्यावयवाश्च ये॥
शरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एतेत्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये॥

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ अश्विनो र्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ॥

सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामि ॥

इन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥

स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु ॥

विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवेत्वा ॥

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता विश्वेदेवा देवता वृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥

विश्वानि देवसवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥

यथेमां वाचङ्कल्याणी मावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्याꣳ शूद्रायाचार्याय च स्वाय चारणाय च ॥ प्रियोदेवानां दक्षिणाये दातुरिह भूयासमयं मे कामः समृद्ध्यताम् ॥

ततो यजमानः सर्वौषधीभिरनुलिप्य विभूतिं धारयेत् ॥

ततः पुष्पाञ्जलिं गृहीत्वा तुलां त्रिः प्रदक्षिणीकृत्य पश्चिमत उपविश्य प्रार्थयेत् ॥

तुलाप्रार्थना–

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ॥
एकतः सर्वसत्यानि तथाऽनृतशतानि च ।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिता ॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमो स्तुते ॥
यो सौ तत्वाधिपो देवः पुरुषः पञ्चविशकः ।
स एषो धिष्ठितो देवि त्वयि तस्मान्नमो नमः ॥

तुलायै नमः ॥

गोविन्दप्रार्थना–

नमो नमस्ते गोविन्द तुलापुरुषसंज्ञकः ।
त्वं हरे तारयस्वास्मानस्मात्संसारसागरात् ॥

गोविन्दाय नमः ॥

ततो दक्षिणहस्ते सूर्यं वामहस्ते धर्मराजं स्वाङ्के इष्टदेवतां गृहीत्वा· प्राङ्मुखः गोविन्दं पश्यन्·

तुलायां आरोहेत् ॥

तुलाधिष्ठात्रिदेवताप्रार्थना-

नमस्ते सर्वभूतानां साक्षीभूते सनातनि ।
पितामहेन देवि त्वं निर्मिता परमेष्ठिना ॥
त्वया धृतं जगत्सर्वं सहस्थावरजङ्गमम् ।
सर्वभूतात्मभूतस्थे नमस्ते सर्वधारिणि ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥
पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥
पवित्रेण पुनीहि मा शुक्रेण देवदीद्यत् ॥
अग्ने क्रत्वा क्रतूँ रनु ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ॥
ब्रह्म तेन पुनातु मा ॥
पवमानः सो अद्य नः पवित्रेण विचर्षणिः ॥
यः पोता स पुनातु मा ॥
उभाभ्यां देवसवितः पवित्रेण सवेन च ॥
मां पुनीहि विश्वतः ॥
वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ॥
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥

ततोवतीर्य तोलितसुवर्णे तुलसीपत्रं प्रक्षिप्य· कुशतिलजलान्यादाय· ॥

संकल्पः-

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ………… ……………………देवी अहं मम· सकलपापक्षयानन्तरं प्रतिलोकपालपदेषु एकैकमन्वन्तरपर्यन्तं निवासोत्तरार्कवर्णकिङ्किणीजालमालिविमानाधिरोहणपूर्वकं अप्सरोगणसंसेव्यमान आत्मकर्तृकविष्णुलोकगमनोत्तरं कल्पकोटिशतावच्छिन्नसमयपर्यन्तं विष्णुपुरनिवासोत्तरमैहलौकिकाखिलभूपालमौलिमणिरञ्जितपादपीठ श्रद्धान्वितयज्ञसहस्रयाजित्व प्रदीप्तप्रतापजितमहीपलोकराजराजत्वभवनपुरःसरं श्रीपरमेश्वरप्रीतये इदं आत्मसमतोलितं सुवर्णं अग्निदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्य आचार्यब्रह्मसदस्यगणेशहोतृत्विग्ज्ञापकद्वारपालपीचारकेभ्य अन्येभ्यो द्विजेभ्यः दीनानाथेभ्यश्च यथाभागं विभज्य दातुं जले समुत्सृजे· तत्सन्न मम·।

प्रार्थना–

यथा पवित्रमतुलमपत्यं ज्ञातवेदसः ।
तथा त्वेन पवित्रेण सुवर्णं हि पुनातु माम् ॥
रुद्रस्य तु महत्तेजः कार्त्तिकेयस्य संभवः ।
पवित्रत्वाद्यथा देवैः शिरसा धार्यते सदा ॥
यथाग्निदेवता सर्वा सुवर्णं च तदात्मकम् ।
यत्कृतं मे स्वकायेन मनसा वचसा तथा ॥
दुष्कृतं तत्सुवर्णस्य दानात् यातु जनार्दन ॥

दान प्रतिष्ठा–

अद्यकृतैतत् आत्मसमतोलित सुवर्णतुलापुरुषमहा
दानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदैवतं ......
......गोत्राय .... शर्मणे आचार्याय तुभ्यं सं
प्रददे. तत्सन्न मम. ॥
ततो भूमिदानम्.

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा
....देवी अहं मम.
श्रीपरमेश्वरप्रीतये कृतस्य सुवर्णतुलापुरुषमहादान

कर्मणो न्यूनातिरिक्तपरिपूर्णार्थं इमां ...... परिमि
तां भूमिं वराहदेवताकां .... गोत्राय ....
.... शर्मणे ~~ब्राह्मणाय~~ आचार्याय संप्रददे.

प्रार्थना-

सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तसस्यफलदा ह्यतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् भूमिदानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं .... गोत्राय .... शर्मणे आचार्याय तुभ्यं संप्रददे. तत्सन्न मम. ॥

ततो रत्नदानम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम. श्रीपरमेश्वरप्रीतये कृतस्य आत्मसमतोलितसुवर्ण तुलापुरुषमहादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये

इमानि यथासंख्याकानि मौक्तिकानि समुद्रदेवताकानि ……… गोत्राय ………… शर्मणे आचार्याय संप्रददे·

प्रार्थना-

रत्नानि सर्वदेवानां प्रियाणि सारवन्ति च ।
अतस्तेषां प्रदानेन मम सन्तु मनोरथाः ॥

दानप्रतिष्ठा-

अद्यकृतैतत् यथासंख्याक मौक्तिकरत्नदानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्नि देवताकं ……… गोत्राय ………… शर्मणे आचार्याय तुभ्यं संप्रददे· नत्सन्न मम· ॥

ननो गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

सवत्सायै गवे नमः ॥

नमो ब्रह्मदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम श्रीपरमेश्वरप्रीतये कृतस्य आत्मसमतोलितसुवर्णतुलापुरुषमहादानकर्मणः साद्गुण्यार्थं इमां सालङ्कारां सवत्सां गां रुद्रदेवताकां .... गोत्राय .... शर्मणे आचार्याय संप्रददे.

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा-

अद्यकृतैतत् सालङ्कार सवत्स गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्र देवताकं .... गोत्राय .... शर्मणे आचार्याय संप्रददे. तत्सन्न मम. ॥

ॐ शान्तिरस्तु. पुष्टिरस्तु. वृद्धिरस्तु. यच्छ्रेय स्तदस्तु. यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्भूमौ प्रतिहतमस्तु. अमृताभिषेकोस्तु. ॥

ततः पूर्णपात्रदानम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा
…………… ……………………………… देवी अहं मम·
श्रीपरमेश्वरप्रीतये आत्मसमतोलितसुवर्णतुलापुरुष
महादानकर्मणि कृतस्य हवनकर्मणः अपूर्णपूर्णार्थं
पूर्णपात्रं प्रजापतिदेवताकं ……… गोत्राय …………
शर्मणे ब्रह्मणे संप्रददे· तत्सन्न मम· ॥

प्रणीता विमोकः:-

ॐ सुमित्रियानऽआपऽओषधयः सन्तु· इति प्रणीताजलेन यजमानशिरोऽभिषिच्य;

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः॥ इति प्रणीतापात्रं ऐशान्यां न्युब्जीकुर्यात्·

वर्हिहोमः:-

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित ।
मनसस्पतऽइमन्देव यज्ञꣳ स्वाहा वातेधाः ॥

मेधा—

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिम्मेधा मयासिषᳪ स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

वस्त्रहोमः—

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ।
समाववर्ति पृथिवी समुषाः समुसूर्यः समुविश्वमिदं जगत् ।
वैश्वानरज्योति र्भूयासं विभून्कामा-व्यश्नवै भूः स्वाहा ॥

शेषचरुहोमः—

ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहं स्वाहा ॥

घृतच्छाया–

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभि र्भूयात् ॥ घृतेन द्यावा पृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥

अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रे व्यवस्थितम् ।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टीं च वर्द्धय ॥

ससुवर्ण घृतकांस्यपात्राय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम. श्रीपरमेश्वर प्रीतये कृतैतद आत्मसमतोलित सुवर्णतुलापुरुषमहादानकर्मणि इदं स्वमुखावलोकितं आज्यं मृत्युञ्जयदेवताकं कांस्यपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं .... गोत्राय .... शर्मणे आचार्याय संप्रददे. ।

प्रार्थना–

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्वृद्धिकरं दातु राज्यं पातु सदैव माम् ॥

आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् ।
आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ॥
आज्यपात्रप्रदानेन शान्तिरस्तु सदा मम ।

दानप्रतिष्ठा-

अद्यकृतैतत् अवलोकिताज्य सुवर्णकांश्यपात्रदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे आचार्याय संप्रददे· नन्म न्न मम·॥

यज्ञान्तगोदानम्-

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

सवत्सायै गवे नमः ।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ....देवी अहं मम·

श्रीपरमेश्वरप्रीतये कृतस्य आत्मसमतोलितसुवर्ण· तुलापुरुषमहादानकर्मणः तत्तद्देवतास्थापनपूजनहवनकर्मणश्च प्रतिष्ठासाङ्गतासिद्ध्यर्थं इमां सालङ्कारां सवत्सां गां रुद्रदेवताकां .... गोत्राय .... शर्मणे आचार्याय संप्रददे·

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥
यज्ञसाधनभूता या विश्वस्यान्नप्रदायिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

दानप्रतिष्ठा–

अद्यकृतैतत् सालङ्कार सवत्स गोदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे आचार्याय संप्रददे· तत्सन्न मम·॥

उत्तराङ्गपूजा–

भूयसीदक्षिणा-

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

रजतद्रव्येभ्यो नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम श्रीपरमेश्वरप्रीतये कृतस्य आत्मसमतोलितसुवर्णतुलापुरुषमहादानकर्मणो न्यूनातिरिक्तपरिपूर्त्तिपूर्वकसाद्गुण्यसिद्ध्ये इमां भूयसीदक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्योऽन्येभ्यश्च दातुं समुत्सृजे· तत्सन्न मम ॥

देवविसर्जनम्-

अभिषेकः

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्ति र्विश्वे देवाः शान्ति र्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पति र्दधातु ॥ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥

ॐ शान्तिरस्तु· पुष्टिरस्तु· वृद्धिरस्तु· यच्छ्रेयस्तदस्तु· यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु· द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्ति र्भवतु· अमृताभिषेकोऽस्तु॥

आशीर्वादमन्त्राः–

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य ज्यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ दीर्घायुस्त ऽओषधे खनिता यस्मै च त्वा खनाम्यहम् । अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्वं वर्धयस्व सत्या नः सन्तु यजमानस्य कामाः ॥ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

तिलकमन्त्रः—

त्र्यायुषञ्जमदग्नेः ललाटे ।
कश्यपस्य त्र्यायुषम् ग्रीवायाम् ।
यद्देवेषु त्र्यायुषम् दक्षबाहुमूले ।
तन्नो ऽअस्तु त्र्यायुषम् हृदि ।

प्रसाद मन्त्राः—

श्रीर्वर्चस्यमायुष्यमारोग्यमाविधा-पवमानं महीयते । धान्यं धनं पशून्बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥
भद्रमस्तु शिवं चास्तु महालक्ष्मी प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

ततो मण्डपदानम्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ………… ………………… देवी अहं मम श्रीपरमेश्वरप्रीतये आत्मसमतोलित

सुवर्णतुलापुरुषमहादानकर्मणि तत्रदेवतानां स्थापनपूजनहवनादिकर्मसंपत्तये रचितं ध्वजापताकामण्डितं सुपूजितगोविन्दप्रतिमायुतं सपरिच्छदं इदं मण्डपं विष्णुदेवताकं ....गोत्राय .... शर्मणे आचार्याय संप्रददे. तत्सन्न मम. ।

प्रार्थना—

नमो नमस्ते गोविन्दपुराणपुरुषोत्तम ।
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा—

अद्य कृतैतत् आत्मसमतोलितसुवर्णतुलापुरुषमहादानाङ्ग सपरिच्छद मण्डपदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे आचार्याय संप्रददे. तत्सन्न मम. ॥

अञ्जलिं बध्वा–

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु-
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः३॥

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥

हस्ते जलं गृहीत्वा–

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृत स्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥

सहस्रब्राह्मणभोजनसंकल्पः–

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रव
रा .... देवी अहं मम·

श्रीपरमेश्वरप्रीतये कृतस्य आत्मसमतोलितसुवर्णतुलापुरुषमहादानकर्मणः साङ्गुण्यार्थं मिष्टान्नेन सहस्रब्राह्मणभोजनकर्म करिष्ये; तत्करिष्यमाणसहस्रब्राह्मणभोजनकर्मणि· एभिश्चन्दनपुष्पाक्षतादिभिः सहस्रब्राह्मणान् वृणे· करिष्यमाणभोजनकर्मणः प्रतिष्ठार्थं इमां दक्षिणां

देवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यः सहस्रब्राह्मणेभ्यो दातुं समुत्सृजे· तत्सन्न मम·॥

स्नानसङ्कल्पः–

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा ……… ……………… देवी अहं मम आजन्मसंचित मनोवाक् कायकर्म जनित सकलपापक्षयपूर्वक कुरुक्षेत्रादिपुण्यतीर्थ स्नानसमफलावाप्तये अस्मिन् ……… तीर्थे सुवर्णतुलापुरुषमहादानकर्मणि वाग्मत्या जलेन स्नानं करिष्ये ॥

प्रार्थना–

नमामि गङ्गे तव पादपङ्कजं
सुरासुरैर्वन्दितदिव्यरूपम् ।
भुक्तिं च मुक्तिं च ददासि नित्यं
भावानुसारेण सदा नराणाम् ॥

ॐ वाग्मत्यै नमः ॥

६७

अथ

कर्मलो [illegible]

श्री गणेशाय नमः॥ [illegible]
ह्रीं आधारशक्तये कमलासनाय नमः॥ आसन-
मन्त्रस्य मेरुपृष्ठऋषिः सुतलं छन्दः कूर्मो देवता
आसनोपवेशने विनियोगः॥ पृथ्वी त्वया धृता लो-
का देवि त्वं विष्णुना [illegible] मां देवि त्वं
पवित्रं कुरु [illegible]॥ [illegible]
अपसर्पन्तु [illegible] भुविसंस्थिताः। ये भू-
ता विघ्न[illegible]
कत्वा [illegible]॥ [illegible]नमः। वि-
[illegible]॥ [illegible] नमः। [illegible]
[illegible] नमः॥ [illegible]

यामं कुर्यात् ॥ दक्षिणनासिकया श्वासं ग्रहनं कुर्वन् १६ वा
रं मूलमन्त्रं जपन् श्वासं निरुध्य ३२ वारं मन्त्रं ज
पुनः वामनासिकया श्वासं विसृजन् [illegible] वार मन्त्रं ज
पेत् ॥ इति प्राणायामः ॥ ॥ हस्ते जलं गृहीत्वा ॐ अ
स्य श्री दक्षिणकालिका [illegible] भैरव ऋषिः उ
ष्णिक् छन्दः कालिका [illegible] ॥ ह्रीं [illegible] शक्तिः क्रीं
कीलकं [illegible] विनियोगः
इति मन्त्रं [illegible] ॥ ततः [illegible] ॥ शिरसि
भैरव ऋषये नमः ॥ मुखे ॥ [illegible] हृदये
दक्षिणकालिकायै [illegible] ॥ [illegible] ह्रीं बीजाय
नमः ॥ [illegible] ॥ [illegible] ॥ सर्वाङ्गे क्रीं कील

काय नमः ॥०॥ करन्यासः ॥ क्रां अङ्गुष्ठाभ्यां नमः ॥
क्रीं तर्जनीभ्यां स्वाहा ॥ क्रूं मध्यमाभ्यां वषट् ॥ क्रैं अना-
मिकाभ्यां हुम् ॥ क्रौं कनिष्ठिकाभ्यां वौषट् ॥ क्रः
करतलकरपृष्ठाभ्यां नमः ॥ क्रः अस्त्राय फट् ॥०॥
देहन्यासः ॥ क्रां हृदयाय नमः ॥ क्रीं शिरसे स्वाहा
क्रूं शिखायै वषट् ॥ क्रैं कवचाय हुम् ॥ क्रौं नेत्र-
त्रयाय वौषट् ॥ क्रः अस्त्राय फट् ॥ ध्यानम् ॥
सद्यः छिन्नशिरः कृपाणमभयं हस्तैर्वरं बिभ्रतीम् ।
घोरास्यां शिरसां स्रजा सुरुचिरामुन्मुक्तकेशावलीम् ॥
सृक्कासृक्प्रवहां श्मशाननिलयां श्रुत्योः शवालङ्कृतिम् ।
श्यामाङ्गीं कृतमेखलां शवकरैर्देवीं भजे कालिकाम् ॥०॥

ततः शांतं सहस्रं वा जपं कृत्वा पश्चात् जपं समाप्य हस्ते जलं गृहीत्वा ॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवी त्वत्प्रसादान्महेश्वरी ॥ ० ॥ इत्युक्त्वा जलं देव्या वामहस्ते समर्पयेत् ॥ आत्मानं जलेनाभिषिञ्चेत् । समुद्रितेन ॥ ० ॥

अथ वक्ष्ये महेशानि कवचं सर्वकामदम् ॥
यस्य विज्ञानमात्रेण भवेत्साक्षात्सदा शिवः ॥१॥
नार्चनं तस्य देवेशि मन्त्रमात्रञ्जपेन्नरः ॥
सम्भवेत्पार्वतीपुत्रः सर्वशास्त्रविशारदः ॥२॥
विद्यार्थीनां सदा [illegible] विशेषतः ॥
धनार्थीनां [illegible] ॥३
अस्य श्री [illegible] भगवान्
ऋषिरनुष्टुप् [illegible] देवता [illegible]
ॐ [illegible] कवचं मम
[illegible] विनियोगः
॥०॥ [illegible] ॥

ऐँकारो मस्तके पातु वाग्भवा सर्वसिद्धिदा ॥
ह्रीँ पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शाङ्करी ॥४॥
जिह्वायां मुखवृत्ते च कर्णयोर्हन्तयोर्नसि ॥
ओष्ठाधरे दन्तपङ्क्तौ तालुमूले हनौ पुनः ॥५॥
पातु मां विष्णुवनिता लक्ष्मीः श्री विष्णुरूपिणी ॥
कर्णयुग्मे भुजद्वन्द्वे स्तनद्वन्द्वे च पार्वती ॥६॥
हृदये मणिबन्धे च ग्रीवायां पार्श्वयोः पुनः ॥
पृष्ठदेशे तथा गुह्ये वामे च कटिदेशके ॥७॥
उपस्थे च नितम्बे च नाभौ जङ्घाद्वये पुनः ॥
जानुचक्रे पदद्वन्द्वे [illegible] ॥८॥
स्वधा तु प्राणशक्त्यां [illegible] ॥

विजया पातु भवने जया पातु सदा मम ॥९॥
सर्वाङ्गः पातु कामेशी महादेवी सरस्वती ॥
तुष्टिः पातु महामाया उत्कृष्टिः सर्वदावतु ॥१०॥
ऋद्धिः पातु महादेवी सर्वत्र शम्भुवल्लभा ॥
वाग्भवी सर्वदा पातु पातु मां हरगेहिनी ॥११॥
रमा पातु [illegible] स्वयम् ॥
सर्वाङ्ग [illegible] सुरेश्वरी ॥१२॥
शिवदूती सदा पातु सुन्दरी पातु सर्वदा ॥
भैरवी पातु सर्वत्र [illegible] सर्वदावतु ॥१३॥
त्वरिता पातु मां [illegible] सदावतु ॥
पातु मां कालिका [illegible] सदावतु ॥१४

नवदुर्गा सदा पातु कामाक्षी सर्वदावतु ॥
योगिन्यः सर्वदा पान्तु मुद्राः पान्तु सदा मम ॥१५॥
मात्राः पान्तु सदा देव्यश्चक्रस्था योगिनीगणाः ॥
यक्षिणी सर्वकार्येषु सर्वकर्मसु सर्वदा ॥१६॥
पातु मान्देवदेवी च [illegible] ॥
इति ते कथितं दिव्यं कवचं सर्वसिद्धिदं ॥१७॥
यत्र तत्र न वक्तव्यं [illegible] ॥
शठाय भक्तिहीनाय निन्दकाय [illegible] ॥१८॥
न्यूनाङ्गे ह्यतिरिक्ताङ्गे [illegible] ॥
न तावन्दर्शयेद्दिव्यं सन्दर्शे [illegible] ॥१९॥
कुलीनाय महेच्छाय [illegible] ॥

दैवज्ञाय विशुद्धाय दद्यात्कवचमुत्तमम् ॥२०॥
निजशिष्याय शान्ताय भक्तिये ज्ञानिने तथा ॥
दद्यात्कवचमेतत्तु [illegible] सर्वतन्त्रसमन्वितम् ॥२१॥
शनौ मङ्गलवारे च [illegible] कस्तथा ॥
यावकेन [illegible] सर्वतन्त्रसमन्वितम् ॥२२॥
विलिख्य [illegible] स्वयम्भुकुसुमैः शुभैः ॥
स्वयम्भुकैः [illegible] नाना[illegible]समन्वितैः ॥२३॥
गोरोचना कुङ्कुम [illegible] वा [illegible] ॥
कुलिशेन [illegible] वा [illegible] रेवादन ॥२४॥
[illegible] कुण्डगोलसमुद्भव
पूर्वाभाद्र [illegible] मङ्गलवासर ॥२५॥

विलिखेत्प्रपठत्मात्रं शुभयोग सुरालये ॥
आयुष्मत्प्रीतियोगे च वृद्धियोगे विशेषतः ॥ [illegible] ॥
इन्द्रयोगे शुभे योगे शुक्लयोगे तथैव च ॥
कौलवे वालवे चैव वणिजे चैव सत्तमः ॥ [illegible] ॥
शून्यागारे श्मशाने [illegible] विशेषतः ॥
कुमारीकुसुम [illegible] ॥ [illegible] ॥
मत्स्यमांस [illegible] ॥
छन्नाद्यैः [illegible] ॥ २९ ॥
ब्राह्मणान् [illegible] ॥
आसवदक्षुणान्यानि [illegible] ॥ [illegible] ॥
[illegible]

तदाधिरे मन्त्रविद्यां शङ्करेण प्रभाषिताम् ॥
सारंद्विगुणाविनि कृतेन नात्र संशयः ॥ ३१ ॥
सर्ववेत्ता [illegible]गीपुत्रः सर्वशास्त्रपुरस्कृतः ॥
गुरुर्देवो हरः साक्षात् पत्नी तस्य हरप्रिया ॥ ३२ ॥
अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः ॥ ३३ ॥
भजति य इह भक्त्या नित्यमाद्यान्तरात्मा ।
जनयति भवगुणं [illegible]ति सर्वेश्वरम् ॥
सम्भवति पदमुच्चैः सम्पदां पादतश्च ।
शिशिरयति च [illegible]क्षणानाक्विराय ॥ ३४ ॥

इति विश्वसारतन्त्रे कमलात्मिकाकवचम् ।

॥ समाप्तम् ॥

[illegible]

श्रीगणेशाय नमः॥

आसने उपविश्य. दीपं प्रज्वाल्य.

आचमनम्–

ॐ आत्मतत्वाय स्वाहा, ॐ विद्या तत्वायस्वाहा,
ॐ शिव तत्त्वाय स्वाहा । इत्याचम्य. ॥
ॐ सर्वतत्त्वाय नमः । इति करं प्रक्षाल्य. ॥

कर्मपात्र निर्माणम् ।

तज्जलेन पवित्रीकरणम्.

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥
यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः॥

भूतोत्सादनम्.

अक्षतादिकं गृहीत्वा.

अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिता ॥
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

विष्णुप्रार्थना–

शुक्लाम्वरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ॐ विष्णवे नमः ॥

जलं गृहीत्वा आत्मशुद्धिं कुर्यात्.
देव त्वं प्राकृतं चित्तं पापाक्रान्तमभून्मम ॥
तन्निःसारय चित्तान्मे पापं फट् फट् च ते नमः ॥

देव प्रार्थना–
सूर्यः सोमो महाकालो महाभूतानि पञ्च च ॥
एते शुभाशुभस्येह कर्मणो नव शाक्षिणः ॥
ॐ देवेभ्यो नमः ॥

भैरव प्रार्थना–
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ॥
भैरवाय नमस्तुभ्य मनुज्ञां दातुमर्हसि ॥
ॐ भैरवाय नमः ॥

अर्घस्थापनम्.
भूमौ चतुस्रं मण्डलं विधाय. मध्ये शंखं चक्रं
लिखित्वा पूजयेत्.
ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥
ॐ शंखचक्राभ्यां नमः ॥
ॐ दशकलात्मने नमः॥ ॐ वह्निमण्डलाय नमः ॥
ॐ द्वादशकलात्मने नमः॥ ॐ अँ अर्कमण्डलाय नमः॥

ॐ षोडशकलात्मने नमः॥ॐ सोममण्डलाय नमः॥

इति संपूज्य.

नमः इति जलेनापूर्य ।

पञ्चामृत गन्धाक्षत यव दूर्वा कुश फल शर्षपादिकं अर्घपात्रे निधाय.

अङ्कुशमुद्रया तीर्थान्यावाहयेत्.

गङ्गे च यमुने चैव गोदावरि सरस्वति ॥
नर्मदे सिन्धु कावेरि जलेस्मिन् सन्निधिं कुरु॥

वँ इति धेनुमुद्रया अमृतीकृत्य.

मत्स्यमुद्रया आच्छा आच्छाद्य. अर्घपात्रं स्पृष्ट्वा.

ॐ इति दशधा जपेत्.

प्रतिज्ञा संकल्पः

अद्येह काश्यप गोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा मेषराशिः.......... देवी अहं मम संज्ञासहित सूर्यनारायण प्रीति द्वारा सकलपापोपशमन पूर्वक श्रुतिस्मृति पुराणोक्त दीर्घायुरारोग्यैश्वर्यावाप्त्ये एतावत्काल पर्यन्तं सूर्यनारायणपूजनार्घदानादि कर्मणो यथोक्तफलावाप्त्ये. न द्वतोद्यापनकर्मणि दीपकलश

गणेशपूजन पूर्वकं मंत्रासहित सूर्यनारायणपूजन महं करिष्ये. तदङ्गतया द्वादशदलेषु मित्रादिद्वादशादित्यपूजनं च करिष्ये.

दीप कलश गणेश पूजां विधायय.

दीपप्रार्थना-

नमोस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुवाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥

ॐ दीपनारायणाय नमः ॥

कलश प्रार्थना-

वरुण त्वं महाभाग सर्वदेव प्रपूजित ॥
विन मम यज्ञेस्मिन्न विघ्नं कुरु सर्वदा ॥

ॐ वरुणकलशाय नमः ॥

गणेश प्रार्थना-

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
ॐ गणाधिपतये नमः

पूर्वादि अष्टदिक्षु पीठशक्ति पूजा·

दीप्तायै नमः ॥ लयायै नमः ॥ जयायै नमः ॥
भद्रायै नमः ॥ विभूत्यै नमः ॥ विमलायै नमः ॥
अमोघायै नमः ॥ विद्युतायै नमः ॥
मध्ये - सर्वतोमुख्यै नमः ॥

द्वादशदले पूर्वादिक्रमेण द्वादशादित्य पूजा

ॐ मित्र इहा गच्छ इह तिष्ठ मम पूजां गृहाण मित्राय नमः
ॐ विष्णो इहागच्छ इह तिष्ठ मम पूजां गृहाण विष्णवे नमः
ॐ अरुण इहागच्छ इह तिष्ठ मम पूजां गृहाण अरुणाय नमः
ॐ सूर्य इहागच्छ इह तिष्ठ मम पूजां गृहाण सूर्याय नमः
ॐ भानो इहागच्छ इह तिष्ठ मम पूजां गृहाण भानवे नमः
ॐ तपन इहागच्छ इह तिष्ठ मम पूजां गृहाण तपनाय नमः

ॐ इन्द्र इहागच्छ इह तिष्ठ मम पूजां गृहाण इन्द्राय नमः।
ॐ रवे इहा गच्छ इह तिष्ठ मम पूजां गृहाण रवये नमः।
ॐ गभस्ते इहागच्छ इह तिष्ठ मम पूजां गृहाण गभस्तये नमः
ॐ शमन इहागच्छ इहतिष्ठ मम पूजां गृहाण शमनाय नमः।
ॐ हिरण्यरेतः इहागच्छ इह तिष्ठ मम पूजां गृहाण हिरण्यरेतसे नमः
ॐ दिनकृत् इहागच्छ इहतिष्ठ मम पूजां गृहाण दिनकृते नमः

मध्ये संज्ञासहित सूर्यनारायण पूजा

ध्यानम्

तेजोरूपं सहस्रांशुं सप्ताश्वरथवाहनम् ॥
द्विभुजं वरदं पद्मलांछनं सर्वकामदम् ॥
ध्यानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

आवाहनम्·

आगच्छ भगवन् सूर्य मण्डले सुस्थिरो भव ॥
यावत्पूजा समाप्येत तावत्त्वं सन्निधिं कुरु ॥
ॐ संज्ञासहित श्रीसूर्यनारायण इहागच्छ इह तिष्ठ यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव ।
आवाहनं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

प्राणप्रतिष्ठा

ॐ एतन्ते देवसवित र्यज्ञं प्राहु बृहस्पतये ब्रह्मणे ॥
तेन यज्ञमव तेन यज्ञपतिन्तेन मामव ॥
मनोजूतिर्जुषता माज्यस्य बृहस्पति र्यज्ञमिमन्तनोत्व
रिष्टं यज्ञꣳ समिमन्दधातु ॥ विश्वे देवा स इह मादयन्ता
मों प्रतिष्ठ ॥

आसनम्

हेमासनं महादिव्यं नानारत्न विभूषितम् ॥
दत्तं मे गृह्यतां देव दिवाकर नमोस्तु ते ॥
आसनं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

पाद्यम्

गङ्गाजलं समानीतं परमं पावनं महत् ॥
पाद्यं गृहाण देवेश धामरूप नमोस्तु ते ॥
पाद्यं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

अर्घ्यम्

रक्तचन्दन पुष्पाढ्यं गन्धाक्षततिलै र्यवैः ।
कुशदूर्वाफलैः पूर्णमर्घ्यं मे प्रतिगृह्यताम् ॥
अर्घ्यं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

आचमनम्

त्वदर्थे कल्पितं तोयं पवित्रं स्वादु शीतलम् ॥
तदाचमस्व देवेश द्युमणे पङ्कजासन ॥

आचमनीयं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः

मधुपर्कम्·

मधुपर्कं शुभं पुण्यं दध्याज्य मधु साधितम् ॥
तं जुषस्व विधानेन कृपया भक्तवत्सल ॥

मधुपर्कं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः॥

शुद्धोदकम्

गङ्गाजलसमं शीतं नदीतीर्थसमुद्भवम् ॥
स्नानं दत्तं मया देव गृहाण पङ्कजासन ॥

मधुपर्कानन्तरं शुद्धोदकस्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

पयस्नानम्

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ॥
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥

पयःस्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः॥

पयःस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि संज्ञा सहित सूर्यनारायणाय नमः ॥

दधिस्नानम्

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥
दध्यानीतं मयादेव स्नानार्थं प्रतिगृह्यताम् ॥

दधिस्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः॥

दधिस्नानानन्तरं शुद्धोदक स्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

घृतस्नानम्

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ॥
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥

घृतस्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः

घृतस्नानानन्तरं शुद्धोदक स्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

मधुस्नानम्

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

मधुस्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः॥

मधुस्नानानन्तरं शुद्धोदक स्नानं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

शर्करास्नानम्

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ॥
मलापहारिणी दिव्या स्नानार्थं प्रतिगृह्यताम् ॥
शर्करास्नानं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥
शर्करास्नानानन्तरं शुद्धोदकस्नानं समर्पयामि संज्ञासहित
सूर्यनारायणाय नमः ॥

मिश्रित पञ्चामृतस्नानम्.

पञ्चामृतं मयानीतं पयो दधि घृतं मधु ॥
शर्करादिसमायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥
पञ्चामृतस्नानं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥
पञ्चामृतस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि संज्ञासहित
सूर्यनारायणाय नमः ॥

गङ्गाजलम्.

गङ्गा कृष्णा गौतमी च कावेरी च शतहृदा ॥
ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम् ॥
गङ्गाजलं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥

सुगन्धिद्रव्यम्.

गन्धकर्पूरसंयुक्तं कस्तूर्यादि सुवासितम् ॥

अङ्गोद्वर्तनकं देव गृहाण कमलासन ॥
सुगन्धिद्रव्यं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥

वस्त्रम्

वस्त्रे सुरक्ते देवेश सुसूक्ष्मे नूतने शुभे ॥
मयार्पिते जगन्नाथ गृहाण तिमिरान्तक ॥
वस्त्रं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥

यज्ञोपवीनम्

नमः कमलहस्ताय विश्वरूपाय ते नमः ॥
उपवीतं मयानीतं तद्गृहाण दिवाकर ॥
यज्ञोपवीतं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥

चन्दनम्

श्रीखण्ड चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥
रक्तचन्दनसंयुक्तं गृहाणेन्प्रभाकर ॥
चन्दनं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥

अक्षताः

अक्षताः कुंकुमौघेन रञ्जिता स्तु सुशोभनाः ॥
मयार्पिता देवदेव तान्गृहाण कृपानिधे ॥
अक्षतान् समर्पयामि संज्ञासहितसूर्यनारायणाय नमः॥

सिन्दूरम्

उद्यदादित्यसंकाशं स्त्रीणां सीमन्तभूषणम् ॥
वीरालङ्करणं देव सिन्दूरं प्रतिगृह्यताम् ॥

सिन्दूरं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

पिष्टातकम्

पुष्पोद्भवं रक्तचूर्णं देवानां प्रीतिदायकम् ॥
पिष्टातकं गृहाणेदं शरणागतवत्सल ॥

पिष्टातकं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः

पुष्पाणि

जपाकदंबकुसुम रक्तोत्पलयुतानि च ॥
पुष्पाणि गृह्यतां देव सर्वकामप्रदो भव ॥

पुष्पाणि समर्पयामि संज्ञासहित सूर्यनारायणाय नमः

माल्यम्

माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः ॥
मयाहृतानि पूजार्थं गृहाण पङ्कजासन ॥

माल्यानि समर्पयामि संज्ञासहित सूर्यनारायणाय नमः

अङ्गपूजा

ॐ सूर्याय नमः । पादौ पूजयामि ॥
ॐ अरुणाय नमः । जंघे पूजयामि ॥
ॐ माधवाय नमः । जानुनी पूजयामि ॥
ॐ धात्रे नमः । ऊरू पूजयामि ॥
ॐ हरये नमः । कटिं पूजयामि ॥
ॐ भर्गाय नमः । गुह्यं पूजयामि ॥
ॐ सुवर्णरेतसे नमः । नाभिं पूजयामि ॥
ॐ अत्रये नमः । जठरं पूजयामि ॥
ॐ दिवाकराय नमः । हृदयं पूजयामि ॥
ॐ तपनाय नमः । कण्ठं पूजयामि ॥
ॐ भानवे नमः । स्कन्धौ पूजयामि ॥
ॐ हंसाय नमः । हस्तौ पूजयामि ॥
ॐ मित्राय नमः । मुखं पूजयामि ॥
ॐ रवये नमः । नासिकां पूजयामि ॥
ॐ खगाय नमः । नेत्रे पूजयामि ॥
ॐ पूष्णे नमः । कर्णौ पूजयामि ॥
ॐ हिरण्यगर्भाय नमः । ललाटं पूजयामि ॥

ॐ आदित्याय नमः । शिरः पूजयामि ॥
ॐ भास्कराय नमः । सर्वाङ्गं पूजयामि ॥

धूपम्

वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः ॥
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥
धूपं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः

दीपम्

सुप्रकाशो महान् दीप स्त्रैलोकतिमिरापहः ॥
सवाह्याभ्यन्तरं ज्योति र्दीपोयं प्रतिगृह्यताम् ॥
दीपं दर्शयामि संज्ञासहितसूर्यनारायणाय नमः

नैवेद्यम्

पक्वापक्वं रसोत्कृष्ट मन्नं स्वादु चतुर्विधम् ॥
तुष्टिदं सर्वदेवानां नैवेद्यं प्रतिगृह्यताम् ॥
नैवेद्यं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः

जलम्

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ॥
आचम्यतां जगन्नाथ मयादत्तं हि भक्तितः ॥
जलं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः

करोद्वर्तनम्
गन्धं कर्पूरसंयुक्तं कस्तूर्यादिसुवासितम् ॥
करोद्वर्तनकं देव गृहाण परमेश्वर ॥
करोद्वर्तनं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः
ताम्बूलम्
पूगीफलसमायुक्तं सुधाखदिरसंयुतम् ॥
भक्त्या दत्तं मया देव ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं समर्पयामि संज्ञासहित सूर्य नारायणाय नमः
सद्रव्य नारीकेलफलम्
फलानीमानि देवेश स्थापितानि पुरस्तव ॥
तेन मे सफलावाप्ति र्भवेज्जन्मनि जन्मनि ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो ॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
नारिकेल फलं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥
उपायन द्रव्यं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः ॥

नीराजनम्

पञ्चवर्त्ति समायुक्तं सर्वमङ्गलदायकम् ॥
नीराजनं गृहाणेदं सर्वसौख्यप्रदो भव ॥
नीराजनं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः

कर्पूरदीपम्

कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥
आरार्त्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥
कर्पूरदीपं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः

चामरम्

शशाङ्ककरसंकाश हिमडिण्डिरपाण्डुर ॥
प्रोत्सारयाशु दुरितं चामरामर वल्लभ ॥
चामरं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः ॥

व्यजनम्

व्यजनं वायुदेवत्यं ग्रीष्मकाले सुखावहम् ॥
अस्य प्रदानात् सकला मम सन्तु मनोरथाः ॥
व्यजनं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः

पुष्पाञ्जलिः

कालात्मन् सर्वभूतात्मन् देवात्मन् सर्वतोमुख ॥
यस्मादग्नीन्दुरूपस्त्वं अतः पाहि दिवाकर ॥
नमः सवित्रे जगदेकचक्षुसे
जगत्प्रसूतिस्थितिनाशहेतवे ॥
त्रयीमयाय त्रिगुणात्मधारिणे
विरञ्चिनारायणशंकरात्मने ॥
यस्योदये स्याज्जगतः प्रबोधो
यः कर्मशाक्षी भुवनस्य गोप्ता ॥
कुष्ठादिकव्याधिविनाशको यः
स भास्करो मे दुरितं निहन्यात् ॥
मयाद्य देवदेवेश यत्कृतं पूजनं तव ॥
तत्सर्वं पूर्णतां यातु त्वत्प्रसादात् दिवाकर ॥
पुष्पाञ्जलिं समर्पयामि संज्ञासहितसूर्यनारायणाय नमः

प्रदक्षिणा

यानिकानि च पापानि जन्मान्तरकृतानि च ॥
विलयं यान्तु तानीह प्रदक्षिणा पदे पदे ॥
प्रदक्षिणां समर्पयामि संज्ञासहितसूर्य नारायणाय नमः

नमस्कारः ॥ दण्डवत् ॥

नमः पङ्कजहस्ताय नमः पङ्कमालिने ॥
नमः पङ्कजनेत्राय भास्कराय नमोनमः ॥
अग्निमीले नमस्तुभ्यं इषेत्वोर्जेति भास्कर ॥
अग्न आयाहि वरद नमस्ते ज्योतिषां पते ॥
नमो नमः पापविनाशनाय
विश्वात्मने सप्ततुरंगमाय ॥
सामर्ग्यजूर्धामनिधे विधान
भवाब्धिपोताय नमः सवित्रे ॥

नमस्कारं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः

विशेषार्घ्यदानम्

नमः सहस्रकिरण सर्वव्याधिविनाशन ॥
गृहाणार्घ्यं मया दत्तं संज्ञया सहितो रवे ॥

विशेषार्घ्यं समर्पयामि संज्ञासहित सूर्यनारायणाय नमः

उत्तराङ्गपूजा

दीपपूजा

ॐ दीपनारायणाय नमः ॥

कलशपूजा

ॐ कलशे आवाहित देवताभ्यो नमः ॥

गणेश पूजा

ॐ गणाधिपतये नमः ॥

द्वादशदलेषु

ॐ मित्रादि द्वादशादित्येभ्यो नमः ॥

मध्ये·

ॐ संज्ञासहित सूर्यनारायणाय नमः ॥

अर्घ्यभ्रामणम्

भूमौ स्खलित पादानां भूमिरेवावलम्बनम् ॥
त्वयि जातापराधानां त्वमेव शरणं मम· ॥

अर्घपात्रं पराङ्मुखं कृत्वा पूजयेत्·

ॐ पराङ्मुखार्घपात्राय नमः ॥

तत्पात्रमुत्तानं कृत्वा·

ॐ अच्छिद्रमस्तु· इति जलं दद्यात्·

विसर्जनम्

गच्छन्तु देवताः सर्वाः पूजामादाय पार्थिवीम्॥
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥
आवाहनं न जानामि न जानामि विसर्जनम्॥
मन्त्रपूजां न जानामि क्षमस्व परमेश्वर ॥

नैवेद्य भागं गृहीत्वा ईशानभागे स्थापयेत्॥
सूर्य भक्तेभ्यो नमः ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु
न्यूनं संपूर्णतां यातु सद्योवन्दे तमच्युतम्॥
ॐ अच्युताय नमः

प्रतिमादानम्

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेति त्रिप्रवरा मेषराशिः ……………… देवी अहं मम सूर्यनारायण प्रीतिद्वारा सकल पापापशमन पूर्वक श्रुतिस्मृति पुराणोक्त दीर्घायुरारोग्यैश्वर्यावाप्तये एताव-

त्कालपर्यन्तं सूर्यनारायणपूजनार्घदानादिकर्मणः प्रतिष्ठासाङ्गतार्थं तदुद्यापनकर्मणि सुपूजितां ताम्रस्थाल्युपरि रक्तवस्त्रपीठे स्थितां इमां सौवर्णीं सूर्यप्रतिमां विष्णुदेवताकां ...... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे । तत्सन्न मम ।

प्रार्थना—

सौवर्णीं प्रतिमां दद्मि व्रतसंपूर्तिहेतवे ॥
प्रीयतां भगवान् देवो मम संसारतारकः ॥
रवे प्रसीद देवेश सर्वलोकेश्वर प्रभो ॥
तवरूपप्रदानेन मम सन्तु मनोरथाः ॥

दानप्रतिष्ठा—

अद्यकृतैतत् सुपूजितसूर्यनारायणप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे । तत्सन्न मम । ॥

गोदानम् ·

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रि
प्रवरा मेषराशिः ………………… देवी अहं मम
सूर्यनारायणप्रीतिद्वारा सकलपापोपशमनपूर्वक
श्रुतिस्मृतिपुराणोक्तदीर्घायुरारोग्यैश्वर्यावाप्तये
एतावत्कालपर्यन्तं सूर्यनारायण पूजनार्घदानादि-
कर्मणः प्रतिष्ठा साङ्गता सिद्धये इमां सालङ्कारां
गां रुद्रदैवताकां ……… गोत्राय ……… शर्मणे
ब्राह्मणाय तुभ्यं संप्रददे · तन्मन्न मम ॥

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्यकृतैतत् सालङ्कृत गोदानकर्मणः प्रतिष्ठार्थं
इदं रजतं चन्द्रदैवतकं ……… गोत्राय ………
शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तन्मन्न मम·

2 कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृत स्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥

१ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच॥
हूयतेच पुनर्द्वाभ्यां समे विष्णुः प्रसीदतु ॥

पुरुषोत्तममासे अपूपान्नदानम् ॥

आसने उपविश्य आचम्य दीपं प्रज्वाल्य अर्घस्थापनं कुर्यात् ॥

भूमौ चतुरस्रं मण्डलं विधाय मध्ये शंखं चक्रं लिखित्वा पूजयेत् ॥

ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ ॐ दशकलात्मने नमः ॥ ॐ वह्निमण्डलाय नमः ॥

ॐ द्वादशकलात्मने नमः ॥ ॐ अं अर्कमण्डलाय नमः ॥

ॐ षोडशकलात्मने नमः ॥ ॐ सोममण्डलाय नमः ॥

इति संपूज्य

ॐ नम इति जलेनापूर्य पञ्चामृत गंगाजल गंधाक्षत यवदूर्वा कुश फल शर्षपादिकं अर्घपात्रे निधाय ॥

अङ्कुशमुद्रया तीर्थान्यावाहयेत् ॥

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥
नर्मदे सिन्धो कावेरि जलेस्मिन्सन्निधिं कुरु ॥

वं इति धेनुमुद्रया अमृतीकृत्य मत्स्यमुद्रया आच्छाद्य ॥
अर्घपात्रं स्पृष्ट्वा

ॐ इति दशधा जपेत् ॥

तज्जलेन आत्मानं पूजासामग्रीं च सिञ्चेत् ॥

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतो पि वा ॥
यः स्मरेत् पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः

ततः कांश्यपात्रस्थितत्रयस्त्रिंशदपूपान्नं राजतदीपपात्रं ताम्बूलं कदलीफलं सघृतकांश्यपात्रं च संस्थाप्य पीतवस्त्रेण आच्छाद्य तिलोपरि सौवर्णीं पुरुषोत्तमप्रतिमां निधाय पूजयेत् ॥

ततः प्राणप्रतिष्ठा ॥

ॐ एतन्ते देवसवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ॥
तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥

ॐ राधिकासहितपुरुषोत्तमनारायण इहागच्छ इहतिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव ॥
इत्यावाह्य ॥

ध्यानम् ॥

ॐ वन्दे नवघनश्यामं द्विभुजं मुरलीधरम् ॥
पीताम्बरधरं देवं सराधं पुरुषोत्तमम् ॥

ध्यानं समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥

आवाहनं·समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
आसनं·समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
पाद्यं·समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
अर्घ्यं.समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
आचमनं.समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
पञ्चामृतं.समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
शुद्धोदकस्नानं.समर्पयामि राधिकासहित पुरुषोत्तमाय नमः ॥
वस्त्रं·समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
यज्ञोपवीतं·समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
चन्दनं·समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
अक्षतान्· समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
तिलान्· यवान्· समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
सिन्दूरं समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
पिष्टातकं· समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
पुष्पाणि· समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
तुलसीदलं· समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥

ततः तदधिष्ठातृविष्णुस्वरूपित्रयस्त्रिंशद्देवता आवाह्य पूजयेत् ॥

ॐ विष्णो इहागच्छ इहतिष्ठ मम पूजां गृहाण विष्णवे नमः ॥
ॐ जिष्णो इहागच्छ इह तिष्ठ मम पूजां गृहाण जिष्णवे नमः ॥
ॐ महाविष्णो इहागच्छ इहतिष्ठ मम पूजां गृहाण महाविष्णवे नमः
ॐ हरे इहागच्छ इह तिष्ठ ममपूजां गृहाण हरये नमः ॥
ॐ कृष्ण इहागच्छ इह तिष्ठ मम पूजां गृहाण कृष्णाय नमः ॥
ॐ अधोक्षज इहागच्छ इह तिष्ठ मम पूजां गृहाण अधोक्षजाय नमः
ॐ केशव इहागच्छ इहतिष्ठ मम पूजां गृहाण केशवाय नमः ॥
ॐ माधव इहागच्छ इह तिष्ठ मम पूजां गृहाण माधवाय नमः ॥
ॐ राम इहागच्छ इह तिष्ठ मम पूजां गृहाण रामाय नमः ॥
ॐ अच्युत इहागच्छ इह तिष्ठ मम पूजां गृहाण अच्युताय नमः ॥
ॐ पुरुषोत्तम इहागच्छ इह तिष्ठ मम पूजां गृहाण पुरुषोत्तमायनमः
ॐ गोविन्द इहागच्छ इह तिष्ठ मम पूजां गृहाण गोविन्दायनमः ॥
ॐ वामन इहागच्छ इह तिष्ठ मम पूजां गृहाण वामनाय नमः ॥
ॐ श्रीश इहागच्छ इह तिष्ठ मम पूजां गृहाण श्रीशाय नमः ॥
ॐ श्रीकण्ठ इहागच्छ इह तिष्ठ मम पूजां गृहाण श्रीकण्ठायनमः
ॐ विश्वसाक्षिन् इहागच्छ इह तिष्ठ मम पूजां गृहाण विश्वसाक्षिणे नमः
ॐ नारायण इहागच्छ इहतिष्ठ ममपूजां गृहाण नारायणाय नमः ॥

ॐ मधुरिपोइहागच्छ इह तिष्ठ मम पूजां गृहाण मधुरिपवे नमः॥
ॐ अनिरुद्ध इहागच्छ इहतिष्ठ मम पूजां गृहाण अनिरुद्धाय नमः॥
ॐ त्रिविक्रम इहागच्छ इह तिष्ठ मम पूजां गृहाण त्रिविक्रमायनमः॥
ॐ वासुदेव इहागच्छ इह तिष्ठ मम पूजां गृहाण वासुदेवाय नमः॥
ॐ जगद्योने इहागच्छ इह तिष्ठ मम पूजां गृहाण जगद्योनये नमः॥
ॐ अनन्त इहागच्छ इह तिष्ठ मम पूजां गृहाण अनन्ताय नमः॥
ॐ शेषशायिन् इहागच्छ इह तिष्ठ मम पूजां गृहाण शेषशायिनेनमः॥
ॐ संकर्षण इहागच्छ इह तिष्ठ मम पूजां गृहाण संकर्षणाय नमः॥
ॐ प्रद्युम्न इहागच्छ इह तिष्ठ मम पूजां गृहाण प्रद्युम्नाय नमः॥
ॐ दैत्यारे इहागच्छ इह तिष्ठ मम पूजां गृहाणदैत्यारये नमः॥
ॐ विश्वतोमुख इहागच्छ इह तिष्ठ मम पूजां गृहाण विश्वतोमुखायनमः
ॐ जनार्दन इहागच्छ इह तिष्ठ मम पूजां गृहाण जनार्दनाय नमः॥
ॐ धरावास इहागच्छ इह तिष्ठ मम पूजां गृहाण धरावासायनमः
ॐ दामोदर इहागच्छ इह तिष्ठ मम पूजां गृहाण दामोदराय नमः॥
ॐ अघार्दन इहागच्छ इह तिष्ठ मम पूजां गृहाण अघार्दनायनमः
ॐ श्रीपते इहागच्छ इह तिष्ठ मम पूजां गृहाण श्रीपतये नमः॥
धूपं आघ्रापयामि राधिकासहितपुरुषोत्तमाय नमः॥

दीपं दर्शयामि राधिकासहितपुरुषोत्तमाय नमः ॥
नैवेद्यं - समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
जलं - समर्पयामि राधिकासहित पुरुषोत्तमाय नमः ॥
करोद्वर्तनं - समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
ताम्बूलं - समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
द्रव्यं - समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
नीराजनं - समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
पुष्पाञ्जलिः ॥

कस्तूरीतिलकं ललाटपटले वक्षस्थले कौस्तुभं
नासाग्रे गजमौक्तिकं करतले वेणुं करे कङ्कणम् ॥
सर्वाङ्गे हरिचन्दनं च तुलसी कण्ठे च मुक्तावली ।
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥

पुष्पाञ्जलिं - समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥
ततो विशेषार्घ्यदानम् ॥

देवदेव नमस्तुभ्यं पुराणपुरुषोत्तम ॥
गृहाणार्घ्यं मया दत्तं राधिकासहितोहरे ॥

अर्घ्यं - समर्पयामि राधिकासहितपुरुषोत्तमाय नमः ॥

अर्घपात्रं पराङ्मुखं कृत्वा ॥

पराङ्मुखार्घपात्राय नमः॥

इति संपूज्य ॥

तत्पात्रं उत्तानं कृत्वा ॥

ॐ अच्छिद्रमस्तु इति जलं दद्यात्॥

ब्राह्मणं संपूज्य ॥

ॐ ब्राह्मणाय नमः॥

ततः कुशादिकमादाय सङ्कल्पः॥

ॐ अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम समस्तपापक्षयपुत्रपौत्रधनधान्यादिसमृद्धिपूर्वक भूमिदानजन्यसमफलावाप्तिद्वारा श्रीराधिकासहितपुरुषोत्तमनारायणप्रीतये काश्यपात्रस्थं घृतं मृत्युञ्जयदेवताकं कांश्यपात्रं विश्वकर्मदेवताकं सज्योतिरजतदीपपात्रं चन्द्रदेवताकं · कदलीफलताम्बूलादिवस्तुसमन्वितान् कांश्यपात्रस्थितान् कांश्यपात्रेणपिहितान् पीतवस्त्रसहितान् त्रयस्त्रिंशदपूपान् प्रजापतिदेवताकान् · तिलोपरिस्थापितां सुपूजितश्रीरा

धिकासहितपुरुषोत्तमनारायणप्रतिमां विष्णुदेवताकां ·
..........गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं
संप्रददे ॥

प्रार्थना ॥

ॐ विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः ॥
अपूपान्नप्रदानेन मम पापं व्यपोहतु ॥
नारायण जगद्बीज भास्करप्रतिरूपक ॥
दानेनानेन पुत्रांश्च संपदं चापि वर्द्धय ॥
यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनः ॥
शंखः करतले यस्य स मे विष्णुः प्रसीदतु ॥
कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥
यो वञ्चयति भूतानि तस्मै कालात्मने नमः ॥
कुरुक्षेत्रमयो देशः सूर्यपर्वशताधिकः ॥
पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम ॥
मलानां च विशुद्ध्यर्थं पापप्रशमनाय च ॥
पुत्रपौत्राभिवृद्ध्यर्थं प्रदत्तं नव भास्कर ॥
कामधेनोः समुद्भूतं देवानामुत्तमं हविः ॥
आयुर्विवर्द्धनं दातुराज्यं पातु सदैव माम् ॥

यानि पापान्यनेकानि कामाकामकृतानि च ॥
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥
हिरण्यगर्भः पुरुषः परात्पर जगन्मय ॥
रंभादानेन मे देव क्षयं शमयतु प्रभो ॥
सज्योतिर्घृतपात्रे च दीपं वाहुसमुन्नतम् ॥
सुखं स्यादस्य दानेन शान्तिरस्तु सदा मम ॥
ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् ॥
अस्य प्रदानात्सकलं माङ्गल्यं चास्तु मे सदा ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत् श्रीपुरुषोत्तमनारायणप्रीतये कृतस्य घृत कांस्यपात्र कदलीफल ताम्बूल दीपपात्र श्रीराधिका सहितपुरुषोत्तमनारायणप्रतिमायुत अपूपान्नदानकर्मणः प्रतिष्ठासाङ्गतासिद्ध्ये इदं रौप्यं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

अञ्जलिं वध्वा ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा
वुद्ध्यात्मना वा नुसृतः स्वभावात् ॥
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पये तत् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ॥
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ ॥

जलपूर्णघटदानम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम ब्रह्माण्डदानजन्यफलप्राप्तिपूर्वक श्रीराधिकासहितपुरुषोत्तमनारायणप्रीतये इदं जलपूर्णघटं वरुणदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

प्रार्थना ॥

जलपूर्णघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत् जलपूर्णघटदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

घृतपूर्णघटदानम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः .... अहं मम सूर्यलोकप्राप्तिपूर्वक श्रीराधिकासहितपुरुषोत्तमनारायणप्रीतये इदं घृतपूर्णकलशं वरुणदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय

तुभ्यं संप्रददे तत्सन्न मम ॥

प्रार्थना ॥

घृतपूर्णघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत्· घृतपूर्णघटदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम॥

तिलदानम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः .... अहं मम श्रीराधिकासहितपुरुषोत्तमनारायणप्रीतिद्वारा सकलपापक्षयपूर्वक तिलसमसहस्त्रवर्षपर्यन्त स्वर्गलोकवासकामनया इमान्तिलान् सोमदेवताकान् .... गोत्राय .... शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

प्रार्थना ॥

तिलाः पुण्याः पवित्राश्च सर्वकामकरास्मृताः ॥
तिलदानेन सर्वं मे पापं नाशय केशव ॥

दानप्रतिष्ठा ॥

अद्यकृतैतत् तिलदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ………… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

गोदानम् ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ………… अहं मम श्रीराधिकासहितपुरुषोत्तमनारायणप्रसादतः सकलपापनाशनपूर्वकं ब्रह्मलोकावाप्तये इमां गां रुद्रदेवताकां तन्निष्क्रयीभूतं रजतं चन्द्रदेवताकं ………… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

प्रार्थना ॥

यज्ञसाधनभूताया विश्वस्याघप्रणाशिनी ॥
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

दानप्रतिष्ठा

अद्यकृतैतत् गोनिष्क्रयीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ………… गोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे तत्सन्न मम ॥

ब्राह्मणभोजनसंकल्पः ॥

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः ......
.... अहं मम· श्रीराधिकासहितपुरुषोत्तमनारा
यणप्रीतये सिद्धान्नेनत्रयस्त्रिंश संख्याकब्राह्मणान् भोजनकर्म
करिष्ये करिष्यमाणभोजनकर्मणः प्रतिष्ठासाङ्गतासिद्ध्य
र्थं रजतं चन्द्रदैवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो
ब्राह्मणेभ्यो वरणपूर्वकदक्षिणां दातुं समुत्सृजे तत्सन्न मम॥

७०

गोसहस्रमहादानम्

श्रीगणेशाय नमः ।। ❀ अथ षोडशमहादानान्तर्गत-गोसहस्रमहादानप्रयोगः —

कर्ता प्रायश्चित्तगोदानं कुर्यात् —

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोनिष्क्रयीभूतरजतद्रव्याय नमः ।
ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ब्राह्मणाय नमः ।

सङ्कल्पः — अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः सपुत्रा सपरिवारा ······ देवी अहं मम श्रीपरमेश्वरप्रीतिपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तये करिष्यमाण षोडशमहादानान्तर्गतगोसहस्रमहादानकर्मणि पूर्वकर्तव्य नियमानाचरणजन्यप्रत्यवायपरिहारपूर्वक सद्योदेहशुद्धिद्वारा तत्कर्माधिकारतासिद्धये प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयद्रव्यं रजतं चन्द्रदेवताकं ··············· गोत्राय आचार्याय तुभ्यं संप्रददे ।

प्रार्थना —

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।

तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्य कृतैतत्प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयरजतदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये इदं रजतं चन्द्रदेवताकं .... गोत्राय आचार्याय तुभ्यं संप्रददे ॥

ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्भूमौ प्रतिहतमस्तु अमृताभिषेकोऽस्तु ॥

देवस्मरणम्—

प्रतिज्ञासङ्कल्पः —

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः सपुत्रा सपरिवारा .... देवी अहं मम सकलपापक्षयानन्तर सिद्धचारणसेवितत्वार्कवर्णसुवर्णकिङ्किणीजालमालिविमानारोहणोत्तरैकैकमन्वन्तरावच्छिन्नेन्द्रादिसकललोकपाललोकाधिकरणपुत्रपौत्रसमन्वितनिवासामरकर्तृकपूजापूर्वकसप्तलोकातिक्रमणोत्तरपुत्रपौत्रसमन्वितशिवालयगमनैकोत्तरशतपितृमातामहकुलतारणकल्पशतावच्छिन्नशिवपुरनिवासानन्तरराजराजभवनाश्वमेधशतकर्तृ

त्वशिवध्यानपरत्वविष्णुसादृश्यापन्नयोगस्थानहेतुकसंसार मोचनकामा श्वो गोसहस्रमहादानं प्रतिपादयिष्ये ॥

स्वस्तिवाचनम् ।

दीपपुष्पाञ्जलिः —

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते ॥
सहस्रकोटीयुगधारिणे नमः
नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोस्तु ते ॥

दीपनाथाय नमः ।

कलशपुष्पाञ्जलिः —

ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।

आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ।
त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥

वरुणकलशाय नमः ।

गणेशपुष्पाञ्जलिः —

ॐ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

सिद्धिबुद्धिसहितगणाधिपतये नमः ।

मण्डपप्रवेशः —

अथ शङ्खघण्टावादन-मङ्गलमन्त्रपठनपूर्वकं दीपकलशगणेशान्धृत्वा मण्डपं त्रिःप्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविशेत् ॥ आ नो भद्रा इत्यादिकं पठेत्.

वरणम् —

वरणद्रव्याय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेति त्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः ………………………… देवी अहं मम ……………………… करिष्यमाणगोसहस्रमहादानकर्मणि पूर्वाङ्गत्वेन निर्विघ्नतासिद्धये दीपकलशगणेशपूजनं, मातृकापूजनं, पुण्याहवाचनं, नान्दीश्राद्धानुकल्पगोदानं, ग्रहपूजनं, वास्तुपूजनं, मण्डपदेवतापूजनं, ध्वजपताकोच्छ्रयणादि, षोडशारचक्रदेवतापूजनं, श्रीनन्दिकेश्वरसंपूजनं, गवामधिवासनं, तथा स्वगृह्योक्तप्रकारेणाग्निप्रज्वालनपूर्वकं संपूजितदेवानां हवनादि कर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् ऽभिश्चन्दनपुष्पाक्षतमाल्यधौतोत्तरीयासनराजतजलपात्रसौवर्णाङ्गुलीयककेयूररुद्राक्षकण्ठाभरणादिभिः आचार्यत्वेन, तथा ऽभिश्चन्दनपुष्पाक्षतधौतोत्तरीयजलपात्रासनसौवर्णाङ्गुलीयकादिभिर्गणपतिब्रह्मसदस्यहोतृत्विग्जापकद्वारपालत्वेन, तथा ऽभिश्चन्दनपुष्पाक्षतधौतोत्तरीयादिभिः परिचारकत्वेन च युष्मानहं वृणे

ॐ वृताः स्मः ॥

मधुपर्कः —

यजमानः

ॐ साधु भवानास्तामित्यस्य प्रजापतिऋषिर्यजुर्ब्रह्मा देवताऽऽचार्यार्चने विनियोगः। ॐ साधु भवानास्तामर्चयिष्यामो भवन्तं इति ब्रूयात्॥ ॐ अर्चय इति प्रत्युक्ते, अर्चनीयोपवेशनार्थं शुद्धमासनं दत्वा विष्टरमादाय ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते,

यजमानः ॐ विष्टरः प्रतिगृह्यताम् इति वदेत् ॥

अर्चनीयः

ॐ विष्टरं प्रतिगृह्णामि इत्यभिधाय एकं विष्टरं गृहीत्वा ॐ वर्ष्मोस्मीत्याथर्वणऋषिरनुष्टुप्छन्दो विष्टरो देवता आत्मस्तुतिपूर्वकोपवेशने विनियोगः। ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः॥ इमन्तमभिनिष्ठामि योमाकश्चाभिधासति॥ इत्यासने उत्तराग्रं कृत्वा विष्टरोपरि उपविशेत्॥

ततः पाद्यं पाद्यं पाद्यं इत्यन्येनोक्ते,

यजमानः पाद्यं अञ्जलिना आदाय ॐ पाद्यं प्रतिगृह्यताम् इति वदेत्॥

अर्चनीयः

ॐ पाद्यं प्रतिगृह्णामि इत्यभिधाय यजमानहस्तात् पाद्यमादाय ॐ विराजो दोहोसीति प्रजापतिऋषिरापो देवता

यजुः पादप्रक्षालने विनियोगः । ॐ विराजो दोहोसि विराजो दोहमसीय ॥ मयि पाद्यायै विराजो दोहः ॥ इति दक्षिणपादं प्रक्षाल्य;

ॐ विराजो दोहोसीति प्रजापतिरृषिरापो देवता यजुः पादप्रक्षालने विनियोगः । ॐ विराजो दोहोसि विराजो दोहमसीय ॥ मयि पाद्यायै विराजो दोहः ॥ इति वामपादमपि प्रक्षालयेत् ॥

ततो विष्टरान्तरं गृहीत्वा ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते,

यजमानो विष्टरमादाय ॐ विष्टरः प्रतिगृह्यताम् इति वदेत् ॥

अर्चनीयः

ॐ विष्टरं प्रतिगृह्णामि इत्यभिधाय यजमानहस्ताद् विष्टरमादाय प्रक्षालितपादयोः अधस्तात् उत्तराग्रं निदध्यात् ॥

ततः अर्घोर्घोर्घः इत्यन्येनोक्ते,

यजमानः

दूर्वा-ऽक्षत-फल-चन्दन-दधि-जलयुतं अर्घपात्रं गृहीत्वा ॐ अर्घः प्रतिगृह्यताम् इति वदेत् ॥

अर्चनीयः

ॐअर्घं प्रतिगृह्णामि इत्यभिधाय यजमानहस्तात् अर्घपात्रं गृहीत्वा ॐआपस्थेतिप्रजापतिऋषिरापो देवता यजुरर्घग्रहणे विनियोगः। ॐआपस्थयुष्माभिः सर्वान्कामानवाप्नवान् इति (अर्चनीयः) स्वशिरसि अक्षतादिकं किञ्चिद्दत्वा ॐसमुद्रं व इत्याथर्वणऋषिरनुष्टुप्छन्द आपो देवताऽर्घाभिमन्त्रणे विनियोगः। ॐसमुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत॥ अरिष्टास्माकं वीरामापरासेचि मत्पयः॥ इति अर्घपात्रं ऐशान्यां त्यजन् पठेत्॥

तत आचमनीयमाचमनीयमाचमनीयम् इत्यन्येनोक्ते, यजमानः आचमनीयमादाय ॐआचमनीयं प्रतिगृह्यताम् इति वदेत्॥

अर्चनीयः

ॐआचमनीयं प्रतिगृह्णामि इत्यभिधाय यजमानहस्तात् आचमनीयमादाय ॐआमागन्निति परमेष्ठीऋषिर्बृहतीच्छन्द आपो देवताऽऽचमने विनियोगः। ॐआमागन्यशसासꣳसृजवर्चसा॥ तम्मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्॥ इति सकृत् आचम्य द्विस्तूष्णीं आचामेत्॥

ततो मधुपर्को मधुपर्को मधुपर्कः इत्यन्येनोक्ते, यजमानः कांस्यपात्रस्थितानि "दधि-मधु-घृतानि" कांस्यपात्रपिहितानि आदाय ॐ मधुपर्कः प्रतिगृह्यताम् इति वदेत् ॥

आर्चनीयः

ॐ मधुपर्कं प्रतिगृह्णामि इत्यभिधाय दातृकरस्थमेव ॐ मित्रस्य त्वेति बृहस्पतिऋषिर्मधुपर्को देवता यजुर्मधुपर्कावेक्षणे विनियोगः। ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ इति दातृकरस्थमेव मधुपर्कं निरीक्ष्य ॐ देवस्य त्वेति बृहस्पतिराङ्गिरसऋषिः सविता देवता यजुर्मधुपर्कग्रहणे विनियोगः। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ प्रतिगृह्णामि ॥ इति मधुपर्कपात्रं गृहीत्वा वामहस्ते कृत्वा ॐ नमः श्यावास्यायेति प्रजापतिऋषिः सविता देवता यजुर्मधुपर्कालोडने विनियोगः। ॐ नमः श्यावास्यायान्नशने यत्त आविद्धन्तन्तो निष्कृन्तामि ॥ इति अनामिकया प्रदक्षिणमालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिद् भूमौ निःक्षिप्य पुनः वारद्वयं निःक्षिपेत् ॥ ततः ॐ यन्मधुन इति कुत्सऋषिर्जगतीच्छन्दो मधुपर्को देवता मधुपर्कप्राशने वि

नियोगः। ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोसानि ॥ इति समन्त्रं त्रिवारं प्राश्नीयात् ॥

ततो मधुपर्कपात्रं पूर्वस्यां असञ्चरे धृत्वा आचम्य ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठीऋषिर्दैवीगायत्रीछन्दः परमात्मा देवता प्राणस्पर्शने विनियोगः। ॐ वाङ्म आस्ये अस्तु ॥ ॐ नसोर्मे प्राणोस्तु ॥ ॐ अक्ष्णोर्मे चक्षुरस्तु ॥ ॐ कर्णयोर्मे श्रोत्रमस्तु ॥ ॐ बाह्वोर्मे बलमस्तु ॥ ॐ ऊर्वोर्मे ओजोस्तु ॥ ॐ अरिष्टानि मेङ्गानि तनूस्तन्वा मे सह सन्तु ॥ ततो यजमानेन गौर्गौर्गौः इत्यभिहिते,

अर्चनीयः

ॐ मातारुद्राणामिति ब्रह्माऋषिस्त्रिष्टुप्छन्दो गौर्देवता गोरभिमन्त्रणे विनियोगः। ॐ मातारुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाममृतस्य नाभिः॥ प्रनुवोचं चिकितुषे जनायमागामनागामदितिं वधिष्ठ ॥ मम ……………
…………… देव्या यजमान्याश्च पाप्मा हतः ॐ इतिउ पांशु पहित्वा उत्सृजततृणान्यत्तु इति उच्चैर्वदेत् ॥ ॥

तत आचार्यं संपूज्य, ममास्मिन्यज्ञे आचार्यत्वेन त्वामहं वृणे. ॐ वृतोस्मि ॥

प्रार्थना—

आचार्यत्वे यथा स्वर्गे शक्रादीनां बृहस्पतिः ।
तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत ॥
ॐ भवानि.

ततो गणेशं संपूज्य, ममास्मिन्यज्ञे गणपतित्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

देवानामसुराणां च यज्ञे प्राक्पूजितस्तु यः ।
निर्विघ्नं कुरुते यद्वत्वं मे गणपतिर्भव ॥
ॐ भवानि.

ततो ब्रह्माणं संपूज्य, ममास्मिन्यज्ञे ब्रह्मत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः ।
तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम ॥
ॐ भवानि.

ततः सदस्यं संपूज्य, ममास्मिन्यज्ञे सदस्यत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

यथा विश्वसृजो यज्ञे याक्यवल्क्यो द्विजोत्तमः ।
तथा त्वं मम यज्ञेस्मिन् सदस्यो भव सुव्रत ॥
ॐ भवानि.

ततो होतारं संपूज्य, ममास्मिन्यज्ञे होतृत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

भगवन् सर्वधर्मज्ञ सर्वधर्मविदां वर ।
वितते मम यज्ञेस्मिन्नृत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततो ऋत्विजं संपूज्य, ममास्मिन्यज्ञे ऋत्विक्त्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर ।
वितते मम यज्ञेस्मिन्नृत्विक्त्वं मे मखे भव ॥

ॐ भवानि.

ततो द्वारपालं संपूज्य, ममास्मिन्यज्ञे ऋग्वेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥
ॐ भवानि.

ततोऽन्यं द्वारपालं संपूज्य, ममास्मिन्यज्ञे यजुर्वेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

कानराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततोऽन्यं द्वारपालं संपूज्य, ममास्मिन्यज्ञे सामवेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततोऽन्यं द्वारपालं संपूज्य, ममास्मिन्यज्ञे अथर्ववेदसूक्तपारायणार्थं द्वारपालत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

बृहन्नेत्रोऽथर्ववेदोनुष्टुभो रुद्रदैवतः ।
वैशम्पायनविप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततो जापकं संपूज्य, ममास्मिन्यज्ञे ऋग्वेदमन्त्रजपकर्मकर्तुं जापकत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वंमे मखे भव ॥
ॐ भवानि.

ततोऽन्यं जापकं संपूज्य, ममास्मिन्यज्ञे यजुर्वेदमन्त्रजपकर्मकर्तुं जापकत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततोऽन्यं जापकं संपूज्य, ममास्मिन्यज्ञे सामवेदमन्त्रजपकर्मकर्तुं जापकत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥
ॐ भवानि.

ततोऽन्यं जापकं संपूज्य, ममास्मिन्यज्ञे अथर्ववेदमन्त्रजपकर्मकर्तुं जापकत्वेन त्वामहं वृणे, ॐ वृतोस्मि ॥

प्रार्थना—

बृहन्नेत्रोऽथर्ववेदोनुष्टुभो रुद्रदैवतः ।
वैशम्पायन विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

ॐ भवानि.

ततः परिचारकादींश्च पूजयेत् ॥

ततः सर्वेषां प्रार्थना—

अस्य यागस्य निष्पत्त्यै भवन्तोभ्यर्थिता मया ।
सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम् ॥

यथाविहितं कर्म कुरुत । यथामति करवाम ॥

पुण्याहवाचनम्—

फलवस्त्रादिकं गृहीत्वा—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः सपुत्रा सपरिवारा ...... देवी अहं मम करिष्यमाणे गोसहस्रमहादानकर्मणि सर्वाभ्युदयप्राप्त्यै ब्राह्मणद्वारा पुण्याहं वाचयिष्ये, तदङ्गतया चतुर्णां ब्राह्मणानां पूजनं वरणं च करिष्ये.

एभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवस्त्रोपायनादिभिः पुण्याहवाचनार्थं ब्रह्मन् त्वामहं वृणे. ॐ वृतोस्मि ॥

ततः अञ्जलिं बध्वा—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः सपुत्रा सपरिवारा······ देवी अहं मम गोसहस्रमहादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "पुण्याहं भवन्तो ब्रुवन्तु३" ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥ १ ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः सपुत्रा सपरिवारा······ देवी अहं मम गोसहस्रमहादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे " स्वस्ति भवन्तो ब्रुवन्तु३" ॐ स्वस्ति३ ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ २ ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः सपुत्रा सपरिवारा······ देवी अहं मम गोसहस्रमहादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "ऋद्धिं भवन्तो ब्रुवन्तु३" ॐ ऋध्यन्ताम् ३ ॐ

सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम । दिवं पृथिव्या अध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ ३ ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिः सपुत्रासपरिवारा...देवी अहं मम गोसहस्र महादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "वृद्धिं भवन्तो बुवन्तु३" ॐ वृद्ध्यन्ताम् ३ ॐ ज्यैष्ठ्यञ्च मेऽआधिपत्यञ्च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मेषराशिःसपुत्रासपरिवारा.....देवी अहं मम गोसहस्र महादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "कल्याणं भवन्तो बुवन्तु३" ॐ कल्याणम् ३ ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्याᳪ शूद्राय चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः

समृध्यताम् ॥ ५ ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः सपुत्रासपरिवारा……देवी अहं मम गोसहस्रमहादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः, मण्डपे "श्रियं भवन्तो ब्रुवन्तु३" ॐ श्रीः ३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥ ६ ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मेषराशिः सपुत्रासपरिवारा……देवी अहं मम गोसहस्रमहादानकर्मणि सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "शान्तिं भवन्तो ब्रुवन्तु३" ॐ शान्तिः३ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ७ ॥

विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्नऽ आसुव ॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥
पुण्याहवाचनसमृद्धिरस्तु ॥

अथ मातृकापूजन-नान्दीश्राद्धानुकल्पगोदान- ग्रह-वास्तु-मण्डपदेवता-पूजन-ध्वजपताकोच्छ्रयण-षोडशारचक्रदेवतापूजन- नन्दिकेश्वरसंपूजन-गवाधिवासनाऽग्निप्रज्वालन-संपूजितदेवताहवनादीनि च ब्राह्मण द्वारा कारयेत् ॥

तत आचार्यः उपरि फलपुष्पादिशोभितपञ्चवर्णवितानबद्धवेदिमध्ये षोडशारचक्रं विलिख्य पुष्पैरवकीर्य सलक्षणवृषं सवत्सधेनुदशकं च वस्त्र-माल्य-सुवर्णघण्टा-सुवर्णतिलक-रत्नखचितसुवर्णशृङ्ग-रौप्यखुर- ताम्रपृष्ठ-मुक्तालाङ्गूल-दोहनपात्र-कौशेयवस्त्र-पादुकोपानच्छत्र-चामर-भाजना-ऽऽसनाद्युपस्कर शोभितं वेद्याः परितः स्थाप्याधिवासयेत् । गोसहस्रं च सुवर्णशृङ्गादिसहितं मण्डपाद् बहिः स्थापयेत् ॥

ततः सवृषगोदशकमध्ये वेद्यां षोडशारस्थद्रोणपरिमितलवणोपरि कौशेयवस्त्रसंवीतं नानाऽऽभरण-रत्न-माल्येक्षुफलाद्युपस्कर संयुक्तं नन्दिकेश्वरं स्थापयेत्। पादुकोपानच्छत्र-चामर-दण्ड-भोजनभाजनादीनि च पीठ स्थापयेत् ॥ नन्दिकेश्वरं च संपूज्याधिवासयेत् ॥ ॥

उत्तरदिने :—

दीपपुष्पाञ्जलिः —

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

दीपनाथाय नमः।

कलशपुष्पाञ्जलिः—

ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

वरुणकलशाय नमः।

गणेशपुष्पाञ्जलिः—

ॐ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणपतये नमः।

मातृपुष्पाञ्जलिः—

ॐ ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥

मातृभ्यो नमः ।

ग्रहपुष्पाञ्जलिः—

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

नवग्रहेभ्यो नमः ।

वास्तुपुष्पाञ्जलिः—

ॐ वास्तोष्पते महाभाग भूमिशय्यारतःप्रभो ।
मद् गृहं धनधान्यादिसमृद्धं कुरु सर्वदा ॥

वास्तोष्पतये नमः ।

अग्निपुष्पाञ्जलिः—

ॐ अग्निं प्रज्वलितं वन्दे जातवेदोहुताशनम् ।
सुवर्णवर्णममलं समिद्धं सर्वतो मुखम् ॥

अग्नये नमः ।

अथ प्रत्यक्षं वृषं नन्दिकेश्वरं धेनुदशकंच त्रिःप्रदक्षिणीकृत्य;

पुष्पाञ्जलिना पूजयेत् ।

नन्दिकेश्वरपुष्पाञ्जलिः—

ॐ ऊर्द्धस्त्रिनेत्रो द्विभुजः सौम्यास्यो नन्दिकेश्वरः ।
वामे तु शूलभृद्दक्षे चाक्षमालासमन्वितः ॥

नन्दिकेश्वराय नमः ।

गोपुष्पाञ्जलिः—

ॐ नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च ।
लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः ॥
गवामङ्गेषु तिष्ठन्ति भुवनान्येकविंशतिः ।
ब्रह्मादयस्तथा देवा रोहिण्यः पान्तु मातरः ॥
गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहम् ॥
यस्मात्त्वं वृषरूपेण धर्म एव सनातनः ।
अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ॥

गोभ्यो नमः । वृषभाय नमः ।

प्रत्यक्षवृषयुनधेनुदशकोत्तरगोसहस्राय नमः ।

अथ गोसहस्रमहादानसङ्कल्पः—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रास परिवारा मेषराशिः ……

देवी अहं मम जन्मजन्मान्तरीणसमस्तपातकोपपातककक्षयानन्तरसिद्धचारणाप्सरोगणसेवितार्कवर्णकिङ्किणीजालमालिविमानारोहणोत्तरानेकमन्वन्तरकालावच्छिन्नेन्द्रादिलोकपाललोकाधिकरणकपुत्रपौत्रादिसमन्वितशिवलोकगमनैकोत्तरसंख्यासंख्येयपितृमातामहकुलतारणकल्पशतशिवलोकनिवासानन्तराश्वमेधशतकर्तृत्वशिवध्यानपरत्वविष्णुसादृश्यापन्नयोगस्थानहेतुकसंसारमोचनकामा इमाः सुपूजिताः सुवर्णघण्टाः हेमतिलकाः कौशेयवस्त्रमाल्ययुताः रत्नप्रोतस्वर्णशृङ्गीः रौप्यखुराः ताम्रपृष्ठाः ताम्रदोहनाः चामरोपशोभिताः पादुकोपानच्छत्राद्यनेकोपस्करसंयुताः वेदीलिखितयन्त्रोपरिनिहितद्रोणपरिमितलवणराशिस्थताम्रघटोपरिगतताम्रस्थालीस्थापितसुपूजितसोपस्करसुवर्णनिर्मितनन्दिकेश्वरप्रतिमायुताः प्रत्यक्षवृषभयुतसवत्सगोदशकोत्तरसहस्रसंख्याकाः गाः रुद्रदेवताकाः ……………गोत्राय ……………………
शर्मणे आचार्याय, नानानामगोत्रेभ्यो नानानामशर्मभ्यो ऋत्विगादिभ्योऽन्येभ्यो ब्राह्मणेभ्यश्च यथाभागं विभज्य युष्मभ्यं संप्रददे। तत्सन्न मम ॥

तत आचार्यादयो गोपुच्छं गृहीत्वा–

ॐ कोदात्कस्मा ऽ अदात्कामोदात्कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥
इति कामस्तुतिं पठेयुः ।

यजमानः अञ्जलिं बध्वा प्रार्थयेत्–

ॐ नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च ।
लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः ॥
गवामङ्गेषु तिष्ठन्ति भुवनान्येकविंशतिः ।
ब्रह्मादयस्तथा देवा रोहिण्याद्यास्तु मातरः ॥
गावो ममाग्रतः सन्तु गावः पृष्ठत एव च ।
गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहम् ॥
यस्मात्त्वं वृषरूपेण धर्म एव सनातनः ।
अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ॥

दानप्रतिष्ठा–

अद्यकृतैतत् सर्वोपस्कर युत प्रत्यक्षवृषभसमन्वित सवत्सगोदशकोत्तर सहस्रगोदानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदैवताकं .... गोत्राय ....शर्मणे आचार्याय, नानानामगोत्रेभ्यो नानानामशर्मभ्यो ऋत्विगादिभ्योऽन्येभ्यो ब्राह्मणेभ्यश्च यथाभा

गं विभज्य युष्मभ्यं संप्रददे ॥

भूमिदानम्—

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

भूमिनिष्क्रयरजतद्रव्याय नमः।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः .... देवी अहं मम जन्मजन्मान्तरीण समस्तपापक्षयपूर्वक श्रुतिस्मृतिपुराणोक्तफलावाप्तये कृतैतत्सोपस्कर गोसहस्र महादानकर्मणः साङ्गोपाङ्गफलावाप्तये इदं भूमिनिष्क्रयरजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे .... तुभ्यं संप्रददे ।

प्रार्थना—

सर्वेषामाश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तसस्यफलदा अतः शान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—

अद्यकृतैतद् भूमिनिष्क्रयरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय ....

……शर्मणे ……………… तुभ्यं संप्रददे ॥

सुवर्णदानम्—

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

सुवर्णद्रव्याय नमः।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः …………………… देवी अहं मम जन्मजन्मान्तरीण सकलपापक्षयपूर्वकश्रुतिस्मृतिपुराणोक्तफलावाप्तये कृतस्य सपरिच्छद गोसहस्रमहादानकर्मणः साङ्गोपाङ्गफलावाप्तये इदं सुवर्णं वह्निदैवतं ……………… गोत्राय ……………… ……शर्मणे ……………… तुभ्यं संप्रददे ।

प्रार्थना—

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छमे ॥

दानप्रतिष्ठा—

अद्यकृतैतत् सुवर्णदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……………… गोत्राय ……………………

शर्मणो .... तुभ्यं संप्रददे ॥

पुण्याहवाचनम् —

फलवस्त्रादिकं गृहीत्वा —

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः .... देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये, तदङ्गतया चतुर्णां ब्राह्मणानां पूजनं वरणं च करिष्ये ॥

एभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवस्त्रोपायनादिभिः पुण्याहवाचनार्थं ब्रह्मन् त्वामहं वृणे, ॐ वृतोस्मि ॥

तत अञ्जलिं बध्वा —

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः .... देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "पुण्याहं भवन्तो ब्रुवन्तु३" ॐ पुण्याहम् ३ ॐ पुनन्तु मा देव

जनाः पुनन्तु मनसा धियः। पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥१॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः .... देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "स्वस्ति भवन्तो ब्रुवन्तु३" ॐ स्वस्ति३ ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥२॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः .... देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "ऋद्धिं भवन्तो ब्रुवन्तु३" ॐ ऋध्यताम्३ ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम। दिवं पृथिव्याऽअध्यारुहामा विदामदेवान्स्वर्ज्योतिः ॥३॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः ……………… ……… देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "वृद्धिं भवन्तो ब्रुवन्तु ३" ॐ वृद्ध्यताम् ३ ॐ ज्यैष्ठ्यञ्च मऽ आधिपत्यञ्च मे मन्युश्च मे भामश्च मेऽमश्च मेम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः ……………… ……… देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "कल्याणं भवन्तो ब्रुवन्तु३ ॐ कल्याणम्३ ॐ यथेमां वाचङ्कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्या ँ शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणाये दातुरिह भूयासमयं मे कामः समृद्ध्यताम् ॥५॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः ………………… देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "श्रियं भवन्तो ब्रुवन्तु३" ॐ श्रीः३ ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥६॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः ……………… ………देवी अहं मम कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया सर्वाभ्युदयप्राप्तये भो ब्राह्मणाः मण्डपे "शान्तिं भवन्तो ब्रुवन्तु३" ॐ शान्तिः३ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ॥७॥

विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्न ऽ आसुव ॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥
पुण्याहवाचनसमृद्धिरस्तु ॥

पूर्णपात्रदानम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेशराशिः ……………… ……देवी अहं मम श्रीपरमेश्वरप्रीतये कृतस्य गोसहस्रमहादानाङ्गहवनकर्मणः अपूर्णपूर्णार्थं पूर्णपात्रं प्रजापतिदेवताकं ……… गोत्राय …………………… शर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यं संप्रददे ॥

प्रणीताविमोकः—

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु· इति प्रणीताजलेन यजमानशिरोभिषिच्य;

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः ॥ इति प्रणीतापात्रं ऐशान्यां न्युब्जी कुर्यात् ॥

बर्हिर्होमः—

ॐ देवा गातुविदो गातुं वित्वा गातुमित ।
मनसस्पतऽ इमन्देव यज्ञꣳ स्वाहा वाते धाः ॥

मेधा—

ॐ सद सस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिम्मेधामयासिषꣳ स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

वस्त्रहोमः—

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि । समाववर्ति पृथिवी समुखाः समुसूर्यः समु विश्वमिदं जगत् । वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यष्णावै भूः स्वाहा ॥

शेषचरुहोमः—

ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम्॥ स्वाहा॥

अङ्गालम्भनम्—

सप्तभिर्वक्ष्यमाणमन्त्रैः प्रतिमन्त्रं ललाटाच्चिबुकपर्यन्तं मुखं पाणिप्रतपनपूर्वकं मार्जयेत्।

ॐ तनूपा ऽग्नेसि तन्वं मे पाहि ॥
ॐ आयुर्दा ऽअग्ने ऽस्यायुर्मे देहि ॥
ॐ वर्चोदा ऽअग्नेऽसि वर्चो मे देहि ॥
ॐ अग्ने यन्मे तन्वा ऽऊनन्तन्मऽ आपृण ॥
ॐ मेधां मे देवः सविता आदधातु ॥
ॐ मेधां मे देवी सरस्वती आदधातु ॥
ॐ मेधामश्विनौ देवावाधत्ताम्पुष्कर स्रजो ॥
ॐ अङ्गानि च मऽ आप्यायनाम्। इति सर्वाङ्गानि स्पृशेत्।
ॐ वाक् च मऽ आप्यायताम् । इति मुखे
ॐ प्राणश्च मऽ आप्यायनाम् । इति नासिकायाम्
ॐ चक्षुश्च मऽ आप्यायताम् । इति नेत्रयोः
ॐ श्रोत्रञ्च मऽ आप्यायनाम् । इति श्रोत्रयोः

ॐ यशो बलञ्च मऽ आप्यायताम् ।इति बाह्वोः

घृतच्छाया–

ससुवर्णघृतकांस्यपात्राय नमः।

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नौ दूर्वे प्रतनु सहस्रेण शतेन च ॥
ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात्। घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम्। तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः ……………………… देवी अहं मम श्रीपरमेश्वरप्रीतये कृतस्य गोसहस्रमहादानकर्मणः उत्तराङ्गतया इदमवलोकितमाज्यं मृत्युञ्जयदेवताकं कांस्यपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं ……………… गोत्राय ……………………… शर्मणे ब्राह्मणाय ……… तुभ्यं संप्रददे ॥

प्रार्थना—

कामधेनोः समुद्भूतं देवनामुत्तमं हविः ।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ॥
आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् ।
आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ।
आज्यपात्रप्रदानेन शान्तिरस्तु सदा मम ॥

दानप्रतिष्ठा—

अद्य कृतैतदवलोकिताज्यहिरण्यकांस्यपात्रदानकर्मणः प्रतिष्ठार्थं रजतं चन्द्रदेवताकं ……… गोत्राय ………………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥

यशान्तगोदानम्—

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गोनिष्क्रयरजतद्रव्याय नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः ………… ………देवी अहं मम श्रीपरमेश्वरप्रीतये कृ

तस्य गोसहस्रमहादानकर्मणः तत्तद्देवतापूजनकर्मणश्च प्रतिष्ठासाङ्गतासिद्ध्यर्थं इदं गोनिष्क्रयरजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय आचार्याय तुभ्यं संप्रददे ॥

प्रार्थना—

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥
यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

दानप्रतिष्ठा—

अद्यकृतैतत् गोनिष्क्रयरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय आचार्याय तुभ्यं संप्रददे ॥

उत्तराङ्ग पूजा—

भोजनभूयसीदानम्—

ॐ हिरण्य गर्भगर्भस्थं हेमबीजं विभावसोः
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे
रजतद्रव्येभ्यो नमः ।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः .... देवी अहं मम श्रीपरमेश्वरप्रीतये कृतस्य गोसहस्रमहादानकर्मणः साङ्गतासिद्ध्यर्थं अष्टोत्तरशतसंख्याकब्राह्मणेभ्यो वरणदक्षिणादानपूर्वकं सिद्धान्नभोजनं करिष्ये, तथैतत्कर्मणो न्यूनातिरिक्तदोषपरिहारपूर्वकसाङ्गुण्यसिद्धये इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्योऽन्येभ्यश्च दीनानाथेभ्यो दातुं समुत्सृजे तत्सन्न मम ॥

देवविसर्जनम्—

अभिषेकः—

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव॥

ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु द्विपदेभ्यश्चतुष्पदेभ्यश्च शान्तिर्भवतु अमृताभिषेकोस्तु॥

आशीर्वादमन्त्राः—

ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे रा

जन्यः शूर इषव्योतिव्याधी महारथो जायतान्दोग्ध्री
धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णूरथेष्ठाः
सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे नि
कामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां
योगक्षेमो नः कल्पताम् ॥ दीर्घायुस्तऽ ओषधे खनि
ता यस्मै च त्वा खनाम्यहम् । अथो त्वन्दीर्घायुर्भूत्वा श
तवल्शा विरोहतात् ॥ पुनस्त्वादित्यारुद्रावसवः समिन्ध
तां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्वं वर्धय
स्व सत्याः सन्तु यजमानस्य कामाः ॥ मनसः काममाकू
तिं वाचः सत्यमशीय । पशूनाꣳ रूपमन्नस्य रसो य
शः श्रीः श्रयताम् ॥

तिलकमन्त्रः —

त्र्यायुषञ्जमदग्नेः ललाटे ॥
कश्यपस्य त्र्यायुषम् ग्रीवायाम् ॥
यद्देवेषु त्र्यायुषम् दक्षबाहुमूले ॥
तन्नोऽ अस्तु त्र्यायुषम् हृदि ॥

प्रसादमन्त्राः —

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धान्यं धनं पशून्बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥
भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

ततो मण्डपदानम्—

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा सपुत्रा सपरिवारा मेषराशिः .... देवी अहं मम जन्मजन्मान्तरीयसकलपापक्षयपूर्वकश्रुतिस्मृतिपुराणोक्तफलावाप्तिद्वारा श्रीपरमेश्वरप्रीतये गोसहस्रमहादानकर्मणि तत्तद्देवतास्थापनपूजनहवनादिकर्मसंपत्तये विनिर्मितमिदं ध्वजपताकादिमण्डितं सुपूजिततत्तद्देवताप्रतिमासनाथं सपरिच्छदं मण्डपं विश्वकर्मदेवताकं .... गोत्राय .... शर्मणे ब्राह्मणाय आचार्याय तुभ्यं संप्रददे ।

प्रार्थना—

नमो नमस्ते गोविन्द पुराण पुरुषोत्तम ।
दानेनानेन देवेश प्रसन्नो भव सर्वदा ॥

दानप्रतिष्ठा—

अद्यकृतैतत्, गोसहस्रमहादानाङ्ग सपरिच्छदमण्डप दानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ....गोत्राय ....शर्मणे ब्राह्मणाय आचार्याय दानप्रतिष्ठात्वेन तुभ्यं संप्रददे ॥

अञ्जलिं बध्वा—

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ अच्युताय नमः ३ ॥

हस्ते जलं गृहीत्वा—

ॐ कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥

गोप्रदक्षिणा ·

गावः सुरभयो नित्यं गावो गुग्गुल गन्धिकाः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥१॥
अन्नमेव परं गावो देवानां हविरुत्तमम् ।
पावनं सर्वभूतानां क्षरन्ति च वहन्ति च ॥२॥
हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि ।
ऋषीणामपि होतॄणां गावो होमे प्रतिष्ठिताः ॥३॥
सर्वेषामेव भूतानां गावः शरणमुत्तमम् ।
गावः स्वर्गस्य सोपानं गावो धन्याः सवाहनाः ॥४॥
गावः पवित्रं परमं गावो मङ्गलमुत्तमम् ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥५॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमः ।
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥६॥
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ।
गावो मामुपतिष्ठन्तु हेमशृङ्गाः पयोमुचः ॥७॥
सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा ।
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा ॥८॥
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ।
एवं रात्रौ दिवा वापि समेषु विषमेषु च ॥९॥

भयेषु च नरो नित्यं कीर्तयन् मुच्यते भयात् . ॥१०॥
घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्ता स्ता मे सन्तु सदा गृहे . ॥११॥
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् . ।
घृतं मे सर्वतश्चैव घृतं मे मनसि स्थितम् . ॥१२॥
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः . ।
गावो मामुपतिष्ठन्तु गवां मध्ये वसाम्यहम् . ॥१३॥
इत्याचम्य जपन्प्रातः सायं वा पुरुषस्तथा . ।
यद्रात्र्या कुरुते पापं तद्रात्र्या प्रतिमुच्यते . ॥१४॥
यदन्हा कुरुते पापं तदह्ना प्रतिमुच्यते . । ॥१५॥

॥ इति गोमतीजपम् ।

प्रदक्षिणां समर्पयामि सहस्रदशोन्तर
जो सहस्राय नमः ॥

"BULL-DOG" EXERCISE BOOK No. 1

कन्यादान सङ्कलन

५१

Subject ____________

Name ____________

Class ____________

Roll No. ____________ Year ____________

प्रायश्चित्तगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥

गोनिष्क्रयीभूत रजत द्रव्याय नमः

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेतित्रिप्रवरा मकरराशिः ………………… देवी अहं मम करिष्यमाण ब्राह्मणपुत्रीकन्यादानकर्मणि शास्त्रोदितनियमानाचरणजन्यप्रत्यवाय परिहारपूर्वकं सद्योदेहशुद्धिद्वारा तत्कर्माधिकारसिद्ध्यै प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयरजतद्रव्यं चन्द्रदेवताकं ……… गोत्राय ……………… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे.

प्रार्थना-

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दान प्रतिष्ठा-

अद्यकृतैतत् प्रायश्चित्तप्रत्याम्नायीभूतगोनिष्क्रयरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय

लग्नगोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोप्रत्याम्नायीभूत रजतद्रव्याय नमः

ब्राह्मणाय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा मकरराशिः ………………… देवी अहं मम· करिष्यमाण ब्राह्मणपुत्रीकन्यादान कर्मणि कन्यादानलग्नात् अरिष्टस्थानस्थितानां ग्रहाणां अशुभफलनिवृत्तये शुभस्थानस्थितानां ग्रहाणां शुभाधिक्यफलावाप्तये सकलारिष्टशान्तये इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे·

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्यकृतैतत् लग्नारिष्टगोनिष्क्रयीभूत रजतदान कर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं ……… गोत्राय ……… शर्मणे ब्राह्मणाय तुभ्यं संप्रददे· तन्मन्न मम·

…University… Kathmandu

हरिः ॐ तत्सत् ३ विष्णुः ३ ॐ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय ॐ तत्सत् श्रीहंसस्य सच्चिदानन्दरूपिणो ब्रह्मणोऽनिर्वाच्य माया शक्तिविजृम्भिता विद्यायोगात्कालकर्म स्वभावाविर्भूत महत्तत्वोदिताहङ्कार त्रितयोद्भूत वियदादि पञ्चेन्द्रिय देवता निर्मिताण्ड कटाहे चतुर्दश लोकात्मके लोके लीलया तन्मध्यवर्ति भगवतः श्रीनारायणस्य नाभिकमलोद्भूतेन सकललोकपितामहेन ब्रह्मणा सृष्टिं कुर्वता तदुद्धरणाय प्रार्थितेन महापुरुषरूपिणा धृतवराहावतारेण ध्रियमाणायामस्यां भूर्लोक संज्ञितायां धरित्र्यां सप्तद्वीपमण्डितायां क्षीरोदाद्यब्धि द्विगुण कुशादिद्वीपवलयीकृते लक्षयोजन विस्तीर्णे जम्बूद्वीपे भरतखण्डे स्वर्गस्थितामराद्याशासितावतारे गङ्गादिसरिद्भिः पावित्रे निखिलजनपावने शौनकादिमुनिकृतवसतिके नैमिषारण्ये आर्यावर्ते पाशुपतक्षेत्रे हिमवत्पर्वतैकदेशे श्रीभगवन्मार्तण्ड कृपापात्र कालत्रितयज्ञ गर्ग वराहाचार्यादि गणितायां संख्यायां श्रीब्रह्मणो द्वितीयपरार्द्धे द्वितीययामे तृतीयमुहूर्ते श्रीश्वेतवाराहनाम्नि प्रथमकल्पे स्वायम्भुव स्वारोचिषो त्तम तामस

रैवत चाक्षुषेति षण्मनूनामतिक्रम्य मारो संप्रति सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगस्य प्रथमचरणे बौद्धावतारे श्रीमन्नृपति विक्रमार्क समयात् संवत्सराणां समयेनातिक्रौंनां षष्ठ्यब्दानां मध्ये सर्वधारी नाम संवत्सरे श्रीसूर्ये उत्तरायणे वसन्त ऋतौ मासोत्तमे मासे वैशाख मासे शुक्लपक्षे अक्षयतृतीयायां पुण्यतिथौ रविवासरे रोहिणीनक्षत्रे तिगण्ड योगे तैतिलकरणे वारुणमुहूर्ते मिथुनलग्ने मेषराशिस्थिते श्रीसूर्ये वृषराशिस्थिते चन्द्रमसि तुला राशिस्थिते देवगुरौ अन्येषु ग्रहेषु यथा यथास्थान स्थितेषु सत्सु. एवं ग्रहगुणविशेषेण विशिष्टायाम्

अद्येह काश्यपगोत्रा काश्यपावत्सार नैध्रुवेतित्रि प्रवरा सभर्तृका सपुत्रा सपरिवारा मकर राशिः…… ……………… देवी अहं मौद्गल्यगोत्रस्य मोद्गल्य भार्गव च्यवनेति त्रिप्रवरस्य नन्दिकेश्वर शर्मणः प्रपोत्राय, मोद्गल्य गोत्रस्य मोद्गल्य भार्गव च्यवनेति त्रिप्रवरस्य कालीदास शर्मणः पोत्राय, मौद्गल्यगोत्रस्य मौद्गल्य भार्गव च्यवनेतित्रिप्रवरस्य भैरवप्रसाद शर्मणः पुत्राय, भारद्वाजगोत्रस्य भारद्वाजाङ्गिर-

रस वार्हस्पत्येति त्रिप्रवरस्य नारायणादत्त शर्मणः प्रपौत्रीं, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरस्य यदुनाथ शर्मणः पौत्रीं, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरस्य माननाथशर्मणः पुत्रीं, मौद्गल्यगोत्रस्य मौद्गल्य भार्गव च्यवनेति त्रिप्रवस्य नन्दिकेश्वरशर्मणः प्रपौत्राय, मौद्गल्यगोत्रस्य मौद्गल्य भार्गव च्यवनेति त्रिप्रवरस्य कालीदासशर्मणः पौत्राय, मौद्गल्यगोत्रस्य मौद्गल्य भार्गव च्यवनेति त्रिप्रवरस्य भैरवप्रसादशर्मणः पुत्राय, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरस्य नारायणदत्त शर्मणः प्रपौत्रीम्, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरसवार्हस्पत्येति त्रिप्रवरस्य यदुनाथ शर्मणः पौत्रीम्, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरस्य माननाथशर्मणः पुत्रीम्, मौद्गल्यगोत्रस्य मौद्गल्य भार्गव च्यवनेति त्रिप्रवरस्य नन्दिकेश्वरशर्मणः प्रपौत्राय, मौद्गल्यगोत्रस्य मौद्गल्य भार्गव च्यवनेति त्रिप्रवस्य कालीदासशर्मणः पौत्राय, मौद्गल्यगोत्रस्य मौद्गल्य भार्गव

च्यवनेति त्रिप्रवरस्य भैरवप्रसाद शर्मणः पुत्राय, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरस्य नारायणदत्त शर्मणः प्रपौत्रीं, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरस्य यदुनाथ शर्मणः पौत्रीम्, भारद्वाजगोत्रस्य भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरस्य माननाथ शर्मणः पुत्रीम्, मौद्गल्यगोत्राय मौद्गल्य भार्गव च्यवनेति त्रिप्रवराय गोविन्दप्रसाद शर्मणे वराय, भारद्वाजगोत्रोत्पन्नां भारद्वाजाङ्गिरस वार्हस्पत्येति त्रिप्रवरां आयुष्मतीं वरार्थिनीं श्रीरूपिणीं हेमकुमारी नाम्नीं सालङ्कारां नानाविधयौतकयुतां इमां कन्यां प्रजापतिदैवताकां मम पुराणोक्त शतगुणीकृत ज्योतिष्टोमातिरात्र समफलावाप्ति पूर्वकं समस्तपितृणां निरतिशयानन्द ब्रह्मलोकावाप्ति रूपादि फलप्राप्तिपूर्वकं श्रीलक्ष्मीनारायण प्रीतये तथा अनेन वरेण अस्यां कन्यायां उत्पादयिष्यमाण सन्तत्या द्वादशावरान् द्वादशपरान् पुरुषान् आत्मानं च पवित्रीकर्तुम्- ब्राह्म विवाहविधिना देवाग्निगुरुब्राह्मण सन्निधौ अस्या-

दिसाक्षिकतया सहधर्माचरणाय पत्नीत्वेन तुभ्यं संप्रददे· प्रतिगृह्णातु भवान्·

प्रार्थना-

कन्यां कनकसंपन्नां कनकाभरणै र्युताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥
विश्वम्भरः सर्वभूताः साक्षिण्यः सर्वदेवताः ।
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ॥
कन्यालक्ष्मीः समाख्याता वरो नारायणः स्मृतः।
तस्मात्कन्याप्रदानेन कृष्णो मे प्रीयतामिति ॥

कन्याप्रार्थना-

कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः।
कन्ये मे पृष्ठतो भूयास्त्वद्दाना-मोक्षमाप्नुयाम्॥

ततः वरकन्ययोः पूजनम्-

प्रार्थना-

त्रैलोक्यनाथ देवेश सर्वभूत दयानिधे ।
दानेनानेन सुप्रीतः सदा शान्तिं प्रयच्छ मे ॥

ततो वरः - देवस्य त्वा सवितुः प्रसवेश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ प्रजापतये कन्यां प्रतिगृह्णामि॥ द्यौस्त्वा ददातु-पृथिवी त्वा प्रतिगृह्णातु· इति भूमीं स्पृशेत् ॥

ॐ स्वस्ति ॐ कोदात्कस्मा अदात् कामोदा कामायादात् ॥ कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥

दानप्रतिष्ठा-

अद्यकृतैतत् कन्यादानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं मोद्गल्यगोत्राय गोविन्दप्रसादशर्मणे वराय तुभ्यं संप्रददे·

तत्सन्न मम·

गोदानम्

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गोभ्यो नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैधुवेति त्रिप्रवरा सभर्तृका सपुत्रा सपरिवारा मकरराशिः .... देवी अहं मम· कन्यादानकर्मणः यथोक्तफलावाप्तये हेमशृङ्गीं रौप्यखुरां ताम्रपृष्ठीं कांश्योपदोहनां मुक्तालाङ्गूलविभूषितां सवस्त्रां सवत्सां इमां गां रुद्रदेवता-

कां मौद्गल्यगोत्राय गोविन्दप्रसादशर्मणे
वराय तुभ्यं संप्रददे· तन्सन्न मम·

प्रार्थना–

कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मा तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा–

अद्य कृतैतत् सालङ्कार गोदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं मौद्गल्यगोत्राय गोविन्दप्रसादशर्मणे वराय तुभ्यं संप्रददे· तन्सन्नमम·

भूयसी दक्षिणा संकल्पः–

ॐ हिरण्यगर्भगर्भस्थं हेमवीजं विभावसोः ॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

रजतद्रव्याय नमः

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा सभर्तृका सपुत्रा सपरिवारा मकरराशिः····
··············देवी अहं मम· ब्राह्मणपुत्रीकन्यादानकर्मणो न्यूनातिरिक्त परिपूर्णार्थं इमां भूयसीदक्षिणां रजतं चन्द्रदेवताकं नानानाम गोत्रेभ्यो

नाना नाम शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य
दातुं जले समुत्सृजे· तत्सन्न मम·।

श्रीगणेशाय नमः॥ ॥ अथ तर्पणम्॥

आचम्य ॥ प्रायश्चित्तगोदानम् ॥

तर्पण संकल्पः–

ॐ अद्येह काश्यपगोत्रस्य आत्मनो पितामह प्रपितामहानां
[illegible] प्रताप [illegible] विक्रम [illegible]
वर्मणां वसु [illegible] स्वरूपाणां तथा काश्यप गोत्राणां
आत्मपितामही प्रपितामही [illegible] प्रपितामहीनां [illegible]
[illegible] कुमारी देवी [illegible] राज्यलक्ष्मी देवीनां वसु [illegible]
स्वरूपाणां तथा [illegible] गोत्राणां आत्म मातामह प्रमातामह
वृद्ध प्रमातामहानां [illegible] वर्मणां
सपत्नीकानां वसु [illegible] स्वरूपाणां [illegible]
[illegible] ब्रह्मादिदेवर्षि
मनुष्य दिव्यपितॄणां तर्पणपूर्वक [illegible] करिष्ये.

~~ॐ अद्येह काश्यपगोत्रस्य आत्मपितामहादि प्रताप [illegible]~~

~~स्वरूपस्य अद्य कर्तव्य साम्वत्सरिक एकोद्दिष्ट श्राद्धाङ्गत्वेन~~

अक्षय्यतृप्तये ब्रह्मादिदेवर्षि मनुष्य दिव्यपितॄणां तर्पणपूर्वकं स्वपितॄणां तर्पणं करिष्ये.

ततः प्राङ्मुखः पवित्रपाणिः देवतीर्थेन सकुशोदकेन तर्पणं कुर्यात.

ब्रह्मादिदेवतानां आवाहनम् ॥

ॐ विश्वेदेवाः स आगत शृणुता म इ॒मꣳ हवम्॥

एदं वर्हि निर्षीदत ॥१॥ विश्वेदेवाः शृणुतेमऽहवंमे येऽअन्तरिक्षे य उपद्यविष्ट ॥ ये अग्निजिह्वा उनवा यजत्रा आसद्यास्मिन् वर्हिषि मादयध्वम् ॥२॥

ॐ ब्रह्मादिदेवाः इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु एताञ्जलाञ्जलीन् ॥ ॥

ॐ ब्रह्मा तृप्यताम्· ॐ विष्णुस्तृप्यताम्· ॐ रुद्रस्तृप्यताम्· ॐ प्रजापतिस्तृप्यताम्· ॐ देवास्तृप्यन्ताम्· ॐ छन्दांसि तृप्यन्ताम्· ॐ वेदास्तृप्यन्ताम्· ॐ ऋषयस्तृप्यन्ताम्· ॐ पुराणाचार्यास्तृप्यन्ताम्· ॐ गन्धर्वास्तृप्यन्ताम्· ॐ इतराचार्यास्तृप्यन्ताम् ॐ संवत्सरः सावयवस्तृप्यताम्· ॐ देव्यस्तृप्यन्ताम्· ॐ अप्सरसस्तृप्यन्ताम्· ॐ देवानुगास्तृप्यन्ताम्· ॐ नागास्तृप्यन्ताम्· ॐ सागरास्तृप्यन्ताम्· ॐ पर्वतास्तृप्यन्ताम्· ॐ सरितस्तृप्यन्ताम्· ॐ मनुष्यास्तृप्यन्ताम्· ॐ यक्षास्तृप्यन्ताम्· ॐ रक्षांसि तृप्यन्ताम्· ॐ पिशाचास्तृप्यन्ताम्· ॐ सुपर्णास्तृप्यन्ताम्· ॐ भूतानि तृप्यन्ताम्· ॐ पशवस्तृप्यन्ताम्· ॐ वनस्पतयस्तृप्यन्ताम्· ॐ ओ-

षधयस्तृप्यन्ताम्· ॐ भूतग्रामचतुर्विधस्तृप्यताम्·॥

ॐ मरीचिस्तृप्यताम्· ॐ अत्रिस्तृप्यताम् · ॐ अङ्गिरास्तृप्यताम्· ॐ पुलस्त्यस्तृप्यताम् ॐ पुलहस्तृप्यताम्· ॐ क्रतुस्तृप्यताम्· ॐ प्रचेतास्तृप्यताम्· ॐ वशिष्ठस्तृप्यताम्· ॐ भृगुस्तृप्यताम्· ॐ नारदस्तृप्यताम्·

ततः कण्ठे सूत्रं कृत्वा उदङ्मुखः कायतीर्थेन मनुष्यान् तर्पयेत् ॥

सनकादीनां आवाहनम्· ॥

ॐ सनकादयः सप्त मनुष्याः इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु एताञ्जलाञ्जलीन्· ॥

ॐ सनकस्तृप्यताम् २ ॐ सनन्दनस्तृप्यताम् २
ॐ सनातनस्तृप्यताम् २ ॐ कपिलस्तृप्यताम् २
ॐ आसुरिस्तृप्यताम् २ ॐ वोढुस्तृप्यताम् २
ॐ पञ्चशिखस्तृप्यताम् २ ॥

अपसव्येन दक्षिणाभिमुखः पातितवामजानुः मोटितकुशतिलाञ्जलित्रयेण खड्गपात्रेण पितृतीर्थेन तर्पयेत्· ॥

दिव्यपितृणां आवाहनम्·॥

ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधी महि।उशन्नु
शत आवह पितृन् हविषे अत्तवे ॥१॥ आयन्तु नः
पितरः सोम्यासोऽग्निष्वात्ताः पथिभि र्देवयानैः ॥अ-
स्मिन् यज्ञे स्वधया मदन्तो धिब्रुवन्तु ते वन्त्वस्मान्
॥२॥

ॐ कव्यवाडनलादयो दिव्यपितरः इहागच्छन्तु इह ति-
ष्ठन्तु गृह्णन्तु एताञ्जलाञ्जलीन् ॥
ॐ कव्यवाडनल स्तृप्यताम् ३ ॐ सोम स्तृप्यताम् ३
ॐ यम स्तृप्यताम् ३ ॐ अर्यमा स्तृप्यताम् ३
ॐ अग्निष्वात्ता स्तृप्यन्ताम् ३ ॐ सोमपा स्तृप्यन्ताम् ३
ॐ बर्हिषदः पितर स्तृप्यन्ताम् ३ ॥
ॐ यमाय नमः ३ ॐ धर्मराजाय नमः ३ ॐ मृत्यवे न-
मः ३ ॐ अन्तकाय नमः ३ ॐ वैवस्वताय नमः ३ ॐ
कालाय नमः ३ ॐ सर्वभूतक्षयाय नमः ३ ॐ ओदुम्ब-
राय नमः ३ ॐ दध्नाय नमः ३ ॐ नीलाय नमः ३
ॐ परमेष्ठिने नमः ३ ॐ वृकोदराय नमः ३ ॐ चित्राय
नमः ३ ॐ चित्रगुप्ताय नमः ३ ॥

ततः स्वपितृणां आवाहनम् ॥

आगच्छन्तु मे पितरः इमान् गृह्णन्तु जलाञ्जलीन्·
ॐ उदीरता मवर उत्परा स उन्मध्यमा पितरः
सोम्यासः असुं यई युरवृका ऋतज्ञा स्तेनो वन्तु
पितरो हवेषु ॥
ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेङ्गल ।
वीरविक्रमवर्मा [redacted] वसुस्वरू-
प स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधानमः॥
ॐ अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृग-
वः सोम्यासः नेषां वयꣳ सुमतौ यज्ञियाना मपि
भद्रे सौ मनसे स्याम· ॥
ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेङ्गल वीर
विक्रमवर्मा [redacted] वसुस्वरूप स्तृप्य
ताम् ॥ इदं जलं सतिलं तस्मै स्वधानमः ॥ ॥
ॐ आयन्तु नः पितरः सोम्यासो ग्निष्वात्ता पथिभि
र्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदन्तो धिब्रुवन्तु ते
वन्त्वस्मान्·॥
ॐ अद्येह काश्यपगोत्रः अस्मत्पिता पेङ्गल वीरवि-
क्रमवर्मा [redacted] वसुस्वरूप स्तृप्यताम्·॥
इदं जलं सतिलं तस्मै स्वधा नमः ॥

तृप्यध्वम् ॥ ॥तृप्यध्वम् ॥ ॥तृप्यध्वम् ॥ ॥

ॐ ऊर्जं वहन्ती रमृतं घृतं पयः कीलालं परिस्रुतम् ॥ स्वधास्थ तर्पयत मे पितॄन् ॥

ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः ऐंद्रप्रतापवीर विक्रमवर्मा [redacted] रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधानमः ॥

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ॥

ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः ऐंद्रप्रता[illegible]वीर क्रमवर्मा [redacted] रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधानमः ॥

ॐ ये चेह पितरो ये च नेह यांश्च विद्म यां उ च न प्रविद्म ॥ त्वं वेत्थ यतिते जातवेदः स्वधाभि र्यज्ञँ सुकृतं जुषस्व ॥

ॐ अद्येह काश्यपगोत्रः अस्मत्पितामहः ऐंद्रप्रताप वीर विक्रमवर्मा [redacted] रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधानमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ ॥

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः॥ माध्वीर्नः सन्त्वोषधीः॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा आदित्यस्वरूप स्तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधा नमः॥

ॐ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः॥ मधु द्यौरस्तु नः पिता॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा आदित्यस्वरूप स्तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥

ॐ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः॥ माध्वीर्गावो भवन्तु नः॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा आदित्यस्वरूप स्तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधा नमः॥ तृप्यध्वम्॥ तृप्यध्वम्॥ तृप्यध्वम्॥ ॥ ॥

ॐ आमावाजस्यप्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे। आमागन्तां पितरा मातरा चामा सोमो ऽमृतत्वेन गम्यात्॥

ॐ अद्येह काश्यपगोत्रा अस्मत्प्रपितामही [illegible] देवी वसुस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्यै स्वधानमः॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पितामही [illegible]

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः॥ माध्वीर्नः सन्त्वोषधीः॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा [redacted] आदित्यस्वरूप स्तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधा नमः॥

ॐ मधु नक्तमुतोषसो मधुमत्पार्थिवँ रजः॥ मधु द्यौरस्तु नः पिता॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा [redacted] आदित्यस्वरूप स्तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥

ॐ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः॥ माध्वीर्गावो भवन्तु नः॥

ॐ अद्येह काश्यपगोत्रः अस्मत्प्रपितामहः दुलक वीरविक्रमवर्मा [redacted] आदित्यस्वरूप स्तृप्यताम्॥ इदं जलं सतिलं तस्मैस्वधा नमः॥ तृप्यध्वम्॥ तृप्यध्वम्॥ तृप्यध्वम्॥ ॥ ॥

ॐ आमा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे। आमा गन्तां पितरा मातरा चामा सोमो ऽमृतत्वेन गम्यात्॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पितामही लक्ष्मीदिव्येश्वरि देवी वसुस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पितामही लक्ष्मीदिव्येश्वरी देवी वसुस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधा नमः॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पितामही लक्ष्मीदिव्येश्वरी देवी वसुस्वरूपा तृप्यताम्। इदं जलं सतिलं तस्मै स्वधानमः॥ तृप्यध्वम्॥ तृप्यध्वम्॥ तृप्यध्वम्॥

ॐ अद्येह काश्यपगोत्रा अस्मत्प्रपितामही ललितकुमारी देवी तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥

ॐ अद्येह काश्यपगोत्रा अस्मत्प्रपितामही ललितकुमारि देवी रुद्रस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः

ॐ अद्येह काश्यपगोत्रा अस्मत्प्रपितामही ललितकुमारि देवी रुद्रस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥

॥ तृप्यध्वम्॥ ॥तृप्यध्वम्॥ ॥तृप्यध्वम्॥

ॐ अद्येह काश्यपगोत्रा अस्मद् वृद्धप्रपितामही त्रैलोक्यराज्यलक्ष्मी देवी आदित्यस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥

ॐ अद्येह काश्यपगोत्रा अस्मद् वृद्धप्रपितामही त्रैलोक्यराज्यलक्ष्मी देवी आदित्यस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥

ॐ अद्येह काश्यपगोत्रा अस्मद् वृद्धप्रपितामही त्रैलोक्यराज्यलक्ष्मी देवी आदित्यस्वरूपा तृप्यताम्॥ इदं जलं सतिलं तस्मै स्वधानमः॥ तृप्यध्वम्॥ तृप्यध्वम्॥ तृप्यध्वम्॥

ॐ नमो वः पितरो रसाय नमो वः पितरः सोशाय नमो वः पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरो मन्यवे नमोवः पितरः पित

रो नमो वो गृहान्नः पितरो दत्त सतोवः पितरो देष्मे तद्वः पितरो वासः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मन्मातामहः अर्जुन सिंह वर्मा सपत्नीकः वसुस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मन्मातामहः अर्जुन सिंह वर्मा सपत्नीकः वसुस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मन्मातामहः अर्जुन सिंह वर्मा सपत्नीकः वसुस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम ॥ तृप्यध्वम ॥ तृप्यध्वम ॥ ॥ ॥

ॐ अद्येह आत्रेय गोत्रः अस्मन्प्रमातामहः रूपसिंह वर्मा सपत्नीकः रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मन्प्रमातामहः रूपसिंह वर्मा सपत्नीकः रुद्रस्वरूप स्तृप्यताम् ॥ इदं जलं सतिलं तस्मै स्वधा नमः ॥

ॐ अद्येह आत्रेय गोत्रः अस्मन्प्रमातामहः रूपसिंह

= अद्येह वत्सगोत्रा अस्मत्स्वसृ मेघराजलक्ष्मी देवी वसुस्वरूपा
तृप्यताम् । इदं जलं सतिलं तस्यै स्वधा नमः ॥
॥ तृप्यध्वम् ॥ ॥ तृप्यध्वम् ॥ ॥ तृप्यध्वम् ॥
अद्येह वत्सगोत्रा अस्मत्पितृ [illegible] लक्ष्मी [illegible] देवी वसुस्वरूपा तृप्यताम् इदं जलं
सतिलं तस्यै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥ तृप्यध्वम् ॥

म५ पा। वर्मा सपत्नीकः रुद्रस्वरूपस्तृप्यताम् ॥ इदं जलं
सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम् ॥ तृप्यध्वम्
॥ तृप्यध्वम् ॥ ॥ ॥
ॐ अद्येह आत्रेय गोत्रः अस्मद्वृद्धप्रमाता मह टिकम
सिंह वर्मा सपत्नीकः आदित्यस्वरूपस्तृप्यताम्
॥ इद जलं सतिलं तस्मै स्वधा नमः ॥
ॐ अद्येह आत्रेय गोत्रः अस्मद्वृद्धप्रमाता मह टिकम
सिंह वर्मा सपत्नीकः आदित्यस्वरूपस्तृप्यताम् ॥
इदं जलं सतिलं तस्मै स्वधा नमः ॥
ॐ अद्येह आत्रेय गोत्रः अस्मद्वृद्धप्रमाता मह टिकम
सिंह वर्मा सपत्नीकः आदित्यस्वरूपस्तृप्यताम् ॥
इदं जलं सतिलं तस्मै स्वधा नमः ॥ तृप्यध्वम् ॥
तृप्यध्वम् ॥ तृप्यध्वम् ॥ ॥ ॥

ॐ अद्येह काश्यपगोत्रा अस्मत्पत्नी [illegible] प्रदीप [illegible] देवी
वसुस्वरूपा तृप्यताम् ॥ इदं जलं सतिलं तस्यै स्वधा नमः ॥
॥ तृप्यध्वम् ॥ ॥ तृप्यध्वम् ॥ ॥ तृप्यध्वम् ॥

// आब्रह्मस्तम्ब पर्यन्तं देवर्षी पितृ मानवाः ।
तृप्यन्तु पितरः सर्वे मातृ माता महादयः ॥१॥
मातृवंशे मृता ये च पितृवंशे तथैव च ॥
गुरुश्वसुर बन्धूनां ये चान्ये बान्धवा मृता ॥२॥

१० ते तृप्ति माखिला यान्तु येस्मत्तोयाभिकाङ्क्षिणः ॥
ये बान्धवा बान्धवा ये येन्य जन्मनि बान्धवाः ॥ ३ ॥
ते सर्वे तृप्तिमायान्तु मद्दत्तेनांवुना खिलाः ॥
देवासुरा स्तथा यक्षा नागा गन्धर्वराक्षसाः ॥ ४ ॥
पिशाचा गुह्यकाः सिद्धा कुष्माण्डा स्तरवः खगाः ॥
जलेचरा भूमिचरा वाय्वाधाराश्च जन्तवः ॥ ५ ॥
ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुना खिलाः ॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥ ६ ॥
तेषामाप्यायनायेत दीयते सलिलं मया ॥
अतीतकुलकोटीनां सप्तद्वीप निवासिनाम् ॥ ७ ॥
आब्रह्म भुवना ल्लोका निदमस्तु तिलोदकम् ॥
यत्र क्वचन संस्थानां क्षुत्तृष्णो पहतात्मनाम् ॥ ८ ॥
इदमक्षय्यमेवा स्तु मया दत्तं तिलोदकम् ॥

अथ वस्त्रनिष्पीडनम् ॥

ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥
ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

ततः सव्यं कृत्वा· आचम्य· पूर्वाभिमुखो भूत्वा·
षट् कोणं विलिख्य· ब्रह्मादीन्पूजयेत् ॥ ॥
ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ता द्विसीमतः सुरुचो वेन आवः सबुध्न्या उपमा अस्यविष्ठा शतश्च योनि मसतश्च विव· ॥ ॐ ब्रह्मणे नमः ॥

ॐ इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम् ॥ समूढ
मस्य पांऽसुरे स्वाहा ॥ ॐ विष्णवे नमः ॥
ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः ॥ बाहुभ्यामु
तते नमः ॥ ॐ रुद्राय नमः ॥
ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीम
हि ॥ धियो यो नः प्रचोदयात् ॥ ॐ सवित्रे नमः ॥
ॐ मित्रस्य चर्षणी धृतो वो देवस्य सानसि ॥ द्युम्नं
चित्र श्रवस्तमम् ॥ ॐ मित्राय नमः ॥
ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋत सदन्यसि वरुणस्य ऋत सदनमसि वरुणस्य ऋतसदनमासीद ॥ ॐ वरुणाय नमः ॥

सूर्याय अर्घदानम् ॥

ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ॥
जगत्सवित्रे शुचये शाक्षिणे कर्मदायिने ॥१॥
एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ॥
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ॥२॥

उपस्थानम्

अदृश्रमस्य केतवो विरश्मयो जनाँ अनु भ्राजन्तो
अग्नयो यथा ॥ उपयाम गृहीतोसि सूर्याय त्वा भ्रा-

जायै षते योनिः सूर्याय त्वा भ्राजाय ॥ सूर्य भ्राजिष्ठ भ्राजिष्ठ स्त्वं देवे ष्वसि भ्राजिष्ठोहं मनुष्येषु भूयासम् ॥ हꣳसः शुचिष द्वसुरन्तरिक्षः सद्धोता वेदिष दतिथि र्दुरोणसत् ॥ नृषद्वर सहत सद्व्योम सदब्जा गोजा ऋतजा अद्दजा ऋतं बृहत् ॥ ॥

ततः पूर्वादिक्रमेण ॥

ॐ प्राच्यै दिशे नमः इन्द्राय नमः ।
ॐ आग्नेय्यै दिशे नमः अग्नये नमः ।
ॐ दक्षिणायै दिशे नमः यमाय नमः ।
ॐ नैर्ऋत्यै दिशे नमः निर्ऋतये नमः ।
ॐ प्रतीच्यै दिशे नमः वरुणाय नमः ।
ॐ वायव्यै दिशे नमः वायवे नमः ।
ॐ उदीच्यै दिशे नमः कुवेराय नमः ।
ॐ ऐशान्यै दिशे नमः ईशानाय नमः ।
ॐ ऊर्ध्वायै दिशे नमः ब्रह्मणे नमः ।
ॐ अधो दिशे नमः अनन्ताय नमः ।

ततः उपविश्य नमेत् ॥

ॐ ब्रह्मणे नमः ॐ अग्नये नमः ॐ पृथिव्यै नमः
ॐ ओषधिभ्यो नमः ॐ वाचे नमः ॐ वाचस्पतये नमः

ॐ विष्णवे नमः ॐ महद्भ्यो नमः ॐ अद्भ्यो नमः
ॐ अपां पतये नमः ॐ वरुणाय नमः
ततो मुखसंमार्जनम् ॥
ॐ संवर्चसा पयसा सन्तनूभि रगन्महि मनसा सꣳ
शिवेन। त्वष्टा सुदत्रो विदधातु रायो नुमार्ष्टु तन्वो
य द्विलिष्टम् ॥
ततः चक्षुस्पर्शः ॥
ॐ तच्चक्षु र्देवहितं पुरस्ता च्छुक्र मुच्चरत ॥ पश्येम
शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः श-
तं प्रब्रवाम शरदः शत मदीनाः स्याम शरदः शतं भू
यश्च शरदः शतात् ॥
ततः तर्पणजलं विलोडयेत् ॥
ॐ देवा गातु विदो गातुं वित्वा गातुमित ॥ मनसस्पत
इम न्देव यज्ञꣳ स्वाहा वातेधाः ॥
जलं गृहीत्वा ·
अनेन कर्मणा जनार्दनः प्रीयताम् ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

ब्राह्मणवरणम्

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
वर्मा अहं मम· काश्यपगोत्रस्य पेशल्नवीरविक्रम
वर्मणः सकलपापक्षयद्वारा पुन्नामादिनरकोद्धार पूर्वक
अक्षयस्वर्गवासप्राप्तये· अस्मत्कुलस्य शुभफलावाप्तये
आत्मनः शरीरशुद्ध्यर्थं शुद्धशान्तीकहवनकर्म करि
ष्ये· तत्कर्मणि दीप कलश गणेश गणपत्यादि वन
स्पत्यन्त देवतासंपूजनपूर्वकं हवनकर्म कर्तुं नानाना
मगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्च
न्दन पुष्पाक्षत पूगीफलादिभि र्युष्मान् वृणो·

वृताः स्मः

पुण्यवाचनम्·

अद्येह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेतित्रिप्रवरः
वर्मा अहं मम· काश्यपगोत्रस्य पेशल्नवीरविक्रम
वर्मणः त्रयोदशाहे शुद्धशान्तीकहवनकर्मणि सर्वाभ्युदयप्रा
प्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये· तत्पुण्याहवाचना
र्थं एभिश्चन्दनपुष्पाक्षतपूगीफल वस्त्रोपायनादिभि अनु
र्णां ब्राह्मणानां वरणं पूजनं च करिष्ये·

पुण्याहवाचनम् .

अद्येह ...... वर्मा अहं मम काश्यपगोत्रस्य पेशालवीरविक्रमवर्मणः शुद्धशान्तिक हवन कर्मणि सर्वाभ्युदयप्राप्त्ये ब्राह्मण द्वारा पुण्याहं वाचयिष्ये . तदङ्गतया गन्धश्चन्दनपुष्पाक्षत पूगीफल यज्ञोपवीत वस्त्रोपापनादिभिः पुण्याहवाचनार्थं ब्रह्मन् त्वामहं वृणे ॥ वृतोऽस्मि ॥

अद्येह ...... वर्मा अहं मम काश्यपगोत्रस्य पेशालवीरविक्रमवर्मणः शुद्धशान्तिक हवन कर्मणि सर्वाभ्युदयप्राप्त्यै भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहम् ३ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

अद्येह ...... वर्मा अहं मम काश्यपगोत्रस्य पेशालवीरविक्रमवर्मणः शुद्धशान्तिक हवन कर्मणि सर्वाभ्युदयप्राप्त्यै भो ब्राह्मणाः मम गृहे स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति ३ ॐ स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

अद्येह ...... वर्मा अहं मम काश्यपगोत्रस्य पेशालवीरविक्रमवर्मणः शुद्धशान्तिक हवन कर्मणि सर्वाभ्युदयप्राप्त्यै भो ब्राह्मणाः मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋध्यताम् ३ ॐ सत्रस्य ऋद्धिरस्य गन्म ज्योतिरमृता अभूम ।

दिवं पृथिव्या अद्ध्यारुहाम्मा विदाम देवान्स्वर्ज्योती:॥
अद्येह ······ वर्मा अहं मम काश्यपगोत्रस्य पेम्बालेमोर
विक्रम तमाङ: शुद्धशान्तिक हवनकर्माणि सर्वाभ्युदयप्राप्तये
भो ब्राह्मणाः मम गृहे वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृद्ध्यताम् ३
ॐ ज्यैष्ठ्यञ्च मऽआधिपत्यञ्च मे मन्युश्च मे भामश्च मे मश्च
मे म्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे
वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥
अद्येह ···· वर्मा अहं मम काश्यपगोत्रस्य पेम्बालवी
क्रम तमाङ: शुद्धशान्तिक हवनकर्माणि सर्वाभ्युदयप्रा
प्तये भो ब्राह्मणाः मम गृहे कल्याणं भवन्तो ब्रुवन्तु ३ ॐ क
ल्याणम् ३ ॐ यथेमां वाचङ्कल्याणी मा वदानि जनेभ्यः।
ब्रह्मराजन्याभ्या ᳪ शूद्राय चार्याय च स्वाय चारणाय च।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृ
द्ध्यताम् ॥
अद्येह ····· वर्मा अहं मम काश्यपगोत्रस्य पेम्बालवि
रविक्रम तमाङ: शुद्धशान्तिक हवनकर्माणि सर्वाभ्युदयप्रा
प्तये भो ब्राह्मणाः मम गृहे श्रीरस्तु भवन्तो ब्रुवन्तु ३ ॐ श्रीः ३
ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूना ᳪ रूप
मन्नस्य रसो यशः श्रीः श्रयताम् ॥
अद्येह ····· वर्मा अहं मम काश्यपगोत्रस्य पेम्बालवी

रविक्रम वर्मणः रुद्रशान्तिक हवनकर्मणि सर्वाभ्युदयप्राप्त
ये भो ब्राह्मणाः मम गृहे शान्तिं भवन्तो ब्रुवन्तु २ ॐ शान्तिः२
ॐ द्यौः शान्तिरन्तरिक्ष६ शान्तिः पृथिवी शान्तिरापः शान्ति
रोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म
शान्तिः सर्व६ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥

विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रं तन्न आसुव ॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥
पुण्याहवाचनसमृद्धिरस्तु॥

प्रायश्चित्तगोदान

ॐ अद्य काश्यप गोत्र चन्द्रपजा नामा नैमित्तिक प्राय · · ·
वर्मा अहं मम   काश्यपगोत्रस्य अस्मत्पितुः श्रीमान्वी
रविक्रमवर्मणः करिष्यमाण रुद्रशान्त्यङ्ग हवनकर्मा
धिकारसिद्ध्यर्थं इमां सालंकारां गां रुद्रदैवताकां
(सान्निध्यकर्मभूतं जातं चन्द्रदैवताकं)   गोत्रा
य   शर्मणे ब्राह्मणाय तुभ्यं संप्रददे
प्रार्थनं, अद्येत्यादि प्रायश्चित्त गो-(निष्क्र
यजात) दानप्रतिष्ठार्थं इदं जातं चन्द्रदैवताकं गो
त्राय   शर्मणे   ब्राह्मणाय तुभ्यं संप्रददे

वैद्य

[illegible]

ज्योतिरुजा

THE BULL DOG

Exercise Book.

No. 2.

Name:

Address

कुमारी पूजा

आचम्य कर्मपात्रं कृत्वा प्रतिज्ञां कुर्यात्

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ···· ················ देवी अहं मम श्रीश्रेष्टदेवता प्रसादसिद्धि द्वारा सर्वाभीष्ट फलप्राप्तये श्रीश्रेष्टदेवताप्रीतये कुमारी पूजनं कुमारपूजनं च करिष्ये-

आवाहनम्, पुष्पाक्षतानादाय-

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥

आवाहनं समर्पयामि कुमारीभ्यो नमः ।

ॐ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारी जगन्मात र्नमोस्तुते ॥

पाद्यं समर्पयामि कुमारीभ्यो नमः । आचमनीयं समर्पयामि कुमारीभ्यो नमः । वस्त्रं समर्पयामि कुमारीभ्यो नमः । सौभाग्यद्रव्यं समर्पयामि कुमारीभ्यो नमः । भूषणं समर्पयामि कुमारीभ्यो नमः । गन्धं समर्पयामि कुमारीभ्यो नमः । सिन्दूरं समर्पयामि कुमारीभ्यो नमः । पिष्टानकं समर्पयामि कुमारीभ्यो नमः । अक्षतान् समर्पयामि कुमारीभ्यो नमः । पुष्पाणि समर्पयामि कुमारीभ्यो नमः । धूपं आघ्रापयामि कु-

मारीभ्यो नमः। दीपं आदर्शयामि कुमारीभ्यो नमः। नैवेद्यं समर्पयामि कुमारीभ्यो नमः। दक्षिणां समर्पयामि कुमारीभ्यो नमः।

पुष्पाञ्जलिः

ॐ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि।
पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते॥
पुष्पाञ्जलिं समर्पयामि कुमारीभ्यो नमः।
जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते॥

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा ………………………… देवी अहं मम श्रीश्वेष्टदेवता प्रसाद सिद्धि द्वारा सर्वाभीष्ट फल प्राप्तये कृतस्य कुमारीपूजन कर्मणः प्रतिष्ठार्थं रौप्यं चन्द्रदेवताकं …… …… गोत्राय ………………… शर्मणे ब्राह्मणाय दातुं समुत्सृजे।

अद्येह काश्यपगोत्रा काश्यपावत्सारनैध्रुवेति त्रिप्रवरा .... देवी अहं मम भूतप्रेतादिजनित समस्त दुःख निवृत्ति देशोपद्रवादि नानाविधानिष्ट शान्ति- धनधान्यादि सकल सम्पत्समृद्धि फलावाप्तिपूर्वकं दीर्घायुरारोग्यैश्वर्याद्या वाप्तये श्रीस्वेष्टदेवता प्रीतये एकावृत्ति सप्तशती स्तोत्र पाठकर्म· तथा एकावृत्ति कालिका सहस्रनाम स्तोत्र पाठकर्म· तथा कालिकापञ्चाङ्ग पाठकर्म· तथा एकसहस्र काली मन्त्र जपकर्म च ब्राह्मणद्वारा करिष्ये· तत्कर्म कर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दन पुष्पाक्षतादिभिर्युष्मान् वृणे· तथा करिष्यमाण जपपाठकर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थं इमां दक्षिणां रौप्यं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे ।

अशोक कलिका प्राशन मन्त्रः-

त्वामशोकवराभीष्ट मधुमास समुद्भव ।
पिवामि शोकसन्तप्तो मामशोकं सदाकुरु ॥

फलं च-

अशोक कलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥

अथग्रहणशान्तिः

अहं मम स्वजन्मराशितश्चतुर्थराशिगतेन चन्द्रोपरागेण
सूचितशरीरव्यथाशान्तिदीर्घायुरारोग्यैश्वर्योदयावाप्त
ये स्नानं करिष्ये ॥ ॥ दानम् ॥ अहं मम स्वजन्म
राशितश्चतुर्थराशिगतेन अमुकपरागेण सूचितशरीरव्य
थाशान्तिदीर्घायुरारोग्यैश्वर्योदयावाप्तये इमान् तिलान् सो
मदेवताकान् सौवर्णं नागं विष्णुदेवताकं ताम्रपात्रं विश्व
कर्मदेवताकं वस्त्रं बृहस्पतिदेवताकं घृतकुंभं मृत्युंजयदेव
ताकं इमां सालङ्कारां गां रुद्रदेवताकां रजतचन्द्रविम्बं चन्द्र
देवताकं अमुकगोत्राय .... महर्षे ..... हिरण्यगर्भः
ॐ तमोमय महाभीम सोमसूर्यविमर्दन हेमताराप्रदा
नेन मम शांतिप्रदो भव १ विधुंतुद नमस्तुभ्यं सिंहिकान
न्दनाच्युत दानेनानेन नागस्य रक्ष मां वेधजाद्भयात् २
कृतैतत् तिलसुवर्णनागताम्रपात्रवस्त्रघृतकुंभदानकर्मणः
प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं अमुकगोत्राय॰
अहं मम स्वजन्मराशितश्चतुर्थराशिगतेनामुकपरागेण
सूचितशरीरव्यथाशान्तिदीर्घायुरारोग्यैश्वर्योदयावाप्तये
कृतामुकपरागशान्तिकर्मणि सुपूजितसुवर्णप्रतिमायु

तंताम्रघटं विश्वकर्मदेवताकं अमुकगोत्राय॰ ॐ इदं
विष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपांऽसुरेस्वाहा
कृतैतन्सुपूजितसुवर्णप्रतिमायुतताम्रघटदानकर्मणः
प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं अमुकगोत्राय॰ अभि
षेकमंत्रा ॐ सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाः आ
यान्तुयजमानस्यदुरितक्षयकारकाः १ योसौवज्रधरोदेवः
आदित्यानांप्रभुर्मतः सहस्रनयनश्चन्द्रोग्रहपीडांव्यपोहतु २
यः कर्मसाक्षीलोकानांधर्मोमहिषवाहनः ममचन्द्रोपरागो
त्थांग्रहपीडांव्यपोहतु ३ मुखंसर्वयः सर्वदेवानांसप्तार्चि
रमितद्युतिः चन्द्रोपरागसंभूतामग्निः पीडांव्यपोहतु ४
रक्षोगणाधिपः साक्षान्नीलांजनसमप्रभः खड्गहस्तोति
भीमयश्च ग्रहपीडांव्यपोहतु ५ नागपाशधरोदेवः सदा
मकरवाहनः सजलाधिपतिर्देवोग्रहपीडांव्यपोहतु ६
प्राणरूपोहिलोकानांसदाकृष्णमृगप्रिय वायुश्चन्द्रोपरागो
त्थांग्रहपीडांव्यपोहतु ७ योसौनिधिपतिर्देवः खड्गशूल
गदाधरः चन्द्रोपरागकलुषंधनदोत्रव्यपोहतु ८ यो
साविन्दुधरोदेवः पिनाकीवृषवाहनः चन्द्रोपरागपापानि
सनाशयतुशंकरः ९ त्रैलोक्ययानिभूतानिस्थावराणिच
राणिच ब्रह्मविष्ण्वर्करुद्राश्चदहन्तुममपातकम् १०

पुष्पाञ्जलि · ॐ नमोस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे · सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः · · वरणम् · अहं मम ब्रह्महत्यादिसकलपापक्षयपूर्वक श्रीविष्णुसायुज्यपदप्राप्तये चन्द्रोपरागपर्वणि करिष्यमाणदशावतारदानकर्मणि नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतादिभिर्वृणे · · दशावतारदानम् · अहं मम ब्रह्महत्यादिसकलपापक्षयपूर्वकं श्रीविष्णुसायुज्यपदप्राप्तये · अमुकपर्वणि इमाः सुवर्णनिर्मिताः मत्स्य·कूर्म·वराह·नरसिंह·वामन·परशुराम·कृष्ण·बुद्ध·कल्कि·प्रतिमाः विष्णुदेवताकाः नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुं समुत्सृजे · देवरूपं मया विप्र कारितं काञ्चनं शुभम् · तद्धारणप्रदानेन प्रीयतां विश्वरूपधृक् ·
१ कृतैतत्सुवर्णनिर्मितमत्स्यादि·दशावतारदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो यथाभागं विभज्य दातुं समुत्सृजे · ततः कायेन वाचेति पठेत् · यस्य स्मृत्येति कर्म ईश्वरार्पणं कुर्यात् ·

अथ तर्पणश्राद्धप्रत्याम्नायीभूतगोदानम् *

अहं मम अमुकगोत्राणां॰ अस्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां यथायोग्यसपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां अक्षय्यतृप्तिकामनया कर्तव्यापरपक्षिकतर्पण॰आमान्नदानपिण्डप्रपातनाद्यकरणजन्यसकलदुरितनिवृत्तिपूर्वकं तत्कर्मकरणजन्यसकलफलावाप्तये इदं गोप्र॰त्याम्नायीभूतं रजतं चन्द्रदेवताकं अमुकगोत्राय॰ कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥ कृतैतत् गोप्रत्याम्नायीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रदेवताकं अमुकगोत्राय॰ ॥ कायेनवाचेति पठेत् ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥ अच्युताय नमः ३ ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताऽध्वरेषु च ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्ष सुखानि च ॥ प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥ ॥ इति विसर्जयेत् ॥ ॥

अथ उग्रतारापूजनदक्षिणासङ्कल्पः॥

अहं मम सकलपापक्षयास्वचक्रपरचक्रजनितवाधानिवृत्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीमहोग्रतारादेवताप्रीतये नानाविधराजोपचारेण संपूजनमहं करिष्ये, बलिदानम्॥ अहं मम सकलपापक्षयस्वचक्रपरचक्रजनितवाधानिवृत्तिपूर्वक मनोभिलषितफलप्राप्तिकामनया दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीमहोग्रतारादेवताप्रीतये मेष·महिष·अज·हंस·कुक्कुट पञ्चजीववलिप्रदानकर्म करिष्ये॥ लक्षवर्तिका॥ घृताक्तान् लक्षसंख्याकान्दीपान् प्रज्वालनेन समर्पयिष्ये॥ ॥पाठसंकल्पः॥अहं मम सकलविघ्नवाधाभयनिवृत्तिपूर्वक दीर्घायुरारोग्यैश्वर्योदयावाप्तये श्रीमहोग्रतारादेवताप्रीतये……… वृत्तिसप्तशतीस्तोत्रपाठकर्म तथा तारासहस्रनामस्तोत्रपाठकर्मच करिष्ये॥ तत्कर्मकर्तुं नानानामगोत्रान्नानानामशर्मणो ब्राह्मणान् ऽभिश्चन्दनपुष्पादिभिर्वृणे॥ ततः पुष्पाञ्जलिः॥जयन्ती मङ्गला काली भद्रकाली भद्रकाली कपालिनी॥दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते॥१॥उग्रतारामहादेवीं दैत्यवर्गविनाशिनीम्॥भक्तानामभयं कर्त्रीं नमामि विश्वमातरम्॥२॥जय देवि महोग्रे त्वं जय देवप्रमोदिनी॥जय

दुर्गे प्रपन्नार्तिपरित्राणपरायणे ॥ ३ ॥ प्रणमामि महामायां संसारार्णवतारिणीम् ॥ शान्तिं पुष्टिं च मे देहि सततं प्रणमाम्यहम् ॥ ४ ॥ दक्षिणा ॥ कृतस्य उग्रतारादेवीसंपूजनवलिप्रदानकर्मणः तथा सप्तशतीतारासहस्रनामस्तोत्रपाठकर्मणः प्रतिष्ठासिद्ध्यर्थं, इमां दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य यथाकालेन दातुमहमुत्सृजे ॥

अथ शनिप्रदोषव्रतपूजासंकल्पः ॥

अहं मम साम्वसदाशिवदेवताप्रीतिपूर्वकं सकलपापक्षयसंततिसंपत्तिसमृद्धये करिष्यमाणशनिप्रदोषव्रतपूजनकर्मणि देहशुद्धिद्वारा तत्कर्माधिकारसिद्धये इदं गोप्रत्याम्नायीभूतं रजतं चन्द्रदेवताकं अमुकगोत्राय० ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥ ॐ नमो गोभ्य इति च ॥ कृतैतद्गोप्रत्याम्नायीभूतरजतदानकर्मणः प्रतिष्ठार्थं इदं रजतं चन्द्रादेवताकं अमुकगोत्राय० ॥ अथ पूजासंकल्पः ॥ अहं मम साम्वसदाशिवदेवताप्रीतये समस्तजमस्तजन्मोपार्जितसकलदुरितपापक्षयपूर्वक धनधान्यादिसमृद्धिपुत्रपौत्रादिसौभाग्यादिप्राप्तिकामनया शनिप्रदोषव्रताङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं साङ्गस

दाशिवदेवतापूजनकर्मकरिष्ये ॥दीपसंकल्पः॥अहं मम शनिप्रदोषव्रतपूजनकर्मणि साम्बसदाशिवदेवताप्रीतये घृताक्तवर्तिकासमेतान् .... संख्याकान् दीपान्नीराजनेन समर्पयिष्ये ॥ ॥ पुष्पाञ्जलिः॥ ॥ मृत्युञ्जयाय रुद्राय नीलकण्ठाय शंभवे ॥ अमृतेशाय शर्वाय महादेवाय ते नमः॥१॥नमस्ते देवदेवेश नमस्ते धरणीधर।नमस्ते विश्वरूपाय नमस्ते पुरुषोत्तम॥ २ ॥ दक्षिणा॥ अहं मम साम्बसदाशिवदेवताप्रीतिपूर्वकं सकलपापक्षयसन्ततिसंपत्तिसमृद्धिद्वाराकल्पोक्तफलावाप्तये कृतस्य शनिप्रदोषपूजनकर्मणः न्यूनातिरिक्तपरिपूरणार्थं इमां दक्षिणांभूयसीं रौप्यं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुं समुत्सृजे ॥

॥ अथ सुवर्णतुलापुरुषदानविधिः ॥

कर्ता मण्डपसमीपं गत्वा प्रायश्चित्तगोदानं कुर्यात् गां संपूज्य॥ अद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अहं मम श्रीपरमेश्वरप्रीतये करिष्यमाणसुवर्णतुलापुरुषमहादानकर्मणि नियमानाचरणजन्यसकलपापक्षयपूर्वक तत्कर्माधिकारसिद्ध्ये प्राजापत्यप्रत्याम्नायी

भूतां इमां सवत्सां गां रुद्रदेवताकां यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ १ ॥अद्यकृतैतत् प्राजापत्यप्रत्याम्नायीभूतसवत्ससालङ्कारगवीदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये इदं रजतं चन्द्रदेवताकं दानप्रतिष्ठात्वेन यथानामगोत्राय आचार्याय संप्रददे॥ ततो मण्डपपश्चिमद्वारसमीपं दीपकलशगणेशपूजनं विधाय प्रार्थयेत्॥ॐवक्रतुण्डमहाकायकोटिसूर्यसमप्रभ॥अविघ्नं कुरुमे देव सर्वकार्येषु सर्वदा॥१॥ गणपतये नमः॥

ॐनमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे॥सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणेनमः॥दीपनारायणाय नमः॥

ॐवरुणस्त्वंमहाभाग-सर्वदेवप्रपूजितः॥अविघ्नं कुरुमेदेव यज्ञेस्मिन्सततं प्रभो॥वरुणकलशाय नमः॥

ततः शङ्खघण्टावादनपूर्वकं दीपकलशगणेशं धृत्वा मंडपं त्रि प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविशेत्॥ ॥ॐ भद्रङ्कर्णेभिः शृणुयामदेवा भद्रं पश्येमाक्षभिर्यजत्राः॥स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम हिदेवहितं यदाहुः॥इति मन्त्रं पठेत्॥

अन्यान्मन्त्रान्नपि पठेयुराचार्यादयः॥
ॐआनो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः।
देवानो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे॥ १ ॥
देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनो निवर्तताम् ॥
देवानाꣳसख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे॥ २
तान्पूर्वयानि विदाहूमहे वयं भगं मित्रमदितिन्दक्षमस्रिधम् ॥
अर्यमणं वरुणꣳ सोममश्विना सरस्वती नः सुभगामयस्करत्॥ ३
तन्नो वातो मयो भुवातु भेषजन्तन्माता पृथिवीतत्पिता द्यौः॥तद्ग्रावाणः
सोमसुतो मयो भुवस्तदश्विना शृणुतन्धिष्ण्या युवम्॥ ४ ॥
तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ॥
पूषानो यथा वेदसामसद्वृधे रक्षितापायुरदब्धः स्वस्तये ॥ ५ ॥
स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥ स्वस्तिनस्ता
र्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु॥ ६ ॥ पृषदश्वाम
रुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः॥ अग्निजि-
ह्वामनवः सूरचक्षसो विश्वेनो देवाऽअवसागमन्निह ॥ ७ ॥
अथ स्वस्तिवाचनम्॥ ॥ ॐ स्वस्तिनो मिमीतामश्विनाभगः
स्वस्ति देव्यदितिरनर्वणः॥स्वस्ति पूषा असुरो दधातुनः स्वस्तिद्यावा
पृथिवी सुचेतुना ॥ १ ॥ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्तिभुव
नस्य यस्पतिः॥बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु

नः॥ २॥विश्वेदेवानो अद्यास्वस्तये वैश्वानरो वसुरग्निस्वस्तये॥
देवाऽअवन्त्वृभवः स्वस्तये स्वस्तिनो रुद्रः पात्वंहसः ॥ ३ ॥
स्वस्तिमित्रावरुणा स्वस्तिपथ्ये रेवती ॥स्वस्तिनऽइन्द्रश्चाग्निश्चस्वस्ति
नो अदिते कृधि॥ ४ ॥स्वस्तिपन्थामनुचरे मसूर्याचन्द्रमसाविव ॥
पुनर्ददताघ्नताजानता सङ्गमेमहि ॥ ५ ॥स्वस्त्ययनंतार्क्ष्यमरिष्टने
मिं महद्भूतं वायसंदेवतानाम्॥असुरघ्नमिन्द्र सखं समत्सु बृहद्यशो
नावमिवारुहेम ॥ ६ ॥अंहोमुचमाङ्गिर सङ्गयश्च स्वस्त्यात्रेयं मनसाच
तार्क्ष्यम्॥प्रयतपाणिः शरणं प्रपद्ये स्वस्तिसंवादेष्वभयन्नो बृन्हि:॥७॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः॥ १ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥
उमे ब्रह्माणि कौमारि विश्वरूपे प्रसीद मे ॥ २ ॥
दुर्गे शिवेऽभये माये नारायणि सनातनि ॥
जय मे मङ्गलं देहि मङ्गलालय मङ्गले ॥ ३ ॥
ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च
गुरुश्च शुक्रः शनिराहुकेतवो नवग्रहाः शान्तिकरा भवन्तु ४
वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं
छलयते क्षत्रक्षयं कुर्वते॥पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ५

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ६ ॥
मङ्गलं भगवान्विष्णुर्मङ्गलं गरुडध्वजः ॥
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः॥ ७ ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥
एषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥ ८ ॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव
विद्याबलं ब्रह्मबलं तदेव लक्ष्मीपते तेङ्घ्रियुगं स्मरामि ॥ ९ ॥
सर्वमङ्गलमाङ्गल्यं वरेण्यं वरदं शुभम् ॥
नारायणं नमस्कृत्य सर्वकर्माणि कारयेत्॥ १०॥

ततो ब्राह्मणवरणम् ॥

अद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अहं मम श्रीपरमेश्वरप्रीतये सुवर्णतुलापुरुषमहादाने कर्म करिष्ये करिष्यमाणसुवर्णतुलापुरुषदानकर्मणि पूर्वाङ्गत्वेन गणपतिपूजनमातृकापूजननान्दिश्राद्धकर्मकर्तुं तथा ग्रहमखवास्तुपूजनमण्डपदेवतापूजनकर्मकर्तुं तथा स्वगृह्योक्तप्रकारेण अग्निस्थापनादिकर्मकर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतवस्त्रजलपात्रसुवर्णकटककेयूरकुण्डलकटिसूत्राऽङ्गुलीयकासनादिभिर्गणपति· आचार्य· ऋत्विग्· द्वारपाल·जापकत्वेन युष्मान् वृणे ॐ

वृतास्मः॥ ततो ब्राह्मणान् पूजयेत्॥ ॥आचार्यप्रार्थना॥

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः
तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत ॥ १ ॥

ब्रह्मप्रार्थना॥ यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः ॥
तथा त्वं मम यज्ञेस्मिन्ब्रह्मा भव द्विजोत्तम॥ २॥

सदस्यप्रार्थना॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतोंवर ॥
आचार्येण च संयुक्तः कुरु कर्म यथोदितम्॥ ३॥

ऋत्विक्प्रार्थना॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतांवर ॥
वितते मम यज्ञेस्मिन्नृत्विक्त्वं मे भव प्रभो ॥ ४ ॥

द्वारपालजापकप्रार्थना॥ अस्य यज्ञस्य निष्पत्त्यै भवन्तोभ्यर्थिता मया॥
सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम्॥ ५

ततो मधुपर्कविधिः॥

ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम्॥ ॐ अर्चय॥ विष्टरमादाय॥ ॐ विष्टरो विष्टरो विष्टरोइत्यन्येनोक्ते॥ ॐ विष्टरः प्रतिगृह्यताम्॥ ॐ विष्टरं प्रतिगृह्णामि· विष्टरं गृहीत्वा॥ ॐ वर्ष्मोस्मि इत्याथर्वण ऋषिर्वीरो देवता अनुष्टुप्छन्द आत्मस्तुतिपूर्वकोपवेशने विनियोगः॥ ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः॥ इमन्तमभितिष्ठामि यो मा कश्चाभिदासति॥ इति उत्तराग्रे विष्टरे उपविशति ॥ ततो यजमानः पाद्य मञ्जलिमादाय॥ ॐ पाद्यं पाद्यं पाद्यंइत्यन्येनो

क्ते ॥ पाद्यं प्रतिगृह्यताम् ॥ पाद्यं प्रतिगृह्णामि ॥ यजमानाञ्ज
लितः अञ्जलिना पाद्यं गृहीत्वा ॥ ॐ विराजो दोहोसीति
प्रजापतिऋषिरापो देवता यजुः पादप्रक्षालने विनियोगः
ॐ विराजो दोहोसि विराजोदोहमसीय मयि पाद्यायै विराजो
दोह ॥ इति दक्षिणपादं प्रक्षालयति ॥ एवं वामपादम् ॥
ततो विष्टरान्तरं पादयोरधः स्थापयति ॥ ततो दूर्वाक्षतचन्द
नजलयुतमर्घं गृहीत्वा ॥ ॐ अर्घोऽर्घोऽर्घ इत्यन्येनोक्ते ॥
ॐ अर्घः प्रतिगृह्यताम् ॥ ॐ अर्घं प्रतिगृह्णामि ॥ अर्घं गृहीत्वा
ॐ आपस्थेति प्रजापतिऋषिरापो देवता यजुरर्घग्रहणे विनि
योगः ॥ ॐ आपस्थयुष्मान्सर्वान्कामानवाप्नवान् ॥ इति शिरसि
अक्षतादिकं दत्वा ॥ ॐ समुद्रं व इत्यथर्वणऋषिरापो देवतार
नुष्टुप्छन्दः अर्घाभिमन्त्रणे विनियोगः ॥ ॐ समुद्रं वः प्रहि
णोमि स्वां योनिमभिगच्छत ॥ अरिष्टास्माकं वीरा मापरासेवि
मत्पयः ॥ इत्यर्घमीशाने त्यजति ॥ तत आचमनीयमादाय ॥
ॐ आचमनीयमाचमनीयमाचमनीयमित्यन्येनोक्ते ॥ आचम
नीयं प्रतिगृह्यताम् ॥ आचमनीयं प्रतिगृह्णामि ॥ यजमानह
स्ताचमनीयं गृहीत्वा ॥ आमागन्निति परमेष्ठी ऋषिरापो दे
वता बृहतीछन्दः शक्रदाचमने विनियोगः ॥ ॐ आमागन्य
शसा सꣳसृजवर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशू

नामरिष्टं तनूनाम्॥ इति शकृदाचमनम्॥ द्वि तूष्णीम्॥ ततो यजमानः कांश्यपात्रस्थदधिमधुघृतानि कांस्यपात्रपिहितान्यादाय॥ ॐ मधुपर्को मधुपर्को मधुपर्क इत्यन्नेनोक्ते॥ मधुपर्कः प्रतिगृह्यताम्॥ मधुपर्कं प्रतिगृह्णामि॥ ॐ मित्रस्यत्वेति वृहस्पतिऋषिर्मधुपर्कोदेवता यजुर्मधुपर्कावेक्षणे विनियोगः॥ ॐ मित्रस्यत्वा चक्षुषा प्रतीक्ष्ये॥ इति दातृकरस्थमेव निरीक्ष्य॥ ॐ देवस्यत्वेति वृहस्पतिराङ्गिरसऋषिः सविता देवता यजुर्मधुपर्कग्रहणे विनियोगः ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि॥ इति मधुपर्कं गृहीत्वा वामहस्ते धृत्वा॥ ॐ नमः श्यावेति प्रजापतिऋषिः सविता देवता यजुर्मधुपर्कालोडने विनियोगः॥ ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निः कृन्तामि॥ इति अनामिकया प्रदक्षिणं त्रिवारमालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिद्भूमौ विनिक्षिपेत्॥ ॐ यन्मधुन इति कुत्सऋषिर्मधुपर्कोदेवता जगतीछन्दो मधुपर्कप्राशने विनियोगः॥ ॐ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि॥ इति वारत्रयं मधुपर्कप्राशनं ततः आचम्य॥ ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठिऋषिर्दे

वी गायत्री छन्दः परमात्मा देवता: प्राणस्पर्शने विनियोगः ॥ ॐ वाङ्म आस्येस्तु ॥ ॐ नसोर्मे प्राणोस्तु ॥ ॐ अक्ष्णोर्मे चक्षुरस्तु ॥ ॐ कर्णयोर्मे श्रोत्रमस्तु ॥ ॐ बाह्वोर्मे बलमस्तु ॥ ॐ ऊर्वोर्मे ओजोस्तु ॥ ॐ अरिष्टानि मेङ्गानि तनूस्तन्वा मे सह सन्तु ॥ ॐ गौर्गौर्गौरित्यभिहिते ॥ ॐ मातारुद्राणामिति ब्रह्मऋषिर्गौर्देवता त्रिष्टुप्छन्दो गोरभिमन्त्रणे विनियोगः ॥ ॐ मातारुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाममृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट ॥ मम चामुष्य शर्मणो यजमानस्य स्त्रियान्तु मम चामुष्या अमुकीदेव्या यजमान्याः पाप्मा हत उत्सृजत तृणान्यत्तु ॥ इति तृणं छिन्द्यात् ॥

अथ पुण्याहवाचनम् ॥

॥ ॐ अद्यामुकगोत्रामुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवि अहं मम करिष्यमाण सुवर्णतुलापुरुषमहादानकर्मणि सर्वाभ्युदयप्राप्तये पुण्याहं वाचयिष्ये तदङ्गतया ब्राह्मणवरणञ्च करिष्ये ॥ ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥ इति ब्राह्मणवरणम् ॥ एभिर्गन्धपुष्पाक्षतादिभिः सर्वाभ्युदयप्राप्तये पुण्याहवाचनार्थं ब्रह्मन् त्वामहं वृणे ॥ ॐ वृतोस्मि ॥ सुवर्णतुलापुरुषमहादानकर्मणि भो ब्राह्मणा मम गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ॥ ॐ पुण्याहम् ३ ॥ ॐ

पुनन्तुमा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥ १ ॥

ॐ अद्येह· अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवी अहं मम· करिष्यमाण सुवर्णतुलापुरुषमहादानकर्मणि भो ब्राह्मणा मम गृहे स्वस्ति भवन्तो ब्रुवन्तु ३ ॐ स्वस्तिः ३ ॥ ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्तिनो वृहस्पतिर्दधातु ॥ २ ॥

ॐ अद्येह अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवी अहं मम· करिष्यमाण सुवर्णतुलापुरुष महादानकर्मणि भो ब्राह्मणा मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु ३ ॐ ऋध्यन्ताम् ३ ॥ ॐ सत्रस्यऽऋद्धिरस्य गन्मज्योतिरमृताऽअभूम ॥ दिवं पृथिव्याऽअध्यारुहामाविदामदेवान्त्स्वर्ज्योतिः ॥ ३ ॥

ॐ अद्येह अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवी अहं मम· करिष्यमाण सुवर्णतुलापुरुषम

हादानकर्मणि भो ब्राह्मणा मम गृहे वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृद्ध्यन्ताम् ३॥ ॐ ज्यैष्ठ्यञ्च म आधिपत्यञ्च मे मन्युश्च मे भामश्च मे मश्च मेम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥ ४॥

ॐ अद्येह अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवी अहं मम - करिष्यमाण सुवर्णतुलापुरुषमहादानकर्मणि भो ब्राह्मणा मम गृहे कल्याणं भवन्तो ब्रुवन्तु ३ ॐ कल्याणम् ३॥ ॐ यथेमां वाचं कल्याणी मावदानि जनेभ्यः॥ ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय च॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यताम्॥ ५॥

ॐ अद्येह अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवी अहं मम - करिष्यमाणसुवर्णतुलापुरुषमहादानकर्मणि भो ब्राह्मणा मम गृहे श्रियं भवन्तो ब्रुवन्तु३ ॐ श्रीः ३॥ ॐ मनसः काममाकूतिं वाचः सत्यमसीय॥ पशूनाꣳ रूपमन्यस्यरसो यशः श्रीः श्रयताम्॥ ६॥

ॐ अद्येह अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवी अहं मम करिष्यमाणसुवर्णतुलापुरुषमहादानकर्मणि भो ब्राह्मणा मम गृहे शान्तिं भवन्तो ब्रुवन्तु ३ ॐ शान्तिः ३ ॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ॥ ७ ॥

ॐ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ॥
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥ १ ॥

पुण्याहवाचनप्रशादोस्तु ॥ इति यजमानशिरसि किंचित् अक्षतादिकं दद्यात् ॥

ततो गणेशपूजादिकर्म कृत्वा अधिवासनं कुर्यात् ॥

ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसोमम ॥ आहमजानि गर्भधमात्वमजासि गर्भधम् ॥ १ ॥

इत्यादिमन्त्रैः पूजयेत् ॥ तुलादिवसे कृतनित्यक्रियः कर्ता मण्डपदेशं गत्वा देवान्संपूज्य
गणेशं प्रार्थयेत् ॥ ॐ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

मातृप्रार्थना

ॐ ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डागणनाथरुद्रसहिता रक्षन्तु वो मातरः॥ २ ॥

ग्रहप्रार्थना

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

वास्तुप्रार्थना

ॐ वास्तोस्पते नमस्तुभ्यं भूमिशय्यारत प्रभो
मद्गृहं धनधान्यादिसमृद्धिं कुरु सर्वदा॥ ४ ॥

अग्निप्रार्थना

ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्
सुवर्णवर्णममलं समृद्धं विश्वतोमुखम्॥ ५ ॥

इन्द्रप्रार्थना

ॐ एह्येहि सर्वामरसिद्धसाध्यै
रभिष्टुतो वज्रधरामरेश ॥
संवीज्यमानोप्सरसा गणेन
रक्षाध्वरं नो भगवन्नमस्ते ॥ ६ ॥

अग्निप्रार्थना

ॐ एह्येहि सर्वामरहव्यवाह्
मुनि प्रवीरैरभितो भिजुष्टः ॥
तेजोवतां लोकगणेन'सार्धं म
ममाध्वरं पाहि कवे नमस्ते ॥ ७ ॥

यमप्रार्थना

ॐ एह्येहि वैवस्वत धर्मराज
सर्वामरैरर्चित धर्ममूर्ते ॥
शुभाशुभानन्द शुचामधीश
शिवाय नः पाहि मखं नमस्ते ॥ ८ ॥

निऋतिप्रार्थना

ॐ एह्येहि रक्षोगणनायकस्त्वं
विशालवेतालपिशाचसंघैः ॥
ममाध्वरं पाहि पिशाचनाथ
लोकेश्वरस्त्वं भगवन्नमस्ते ॥ ९ ॥

वरुणप्रार्थना

ॐ एह्येहि यादोगणवारिधीनां
गणेन पर्जन्यसहाप्सरोभिः ॥
विद्याधरेन्द्रामरगीयमान
पाहि त्वमस्मान्भगवन्नमस्ते ॥ १० ॥

वायुप्रार्थना

ॐ एह्येहि यज्ञे मम रक्षणाय
मृगाधिरूढः सहसिद्धसंघैः ॥
प्राणाधिपः कालकवेः सहाय
गृहाण पूजां भगवन्नमस्ते ॥ ११ ॥

कुवेरप्रार्थना

ॐ एह्येहि यज्ञेश्वर यज्ञरक्षां
विधत्स्व नक्षत्रगणेन सार्धम् ॥
सर्वौषधीभिः पितृभिः सहैव
गृहाण पूजां भगवन्नमस्ते ॥ १२ ॥

ईशानप्रार्थना

ॐ एह्येहि यज्ञेश्वर नस्त्रिशूल
कपालखट्वाङ्गधरेण सार्धम् ॥
लोकेश यज्ञेश्वर यज्ञसिद्ध्यै
गृहाण पूजां भगवन्नमस्ते ॥ १३ ॥

अनन्तप्रार्थना

ॐ एह्येहि पातालधरामरेन्द्र
नागाङ्गनाकिन्नरगीयमान ॥
यक्षोरगेन्द्रामरलोकसंघै
रनन्त रक्षाध्वरमस्मदीयम् ॥ १४ ॥

ब्रह्मप्रार्थना

ॐ एह्येहि सर्वाधिपते सुरेन्द्र
लोकेन सार्धं पितृदेवताभिः ॥
सर्वस्य धातास्यमितप्रभावो
विशाध्वरंनःनः सततं शिवाय ॥ १५ ॥

ततो ऋत्विजः संपातकलशोदकेन यजमानं पौराण वैदिकमन्त्रैरभिषिंचेयुः ॥ततो यजमानः सर्वौषधीभिः अनुलिप्य विभूतिं धारयेत्॥ततः पुष्पाञ्जलिं गृहीत्वा तुलां त्रिःप्रदक्षिणीकृत्य पश्चिमत उपविश्य प्रार्थयेत्॥ ॐनमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता ॥साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना॥ १ ॥एकतः सर्वसत्यानि तथानृतशतानि च ॥धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते॥ २॥त्वं तुले सर्वभूतानां प्रणाममिह कीर्तिता॥ मां तोलयन्ती संसारादुद्धरस्व नमोस्तु ते॥ ३ ॥ योसौ तत्वाधिपो देवः पुरुषः पञ्चविंशकः॥ स एकोधिष्ठितो देवि त्वयि तस्मान्नमोनमः॥ ४ ॥ ॥ततो गोविन्दप्रार्थना ॥ ॥ॐनमोनमस्ते गोविन्द तुलापुरुषसंज्ञक ॥त्वं हरे

तारयस्वास्मान्नस्मात्संसारसागरात्॥ १ ॥ ततः पुनस्तुलां त्रिःप्रदक्षिणीकृत्य दक्षिणहस्ते सूर्यं वामहस्ते धर्मराजं ॥ स्वांके इष्टदेवतां गृहीत्वा प्राङ्मुखो गोविन्दं पश्येत्॥ उत्तरफलेके आसीत्॥ दक्षिणफलके सुवर्णं अधिकं स्थापयेत्॥ ततस्तुलायां स्थित इमान्मन्त्रान् पठेत्॥ ॥ ॐनमस्ते सर्वभूतानां साक्षिभूते सनातनी॥ पितामहेन देवि त्वं निर्मिता परमेष्ठिना॥ १ ॥ त्वया धृतं जगत्सर्वं सहस्थावरजङ्गमम्॥ सर्वभूतात्मभूतस्थे नमस्ते सर्वधारिणि॥ २ ॥ ॐपुनन्तु मा देवजनाः पुनन्तु मनसा धियः॥ पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा॥ ३ ॥ यथा पवित्रमतुलमपत्यं जातवेदसः॥ तथा स्वेन पवित्रेण सुवर्णं हि पुनातु माम्॥ ४ ॥ ॥ रुद्रस्य तु महत्तेजः कार्तिकेयस्य संभवः॥ पवित्रत्वाद्यथा देवैः शिरसा धार्यते सदा ॥ ५ ॥ यथाग्निर्देवताः सर्वाः सुवर्णं च तदात्मकम्॥ यत्कृतं मे स्वकायेन मनसा वचसा तथा॥ ६ ॥ दुष्कृतं यत्सुवर्णस्य दानाद्यातु जनार्दन॥ ॥ ततस्तुलादवतीर्य तोलितसुवर्णे तुलसीपत्रं प्रक्षिप्य कुशतिलजलान्यादाय॥ ॥

ॐअद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकी देवि अहं मम श्रीपरमेश्वर……… देवताप्रीतये

आत्मसमतोलितमिदं सुवर्णमग्निदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्य आचार्यब्रह्मसदस्यगणपतिऋत्विज्ञापकद्वारपालेभ्यः अन्येभ्यो द्विजेभ्यो दीनानाथेभ्यश्च संप्रददे ॥ इति संकल्प्य ऋत्विगादिहस्तोपरि आचार्यहस्ते दद्यात्॥ कोदात् इति पठेत् ॥

ततः प्रार्थना॥ ॐ नमोनमस्ते गोविन्द तुलापुरुषसंज्ञक ॥
दानेनानेन देवेश प्रसन्नो भव सर्वदा॥ १ ॥

ततो भूमिदानम्॥

ॐ अद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवी अहंमम श्रीपरमेश्वरप्रीतये कृतस्य आत्मसमतोलितसुवर्णतुलापुरुषमहादानकर्मणि न्यूनातिरिक्तपरिपूरणार्थं इमां यथा परिमितां ग्रामसमन्वितां षष्ठ्यधिकशतत्रयीभूतां मध्यदेशस्थां भूमिं विष्णुदेवताकां यथानामगोत्राय आचार्याय संप्रददे ॥ ॥ प्रार्थना॥ ॥ॐ सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ॥अनन्तसस्यफलदा ह्यतः शान्तिं प्रयच्छ मे॥ ॥दानप्रतिष्ठा॥ ॥ कृतैतद्ग्रामसमन्वितभूमिदानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं अमुकगोत्राय आचार्याय संप्रददे ॥ ॥

ततो रत्नदानम्

ॐ अद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेव्यहं मम श्रीपरमेश्वरप्रीतये कृतस्य सुवर्णतुलापुरुषमहादानकर्मणः प्रतिष्ठार्थं इमानि सहस्रसंख्याकानि मौक्तिकानि रत्नानि समुद्रदेवताकानि यथा नामगोत्राय आचार्याय संप्रददे ॥ ॥ततः प्रार्थना॥ ॥ ॐ रत्नानि सर्वदेवानां प्रियाणि सारवन्ति च॥ अतस्तेषां प्रदानेन मम सन्तु मनोरथाः॥ ॥ततो दानप्रतिष्ठा॥ ॥ कृतैतत्सहस्रसंख्याकमौक्तिकादिरत्नदानकर्मणः प्रतिष्ठार्थं इदं सुवर्णं वह्निदेवताकं अमुकगोत्राय आचार्याय संप्रददे॥

ततो गोदानम्॥

ॐ अद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकी देवि अहं मम श्रीपरमेश्वरप्रीतये आत्मसमतोलितसुवर्णतुलापुरुषमहादानकर्मणः साङ्गुण्यार्थं इदं गोनिष्क्रयीभूतं रजतं चन्द्रदेवताकं यथानामगोत्रेभ्य आचार्यादिभ्यः संप्रददे॥ ॥प्रार्थना॥ ॥ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणी॥ तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥ दानप्रतिष्ठा॥ ॥अद्य कृतैतद्गोनिष्क्रयीभूतरजतदानक-

र्मणः प्रतिष्ठासाङ्गतासिद्धये इदं रजतं चन्द्रदेवताकं यथा नामगोत्रेभ्य आचार्यादिभ्यः संप्रददे ॥

ततः पूर्णपात्रम् ॥

ॐ अद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवि अहं मम श्रीपरमेश्वरप्रीतये आत्मसमतोलित सुवर्णतुलापुरुषमहादानकर्मणि कृतस्य हवनकर्मणः अपूर्णपूरणार्थं पूर्णपात्रं प्रजापतिदेवताकं यथानामगोत्राय ब्रह्मणे संप्रददे ॥ ॥ ॥ ॥ ॥

अथ मेधा॥

अथ मेधा॥

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ॥ सनिम्मेधामयासिषꣳस्वाहा ॥ १ ॥ यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ २ ॥ मेधाम्मे वरुणोददातु मेधामग्निः प्रजापतिः ॥ मेधामिन्द्रश्च वायुश्च मेधांधाताददातु मे स्वाहा ॥ ३ ॥ इदम्मेब्रह्मचक्षत्रश्चोभे श्रियमश्नुताम् ॥ मयिदेवादधतुश्रियमुत्तमां तस्येते स्वाहा ॥ ४ ॥

अथ वस्त्रहोमः ॥ ॐ एधोस्येधिषीमयिसमिदसितेजोसि

तेजो मयि धेहि॥ समाववर्ति पृथिवीसमुखाः समुसूर्यः समुविश्वमिदं जगत् ॥वैश्वानर ज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा॥ १ ॥

अथ घृतछाया॥

ॐ ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् घृतेन द्यावा पृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥ १ ॥ ॥ईक्षणम्॥ ॥ ॐ अलक्ष्मीर्यच्च दौस्थ्यं मेमे सर्वगात्रेषु संस्थितम्॥ तत्सर्वं समयाज्यत्वं लक्ष्मीं पुष्टिं च वर्धय॥ २॥ ॐ अद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकी देवि· अहं मम· श्रीपरमेश्वरप्रीतये आत्मसमतोलिततुलापुरुषमहादानकर्मणि इदं स्वमुखावलोकितं· आज्यं मृत्युञ्जयदेवताकं कांस्यपात्रं विश्वकर्मदेवताकं सुवर्णं वह्निदेवताकं यथानामगोत्राय यथानामशर्मणे आचार्याय संप्रददे ॥ ॥ प्रार्थना ॥ ॥ॐ कामधेनोः समुद्भूतं देवानामुत्तमं हविः॥ आयुर्वृद्धिकरं दानुराज्यं पातु सदैव माम्॥ १ ॥दानप्रतिष्ठा॥ ॥अद्यकृतैतत्स्वमुखावलोकित आज्यकांस्यपात्रसुवर्णदानकर्मणः प्रतिष्ठासाङ्गतासिद्ध्यये इदं रजतं चन्द्रदेवताकं यथानामगोत्राय

यथानामशर्मणे आचार्याय संप्रददे ॥

ततो भूयसीदानम् ॥

ॐअद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकी देवि-अहं मम· श्रीपरमेश्वरप्रीतये आत्मसमतोलितसुवर्ण तुलापुरुषमहादानकर्मणि न्यूनातिरिक्तपरिपूरणार्थं इमां भूयसीं दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुं समुत्सृजे ॥

ततो यज्ञान्ते गोदानम्

ॐअद्य अमुक गोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकी देवी·अहं मम· श्रीपरमेश्वरप्रीतये आत्मसमतोलितसुवर्णतुलापुरुषमहादानकर्मणस्तथा तस्मिन्कर्मणि कृतस्य तत्तद्देवतानां स्थापन,पूजन,हवनादि सकलकर्मणश्च प्रतिष्ठासांगतासिद्ध्यर्थं न्यूनातिरिक्तपरिपूरणार्थं इमां सवत्सां सालंकारां गां रुद्रदेवताकां यथानामगोत्राय आचार्याय संप्रददे ॥ प्रार्थना ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥ तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥ १ ॥ दानप्रतिष्ठा ॥

अद्यकृतैतत्सवत्ससालंकारगवीदानकर्मणः प्रतिष्ठासाङ्गता

सिद्धये इदं रजतं चन्द्रदेवताकं यथानामगोत्राय आचार्याय संप्रददे ॥

ततो मण्डपदानम्॥

ॐअद्य अमुकगोत्रा अमुकप्रवरा सपुत्रा सपरिवारा अमुकीदेवि·अहं मम·श्रीपरमेश्वरप्रीतये आत्मसमतोलित सुवर्णतुलापुरुषमहादानकर्मणि तत्तद्देवतानां स्थापनपूजनहवनादिकर्मसंपत्तये रचितं ध्वजापताकादिमंण्डितं सुपूजितगोविन्दप्रतिमायुतं सपरिच्छदं इदं मंडपं विष्णुदेवताकं यथानामगोत्राय आचार्याय संप्रददे॥ ॥

ततः प्रार्थना॥ ॥नमोनमस्ते गोविन्द पुराणपुरुषोत्तम॥दानेनानेन देवेश प्रसन्नो भव सर्वदा॥दानप्रतिष्ठा अद्यकृतैतत्सपरिच्छद मण्डपदानकर्मणः प्रतिष्ठा साङ्गता सिद्धये इदं रजतं चन्द्रदेवताकं यथानामगोत्राय आचार्याय संप्रददे ॥

तत आचार्यादयो यजमानं कलशोदकेन अभिषिच्य तिलकप्रशादं दत्वा आशीर्भिर्वर्द्धयेयुः॥

ततः कायेनवाचेतिमन्त्रेण कर्म ईश्वरार्पणं कुर्यात्॥

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥ न्यूनं संपूर्णतां यातु सद्यो वन्दे तमच्युतम्॥ अच्युताय नमः॥

इति संक्षिप्त सुवर्णतुलापुरुष महादानविधिः॥

अथ ब्राह्मणभोजनसंकल्पः ॥ ॥

अहं मम श्रीपरमेश्वरप्रीतये कृतस्य सुवर्णतुलापुरुषमहादानकर्मणः साद्गुण्यार्थं मिष्टान्नेन सहस्रब्राह्मणभोजनकर्म करिष्ये॥ तत्कर्मणि एभिश्चन्दनपुष्पाक्षतादिभिः सहस्रब्राह्मणान्वृणे॥ करिष्यमाण भोजनकर्मणः प्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यः सहस्रब्राह्मणेभ्यो दातुं समुत्सृजे॥

स्नानसंकल्पः॥

अहं मम आजन्मसंचितकायिकवाचिकमानसिकसकलपापक्षयपूर्वक कुरुक्षेत्रादिपुण्यतीर्थस्नानसमफलप्राप्तये अस्मिन्गुह्येश्वरीसमीपे सुवर्णतुलापुरुषमहादानकर्म

णि वाङ्मत्या जलेन स्नानं करिष्ये ॥ ॥ ॥

अथहिरण्याश्वदानविधिः

ततः कृष्णाजिनोपरि द्रोणपरिमिततिलान् संस्थाप्य तदुपरि सूर्यमूर्तिसंयुतं हिरण्याश्वं निधाय पीताम्बरं वेष्टयित्वा तत्समीपे छत्रोपानत्पादुकाचामरासनानि निधाय त्रिवारं प्रदक्षिणीकृत्य मंत्रं पठेत् ॥

ॐ नमस्ते सर्वदेवेश वेदाहरणलंपट ॥
वाजिरूपेण मामस्मात्पाहि संसारसागरात् ॥ १ ॥
त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्कर ॥
यस्माद्भ्रामयसे लोकानतः पाहि सनातन ॥ २ ॥

कुशतिलजलं गृहीत्वा

अहं मम श्रीपरमेश्वरप्रीतये कुंभाष्टकोपेतं छत्रोपानत्पादुकाचामरासनभाजनसोपस्करशय्यायुतं हेममार्तण्डसंयुतं इमं हिरण्याश्वं विष्णुदेवताकं यथानामगोत्राय आचार्याय संप्रददे ॥

प्रार्थना

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ॥ हिरण्ययेन सविता रथेनादेवो याति भुवनानि

पश्यन्॥ १ ॥

हिरण्यगर्भगर्भस्थं हेमवीजं विभावसोः ॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥२॥

दानप्रतिष्ठा॥

ॐअद्यकृतैतच्छ्रीपरमेश्वरप्रीतये सपरिच्छदहिरण्याश्वदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये इदं सुवर्णं वह्निदेवताकं यथानामगोत्राय आचार्याय संप्रददे ॥

ततो गोदानम्॥

अहं मम श्रीपरमेश्वरप्रीतये कृतस्य सपरिच्छदहिरण्याश्वदानकर्मणो न्यूनातिरिक्तपरिपूरणार्थं सालंकारां इमां गां रुद्रदेवताकां यथानामगोत्राय आचार्याय संप्रददे ॥

प्रार्थना ॥

ॐकपिले सर्वदेवानां पूजनीयासि रोहि
तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥१

दानप्रतिष्ठा ॥

अद्यकृतैतत्सालंकारगवीदानकर्मणः प्रतिष्ठासांगतासिद्धये इदं रजतं चन्द्रदेवताकं यथाना-

सगोत्राय आचार्याय संप्रददे ॥

तत ऋत्विग्भ्यो गां सुवर्णं च दद्यात् ॥

नियोजयेद्द्विजांस्तत्र शतसंख्यान्नृपोत्तम।
अलाभे तु बहूनां च यथालाभं नियोजयेत्।
विद्रुगान्वयोद्भूतान्गृहस्थान्संजितेन्द्रियान्।
स्वकर्मनिरतान् शुद्धान्शान्तश्शीलान्वयान्वितान्।
धूमायमानेन वृथा होतव्यं ज्वलितेनले।
होमो व्याहृतिभिश्चैव सर्वत्र विधीयते।
प्रणवादिभिश्च कर्तव्यः स्वाहाकारान्तयोजितैः।
जुहुयात्सर्वदेवानां यथांशेनोपकल्पिताः।
तिलाः फलाः घृताभ्यक्ताः किञ्चिद्यवसमन्विताः।
होतव्याः कोटिहोमे तु समिधश्च पलाशजाः।
पूर्णे पूर्णे सहस्रे च दद्यात्पूर्णाहुतिं शुभाम्।
पञ्चमे तन्मुखे राजन्सर्वकामार्थसिद्धये। ईशानभागे

संक्षेपपक्षे तु - शतमुख- दशमुखैकमुखाद्यः कोटिहोमभेदाः।
यज्ञसमाप्तौ महोत्सवं कारयित्वा निष्क कङ्कण कुण्डलादिभिः ऋत्विजः संभूष्य गोशताश्वशत सुवर्णसहस्रादानं सर्वेभ्यः दीनान्धकृपणविप्रादि भोजनमवभृथस्नानम्। अत्र विशेषतो ब्राह्मणसंख्यानियमः कालनियमश्च नास्ति यतोयं सार्वकालिकः।

एवं समापयेद्यस्तु कोटिहोममखं शुभम्।
तस्यारोग्यं प्रियं पुत्राः राष्ट्रवृद्धिस्तथैव च।
सर्वपापक्षयश्चैव जायते नृपसत्तम।
अनावृष्टिभयं चैव उत्पातभयमेव च।
दुर्भिक्षं ग्रहपीडा च प्रशमं याति भूपते।
एतत्पुण्यं पापहरं सर्वकामफलप्रदम्।
सनकाख्येन मुनिना पार्थिवाय निवेदितम्।
सर्वोपसर्गशमनं भवने स्वकार्ये कारयन्ति मनुजा नृप कोटिहोमम्।
भोगानवाप्य मनसाभिमतान्प्रकामं ते यान्ति शक्रसदनं भुवि शुद्धसत्वाः।

~~देवीभागवते ११ स्कन्धे~~ २१-४ अध्याये गायत्रीप्रकरणे -

गायत्रीचैव संसेव्या धर्मकामार्थमोक्षदा।
गायत्र्यास्तु परं नास्ति इह लोके परत्र च।

तत्र कामप्रयन्तिं तत्र संख्यजपे तत्फलावाप्तिः। पद्मादिभिर्लक्षादि होमेन मोक्षादिसिद्धयः। तदभिमन्त्रितजलभस्मादिप्रयोगाः। शान्त्यादि कर्मसु तु - पयः शमीसमिद्भिर्होमे ज्वरादिशान्तिः तत्तत्फलोद्देशेन तत्तद्द्रव्यहोमः।

पुष्पैः - प्राप्तिश्रीलक्ष्म्यः। बिल्वसमिद्भिः - श्रीः पलाशैः - सर्वेष्टम्।
रक्तपद्मैः - श्रीः तत्पुष्पपत्रादिभिः - " अर्कसमिद्भिः - जयः
जातीपुष्पैः - " अश्वत्थसमिद्भिः - युद्धजयः बिल्वैः समूलैः - राज्यम्।
शालितण्डुलैः - " पायसेन - वचनादि पलाशपुष्पैः - सर्वसिद्धिः -

एवं विधा जपहोमादि नानाप्रयोगा दृश्यन्ते। परं तत्र कोटिहोमस्य स्पष्टतयोल्लेखो नास्ति।

सारांशः—
२०-१००-१००० मा ब्राह्मणाः
गायत्र्या कोटिहोमः
कामनाविशेषेण तिलादिद्रव्यैः, ब्रह्मवृक्षसमिद्दूर्वाङ्कुरैः कोटिहोमः

~~[illegible]~~ पत्रे २५६ पूर्वोक्तान्याग्नेयवाक्यानि परं विशेषः—

गायत्रीं त्रायते यस्माद्गायत्री तु ततः स्मृता ।
कोटिजाप्येन विप्रर्षे यदिच्छति तदाप्नुयात् ।
यक्षविद्याधरत्वे वा गान्धर्वे दैवतेऽपि वा ।
यत्र यत्र भवेद्वाञ्छा तत्र दाप्नोत्यसंशयम् ।
हुता च वरदा देवी सर्वकामवरप्रदा ।

तिलैः — सर्वपातकनाशः पयसा — ब्रह्मवर्चसम् क्षीरिसमिद्भिः — ग्रहशान्तिः
यवैः — शान्तिः दध्ना — पुत्राप्तिः बिल्वैः — धनम्
घृतैः — आयुः शालिभिः — धान्यम् कमलैः — श्रीः
सक्षीरदूर्वाभिः — आरोग्यम्, देशोपसर्गनाशश्च गुग्गुलैः — सौभाग्यम् पायसेन — विद्या

येन येन तु कामेन लक्षहोमं समाचरेत् ।
तं तं काममवाप्नोति नात्र कार्या विचारणा ।

समाप्तिपर्यन्तं भैक्ष्यफलमूल-क्षीरसक्तुयवानामन्यतमाहारः. समाप्तौ गोवत्सस्वर्णदानं. पूर्वं ग्रहशान्तिं कृत्वा. तेषामष्टाविंशति घृताक्तसमिद्धोमः कार्यः

ब्रह्मवृक्षोद्भवाश्चेध्मास्तथा दूर्वाङ्कुरोद्भवाः
होतव्या लक्षहोमे तु गायत्र्याः कामिकी परम् ।
श्रीसूक्तं पावमानं च पौरुषं शाम्भवं तथा ।
रौद्रमैन्द्रं च सौम्यं च अपेक्षितस्य बृहद्रथम् ।
महाजपं तु होमान्ते कुर्याद्वै सर्वसिद्धिदम् ।

अन्ते घटजलेनाभिषेकः एवं लक्षहोमे शत्रुनाश मरक व्याधिनिवृत्ति ईतिनिवारणं रक्षआदिशान्तिः शल्यासिद्धिरनपक्रमम् इत्यादिफलानि पूर्वोक्तवदेव.

+ कोटिहोमं तु यो राजा कारयेद्विधिपूर्वकम् ।
न तस्य मानसो दाह इहलोके परत्र च ।

कोटिहोमे २०, १००, १००० वा यथेष्टं ब्राह्मणवरणम्. एवं करणे सर्वकामाप्तिः सशरीरस्वर्गगमने छायाऽपि पूर्तिः. इत्यादि फलानि पूर्वोक्तवत्.

सावित्री परमा देवी सावित्री पावनं परम् ।
सर्वकामप्रदा चैव सावित्री कथिता तव ।
गायत्रीं तु परित्यज्य येऽन्यमन्त्रमुपासते ।
ते वै मुण्डकरा ज्ञेया इति वेदविदो विदुः ।
गायत्रीं चिन्तयेद्यस्तु हृत्पद्मे समुपस्थिताम् ।
धर्माधर्मविनिर्मुक्तः स याति परमां गतिम् ।

~~मत्स्यपुराणे~~ पत्रे ८६ — (ग्रहयज्ञः)

ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः
प्रथमो युतहोमश्च लक्षहोमस्ततः परः
तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः इत्यादि मात्स्यवचनानि.

गृहस्योत्तरपूर्वेण चतुरस्रं चतुर्द्वारं मण्डपम्. अन्यत्रोक्तं समानमेव. विशेषास्तु—

कुण्डस्य प्रागुदीच्यां वा प्राच्यामुत्तरतोऽपि वा ।
चतुरस्रं चतुर्द्वारं कर्तव्यं ग्रहपीठकम् ।
श्रीकामः पूर्वतः कुर्यात्सुखार्थं दक्षिणेन तु ।
पश्चाद्द्विजन्मासिद्ध्यर्थं शान्त्यर्थं चोत्तरेण तु ।
ऐशान्यां सर्वकामाय आग्नेय्यां त्वाभिचारिके ।

नैऋत्यां पुनलाभाय पुष्ट्यर्थं वायवेन तु·
ग्रहवेदी तु स्थण्डिलपक्षेपि नवकुण्डपक्षेप्युक्तः
+ षोडश ब्राह्मणान् शुद्धान्दम्भानृतविवर्जितान्
तेषां मध्ये श्रेष्ठतममाचार्यं तं प्रकल्पयेत्·
ताम्रकात्स्फटिकाद्रक्तचन्दनात्स्वर्णजावुभौ·   सूर्यादिक्रमेण·
रजतादयसः सीसात्कांस्यात्कार्या ग्रहास्तथा
यथारुचि प्रमाणेन प्रतिमाः कल्पयेत्सुधीः

अन्यग्रन्थोक्तवद्ग्रहस्थापन पूजन नैवेद्यादि ग्रहाणामर्कादि समिधः। ईश्वरादिदेवानां स्वस्वग्रहस्यैव समिधः। पूर्वं वैदिकतत्तन्मन्त्रैर्ग्रहाणां दशदशाहुत्यनन्तरं व्याहृतिभिर्लक्षादिसंख्यहोमः। मदनमते तु अथ सत्र अथर्वोक्तपाठेन तत्तन्मन्त्राणां व्याहृतीनां च विकल्प इति। [illegible] सूर्यादिमन्त्रैर्दशदशाहुतीस्तत्तन्मन्त्रैः प्रतिदैवतं लक्षहोमादि द्रव्येण हुत्वा व्याहृतिभिर्लक्षादिहोमः कार्य इत्याहुः पितृचरणाः। हेमाद्रिमदनौ तु यवाद्यन्यतमद्रव्येण ग्रहान्प्रति तत्तन्मन्त्रेण दशदश हुत्वा तेनैव द्रव्येण व्यस्तसमस्तव्याहृतिभिर्लक्षादिहोम इति।

अत्र व्याहृतिकरणकहोमे अग्निवायुसूर्यप्रजापतय एव देवताः न ग्रहाः। अत एव- भूः भुवः सुवश्चेतीति तिस्रो व्याहृतयो जपेत्।
आभिश्च होमे तिसृभिश्चतुर्थी स्यात्समासत इति।

~~[illegible]~~मते - समस्ताभिर्व्याहृतिभिरेको होमः स चाग्निवायुसूर्यदैवत्य इति सर्वथा व्याहृतिहोमे न ग्रहा देवताः। अत्र प्रधानं ग्रहपूजा तद्धोमो घृतादिहोमः। ग्रहदैवत्यकर्मसमूहे लोके समवायेन ग्रहयज्ञशब्दः। पितृचरणास्तु अयुतहोमादीनामेव प्राधान्यं ग्रहहोमोऽङ्गमित्याहुः ~~तत्र~~ ग्रहयज्ञे फलश्रवणात्। ~~इति~~

~~भविष्योत्तरीय~~कोटिहोममूलवचनानि मयूखे दर्शितानि·
तिलाः कृष्णा घृताभ्यक्ताः किंचिद्व्रीहिसमन्विता इत्यत्र यवसमन्विता इति पाठः।
पत्रे २३- कोटिहोमे शत-तदर्द्ध-तदर्ध-षोडशान्यतमहस्तो मण्डपः, कुण्डं तु अष्टहस्तं दशहस्तं षोडशहस्तं वा। वेदी प्राच्यां द्विहस्तविस्तृता।
सर्वानाचार्यादीन्पदार्थान्समयेन मधुपर्केण सम्पूज्य। मण्डपपूजान्तं समाप्य ऋत्विग्भिः सह यजमानः प्राग्द्वारेण मण्डपं प्रविश्य दक्षिणद्वारपश्चिमदेशे उपविश्य गुर्वादीन्कर्मकरणाय नियोजयेत्।
~~कोटिहोमे तु~~ सर्वतोभद्रे- वेदेः पूर्वं ब्रह्माणं, मध्ये जनार्दनं, पश्चिमे रुद्रं उत्तरे स्कन्दमप्यावाहयेत्। प्रयोगे- सूर्यादीन्ग्रहादीन्समिदाज्यनैवेद्यशेषचरुभिः अष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतमसंख्यया अधिदेवतादीन् यथासंख्यया सूर्याद्या देवता दशसंख्याकतिलाहुतिभिः अग्निं वायुं सूर्यं प्रजापतिं च प्रत्येकं पञ्चविंशतिशतमिताभिस्तिलाहुतिभिरयुतहोमे, लक्षहोमे पञ्चविंशतिसहस्राणि ताभिः, कोटिहोमे पञ्चविंशतिलक्षमिताभिराहुतिभिर्यक्ष्य इति ~~प्रयोगरत्नकृतः~~। ग्रहादीन्संपूज्य चर्वासादनाद्याज्यभागान्ते यजमानः सर्वा आवाहिताः सूर्यादिदेवताः अग्निवायुसूर्यप्रजापतींश्चोद्दिश्य समिदाज्यचरुतिलान्होतुमुत्सृजे न ममेति त्यजेत्। तत ऋत्विजः समिदाज्यनैवेद्यशेषचरून् क्रमेणावाहिताभ्यो देवताभ्योऽष्टसहस्राद्यन्यतमसंख्यया समस्तव्याहृतिभिर्यक्ष्यमाणतन्मन्त्रैर्वा हुत्वा घृताक्ततिलैस्ताभ्य एव देवताभ्यः प्रत्येकं दशदशाहुतीर्हुत्वा होमं [illegible] स्विष्टकृतं हुत्वा व्यस्तसमस्तव्याहृतिभिस्तिलैरयुतं लक्षं कोटिं वा जुहुयुः। [illegible] वसोर्धारा। समाप्तौ धेन्वादिदक्षिणा शक्त्या ब्राह्मणान्भोजयेत्। ततो दीनानाथेभ्यो भूयसीदानं। मण्डपदेवविसर्जनं मण्डपदानमित्यादिकं तत्र प्रयोगो ज्ञेयम्।

नैरृत्यां पुनरलाभाय पुष्पार्थं वा यवेन तु।

ग्रहवेदी तु स्थण्डिलपक्षेपि नवकुण्डपक्षेप्युक्तः

+ षोडशाङ्गुलान्शुक्लान्दर्भान्ततविवर्जितान्।

तेषां मध्ये श्रेष्ठतममाचार्यं तं प्रकल्पयेत्।

ताम्रकात्स्फटिकाद्रक्तचन्दनात्स्वर्णजावुभौ।   सूर्यादिक्रमेण।

रजताद्यसः सीसा कांस्या कार्या ग्रहास्तथा

यथारुचि प्रमाणेन प्रतिमाः कल्पयेत्सुधीः

(अन्यग्रन्थोक्तवद्ग्रहस्थापन पूजन नैवेद्यादि ग्रहाणामर्कादि समिधः।
ईश्वरादिदेवानां स्वस्वग्रहस्यैव सामिधः। पूर्वं वैदिकतत्तन्मन्त्रैर्ग्रहाणां
दश दशाहुत्यनन्तरं व्याहृतिभिर्लक्षादि संख्य होमः - मदनमते तु अथे
त्यत्र अथवेति पाठेन तन्मन्त्राणां व्याहृतीनां च विकल्प इति। [illegible]
[illegible] सूर्यादिमन्त्रैर्दशदशाहुतीस्तत्तन्मन्त्रैः प्रतिदैवतं लक्षहोमादि
द्रव्येण हुत्वा व्याहृतिभिर्लक्षादिहोमः कार्य इत्याहुः पितृचरणाः। हेमाद्रि
मदनौ तु यवाद्यन्यतमद्रव्येण ग्रहानपि तत्तन्मन्त्रेण दशदश हुत्वा तेनैव द्रव्येण
व्यस्तसमस्त व्याहृतिभिर्लक्षादिहोम इति

(अत्र व्याहृतिकरणक होमे अग्निवायुसूर्यप्रजापतय एव देवताः न ग्रहाः। अत एव-
भूः भुवः सुवश्चेति तिसृभिर्व्याहृतयो जपेत्।

(आभिश्च होमे तिसृभिश्च पृथक्स्यात्समासत इति।

~~मदन~~मते - समस्ताभिर्व्याहृतिभिरेको होमः स चाग्निवायुसूर्यदैवत्य इति
सर्वथा व्याहृतिहोमे न ग्रहा देवताः। अत्र प्रधानं ग्रहपूजा तद्धोमो घृतादिहोमः।
ग्रहदैवत्यकर्मसमूहे त्वेतु समवायेन ग्रहयज्ञशब्दः। पितृचरणास्तु अयुत
होमादीनामेव प्राधान्यं ग्रहहोमोऽङ्गमित्याहुः। ~~तत्र~~ ग्रहयज्ञे फलश्रवणात् ~~इत्यर्थः~~

~~भविष्योत्तरीय~~कोटिहोममूलवचनानि मयूखे दर्शितानि।

तिलाः षट्का घृताभ्यक्ताः किंचिद्व्रीहिसमन्विता इत्यत्र यवसमन्विता इति पाठः।

पत्रे २३ - कोटिहोमे शत-तदर्द्ध-तदर्ध-षोडशान्यतमहस्तो मण्डपः, कुण्डं तु
अष्टहस्तं दशहस्तं षोडशहस्तं वा। वेदी प्राच्यां द्विहस्तविस्तृता।
सर्वेषामाचार्यादीनां पदार्थान्समर्पयेत मधुपर्कैः सम्पूज्य। मण्डपपूजान्तं
समाप्य ऋत्विग्भिः सह यजमानः प्राग्द्वारेण मण्डपं प्रविश्य दक्षिणद्वार
पश्चिमदेशे उपविश्य सर्वादीन्कर्मकरणाय नियोजयेत्।

~~कोटिहोमेतु~~ सर्वतोभद्रे - वेदेः पूर्वं ब्रह्माणं, मध्ये जनार्दनं, पश्चिमे रुद्रं मतान्तरे
स्कन्दमप्यावाहयेत्। प्रयोग- सूर्यादीन्ग्रहादीन्समिदाज्यनैवेद्यशेषचरुभिः
अष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतमसंख्यया अधिदेवतादीन् यथा
संख्यया सूर्याद्या देवता दशसंख्याकतिलाहुतिभिः अग्निं वायुं सूर्यं प्रजा
पतिं च प्रत्येकं पञ्चविंशतिशतमिताभिस्तिलाहुतिभिरयुतहोमे, लक्षहोमे
पञ्चविंशतिसहस्रमिताभिः, कोटिहोमे पञ्चविंशतिलक्षमिताभिराहुतिभि
र्यक्ष्य इति ~~प्रकारान्तरकल्पः~~। ग्रहादीन्संपूज्य चरोः सादनाद्याज्यभागान्तो
यजमानः सर्वा आवाहिताः सूर्यादिदेवताः अग्निवायुसूर्यप्रजापतींश्चोद्दिश्य
समिदाज्यचरुतिलान्होतुमुत्सृजे न ममेति त्यजेत्। तत ऋत्विजः समिदाज्यनैवेद्य
शेषचरून् क्रमेणावाहिताभ्यो देवताभ्योऽष्टसहस्राद्यन्यतमसंख्यया समस्त
व्याहृतिभिर्यक्ष्यमाणतन्मन्त्रैर्वा हुत्वा घृताक्ततिलैस्ताभ्य एव देवताभ्यः प्रत्ये
कं दश दशाहुतीर्हुत्वा होमं तेनाग्निमिति स्विष्टकृतं हुत्वा व्यस्तसमस्तव्याहृतिभि
स्तिलैरयुतं लक्षं कोटिं वा जुहुयुः। [illegible] बलोचारिः। समाप्तौ धेन्वादिदक्षिणा
शतमा ब्राह्मणान्भोजयेत्। ततो दीनानाथेभ्यो भूयसी दानं। मण्डपदेवताविसर्जनं
मण्डपदानमित्यादिकं तत्र प्रयोगे ज्ञेयम्।

~~[illegible]~~ (प्रसङ्गः)

अन्यत्सर्वं पूर्ववदेव। तत्र दूहमनौर कृतहोमाय तिलादिद्रव्येण प्रत्येकं
दशाहुती हुत्वा प्रणवादिभूराद्व्याहृतिभिर्व्यस्ताभिर्लिङ्गैः समस्ताभिश्चैके
लेव मावत्त्या युत लक्षहोमादिसंख्यापूरणमिति हेमाद्रिप्रभृतय। एवं विना
गेमूलं नविघ्नः। तत्वं तु त्रिसृभिर्व्याहृतिभिरेकाहुतिरित्येव सर्वो होम इति प्रतिभातीति
इति मात्स्योक्तकोटिहोमं प्रदर्श्य हेमाद्रिमदनरत्नोक्त ~~नृसिंह~~

शांति

~~उपनीय कोटिहोमे विशेषः~~ —

दुःस्वप्नदर्शने घोरे ग्रहपीडासु चालनः
हसन्तीं प्रतिमां दृष्ट्वा चलन्तीं च विशेषतः
प्रस्वेदयुक्तां प्रतिमां दृष्ट्वा च नृपनन्दन।
तथा महाज्वरग्रस्ते धारां देवस्य मूर्द्धनि।
सततं नरसिंहस्य कुर्याद्वा कारयेद्द्विजैः
होमं च भोजनं चैव तस्य दोषः प्रशाम्यति।
अयने विषुवे चैव चन्द्रसूर्यग्रहेऽपि वा।
नरसिंहं समाराध्य लक्षहोमं तु कारयेत्।
शान्तिर्भवति राजेन्द्र तस्य तत्स्थानवासिनाम्।
अनावृष्टिमहामारीज्वरदोषभये तथा।
तत्क्षणान्नाशमायाति नरसिंहप्रसादतः।
नरसिंहं समाराध्य ब्राह्मणैर्वेदपारगैः
कारयेल्लक्षहोमं तु ग्रामे राष्ट्रे नराधिप।
दुःखोपसर्गमरणं प्रजानामालनम्नहि।
सम्यगाराधनाच्चैव नरसिंहस्य मन्दिरे।

श्रीकरायतने वापि कोटिहोमं नराधिप।
कारयेत्संयतैर्विप्रैः सभोजनसदक्षिणैः।
कृते तस्मिन्यथोक्ते तु आगच्छन्ति न तद्भयम्।
कृतमात्रां भूमिं खनित्वा तां संशोध्य वराहहतमृदाऽऽच्छाद्य प्रलिप्य समसिक्तां
समां स्निग्धां पूर्वोत्तरप्लवां भूमिं कृत्वा सर्वतो बाहुमात्रं चतुरस्रं चतुर्हस्तं कुण्डं
विरच्य ब्राह्मणानामन्त्र्य निरान्नं तैः सह कृतब्रह्मचर्यो होमात्पूर्वमुपोष्य घृतगायत्री
जपं कुर्यात्। ते भुक्तान्याः निराहाराः घृतपसो होममारभेयुः। भूसंस्कारान्कुश
ण्डादि कृत्वा अग्निं निधाय गृह्योक्तविधिना चाराज्यभागान्तं समाप्य—
यवधान्यतिलैर्मिश्रां गायत्र्या प्रथमं हुतिम्। धान्यं व्रीहिः यवः शालिः श्यामाकेति।
जुहुयादेकचित्तेन स्वाहाकारान्वितं बुधः
ततो व्याहृतिभिः पञ्चात्जुहुयात्तिलादिकम्।
यावत्प्रपूर्यति संख्या लक्षं वा कोटिरेव वा।
तावद्दिने दिने कुर्याद्दम्पतार्चनपूर्वकम्।
दीनानाथजनेभ्यश्च यजमानः प्रयत्नतः
तावच्च भोजनं दद्याद्यावद्धोमः समाप्यते।
ततः समाप्तौ दक्षिणां दत्त्वा शान्तिजलेन ग्राममध्ये प्रोक्षणं कारयेत्।
एवं कृते तु ग्रामस्य प्राप्य नगरस्य वा।
राष्ट्रस्य च महाभाग राज्ञो जनपदस्य च।
सर्वबाधाप्रशमनी शान्तिर्भवति सर्वदा।
ग्रामे गृहे वा भराष्ट्रदेशे द्विजैरयं मन्त्रकृतः भराविधिः।
तत्रापि शान्तिर्भविता नराणां गवाश्वमर्त्यैः सह भूपतेश्च।
एवं- भविष्योत्तरीयं पूर्वोक्तः पराशरोक्तः पश्चाद्दर्शयिष्यमाणोऽपि कोटिहोमकृत्यः।
मत्स्यपुराणविधानं १५२ पत्रे परं तत्र कोटिहोमो नोपदर्शितः परं कामनाभेदेन होमभेदा बहवः।

~~शान्तिसारे~~ पत्रे ४.

~~मात्स्योक्तानि~~ पूर्वोक्तानि मूलवचनानि. ग्रहाणां कोटिहोमे.

* वेदी च कोटिहोमे स्याद्वितस्तीनां चतुष्टयम्.
चतुरस्रा समन्ताच्च त्रिभिर्वप्रैः समावृता.
वप्रप्रमाणं पूर्वोक्तं वेदिकायास्तथोच्छ्रयः. पूर्वेतु-
(१८ अङ्गुल)
वितस्तिमात्रोच्छ्रितं प्रोक्तं स्थण्डिलं विश्वकर्मणा.
संस्थापनाय देवानां वप्रत्रय समावृताम्.
द्व्यङ्गुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः.
त्र्यङ्गुलोच्छ्रयसंयुक्तं वप्रद्वयमथोपरि.
त्र्यङ्गुलस्तस्य विस्तारः सर्वेषां कथ्यते बुधैः
दशाङ्गुलोच्छ्रिता भित्तिः स्थण्डिले स्यात्तथोपरि.
तस्मिन्नावाहयेद्देवान् पूर्ववत्पुष्पतण्डुलैः.
वीरः स्नातस्तु कुर्वीत दैवं पित्र्यमथापि वा.
प्राङ्मुखो दङ्मुखो वापि श्मश्रुकर्मैव कारयेत्.
वह्निकार्ये उदक्कार्यं कर्मादौ चास्तथा वचम्.

~~[illegible]~~ षोडशकालिजः कोटिहोमे. हेमाद्रिस्तु कोटिहोमे यदि फलवत्तत्त्वानुरोधेन समाप्तिः अतिप्रतिमिष्टा तदा २०, २४, ३२, ६४, १०० वा कुण्डानि इत्यूचे. ~~अतो~~ भविष्योत्तरे - नियोजयेद्द्विजाँस्तत्र शतसंख्यान्नृपोत्तम. अलाभे तु बहूनां तु यथालाभं नियोजयेदिति. आचार्यद्वारपालाश्च सर्वपक्षे अभिन्ना इति हेमाद्रिः. वरणं च. वस्त्रद्वय जलपात्र-केयूर-कर्णभूषण-अङ्गुलीभूषण-मणिबन्धभूषण-कण्ठाभरणानि आचार्यपुरोहिताय दद्यात्. ऋत्विग्भ्योऽपि दापयेत्. समिदादिहोमपक्षे प्रतिदैवतमेकेनायुतादिसंख्यापूरणमिति हेमाद्रिः. व्याहृतिहोमे पूर्वोक्तवत्पक्षद्वयम्.

लक्षकोटिहोमयोः ग्रहमन्त्रमध्ये शतादिसंख्यया समिदादिभिः, कोटिहोमे प्रस्थादीनां कुडववत्. यावद्धोमं प्रतिदिनं ग्रहपूजा प्रतिसहस्रं पूर्णाहुतिः.

कोटिहोमभेदाः -

(१) शतमुखः - शतकुण्डेषु प्रतिकुण्डं दश दश विप्रैः होमः. कुण्डं द्विहस्तं. मण्डपः १०० हस्तः
(२) दशमुखः - दशकुण्डेषु प्रतिकुण्डं विंशतिर्विंशतिर्विप्रैर्होमः. " ५० हस्तः
(३) द्विमुखः - कुण्डद्वये प्रतिकुण्डं ~~शत~~ पञ्चाशत्पञ्चाशद्विप्रैर्होमः. मासार्द्धमासादिसाध्यः २५ ह.
(४) एकमुखः - पूर्वोक्तः साधारणः अनियतैः शतादिभिरनियतकालेन साध्यः.

~~शान्तिसारसमुच्चये~~ पत्रे (~~ग्रहयज्ञः~~) —

ग्रहयज्ञो द्विधा अयुतहोमादिरूपो मात्स्याद्युक्तः, केवलो याज्ञवल्क्यस्मृत्यादौ. द्विविधस्यापि धर्माणां सङ्करः प्रयोगपारिजाते उक्तः. स च नित्यः काम्यश्च. कार्यारम्भ प्रतिष्ठा यज्ञ नववेश्म प्रवेश संस्कार रोगादौ ~~[illegible]~~ ग्रहयज्ञः नित्यः. नित्ये मण्डपो नास्ति. नित्यं नैमित्तिकं हित्वा सर्वमन्यत्र मण्डपः. श्रीशान्तिपुष्ट्याद्यर्थः काम्यः. सोऽपि त्रिधा अयुतलक्षकोटिहोमभेदात्. पूजादिकं सर्वं पूर्वोक्तवत्. आश्वलायनानुसारी च प्रयोगः. यजमानानुकूलचन्द्रताराद्युपेतदिने आज्यभागान्तं कृत्वा ग्रहमन्त्रैर्ग्रहसमिधः प्रतिदैवतमष्टोत्तरशतमष्टाविंशतिं वा मधुसर्पिर्दधिसमन्विता जुहुयात्. इति समिद्धोमानन्तरं तैरेव मन्त्रैः संस्कृताज्येन प्रतिदैवतमेकैकाहुतिं स्रुवेण हुत्वा, मिश्रितेन चरुणा प्रतिदैवतमेकैकाहुतिमेतैरेव मन्त्रैः स्रुवेण जुहुयात्. ततः स्विष्टकृतं हुत्वा घृतयवव्रीहितिलादीनां मध्ये कामनानुसारेण यजमानेन होमार्थं कल्पितेन द्रव्येण प्रत्येकं सूर्यादिदैवतेभ्यः स्वस्वमन्त्रैः ऋत्विग्भिः दशायुतयो होतव्याः. ततो होमाङ्गद्रव्येण व्याहृतिभिर्भूराद्याभिस्तिसृभिरेकाहुतिरेवमाचार्यः समिदाज्य

हुतिसंख्याऽप्यतिरेकेणाऽयुतसंख्यापूर्तिपर्यन्तं होमः कर्तव्यः। स च होम ऋत्विग्भिः कृतपरिकरैः सावधानैः प्राङ्मुखै रुदङ्मुखैर्वा यतैः ऋषिच्छन्दोदेवताविनियोगाभिज्ञै र्यजमानस्याभीष्टकामः समिध्यतामिति ध्यायद्भि रनार्जोनुदक्षिणजान्वाच्योपविष्टै रग्नि वायु सूर्य प्रजापतीन्मनसा ध्यायद्भिः समिद्धेऽग्नौ यावद्भिरयुतहोमसमाप्तिर्भवति तावद्भिः पूर्वाह्णे एव कर्तव्यः। एवं क्रियमाणे यावद्भि र्दिनैः समाप्यते तावद्भिः कर्तव्यः। ततो यजमानानुकूलशुभदिने होमं समाप्य पूर्णाहुतिं कृत्वाऽभिषेकादि कुर्युः। यत्र पृथक्त्वेन ग्रहयज्ञः क्रियते तत्राप्य ग्रहस्याधिदेवता प्रत्यधिदेवता लोकपालानां स्थापनादि कर्तव्यम्। अयुतसंख्या व्याहृतिभिः पूरणीया। एवं लक्षादि ग्रहयज्ञेपि बोध्यम्।। लक्षहोमादौ गरुडस्थापनं पूर्वस्यां कार्यम्।

घृतकुम्भ वसोर्धारां पातयेदनलोपरि।
औदुम्बरीमथार्द्रां च ऋज्वीं कोटरवर्जिताम्।
बाहुमात्रां स्रुचं कृत्वा ततः स्तम्भद्वयोपरि।
घृतधारां ततः सम्यक्पातयेदनलोपरि।

सामादि सूक्तपाठं च कुर्यात्। ब्राह्मणभोजने आहुतिसंख्याया विप्रान्भोजयेत्। मध्यपक्षे प्रत्याहुतिशतमेकं, मन्दपक्षे प्रत्याहुतिसहस्रमेकं भोजयेत्। अन्यथान्तहीनता स्यात्।

कोटिहोम मूलवचनान्यपि मात्स्योक्तान्येव।

मत्स्यपुराणोक्तः पूर्वोक्तः प्रथमं गायत्र्या द्वितीयादि व्याहृतिभिर्होम इत्यादिरूपः। देवीपुराणोक्तो गायत्र्या अयुतहोमादिः—

हेमपीठे वैदूर्यमयं शिवं संस्थाप्य सावरणं शिवं त्रिकालं तत्र दुग्धविशेषादिभिः संपूज्य ग्रहादीना मष्टोत्तरशताष्टाविंशाष्टान्यतमसंख्यया होमं कृत्वा ग्रहादीनां धूप नैवेद्यादि विशेषान यजयित्वा—

लक्षहोमः प्रकर्तव्यः सर्वपीडानिवारणः।
गायत्र्या ग्रहमन्त्रैश्च कूष्माण्डै र्जातवेदसैः।
ऐन्द्रवारुणवाह्नेयैः वायुयाम्यैः सवैष्णवैः।
होमः शतसहस्रेण अतोऽभ्यष्टो विधीयते।

यद्देवा०, यददीव्यं०, आयुष्टे विश्वतो०,
इति कूष्माण्डाः
जातवेदसे सुनवामेति

+ सर्वपीडाविनाशाय कोटिहोमः शुभावहः।
यवव्रीहिघृतक्षीरतिलाः कङ्गुप्रसातिकाः।
पङ्कजोशीरबिल्वाम्रदला होमे प्रकीर्तिताः।
सर्वशास्त्रार्थकुशलैर्ग्रहमात्रप्रपूजकैः।
होमः कार्यः सदा विप्रैः सर्वशान्तिप्रदायकैः।
ग्रहदृष्ट्योपसर्गादि धातुनागाः हमाः शुभम्।
यक्षरक्षः कृतापीडा लक्षहोमात्प्रशाम्यति।

सूक्ष्मधान्यमिति कोशः

+ भूमिकम्पे दिशां दाहे ग्रहयुद्ध उपस्थिते।
केतुसन्दर्शने वापि आदित्यस्य च कम्पने।
कृष्णवर्णेऽथवा सूर्येऽथवा छिद्रसमन्विते।
रक्तवर्णे तथा नद्यो विपरीता भवन्ति च।
निर्गतं गगना द्धूमं वारिमध्ये वहेद्धुता।
उपसर्गास्तथा लोके राज्ञां तु क्षयकारकाः।
यस्य राज्ञो सुराः पञ्च अथ सप्त सुराधिपाः।
ग्रहणं चन्द्रसूर्यस्य ग्रहैर्वा विषमसंस्थितैः।
बलिप्रदानं कर्तव्यं मातृणां पूजनं हितम्।
सूर्यस्याभ्यर्चनं कार्यं शिवस्याशुभनाशनम्।

सारांश: —
गायत्री त्र्यम्बकाद्यन्यतम मन्त्रेण कोटि होम:
पञ्चाङ्गो सप्त बिल्वादि होम द्रव्यं.
यव व्रीहि घृत क्षीर तिल कङ्गु चूतदलानिच होमद्रव्याणि.
पलाश दूर्वा कुश शमी अश्वत्थ उदुम्बर समिद्धोम:

लक्ष होमं महाहोमं कोटिहोमं प्रकीर्तितम्.
गोभूहिरण्यवस्त्राणि नित्यदानं शुभावहम्.
पायसं क्षीर दध्याज्यं देयं नैवेद्यमुत्तमम्.
एकाङ्गे प्रकर्तव्यं मथवा विप्रगृहे शुच.   लक्षादि रहितौ लिङ्गे पूजा कार्या.
सिद्धपीठे वनेचैव अथवा नृपवेश्मनि.
ब्राह्मणैः शुचिभिः स्नातैः संयतैर्मन्त्रपारगैः.
वेदोक्त विधिना कार्यं विजयार्थ मनुत्तमम्.
बाहुमात्रे ततः कुण्डे अङ्गुमात्रेथवा पुनः.
होतव्यं सुरराजेन्द्र नान्यो सुविधिरीदृश:.
शुभेदेशे देवमन्दिरे राजगृहेवा चतुर्हस्तं मेखलादियुतं कुण्डं निर्मायतत्र होम:
+ यवव्रीहि घृतं क्षीरं तिला: कङ्गुदलानिच.
चूतस्य, सुरराजेन्द्र पालाश्य: समिधस्तथा.
दूर्वा: कुशा: शमी, अश्वत्थ औदुम्बर्य: शुभावहा:.
गायत्र्या, त्र्यम्बकेनाथ, शंभोर्वायेत्यनेनच;   नम: शंभवाय०
जातवेदसमन्त्रेण, महाइन्द्रेण चैवहि.
सहस्रशीर्षेतिच वा, हिरण्येन तथापि वा,   नमो हिरण्यबाहवे०
रुद्रमन्त्रैस्तथा सौरैः पञ्चरात्रागमोदितैः,
होतव्यं शतमष्टौ, सहस्रं, लक्षसंख्यया.
पञ्चाङ्गो सप्तबिल्वादि होमद्रव्यं शुभावहम्.
कम्पनं स्वेदकम्पश्च अश्रुपात: प्रजल्पनम्.
देवतानां सुराध्यक्ष जाता: क्षयकारका:.
लक्षहोमं प्रकुर्वीत कोटिहोममथापि वा.

गोदोहे कुम्भवत्ते महावस्त्रं शुभावहम्.
अनाधामरको घोरो जायते राजविभ्रम:.
दुर्भिक्षं सस्यनाशश्च सुखनाश: धराधिप.
जायते नात्रसन्देह: सत्यं हि मम भाषितम्.
ये देवास्ते ग्रहा: सर्वे ये ग्रहास्ते भुजङ्गमा:
मेघाश्च ते समाख्याता लोके वर्षप्रदायका:.
तेषां सम्पूजनान्नित्यं दीर्घायु: पुरुषो भवेत्.
मात्स्ये महोक्त: कोटिहोम: पूर्वमुपदर्शितोप्यत्र तद्वदेव.

विधानपारिजाते प्रस्तावके —

नित्यादि भेद भिन्ना ग्रहयज्ञा: काम्यो युत लक्ष कोटि होम रूप:. काम्ये प्राप्ते निष्कामावा प्रतिपदोक्तान्येव वस्तूनि. कोटिहोम मूलवचनानि मात्स्योक्तानि पूर्ववदेव. प्रयोग: पूर्वोक्तवदेव., समिधस्तु —

+ विशीर्णा विदला ह्रस्वा वक्रा: सशुषिरा: कृशा:.
अतिस्थूलाश्चातिदीर्घा: समिध: कार्यनाशना:-
विशीर्णायु: क्षयं कुर्याद्विदला पुत्रनाशिनी;   विधानमालायाम् . पृ ६३
सुषिरा व्याधिजननी ह्रस्वाच रिपुवर्द्धिनी.   ह्रस्वया म्लानिमाप्नोति
वक्रा विघ्नकरी स्मृता.
दीर्घा विदेशगमनी स्थूला ह्यर्थविनाशनी.   द्विशाखा नेत्ररोगाय,
कृमिदष्टार्थनाशिनी.
अकृशा सुसमा, स्थूला सार्द्रा च सुफलाशिनी.   प्राणघ्नी त्वग्विवर्जिता.
प्रादेशान्नाधिका न्यूना समिध: सर्वकर्मणि.
अर्को नाशयति व्याधिं पलाश: सर्वकामद:.

खादिरश्चार्थलाभाय अपामार्गः सुदर्शनः.
अश्वत्थः सर्वकामाय सौभाग्याय उदुम्बरः
शमी शमयते पापं दूर्वा आयुष्यविवर्द्धिनी.
कुशा धर्मार्थकामानां रक्षणं रक्षसां विदुः
अष्टोत्तरंतु साहस्रं शतमष्टाधिकंतु वा
अष्टाविंशतिमष्टौ वा एकैकस्य तु होमयेत्.
व्याहृतिभिर्भूः स्वाहेत्यादिभिश्चतसृभिरष्टसंख्याक्रमेण जुहुयात्.
प्रयोगः सर्वः पूर्वोक्तवदेव. तत्रेदमुक्तम् —
अत्रापि लक्षहोमवदेव जपानं शीघ्रसमाप्तीच्छायां मुख्याद्धाधिका अपि होतारो वरणीयाः. गणेशमातृसह त्रयस्त्रिंशद्देवाः पूज्याः. ग्रहहोमः पूर्ववत्-व्याहृत्या हुतशेषस्तु कोटिमिता होतव्याः. दक्षिणा लक्षहोमाद्दशगुणा. सहस्रं धेनवः सहस्रं शय्या इत्यादि. ब्राह्मणभोजनमयुतहोमात्सहस्रगुणम्. अयुतेतु प्रतिदैवतं त्रयस्त्रय एकैको वा ब्राह्मणा भोज्या इत्युक्तम्.

~~हेमाद्रौ मात्स्यो~~क्त महाकोटिहोमोप्यत्र. स च पूर्वमुक्तः वत्सरसाध्यः ~~अन्यः~~ —

~~[illegible]~~रस्य त्युक्तमहाकोटिहोमोप्यत्रोक्तः. सोपि प्रायो मात्स्योक्तवदेव- लक्षहोमे- युग्माः सन्तः ऋत्विजः नित्यं व्रतिनः. कन्दमूलफलदधिक्षीराशिनः भूमिं खनित्वा रत्नानि धाय सिकताभिरापूर्य तत्र कुण्डेग्निं प्रणीय ग्रहलक्षणादीन्द्राद्यान् सम्पूज्य मात्स्योक्तमहालक्षहोमवन्मानस्तोकेत्यादिमन्त्रैस्तन्त्रसंख्यहोमः. अन्ते षोडशमहाजलैः पुष्पस्नानं. हस्त्यश्वरथयानभूमिवस्त्रालङ्कारशत दक्षिणादानमेकादश दशगतधेना दशधेनूर्दद्यात्.

+ एवं कृते च यत्किञ्चिद्ग्रहपीडासमुद्भवम्.
भौममाकाशजं वापि अन्यद्वा यदि जायते.
तत्सर्वं लक्षहोमेन प्रशमं यात्यसंशयम्.
शान्तिर्भवति पुष्टिश्च बलं तेजश्च वर्द्धते.
वृद्धिर्भवति राष्ट्रे च सर्वोपद्रवसंक्षयः.
+ कोटिहोमे - उक्तमा विद्वांसश्चत्विजो वरणीयाः.
अस्मात्(लक्षात्)शतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा
आहुतीभिः प्रयत्नेन दक्षिणाभिः फलेन च.
पूर्ववद्ग्रहदेवानामावाहनविसर्जने.
होममन्त्रास्त एवोक्ताः स्नानं दानं तथैव च. कुण्डं तु चतुरस्रम्.
अनेन विधिना यस्तु ग्रहपूजां समाचरेत्.
सर्वान्कामानवाप्नोति ततो विष्णुपरं व्रजेत्.
यः पठेच्छृणुयाद्वापि ग्रहमागमिमं बुधः.
सर्वपापविशुद्धात्मा पदमिन्द्रस्य गच्छति.
अश्वमेधसहस्राणि दश वाष्टौ च धर्मवित्.
कृत्वा यत्फलमाप्नोति कोटिहोमात्तदश्नुते.
ब्रह्महत्यासहस्राणि भ्रूणहत्यार्बुदानि च.
नश्यन्ति कोटिहोमेन स्वयम्भूवचनं यथा.
तस्मात्सदा भूपतयो विदध्युर्नृपैश्च प्रजाः सौख्यबलस्य वृद्धौ.
आयुष्यवृद्धौ विजयाय कीर्त्यै लक्षादिहोमं ग्रहयागमेनम्.

~~अनयोर्मात्स्योक्त~~ पराशरोक्तयोर्महाकोटिहोमयोः ~~[illegible]~~ साम्यं लक्ष्यते. परंतु पराशरोक्त कोटिहोमे वत्सरव्याप्तिता नोल्लिखिता.

सुवर्णतुलादिकं नास्ति.
गोशतस्थाने दशशतादिगोपक्षा अपि.

देवीपुराणोक्तो हेमाद्र्युक्तः गायत्र्यादिमन्त्रैः कोटिहोमः–
स च शान्तिसारोक्तः पूर्वमुक्तः
अन्यो नृसिंहपुराणोक्तो गायत्रीव्याहृतिकोटिहोमः
सोऽपि पूर्वमुक्तः
अन्यो भविष्योत्तरोक्तः कोटिहोमः सोऽपि पूर्वं बहुधा उक्तः,
तथा– शतमख– दशमख– द्विमखैकमखभेदा अपि पूर्वमुक्ताः
भविष्योत्तरीयाः
इत्येवं नानाकोटिहोमा अस्मिन् ग्रन्थे दर्शिताः—

कोटिहोमप्रसङ्गे पत्रे ४—
मण्डपमानमेव मूलवचनम्
तत्र सारसंग्रहोक्तो दशहस्तो मण्डपः कनिष्ठः, चतुर्दशषोडशहस्तौ मध्यमौ
अष्टादशकहस्तावुत्तमौ ४० हस्तो भूरिः, ४५ हस्तो भ्रमः, ५० हस्तो विपुलः
अन्येऽपि भविष्योत्तरोक्ताः १००, ५०, २५ हस्ता मण्डपाः
पत्रे ४५ कुण्डाशक्तौ स्थण्डिलं मेखलानाग भवति होमे समिदादीनां विकल्पः समुच्चयो वा
पत्रे ५ मन्त्रोदिष्टाहुती हुत्वा होमं व्याहृतिभिस्ततः अत्र व्याहृतिभिरिति द्वन्द्वापवादे
कशोभावगतसाहित्यबहुत्वयोः समादिपगतत्वात् सर्वव्याहृतिभिरेकाहुतिः
व्याहृतिहोमः प्रधानं समिदादिहोमो ग्रहाणां तेन ये ग्रहमन्त्रैरेवायुतलक्षादि
होममाहुस्तान्निर्मूलम् तद्विरोधात् नवग्रहमन्त्राणां विभागसद्भावा
च भविष्योत्तरेऽपि होमो व्याहृतिभिश्चैव सर्वस्तत्र विधीयते इति स्पष्टमभि
हितम्- हेमाद्रिनृसिंहपुराणयोरप्येवम् समिद्धोमे ग्रहमन्त्राः व्याहृतिभि

होमे तासामनेकदेवत्येऽपि मात्स्ये ग्रहयज्ञोपक्रमाद्ग्रहशान्तिप्रसङ्गेः
ग्रहयज्ञादिसुपसंहाराच्च ग्रहाणामेव प्रधानदेवतात्वम्
७२ पत्रे मात्स्ये प्रकारान्तरेण गायत्र्या दशसाहस्रं मानस्तोकेन षट्शतः इत्या
दिरूपः, देवीपुराणे- गायत्र्या ग्रहमन्त्रैश्च कूष्माण्डैर्जातवेदसेत्यादिरूपः
कोटिहोम उक्तः अत्र एतावत्प्रसङ्गेन प्रजानां हितकाम्ययेत्युपक्रमाद्रा
जकर्तव्यविषयः
पत्रे ८ भविष्योत्तरोक्ता शतमखादिकोटिहोमभेदाः

मृत्युञ्जयस्य कोटिजपः
दशांशेन पायसाज्यसम्मिश्रित श्रीवृक्षफलपत्र कमल
शतपत्र खर्जूर नारिकेलान्य यज्ञीयफलैः (२६) हवनम्

विधानमालायाम् प १९२ मृत्युञ्जयविधानम्

+ ग्रहपीडासु सर्वासु महारोगनिपीडने
वियोगे बान्धवानां च जनमारउपस्थिते
राज्यभङ्गे धनग्लानावपमृत्युविनाशने
अभियोगे समुत्पन्ने मनोधर्मविपर्यये
मृत्युञ्जयस्य देवस्य विधानं क्रियते बुधैः
यदा कदाचित्समये प्राप्ते चन्द्रबले शुभे
शुभे तिथौ शुभे वारे शुभनक्षत्रसंयुते
शुभे योगे शुभे लग्ने शुभग्रहसमीक्षिते
मृत्युञ्जयस्य देवस्य विधानं शुभमिष्यते
(मण्डिते शङ्कर द्वारि चिन्तिते ....)
पश्चिमद्वारमाश्रित्य शंभोरायतने महत्
दीपस्थानं सुसंशोध्य रत्नकम्बलसंयुते
ब्राह्मणान्वेदशास्त्रज्ञानाहूय गतमत्सरान्
स्वस्तिवाचनपूर्वं तु विधानं परमं भवेत्
प्रारब्धस्य च कार्यस्य सहस्रो जप उत्तमः
ऊनाधिकस्य कार्यान्य जपो हीनफलः स्मृतः
राष्ट्रभङ्गे जनक्लेशे महारोगनिपीडने
कोटिसंख्याजपः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः ....

शिवपूजनं न्यासः जपः अन्ते जपदशांशेन पायसाज्यसम्मिश्रित श्रीवृक्षफलपत्र कमल शतपत्र खर्जूर नारिकेलान्य यज्ञीयफलैः हवनं होमदशांश ब्राह्मणभोजनम् उपाध्यानागलाभत्र दर्शितम्

(२७)

+ एवं कृते विधाने च सर्वकामफलं लभेत्
चिन्तितार्थस्य सिद्धिः स्यान्नान्यकार्यविचारणा
आराध्य विधिवद्देवं मृत्युञ्जयमुमापतिम्
गतविघ्नो गतक्लेशः सततं सुखमाप्नुयात्

+ विधानपारिजाते ४ स्तबके प ४७ जातवेदसविधानम् —
जातवेदस इत्येतत्सूक्तं सर्वार्थसाधनम्
आयुरारोग्यसुखदं धनदं शत्रुनाशनम्
यद्यदाकृतिवान्विप्रस्तत्तदाप्नोति न संशयः
सूक्तेनानेन जुहुयाच्छुचौ देशे द्विजो वह्नौ
जपेद्वा नियतो मन्त्रं हविष्याशी जितेन्द्रियः   परन्त्वत्र कोटिहोमो विशेषेण नोल्लिखितः

शान्तिकमलाकरे – श्रीसूक्तविधाने –

श्रीसूक्तं योजपेद्भक्त्या तस्याऽलक्ष्मीविनश्यति।
गुडूच्याश्च धर्मज्ञो हविष्येण विशेषतः।
श्रीसूक्तेन तु पद्मानां घृताक्तानां नृपोत्तम।
अयुतं होमयेद्यस्तु वन्हौ भक्तिमतो नरः।
पद्महस्त स्वया लक्ष्मी र्नरं तमुपतिष्ठति।
दशायुतं तु पद्मानां गुडूच्याश्च तथाजले।
नापैति तत्कुलाल्लक्ष्मी विष्णोर्वक्षोगता यथा।
घृताक्तानांतु विल्वानां हुत्वा सम्यगयुतं तथा।
वहुवित्तमवाप्नोति स यावन्मनसेच्छति।
विल्वानां लक्षहोमेन कुले लक्ष्मीमुपाश्नुते।
पद्मानामथविल्वानां कोटिहोमं समाचरेत्।
श्रद्धानः समाप्नोति देवेन्द्रत्वमपि ध्रुवम्।
संपूज्य देवीं वरदां यथावत्पद्मैः सितैर्वा कुसुमैस्तथान्यैः।
क्षीरेण धूपैः परमान्नभक्ष्यैर्लक्ष्मीमवाप्नोति विधानतश्च।

शान्तिकमलाकरे – मृत्युञ्जयानुष्ठानप्रकरणे –

घृतमधुशर्करा
(१) मधुरत्रयसहित दूर्वाभिर्वा १००० वा १०००० होमेन दीर्घायुष्यम्.
गुडूचीखण्डैश्चतुरङ्गुलैः " " " "
मिश्रेण तिलतण्डुलैः " " " "
प्रक्षालितगोघृताप्लुततिलैः " " " "
पलाशसमिद्भिः " " " "
गोघृताक्तपायसेन " " " "
(२) " " उदकतर्पणेन "
(३) नित्यब्राह्मणभोजनसाहित्येन " " जपेन "

होमे कामनाविशेषेण द्रव्यविशेषाः –
घृतप्लुतैः अर्ककाष्ठैः, पयसा, आज्येन वा होमे आरोग्यम्
पलाशसमिद्भिः " सर्वरोगशान्तिरारोग्यम्;
पयोक्तै रच्छिद्राम्रपत्रैः, गुडूचीखण्डैः, घृतप्लुतवार्दैर्वा ज्वरनाशः
मधुना, पयसा, घृतेन, औदुम्बरसमिद्भिः, आमलकेन वा प्रमेहनाशः
शाल्मलिसमिद्भिः, कुलत्थैः, घृतेन वा गुल्मनाशः
वर्धमानसमिद्भिः सद्यः शूलनाशः
तैलाभ्यक्तैः करञ्जसमिद्भिः, निर्गुण्डीसमिद्भिर्वा – वातरोगशान्तिः
शमीसमिद्भिः – अतिसारनाशः। पलाशसमिद्भिः अक्षिरोगनाशः
चन्दनसमिद्भिः – अपस्मारनाशः। {कुबेराक्षैन्द्रवल्लीभ्यां – नेत्रशूलनाशः
मार्जितगुडूचीभिः – कामलानाशः। {तैलाभ्यक्तवल्कलखण्डैर्वा
मधुत्रयेण – राजयक्ष्मनाशः। मधुत्रयाक्तमसूरिकाभिः – कुष्ठनाशः;
फलपुष्पैः – गर्भरोगनाशः। घृताक्तैः कुमुदैः पलाशैर्वा
तैलाक्तगोरसर्षपैर्वा } ~~[illegible]~~

घृताक्ततिलैः — मुख-शिरोरोगनाशः । पयोक्तदूर्वाभिः, चरुणा, } [illegible]
बिल्वसमिद्भिः — सर्वरोगनाशः । एतैरश्वत्थसमिद्भिर्वा }
घृताक्तपद्मपत्रैः — अधःस्रावनाशः । गोघृतेन — रक्तातीसारनाशः
घृतमधुक्षीरमिश्रैः त्रिफलाभिः } कण्ठादिसर्वरोगनाशः । मधुत्रयेण — सर्वरोगशान्तिः

आयुर्वेदे यस्य रोगस्य यद्भेषजं तेन तेन होमे तत्तद्रोगनाशः ।
एतन्मन्त्रेण तीर्थजलेन देवाभिषेके — भूतज्वरग्रहादिशान्तिः ।
" " तर्पणे " " " "
नियतहोमे एतन्मन्त्रस्य जपेन, होमेन, तर्पणेन, वा त्रिकल्पना आत्मनः परस्यापि
गुरुलघुभावानुसारेण एक-त्रि-दश द्वादशदिन पक्ष मास मासद्वय मा
त्रय-मास-चतुष्क-षण्मास-वर्षपर्यन्तमनुष्ठानेन — तत्तद्व्याधिनाशः ।
रोगकालोपयुक्तद्रव्यादिकं रोगमुक्तेन नोपयोज्यम् ।
मधुत्रयप्लुतदूर्वाभिः, श्वेतार्ककुसुमैः, गोघृतेन, अपामार्गसमिद्भिः,
कृष्णतिलैः, यवैः, गोघृतेन, पयसा वा शत-सहस्र-युत होमेन —— अपमृत्युजयः ।
शनिवारे अश्वत्थं स्पृष्ट्वा एतज्जपेन साक्षान्मृत्योरपि निवर्तितुं प्रभवते
घृतेन वा पयसा, देवाभिषेकेन, पलाश खदिर अश्वत्थ बिल्वसमिद्धोमेन,
तैल चरु शत होमेन वा — मृत्युञ्जयः ।
अनेनैव प्रयोगा [illegible] ।

अद्भुतेषु च सर्वेषु दुःस्वप्नेषु द्विजोत्तम । दिव्यान्तरिक्षभौमानामद्भुतानां च दर्शने ।
ग्रहपीडासु भान्तेषु नानारूपेषु सर्वशः । भूतप्रेतपिशाचानामावेशे शाकिनीषु तथा ।
ग्रहसम्बन्धिजे वापि अपमृत्युभये महत् । तेनैव गुडपायसैर्मन्त्रेणानेन संयुतः ।
तिलौदनं वा गुडपायसं चौदनमथापि वा । अथो शतं भक्ती गुडपायसघृतेन वा ।
[illegible] न्यग्रोधसंभवैः । अपामार्गसमिद्भिर्वा गुडपायसधान्यतिलैः ।
अथवाऽनेन मन्त्रेण कोटिहोमं तु कारयेत् । गव्येन सर्पिषा चैव धान्यवक्षीरतिलैश्च वा ।
इत्यादि —— कामनाभेदेन नानाद्रव्यैर्होमः

[illegible] । गोदुग्धाज्यैः वह्निः
मधुघृत — [illegible] (तटैः [illegible])
घृतमधुगुडद्राक्षैः विद्या । घृताभ्यामेव पुत्रः
घृताक्ततिलैः धनाय । इत्यादि
पञ्चगव्यसमिद्भिः [illegible] ॥

~~सप्तशत्यष्टम~~ कोटिहोमप्रयोगे [redacted]
~~विशेषवक्तव्यानि कार्याणि~~

~~१पत्रे~~- शास्त्रोक्तेतिकर्तव्यतामात्रानुष्ठानेनापि सिद्धिः तथापि शिष्टसमाचारात्· सर्वपुराणोपसंहारस्य कर्तुमशक्यत्वाच्च· शक्तेन सविस्तरमन्यत्राम्नातमप्यनुष्ठेयम्· माल्पवित्त्वमन्यत्राम्नातं तु वैकल्पिकतयाऽलिख्यानुष्ठेयमिति केचित् ।

~~२पत्रे~~- अयुतहोमादौ शूद्रस्यानुपनीतानां नाधिकारः·

~~४पत्रे~~ पुण्येऽह्नीति सामान्योक्तावपि शुक्रास्ताधिमासादिनिषिद्धातिरिक्तो वैशाखादि शुभमासादिरूपः कालोऽत्र द्रष्टव्यः· देशस्तु नदीतीरगोष्ठादिरूपो मात्स्योक्तो ग्राह्यः·

~~८पत्रे~~ आदौ स्वस्तिवाचनं गणपतिपूजनं ततो मातृपूजापूर्वकं वृद्धिश्राद्धं कार्यम्·

७पत्रे शिरःस्नानं तु कुर्वीत दैवं पित्र्यमथापि वा· प्राङ्मुखोदङ्मुखो वापि श्मश्रुकर्म च कारयेत्· ततः प्रधान सङ्कल्पः ततो गणपतिपूजादिकं पूर्वोक्तं नान्दीश्राद्धं तदुत्तरं पुण्याहवाचनं ततो वरणं ततो मधुपर्कः ततो वस्त्रादिदानं· देवीपु- ~~लैङ्गे~~- वस्त्रयुग्मं तथापूरं केयूरं कर्णभूषणम्· अङ्गुलीभूषणं चैव मणिबन्धस्य भूषणम्· कण्ठाभरणयुक्तानि प्रारम्भे धर्मकर्मणः आचार्याय पुरोहिताय दत्वाथ ऋत्विग्भ्यश्चापि दापयेत्· द्विगुणं आचार्याय गुरवे दद्याद् दक्षिणादानादिकं प्रदेयम्·

~~१०पत्रे~~- दिक्साधनं कृत्वा गणेशं संपूज्य भूमिमावाह्यार्घ्यं दत्वा संपूज्य गणेशं भूमिं शेषवसुधाः संपूज्य वास्तुपूजनं कृत्वा मण्डपं कार्यम्·

~~११पत्रे~~- ८,[illegible],१४,१६,१८,२०,२४,२८,४०,४५,५०,१०० हस्ता मण्डपा इति बहवः पक्षाः· अत्र हस्तोक्तिताश्च सार्धमध्यमाः पञ्च हस्तोक्तिता द्वादशा मिता इति १६हस्तमिताः आग्नेयादिक्रमेण पञ्चमोत्तरं निखेयाः· दिक्षु द्वाराणि द्विहस्तानि कनिष्ठे, द्विहस्तचतुरङ्गुलानि मध्यमे, द्विहस्ताष्टाङ्गुलानि उत्तमे विस्तारतो भवन्ति·

गायत्री मृत्युञ्जयादि कोटिहोमे शैवमण्डपत्वेन तोरणोपरि त्रिशूलम्। इत्युक्तं च हस्तायतमग्निकुण्डं।
मूलध्वजे — गायत्र्या हंसः, मृत्युञ्जयस्य वृषः,

कलशादिभिश्छादनं। द्वारादिषु पूर्वादितः प्लक्षोदुम्बराश्वत्थवटतोरणानि। ~~२०पत्रे~~
अवटाः सप्तचः सार्द्धा दण्डाः प्रतितोरणे शुभाः। पञ्चहस्तप्रमाणास्ते विस्तारेण
मध्यमे षड्हस्ताः
द्विहस्तकाः षडङ्गुलानि वक्राग्र सप्तहस्तास्तथोत्तमे। दशाङ्गुलप्रमाणेन तत्परी
णाह ईरितः। तिर्यक्फलकमानं स्यात्तन्मानामर्द्धमानतः। फलके शैवे शूलं
तेषु मंत्रवादे
वैष्णवे शङ्खवादयः पूर्वादि क्रमेण। ग्रहमखे वै सर्वव्यवस्था ग्राह्या।
शारदायां दशहस्तं मन्यत्र सप्तहस्तमेत्यपूर्वमतम्:
~~२२पत्रे~~- कोटिहोमे मध्ये कुण्डं चतुर्हस्तं मष्टहस्तं षोडशहस्तं वेति पक्षत्रयम्।
~~२३पत्रे~~ कुण्डासंभवे स्थण्डिलं। स्थण्डिले मेखलादयो न। चतुरस्त्रमात्रं भवति।
~~२४पत्रे~~ ईशाने ग्रहवेदी। तत्र ~~स्त~~ त्रयं,
उदङ्मुखेन
~~२६पत्रे~~ पश्चिमद्वारेण मण्डपप्रवेशं कृत्वा वास्तुपूजनं नैऋत्यां स्थित्वा ऋत्विजां नियोगः
~~२८पत्रे~~ ~~मात्स्ये~~- पंचहस्ता ध्वजाः कार्या वैपुल्येन द्विहस्तकाः। सप्तहस्ताः पताकाः स्यु
विंशत्यङ्गुलसंमिताः। दशहस्ताः पताकानां दण्डाः पञ्चांशवेष्टिताः।
~~२९पत्रे~~ मण्डपपूजनं। कांस्येन लौकिकाग्निप्रणयनम्।
~~३०पत्रे~~- वेद्यां सर्वतोभद्रं विधाय तत्र ग्रहपूजनं ताम्रादिमयः प्रतिमाः धूपनैवेद्यादि
विशेषैः पूजा। शान्तिकलशपूजा।
~~३३पत्रे~~- होम्यद्रव्यत्यागः होमादौ ब्राह्मणैर्देयवचनं। पूर्वमेण पत्याहुतिः अत्र सर्पि
ग्रह समिधां उपकल्पेत इत्येक
रादीनां विकल्पः समुच्चयो वा। गुडौदनादि सूर्यादिभ्यो होतव्यं। मन्त्रो देश दशाहुति
होमं कृत्वा व्याहृतिभिः कोट्याद्याहुतयः। षडङ्गुलाः प्रादेशमात्रा वा कुर्वीत समिधा वा:
~~३४पत्रे~~- अत्र व्याहृतिभिरिति द्वन्द्वापवादैकशेषावगतसाहित्यबहुत्वयोरुपादेयगत
त्वात्सर्वव्याहृतिभिरेकाहुतिरित्येव प्रक्रमः। व्याहृतिहोमः प्रधानं समिद्धोमो ऽङ्गम्।

तेन ग्रहमन्त्रैरेवाज्यतादिहोमे ये आहुतानिर्मूलम्। एतद्विशेषानवग्रहमन्त्राणां विभा
गसमुच्चयात्मा होमो व्याहृतिभिश्चैव सर्वत्र विधीयते इति भाविधो नरोत्तमः।
समिदादिहोमसंख्यानतिरेकेण घृतादिसंख्या ग्राह्या। व्याहृतिभिर्होमे तासां
देवतानां कोऽपि उपक्रमोपसंहारयोर्ग्रहयज्ञपद्धतिदृष्टा एवप्रधानदेवताः।
~~३६पत्रे- गोभिलीये~~- नमुष्टके शोजुहुयात् ज्ञानि याति तजानुकः। अतिपातितजानोस्तु
राक्षसैर्ह्रियते हविः। उत्तानेनैव हस्तेन अङ्गुष्ठाग्रेण पीडितम्। संहताङ्गुलिपाणिस्तु
वाग्यतो जुहुयाद्धविः। होमसमये द्वारपालानां श्रीसूक्तादिजपः।
~~४१पत्रे~~- ~~अत्र च~~- यथात्ना भस्यितैर्विप्रैर्ग्रथितैर्विचक्षणैः। न संख्यातियमस्त्रा
त्रयाणाणानां नरोत्तम। नकालनियमश्चैव स्वेच्छया यज्ञ उच्यते।
कुण्डस्येशाने स्वस्तिकोपरि यजमानस्य
~~४८पत्रे~~ वसोर्धारा संतताज्यधारया पूर्णाहुतिः। सुरास्त्वामित्यादिभिरभिषेकः। ततः
श्रेयः सम्पादनं कृत्वा दक्षिणादानादि। तत ईशानदिग्गतभस्मधारणम्।
~~४९पत्रे~~ सूर्यादिउद्देशेन कपिलादि दक्षिणा। सर्वेषां गोसुवर्णादिवा,
~~५०पत्रे~~- गरुडपूजा धृतकुम्भवसुधारा च लक्षकोटिहोमयोः
~~५४पत्रे~~ राजकर्तृककोटिहोमो गायत्र्या दशसाहस्रं मानस्तोकेन षट्सहस्रमित्यादिमन्त्र
समुच्चयेनापि इति भविष्योत्तरे। देवीपुराणे गायत्री ग्रहमन्त्र त्र्यम्बकादीनामन्यतमे
नापीति। कोटिहोमेषु पूर्वस्यां प्रधानदेवतावेदी।
~~५५पत्रे~~ कोटिहोमे पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपारगम्। वस्त्रैश्च भूषणैश्चैव ग
न्धमाल्यानुलेपनैः पूजयित्वा यथान्यायमात्मानं विनिवेदयेत्। स्थालेन च ८, २०,
२४, ३२, ६४, १०० वा होमकाले द्वारपालैः रात्रिसूक्तादेरपि पाठः।

७७ पत्रे पूर्णे पूर्णे सहस्रेतु दद्यात्पूर्णाहुतिं शुभाम्. पूर्णाहुत्यः कोटिहोमे १००० अन्ते पूर्णाहुतिर्भिन्ना. दक्षिणा सहस्रं धेनवः सहस्रं शरवाः. सर्वेषामथवा गावः स्वर्णः

७८ पत्रे- वाजकुले कुण्डशतं कृत्वा प्रतिकुण्डं दश दश विप्राः यावन्तः १००० प्रतिकुण्डं लक्षहोमः. सहस्रमृत्विज एव आचार्य एक एव. स्वामुखे दश कुण्डानि कृत्वा प्रतिकुण्डं विंशति विंशतिः ऋत्विजः यावन्तः २०० प्रतिकुण्डं दशलक्षहोमः.

द्विमुखे कुण्डद्वयं कृत्वा प्रतिकुण्डं पञ्चाशत्पञ्चाशदृत्विजः यावन्तः १०० प्रतिकुण्डं पञ्चाशल्लक्षहोमः. एकमुखे एककुण्डं स्वेच्छया शतपर्यन्ता ऋत्विजः. स्वेच्छया कालः.

८० पत्रे समाप्तौ शरिव तूर्यादिमहोत्सवः कर्तव्यः. एते चतुर्विधा अपि कोटिहोमाः राजादिकर्तव्याः. ग्रामगजरथाश्वानामाचार्याय दानविधेः इति कोटिहोमः. शीघ्रात्तु फलवाक्ये मनुजा इति सामान्योक्तेः राजातिरिक्तस्यापि बहुधनस्याधिकारः इत्यादि.

८० पत्रे स्थानलेपकल्पे बहिः पञ्च हस्ता स्तम्भा मध्ये स्तम्भचतुष्टयमष्टहस्तं दशहस्तं वा दत्वा मध्ये दशद्वादशहस्तोपरि मध्यस्तम्भ समान्स्तम्भान्दत्वा उपरि तिर्यक्काष्ठानि दद्यात्. सर्वमध्यं स्तम्भचतुष्कोपरि किञ्चिदुच्चीकुर्यात्. अस्याऽऽशास्त्रीयत्वेपि सौकर्यार्थत्वात्. ततः कटैश्छादयेत्.

इत्यलौकिकतिरेवोक्ति.

एतदुपयोगीनि प्रकीर्णवचनानि

शान्तिमयूखे पत्र —

पुण्याहवाचनविधिं वक्ष्यामोऽथ यथाविधि.
प्रयोक्तुः कर्मणामादावन्ते चोदयसिद्धये . . .

शान्तिमयूखे लैङ्गे- वस्त्रयुग्मं तथाप्यूरं केयूरं कर्णभूषणम्.
अङ्गुलीभूषणं चैव मणिबन्धस्य भूषणम्.
कण्ठाभरणयुक्तानि प्रारम्भे धर्मकर्मणः
पुरोहिताय दत्वाथ ऋत्विग्भ्यश्चापि दापयेत्.

रत्नाकरे- शुभं पात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः
तस्याभावे शरावेण नवेनाभिमुखं च तम्.
लक्षहोमे च वह्निः स्यात्कोटिहोमे हुताशनः

गोभिलीये- नमुक्तकेशो जुहुयान्नानिपातितजानुकः.
उत्तानेनैव हस्तेन अङ्गुष्ठाग्रेण पीडितम्.
संहताङ्गुलिपाणिस्तु वाग्यतो जुहुयाद्धविः.

कर्मप्रदीपे- ईशान्या माहरेद्भस्म स्रुचा वाथ स्रुवेण वा.
वदनं कारयेत्तेन शिरः कण्ठं सकेशं च.

देववेदी- तस्योत्तरपूर्वेण वितस्ति त्रयसंमितम्.
प्रागुदक्प्रवणं तद्वच्चतुरस्रं समन्ततः
विष्कम्भाद्द्विगुणं प्रोक्तं वप्रद्वयमथोपरि.
अङ्गुलोन्नतविस्तारः सर्वेषां कथितो बुधैः
दशाङ्गुलोच्छ्रिताभित्तिः स्थण्डिलं स्यात्तथोपरि. तत्र देवावाहनम्.

वेदिकव कोटिहोमे स्याद्वितस्तीनां चतुष्टयम्.
चतुरस्रासमन्ताच्च त्रिभिर्वप्रैः समावृता.
वप्रप्रमाणं पूर्वोक्तं वेदिकायास्तथोच्छ्रयः.

अग्निविभागः- कुण्डस्य पूर्वदिग्भागे कालीजिह्वा प्रकीर्तिता.
आग्नेय्यां तु करालीस्याद्दक्षिणे तु सुलोहिता.
मनोजवा तु नैरृत्यां धूम्रवर्णा तु वारुणे.
स्फुलिङ्गिनी तु वायव्यां सौम्ये विश्वरुचि स्तथा.
काल्यां करालयां वा कुर्याच्छान्तिकं पौष्टिकं तथा.
भूतप्रेतपिशाचादिशान्तेर्लोहितजिह्वया.
मनोजवायां जिह्वायामभिचारो विधीयते.
जुहुया धूम्रवर्णायां वश्यकामो यदा भवेत्.
स्फुलिङ्गिनी तु या जिह्वा तस्यामुच्चाटनं विदुः
या तु विश्वरुचिर्जिह्वा कुण्डस्योत्तरभागतः
सर्वार्थसाधिका सेति प्रोच्यते मन्त्रवित्तमैः
---- सुधावेति जिह्वां पूर्वोत्तरे विदुः
कुण्डे तु मध्यमे भागमग्ने रास्यं प्रचक्षते.
तस्मिन्सर्वाणि कार्याणि कारयेन्मारणं विना.
औपासनाग्निमानीय तस्मिन्कुण्डे विनिक्षिपेत्.
अथवा श्रोत्रियागारान्मथितव्यं समानयेत्.
विधाने- अथाग्निकार्यं वक्ष्यामि कुण्डे वा स्थण्डिलेऽपि वा.
स्थण्डिलं वालुकाभिर्वा रत्निम द्वजसापि वा.

ऋत्विग्होमे ऋत्विजः- विद्यावृद्धान्वयोवृद्धान्गृहस्थान्संयतेन्द्रियान्.
स्वकर्मनिरतान् शुद्धान् दानशीलान्प्रयत्नतः.
नियोजयेद्द्विजाँस्तत्र शतसंख्यान्तपोत्तम.
अलाभे तु बहूनां च यथालाभं नियोजयेत्.
अन्यत्र- षोडश ब्राह्मणाञ्छुद्धान्दम्भानृतविवर्जितान्.
तेषां मध्ये श्रेष्ठतम माचार्यं तं प्रकल्पयेत्.
अग्निमुखम्: उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुङ्गवाः (होमं)
सम्प्रदायाम्: नित्यनैमित्तिकं होमं स्थण्डिले वा समाचरेत्.
अङ्गुष्ठोत्सेधसंयुक्तं चतुरस्रं समन्ततः.
चन्द्रपीठे- ताम्रभाण्डेषु धान्यादेः नीरक्तं चतुरस्रं च वितस्त्युच्छ्राय संमितम्.
सिकताभिर्विधातव्यं स्थण्डिलं होमकर्मणि
संस्काररत्नमालायाम्: जपहोमादिषु नरमन्यं नाकारणात्स्पृशेत्.
अबुद्धिपूर्वसंस्पर्शेत्वेनाप्तवार्युपस्पृशेत्.
बुद्धिपूर्वकसंस्पर्शे प्राणायामत्रयं चरेत्.
कर्मान्यथा कृतं यावत्तावदेव पुनश्चरेत्.
प्रधानस्याक्रियायां तु साङ्गं तत्पुनराचरेत्.
हवनं भोजनं दानं श्राद्धं देवार्चनादि च.
वहिर्जानु न कार्यं स्यात्तथाचमनं स्मृतम्.
बहुधूमेऽन्धने चाग्नौ सुसमिद्धे विधूमके
साङ्गारे लेलिहाने च होतव्यं नान्यथा क्वचित्

पत्नी. सर्वेषु धर्मकार्येषु पत्नी दक्षिणतो भवेत्.
अभिषेके विप्रपादक्षालने वामतः स्मृता.

प्राणतोषिण्यां मत्स्यसूक्ते. आहुतिस्तु घृतादीनां दैवेनोत्तानपाणिना.
हवनम् समिद्धोमश्च तिलयत्नो दक्षाद्याहुतिस्तथा.
अङ्कुशादित्रिमुद्रैर्विल्वपत्र इति क्रमात्.
अङ्गुलेषु तु सर्वेषु उत्तराभिमुखो भवेत्.
हविषः प्राशनं कुर्यादन्यत्र पूर्वदिग्भवेत्.
यजमानः स्वयं नैव सन्निधं प्रवयेत्क्वचित्.
पुत्रशिष्यादिभिः कुर्यात्तपुत्रं विनियोजयेत्.
उत्थाय दद्यात्पूर्णाश्च नोपविश्य कदाचन.
कर्षैकं घृतहोमे च द्वितोलं च पयः स्मृतम्.
वार्णं तोलं पञ्चगव्यं तौलकैर्मधुदुग्धकम्.
दधिप्रसृतिमात्रं तु लाजास्तु मुष्टिसंमिताः.
सक्तवो मुष्टिमात्रेण शर्करा तोलकार्धकम्.
त्रितोलं च गुडं विद्यात् इक्षुः पर्वावधिः स्मृतः.
मोदकं धात्रीमानं च भागं वदाम्यानतः.
पिण्डकल्प यथामानं नारिकेलादि पर्वकम्.
तालं च वाकुलं चैव पनसं बीजसंख्यया.
(शाणेः आटो चैव पनसं दशधा कृतम्.)

स्रुव:- खादिरादेः स्रुवः कार्यो हस्तमात्रप्रमाणतः।
अङ्गुष्ठ पर्वखातं तन्निम्नाग्रं दीर्घपुष्करम्।
स्रुक्- षट्त्रिंशाङ्गुलां स्रुचं कारयेत् खादिरादिभिः।
कण्ठे गोपदाकारं पुष्करं तद्वपेद्वहि॥
पुष्कराग्र षडंशं तु खातं ह्यङ्गुलविस्तृतम्।
अङ्गुष्ठकस्थूलतरं दण्डे तस्य च कङ्कणम्।
चमस (प्रणीतापात्र) प्रणीता त्रिभिर्वारणं द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तृतं चतुरङ्गु २०
वारुणं पात्रविमात्रे चन्द्रादशाङ्गुलविस्तृतम्।
पद्मपत्राकृति वाथ प्रोक्षणीपात्र संस्थितिः।

अग्निपूजा बहिः प्रोक्ता तिवच्च नाल बहिरेव सर्वपूजनानि तेकोन्वेत्
वेष्टनधर्मोक्ते- मध्ये पिगधजुष्यादेधा दन्तेर्न संशय:।
शालोत्तराके- वाद्येनैवेध मात्रेणु यानव्याप्नोति निश्चय:

वेषरल्लु पञ्चविंशतिमिते देशैर्धोपृखाग्रैर्वामावर्तेन यथा वेणीभवति तथा [illegible]
गुम्फितो ग्रन्थितो विष्टर सम्पद्यते तत्त्वा [illegible]।

प्रक्रा- पञ्चाशद्भिः कुशैर्दक्षिणावर्तेन वेणीरूपः [illegible]:

गन्ताधिपतये ह्यग्रा स्थावरतेन्यरा ज्ञातेम्।
अन्यथा सिफताविषप्रभव नाहितसंशय:।

कोटिहोमे- प्रयाण्या पञ्च संख्याकुशाः
अभिषेकमन्त्राः संस्कारभास्करीये.
पूर्णाहुतौ: सप्तते अन्न वाक्याले-
[illegible] वैश्वानरं सौभाग्यदम्।
मृडा वैश्वानरं वात्वे यत्रकानि मतः [illegible]।
समाप्तौ तु [illegible]।
[illegible] ज्ञातेषाडश [illegible], [illegible]
[illegible] (आपद्यापि [illegible]
[illegible]

कर्मारम्भे गायत्रीजपः -

वाणीविलासीयपुरश्चरणपद्धतौ –

प्रारम्भपूर्वतृतीयदिने क्षौरकरणं, काले सामर्थ्ये च सति प्रायश्चित्तमपि कार्यं, तत्रायुत संख्यया गायत्रीं तद्देव गायत्रीं वा अशक्तौ एकसहस्रं वा जपेत्।

देवीभागवते –

आदौ मन्त्री व्रतं कुर्याद्देहशोधनकारकम् ।पुरश्चर्यां ततः कुर्यात्समस्तफलभाग्भवेत्।
यस्य कस्यापि मन्त्रस्य पुरश्चरणमारभेत्। व्याहृतित्रयसंयुक्तां गायत्रीं चायुतं जपेत्।

यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः। पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत्।
अकृत्वा मातृकां यागं पैतृकं यः समाचरेत्। तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः।
कोटिहोमपद्धतौ – प१९

१९ मण्डपे प्रवेशानन्तरं वास्तुपूजनमिति साम्प्रदायिकाः। यद्यपि चानेकप्रकारो वास्तु
स्तथापि अत्र वास्तु षष्ठिपद एव.

वास्तुमण्डलं च – नव दक्षिणोत्तरायता रेखाः कृत्वा मध्यकोष्ठचतुष्टयमेकीकृत्य
कोणेषु रेखा दद्यात्तेनार्द्धपदानि संपद्यन्ते।|वास्तोश्चतुरस्रं शरीरमाक्रम्य देवाः स्थिताः।)
लेखनम् –